कादशी महाब्रह्मन् उपवासः कथं भवेत्[६८] इत्युपक्रम्य शुद्धैव द्वादशी ब्रह्मन् उपोष्या मोक्षकांक्षिभिः दशम्येकादशीमिश्रा कर्त
व्या न कदाचनेति[६९] वचनान्मोक्षकामिनां चतुर्थाश्रमिणां द्वादश्युपवासविध्यधिकारसंबंधत्वावगमात् न गृहस्थादीनां द्वादश्युप
वासो विकल्पो वा भवितुमर्हति क्वचिदनयोर्भेदयोर्गृहस्थैर्दशमीविद्धा ग्राह्या यतिभिश्च द्वादशी ग्राह्येति व्यवस्था कृता
सापि यदा तु शुद्धा द्वादशी त्रयोदश्यां नास्ति तदा दशमीविद्धैकादश्यामुपवासः यथोक्तं एकादशी दशाविद्धा परतोपि न वर्द्धते
गृहिभिर्यतिभिश्चैव सैवोपोष्या सदा तिथिः[७०] इत्यनंतभट्टोदाहृतिर्निराकृता तथा विद्धाप्येकादशी ग्राह्या परतो द्वादशी न
चेत् द्वादशी द्वादशीदिनि त्रयोदश्यां तु पारणमिति[७१] इयिकाः कलाया अप्यभावेनोपोष्येति रहस्यं पंचमचतुर्थौ विद्धस
म एकादशी सम द्वादशी यत्र तथा विद्धसम एकादशी न्यूना द्वादशी चतुर्थपंचमभेदयोः पूर्वविद्धोपोष्या गृहिभिः पूर्वा यति
भिः उत्तरेति विश्वरूपः अथ यदा दशमीविद्धा एकादशी द्वादश्यां च किंचन्मात्रा विद्यते द्वादशी च वृद्धा त्रयोदश्यामस्ति तदा द्वितीया

41
1962

येकादश्यामुपवासः॥तदुक्तंब्रह्मवैवर्त्ते॥दशमीशेषसंयुक्तांयःकरोतिविमूढधीः॥एकादशीफलंतस्यनस्याद्द्वादशवार्षिकं॥७२॥तथा
॥एकादशीदशम्यातुसंभग्नाचतथाष्टमी॥पंचम्यांचतथाषष्ठीत्रयोदश्याचतुर्दशी॥७३॥आसुक्रियांनकुर्वीतपूर्वविद्धासुमानव
इतिवचनेभ्योदशमीविद्धैकादश्यामुपवासनिषेधावगमात्॥विष्णुधर्मोत्तरे॥एकादशीतथाषष्ठीअमावास्याचतुर्थिका॥उ
पोष्याःपरसंयुक्ताःपराःपूर्वेणसंयुता॥७४॥इतिपरविद्धाविधानात्॥तथा॥द्वादशीमिश्रिताकार्यासर्वत्रैकादशीतिथिः॥द्वाद
शीचत्रयोदश्यांविद्यतेयदिवानवेति॥नवेत्यादयिकाएकादशीसद्भावेपरोपोष्येतिसिद्धांतः॥इतिनवमोभेदोग्रंथेस्मिन्कृतीयः॥
विद्धाधिकैकादशी॥अधिकाद्वादशी॥अस्मिन्भेदेद्वितीयासर्वैरितिविश्वरूपः॥अथदशमीविद्धैकादशीद्वादश्यांचकियन्मा
त्राविद्यते॥द्वादशीचत्रयोदश्यांनास्ति॥तदापिपारणार्द्द्वादश्यभावेपिद्वितीयैकादश्यामुपवासःकार्य्यः॥उदयादूर्द्ध्वमपि
एकादशीसद्भावात्॥ननुकलाकाष्टामुहूर्त्तवायदिनस्यात्परेदिनि॥द्वादशद्वादशीर्द्दनित्रयोदश्यांतुपारणमिति॥तथा॥एका
दशीमुपोष्येवद्वादश्यांपारणंस्मृतं॥त्रयोदश्यांनकुर्वीतद्वादशद्वादशीक्षयात्॥इत्यादिविद्धाधिकैकादशीसमद्वादशी॥म
त्स्यकूर्मादिपुराणवाक्यैःत्रयोदश्यांपारणप्रतिषेधात्कथंस्यामुपवासः॥उच्यते॥दशम्यनुगतायत्रतिथिरेकादशीभवे

त्॥तत्रापत्यविनाशंचपरेत्यनरकंव्रजेत्॥७५॥तथा॥दशमीशेषसंयुक्तागांधार्यासमुपोषिता॥तस्याःपुत्रशतंनष्टंतस्मात्तां
परिवर्जयेत्॥७६॥इत्यादिनारदविष्णुरहस्यादिवाक्यैर्दशमीविद्धाप्रतिषेधादवश्यंभावि—न्यतरप्रतिषेधेत्रयोदश्यांपारण
प्रतिपादकवचनानांसद्भावादुपवासेदशमीविद्धैकादशीप्रतिषिध्यते॥तथाचोक्तं॥एकादशीमुपोष्येतद्वादशीमथवापुनः
॥विमिश्रांवापिकुर्वीतनदशम्यायुतांक्वचित्॥७७॥विमिश्रांद्वादश्यामिश्रितां॥द्वादश्यभावेत्रयोदश्यांपारणंप्रशस्तं॥वायुपुराणे
॥कलाप्येकादशीयत्रपरतोद्वादशीनचेत्॥तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणं॥७८॥स्मृतिरपि॥सर्वत्रैकादशीकार्याद्वादशीमिश्रि
तानरैः॥प्रातर्भवतुवामाभूद्यतोनित्यमुपोषणं॥७९॥प्रातःपारणेद्वादशीभवतुवामाभवतु॥विद्यमानांद्वादशीमतिक्रम्यपारणंनक
र्त्तव्यमितिरहस्यं॥इत्यष्टमः॥अथसप्तमः॥यदादशमीविद्धैकादशीद्वादश्यांचकियन्मात्राविद्यतेरात्रिशेषेत्रयोदशीतदाप्युत्तरदि
नेप्रवृत्तत्वाद्द्वादशीयुतोपोष्या॥तदुक्तं॥द्वादशीसंगतायत्रभवत्येकादशीकला॥दिनक्षयेपिसापुण्यानदशम्याकथंचन॥८०
॥तथा॥त्रिस्पृगेकादशीयत्रतत्रसन्निहितोहरिः॥तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणं॥८१॥अतोद्वितीयदिनेउपवासः॥
ननुएकादशीद्वादशीचरात्रिशेषेत्रयोदशी॥उपवासंनकुर्वीतपुत्रपौत्रसमन्वितः॥इतिमत्स्यपुराणदर्शनात्कात्यादेःसाद्वयी

48
1762

दिनक्षयनिमित्तोपवासो गृहिणां निषिध्यते॥ न नित्यैकादशीनिमित्तमिति कूर्मपुराणादिषु त्रिस्पृशायां फलाधिक्यमभिहितमिति॥ यत्तु
॥ एकादश्यां यदा विद्धा द्वादशी च क्षयं गता॥ क्षीणा सा द्वादशी ज्ञेया नक्तं तत्र विधीयत इति नक्तविधिवचनं॥ तदुपवासासमर्थं प्रति वेदित
व्यं॥ तथा॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन दानेन नैवाद्वादशिको भवेत्॥८२॥ इति विद्धाधिकैकादशी ऊनद्वादशी॥ अथ
प्रथमद्वितीयतृतीयभेदाः॥ यदा दशमीविद्धैकादशी रात्रिशेषे च द्वादशी ऊनेत्यर्थ इत्येकः॥ उदयपर्यन्ता द्वादशी समेत्यर्थ इति द्विती
यः॥ त्रयोदश्यां द्वादशी कियन्मात्रा विद्यते अधिकेत्यर्थः॥ द्वादश्यूना वा॥ तदा दिनक्षयत्वात्सर्वेषामेव दशमीविद्धैकादश्युपवासः॥
तदुक्तं पुराणे॥ एकादशी दशायुक्ता परतोपि न वर्द्धते॥ यतिभिर्गृहिभिश्चैव सैवोपोष्या क्षये तिथिः॥८३॥ दिनक्षयस्पृते देवि नोपो
ष्या दशमीयुतेति॥ त्रिस्पृगेकादशी यत्र तत्र संनिहितो हरिः॥ तामेवोपवसेत्कामी अकामो विष्णुतत्परः॥८४॥ इति दशमीद्वादशीच
या स्पृशति सा त्रिस्पृगित्यनंतभट्टः॥ किंच॥ उदयानंतरउपवासयोग्यस्य कालस्य तत्रैकादश्यभावात्॥ उदयात्प्रागपि द्वादश्यैकादशी
संगतत्वेन गत्यंतराभावाद्दशमीविद्धा ग्राह्या॥ तथा॥ एकादशी न लभ्येत सकला द्वादशी भवेत्॥ उपोष्या दशमीविद्धा ऋषिरुद्दालकोऽब्रवीत्॥
८५॥ तथा॥ यदि देवात्सु संसिध्येदेकादश्यां तिथित्रयं॥ तत्र क्रतुशतं पुण्यं द्वादश्यां पारणे भवेत्॥८६॥ अत्र द्वादशीवृद्धिभेदेपि दशमी

विद्धोपोष्या॥ तदुक्तं निगमे॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धा तु कर्तव्या यदि न स्यात्परेऽहनि॥८७॥ इति ननु॥ अविद्धानामला
भे तु पयो दधि फलानि वा॥ सकृद्वाल्पमश्नीयादुपवासो भवेदिति वचने सति कथं विद्धायामुपवास इति चेन्मैवं॥ क्षीरादिभक्षणमेकादशीव्यति
रिक्तविषयं॥ एकादश्यां विद्धायामप्युपवासविधानात्॥ यदुक्तं॥ विद्धोन॥ एकादशी ऊनद्वादशी॥ विद्धोन एकादशी समद्वादशी विद्धो
न एकादशी अधिकद्वादशी॥ अविद्धानि निषिद्धे च न लभ्यंते दिनानि तु॥ मुहूर्तैः पंचभिर्विद्धा ग्राह्या चैकादशी तिथिः॥८८॥ तदर्द्धविद्धान्यन्या
नि दिनान्युपवसेद्बुधः॥ पूर्वविद्धा न कर्तव्या षष्ठ्येकादश्यथाष्टमी॥८९॥ एकादशी तु कुर्वीत क्षीयते परतो यदि॥ भेदत्रयं॥ अथ षष्ठो
भेदः॥ यदा दशमीविद्धैकादशी द्वादश्यां च न विद्यते॥ द्वादशी च त्रयोदश्यां कियन्मात्रा विद्यते॥ तदायं तु यतिविषये वक्ष्यमाणत्रु
द्धद्वादश्याभिधानवचनदर्शनेन गृहिभिः पूर्वविद्धोपोष्या परत्रोदयानंतरं कलार्द्धस्याप्यभावात्॥ एकादशी न लभ्येत सकला द्वाद
शी भवेत्॥ उपोष्या दशमीविद्धा ऋषिरुद्दालकोऽब्रवीत्॥९०॥ निगमः॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धा प्रकर्त
व्या यदि न स्यात्परेऽहनि॥ अत एव॥ दशम्यां यस्तु विद्धायामेकादश्यामुपोषितः॥ तस्यायुः क्षीयते सत्यं नारदोयं ब्रवीत्यहं॥९१॥ इत्यादि
दशमीविद्धानिषेधवाक्यानि द्वितीयदिने कलार्द्धरूपाया अप्येकादश्याः सद्भावे वेदितव्यानि॥ यतिविषये तु॥ दशमीगर्भिता पूर्वा लुप्ये
45

निकादशीपरा॥उपोष्याद्वादशीतत्रनदशम्याःकथंचन॥९४॥कलाईनापिविद्धास्याद्दशम्यैकादशीयदा॥तदाह्येकादशींत्यक्त्वाद्वादशीस

मुपोषयेत्॥९५॥इत्यादिवाक्यानांशेषत्वेनाग्रेशुद्धैवद्वादशीराजकुपोष्यामोरुकांक्षिभिरितिश्रवणादकाधिकरणन्यायेनमोक्षकामिनां

यतीनांशुद्धद्वादश्यामेवोपवासः॥अतोविद्धाप्यविद्धानिशेषापरतोद्वादशीनचेत्॥अविद्धापितयाविद्धापरतोद्वादशीयदि॥इत्ये

तदपिद्वादशीवृद्धौयतिविधवादिविषयेचरितार्थमिति॥तस्मादत्रोक्तव्यवस्थयागृहिभिर्यतिभिश्चायंषष्ठोभेदउपावस्तव्यः॥ ॥

[illegible] इतिविद्धापानवभेदाः॥ ॥उन्मीलिनिवंजुलीप्रभृतयोद्वादश्युपवासाननित्यैकादश्यूपवासाः॥ ॥इत्येकादशीनिर्णयः॥ ॥

[illegible] ॥अथद्वादशीपारणानिर्णयःप्रस्तूयते॥ ॥अज्ञानतिमिरेत्युक्त्वासमाप्योपोषणंहरेः॥द्वादश्यांपारणंकुर्यान्नित्येकाम्येप्युपो

[illegible] षिते॥मंत्रः॥अज्ञानतिमिरांधस्यव्रतेनानेनकेशव॥प्रसादसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव॥९८॥ ॥कात्यायनः॥ ॥मंत्रंजपि

[illegible] त्वाहरयेनिवेद्यापोषणाव्रतं॥द्वादश्यांपारणंकुर्याद्वर्जयित्वाल्पोदकी॥अपोदकीशाकविशेषः॥विष्णुधर्म्मे॥द्वादश्याःप्रथमःपादोहरि

[illegible] वासरसंज्ञितः॥तमतिक्रम्यकुर्वीतपारणंविष्णुतत्परः॥९५॥आद्याःपंचदशनाडिकाःप्रथमःपादः॥कूर्मपुराणे॥एकादश्यामुपोष्यैव

द्वादश्यांपारणंस्मृतं॥त्रयोदश्यांनतत्कुर्याद्द्वादशद्वादशीःस्यात् ॥९६॥ - - रदस्थे॥पारणंतुनकर्त्तव्यमुपोष्यैकादशीमिह॥त्रयोदश्यांन

अथप्रनाकीनुस एकादश्याव्रतं ९७ अथत्यक्तशु श्यांनिर्जलैकादश तद्विधिश्च ९७८ अस्यांमद्र लदानंउक्तं ९७९ आषाढशु वायन्येकादश ९७ नयचातुर्मा ९७८ अथआष कादश्यादिगोप

रैर्गातुनित्यंधर्म्मममीप्सुभिः॥स्मृत्यंतरे॥दशम्यनुगतादंतिद्वादशाद्वादशीफलं॥धर्मापत्यंतथायूंषित्रयोदश्यांतुपारणमिति॥९६॥

त्रयोदशीपारणनिषेधादितिचेत्॥उच्यते॥त्रयोदशीपारणनिषेधवचनानिसामान्यशास्त्राणि॥त्रयोदशीपारणविधिभिर्विशेषवि

षयैर्बाध्यंते॥यथाअग्निषोमीयपशुहिंसाविधिनैवसामान्यहिंसानिषेधशास्त्रं॥यदातुपारणाहेद्वादशीविद्यतेतदैकादश्युपवासि

नांद्वादश्यतिक्रमेदोषः॥तदुक्तं॥यदिकिंचित्त्रयोदश्यांद्वादशीचोपलभ्यते॥द्वादश्यांपारणंतत्रवर्जयित्वात्रयोदशीं॥९७॥महाहा

निकरीह्येषाद्वादशीलंघितानरैः॥करोतिधर्म्महरणमस्नातेवसरस्वति॥९८॥यथासरस्वतीअस्नानात्लंघिताधर्म्महरणंकरोति

एवंपारणेद्वादशीअतिक्रमताच॥एकादश्यामुपोष्यैवद्वादश्यांपारणंस्मृतमितिवचनात्॥स्कंदपुराणे॥यदाभवेदतिस्वल्पाद्वा

दशीपारणादिने॥उषःकालेद्वयंकुर्यात्प्रातर्मध्याह्निकंतदा॥इतिवचनात्॥स्वल्पद्वादश्यांअल्पपकर्षेप्रातर्मध्याह्निकयोःकर्मणो

रपकर्षस्तदंतन्यायेन॥यथातिष्ठंतंपशुंप्रजैयेतीत्यनेनप्राप्तापकर्षवत्॥तदुक्तंगरुडपुराणे॥यदात्वल्पाद्वादशीस्यादपकर्षोभवेत्तदा

त्॥प्रातर्मध्याह्निकस्यापितत्रस्यादपकर्षणं॥९९॥एतदपिस्मृत्यंतरे॥एतस्मात्कारणाद्विप्राःप्रत्यूषेस्नानमाचरेत्॥पितृतर्पणसंयुक्त

मल्पाचेद्द्वादशीभवेत्॥१००॥अल्पायामथविप्रेंद्राद्वादश्यामरुणोदये॥स्नानार्चनक्रियाकार्याजपहोमादिसंयुता॥१०१॥यदात्व

47/1962

तीयात्स्याद्द्वादशीनदातामितिक्रमेत्॥ उक्तंच॥ कलाद्वयंत्रयंवापिद्वादश्याःसमतिक्रमेत्॥ एकादशीमुपोषित्वानत्रधर्मफलंव्रजेत्॥१०२
प्राप्नुयादित्यर्थः॥ स्वल्पद्वादश्यांपारणासंभवकालेवाअद्भिःपारणंकृत्वानित्यकर्मकुर्यात्॥ तदुक्तं॥ ॥कात्यायनेन॥ ॥संध्यादिकं
भवेन्नित्यंपारणंतुनिमित्ततः॥ अद्भिस्तुपारयित्वाथनैत्यिकांतेभुक्तिर्भवेत्॥१०३॥ संकटेविषमेप्राप्तेद्वादश्यांपारयेत्कथं॥ अद्भिस्तुपा
रणंकुर्यात्पुनर्भुक्तंनदोषकृत्॥१०४॥ इति॥ इदमत्रसूचितंभवति॥ एकस्यकर्तुरेकस्मिन्दिनेभोजनेउपवासेकर्तव्येभुजिकार्येप्राप्नो
ति॥ तेनाशितमनशितंचभवति॥ उदकविधानाद्भुक्तिक्रियाकार्यसिद्धिरुपवाससिद्धिश्चेति॥ तथात्राद्भिःपारणेभुजिक्रियासिद्धिर्नित्य
कर्मानुष्ठानार्थमशनसिद्धिश्चेतिवेदितव्यं॥ अथस्वतंत्रद्वादशीव्रतोपवासिनांसत्यामपिद्वादश्यांतामतिक्रम्यत्रयोदश्यांपारणं॥
तिथिनक्षत्रनियमेतिथिभांतेचपारणमितिनिश्यंतेपारणविधानात्॥ इति॥ कृतेचलघुद्वैदेनग्रंथेनिर्णयदीपके॥ सपारणा
चनिर्णीतासाभेदैकादशीतिथिः॥१०५॥ ॥अथाष्टौद्वादश्योब्रह्मविवर्तात्॥ ॥उन्मीलिनी[1] व्यंजुली[2] चत्रिस्पृशा[3] पक्षवर्द्धिनी[4]॥ जया[5]
चविजया[6] चैवजयंती[7] पापनाशिनी[8]॥१०६॥ द्वादश्यष्टौमहापुण्याःसर्वपापहराःस्मृताः॥ तिथियोगेनजायंतेचतस्रश्चपरास्तथा॥१०७॥
नक्षत्रयोगात्प्रबलंपापंप्रशमयंतिताः॥ एकादशीतुसंपूर्णावर्द्धतेपुनरेवसा॥१०८॥ उन्मीलिनीभृगुश्रेष्ठकथितापापनाशिनी

द्वादश्यामुपवासस्तुद्वादश्यामेवपारणं॥१०९॥ व्यंजुलीनामसाप्रोक्ताहत्यायुतविनाशिनी॥ अरुणोदयमारभ्यद्वादशीसकलंदिनं
॥११०॥ अंतेत्रयोदशीचात्रत्रिस्पृशासाहरिप्रिया॥ कुहूराकेयदावृद्धिंप्रयातेपक्षवर्द्धिनी॥ ॥१११॥ विहायैकादशींतत्रद्वादशींसमुपोषयेत्॥ पु
ष्यश्रवणपुनर्वसुरोहिणीसंयुतातुया॥११२॥ उपोषितासमफलाद्वादश्यष्टौपृथक्पृथगित्यादिएताअष्टौमहाद्वादश्यःस्वदुक्तफला
भिलाषीउपवसेत्॥ ॥इतिमहाद्वादशीनिर्णयः॥ ॥अथद्वादशीतिथिरुपवासादिषुनिर्णीयते॥ ॥सापूर्वतिथ्य
न्वितोपोष्यानपरतिथ्यन्वितेति॥ तदुक्तंकूर्मपुराणे॥ नागविद्धातुयाषष्ठीरुद्रविद्धोदिवाकरः॥ कामविद्धोभवेद्विष्णुर्नग्राह्यास्तेतुवा
सराइति॥११३॥ नागःपंचमी॥ रुद्रोष्टमी॥ दिवाकरःसप्तमी॥ कामस्त्रयोदशी॥ विष्णुर्द्वादशी॥ तथाचविद्धाद्वादशीनिषिद्धा॥ युग्मेत्वेकादशी
द्वादश्योःसाहचर्यप्राशस्त्यमुक्तं॥ रुद्रेणद्वादशीयुक्तेतिनिगमः॥ ॥इतिद्वादशीसामान्यनिर्णयः॥ ॥अथश्रवणद्वादशीनि
र्णयः॥ ॥तावत्स्कंदपुराणे॥ ॥मासिभाद्रपदेशुक्लाद्वादशीश्रवणान्विता॥ महतीद्वादशीज्ञेयाउपवासेमहाफला॥११४॥ तथाभवि
ष्योत्तरे॥ द्वादशीश्रवणोपेतायदाभवतिभारत॥ संगमेसरितांस्नात्वाशतयज्ञाधिकंफलं॥११५॥ तत्रतीर्थादिकंसर्वमनंतफलदंभवेदित्यु
क्तं॥ नारदेऽपि॥ भाद्रेद्वादश्यांशुक्लायांनक्षत्रंश्रवणंयदि॥ श्रवणद्वादशीनामसाप्रोक्तामुनिपुंगवैः॥११६॥ तीर्थस्नानंकृतंतत्रदानंचादेव

49/1962

पूजनं॥उपवासोजपोहोमस्तथाब्राह्मणभोजनं॥१७॥श्राद्धाद्यपिचतत्सर्वमनंतफलदंभवेत्॥इति॥विष्णुधर्मोत्तरेरामंप्रतिशंकरः॥या
रामश्रवणोपेताद्वादशीमहतीतिसा॥तस्यामुपोषितस्नातःपूजयित्वाजनार्दनं॥१८॥प्राप्नोत्ययत्नाद्धर्मज्ञद्वादशद्वादशीफलमिति॥तथा
॥बुधश्रवणसंयुक्तासावैचद्वादशीभवेत्॥अतीवमहतीतस्यांसर्वंकृतमथाक्षयं॥१९॥संगमेसरितांस्नात्वाद्वादशीनामुपोषयेदिति॥वि
ष्णुभक्तिचंद्रोदयात्॥एवमादिवाक्येभ्यःश्रवणयुक्तद्वादश्यामुपवासःप्राप्तइति॥अतोयदासंपूर्णैकादशीसंपूर्णाचद्वादशीतदात्वेकादश्यां
पृथगुपवासःसंपूर्णत्वेनप्राप्नोति॥द्वादश्यांचपृथगेवमेवोपवासद्वयंकर्तव्यं॥ननुअभोजनसंकल्पात्मकस्योपवासस्यपारणंभोजनं
तदभावेसतिव्रतांतरेआरभ्यमाणेपूर्वव्रतेपारणाविधिलोपःप्राप्नोति॥तस्मात्पूर्वव्रतासमाप्तौव्रतांतरंकर्तुमयुक्तं॥तथास्मृत्यंत
रं॥असमाप्तेव्रतेपूर्वेनैवकुर्याद्व्रतांतरमितिवचनात्कथंव्रतांतरप्रारंभःस्यादितिचेत्॥शृणु॥उभयोर्व्रतयोरेकदेवतात्वादसमाप्तेपिपूर्वे
व्रतेव्रतांतरप्रारंभोभविष्योत्तरोक्तेनवचनेनपूर्वव्रतस्यपारणाविधिलोपलक्षणोदोषोनभवति॥तद्यथा॥एकादशीमुपोष्यैवद्वादशी
मप्युपोषयेत्॥नचात्रविधिलोपःस्यादुभयोर्दैवतंहरिरित्यभिधानात्॥२०॥तथा॥श्रवणद्वादशीमुक्त्वाविष्णुरहस्ये॥द्वादश्यामुपवासोत्र
त्रयोदश्यांतुपारणं॥निषिद्धमपिकर्तव्यमाज्ञेयंपारमेश्वरी॥२१॥अथोपवासद्वयंकर्तुमशक्तःश्रवणद्वादश्युपवासंकुर्यात्तेनपूर्वोप

वासस्यापिफलंप्राप्नुयात्तदुक्तंपुराणांतरात्॥ ॥अनंतभट्टः॥ ॥एवमेकादशीभुक्त्वाद्वादशीमुपोषयेत्॥पूर्वोपवासजंपुण्यंसर्वंप्राप्नोत्यसंशयं
२२॥तथा॥उपोष्यद्वादशींपुण्यांविष्णुऋक्षेणसंयुतां॥एकादश्युद्भवंपुण्यंनरःप्राप्नोत्यसंशयं॥२३॥किंच॥उपवासासमर्थस्यनित्येप्येक
स्मिन्नेकादश्युपवासेनक्तादिकंविहितं॥एकभुक्तेननक्तेनक्षीणवृद्धातुरःक्षिपेत्॥इतिव्यासवचनेन॥तदुपवासद्वयासमर्थंप्रतिकिमुव
क्तव्यं॥ अथयस्तूपवासद्वयासमर्थःस्वीकृतैकादशीव्रतः॥सत्वेकादशींउपोष्यश्रवणान्वितायांद्वादश्यांपारणंकुर्यात्तदुक्तंमत्स्यपुराणे
॥द्वादश्यांशुक्लपक्षेतुनक्षत्रंश्रवणंयदि॥उपोष्यैकादशींपुण्यांद्वादश्यांपूजयेद्धरिमिति॥दीपिकापि॥अथा--व्रतोनंदायांसमुष्यतांश्रु
तिरह्नीभुंजीतवि--र्चकः॥नंदायामेकादश्यांश्रुतिदस्रेश्रवणद्वादश्यांभुंजीतेत्यर्थः॥एतदेकादशीव्रतंतत्सिध्यभिप्रायपरं॥अथयदैका
दश्यांद्वादशीयोगःश्रवणयोगोवाभवतितदैकेनोपवासेनैकादश्युपवासोद्वादश्युपवासश्चसिध्यति॥तदुक्तंविष्णुधर्मोत्तरे॥एकादशी
द्वादशीचवैष्णव्यमपितत्रचेत्॥तद्विष्णुश्रृंखलंनामविष्णुसायुज्यकृद्भवेत्॥वैष्णव्यंश्रवणं॥मत्स्यपुराणेपि॥द्वादशीश्रवणर्क्षंचस्पृशे
देकादशींयदि॥सएववैष्णवोयोगोविष्णुश्रृंखलसंज्ञिकः॥२४॥तस्मिन्नुपोष्यविधिवन्नरःसंक्षीणकिल्बिषः॥प्राप्नोत्यनुत्तमांसिद्धिं
पुनरावृत्तिदुर्लभां॥इति॥अत्रोपवासद्वयसिद्धिःद्वादश्यानंतरंपारणेकृतेवेदितव्या॥यतः॥सांयोगिकेव्रतेप्राप्तेयत्रैकोपिवियुज्य

51/1962

ते॥तत्रैवपारणंकुर्याद्दैवेवेदविदोविदुरितितन्नतत्खंडोदाहृतत्वात्॥उक्तंनैवपारणंकुर्याद्विनाश्रवणरोहिणीमिति॥श्रवणमध्येपारणविधा
नादिति॥अथेदंश्रवणद्वादशीव्रतंश्रवणयुक्तायामेकादश्यामपिकार्यं॥तथाचोक्तंत्र्यामायनेन॥याकाश्चित्तिथयःप्रोक्तापुण्यानक्षत्रयोग
तः॥तास्वेवतद्व्रतंकुर्याच्छ्रवणद्वादशींविना॥याःकाश्चित्तिथयोयेनकेनचिन्नक्षत्रविशेषयोगेनपुण्याःप्रोक्ताः॥तत्रतत्रयुक्तासुतास्वेव
तद्व्रतंकुर्यान्नतिथ्यंतरेतन्नक्षत्रयुक्ते॥तथाफाल्गुनशुक्लद्वादशीपुष्यर्क्षेणयुक्तागोविंदद्वादशीनामतस्यामुपवासव्रतंविहितंतस्या
मेवकुर्यात्॥नपुष्यान्वितायामेकादश्यांसोयंश्रवणद्वादशींविनानियमः॥श्रवणद्वादशीव्रतंतुश्रवणैकादश्यामपिभवतीतितात्पर्यार्थः
॥तस्यांशापिभविष्योत्तरेश्रीकृष्णेनप्रतिपादिता॥एकादशीयदाचस्याच्छ्रवणेनसमन्विता॥विजयानामसाप्रोक्ताभक्तानांविजयप्रदा॥
२५॥नारदीये॥यदानप्राप्यतेऋक्षंद्वादश्यांवैष्णवंक्वचित्॥एकादशीतदोपोष्यापापघ्नीश्रवणान्विता॥२६॥उभयोर्दैवतंविष्णुःपुराणपुरु
षोत्तमइति॥द्वादशीश्रवणोपेताएकादश्यांभवेद्यदा॥तदंतेपारणेसिद्धिरुपवासकृतस्यचेति ॥२७॥ द्वितीयदिनेश्रवणवृद्धौतन्मध्येपारणं
कुर्यात्तदुक्तंविष्णुभक्तिचंद्रोदये॥विशेषेणमहीपालश्रवणंवर्द्धतेयदि॥तन्मध्येपारणंकृत्वापुण्यंक्रतुशतंभवेत्॥२८॥कल्प
श्चिद्द्वादशीश्रवणर्क्षयुक्तायामेकादश्यामुपोषितायांद्वादश्यांश्रवणंवर्द्धतेद्वादशीऋक्षस्यन्यूनाभवतितदातिथ्यंतोनापेक्ष्यइत्युक्ता

तिथिनक्षत्रसंयोगेउपवासोयदाभवेत्॥तावदेवनभोक्तव्यंयावदेकस्यसंक्षयइति॥नारदीयवचनमुदाहृतंतिथिनक्षत्रयोगेनभोक्तव्य
मितिवचनार्थः॥वचनावतारिकायांसंयोगेभोक्तव्यमित्यनर्थःप्रतिभासतइतिनात्रदोषःयत्पुनस्तत्रैव॥विशेषेणमहीपालश्रवणंवर्द्ध
तेयदि॥अस्योत्तरार्द्धं॥तिथिक्षयेनभोक्तव्यंद्वादशींनैवलंघयेत्॥तदिदंतिथिनक्षत्रसंयोगेभोजनविधायकमपिनित्यैकादश्युपवास
पारणाविधिपरत्वेदृष्टव्यं॥श्रवणैकादश्युपवासविहितपारणविधिपरत्वेतुनदोषः॥यथासंयोगिकेव्रतेप्राप्रेयत्रेकापिविलुप्यते
॥तिथिनक्षत्रसंयोगेउपवासोयदाभवेत्॥तथा॥तत्रोपोष्यतिथेस्तिथ्यौश्रवणयोर्वातेव्रतंपारयेदित्यादिवचनेभ्यःएकविगमेपारण
विधानाच्चकिंच॥इदमसंबद्धमुत्तरार्द्धं॥कालनिर्णयकालादर्शदीपिकानंतभट्टव्रतकल्पविष्णुरहस्यादिग्रंथःस्पर्शनात्कौतस्त्यमिति
ऽवलोकनीयमिति॥याकाश्चित्तिथयःप्रोक्तापुण्यानक्षत्रयोगतः॥उक्तंतेपारणंकुर्याद्विनाश्रवणरोहिणीमितिद्वयोस्तुविशेषः॥श्रव
णद्वादश्यांजनार्दननामाविष्णुःपूज्यते॥श्रवणैकादश्यांवामनावतारइति॥तथा॥भाभाकासितपक्षेतुमैत्रश्रवणरेवती॥प्राप्नोति
द्वादशीतत्रहरिभंभ्यर्चयेन्नरः॥साविष्णुशृंखलानामसायुज्यफलदायिनी॥तथा॥तिथिनक्षत्रयोरत्रयोगश्चैवनराधिप॥द्विकला
व्यापिलभ्येतसज्ञेयोह्याष्टयामिकः॥ ॥इतिश्रवणद्वादशीनिर्णयः॥ ॥ ॥अथसकलतिथिसाधारणांतर्गत

तार्कि
द्वादशीश्रवणा
भाद्रपदशुक्लद्वा
श्रवणद्वादशीव्र
तथानिर्णयश्च
अस्यामेववामन
यंतीव्रतं
अथपोषकृष्ण
द्वादश्यांसुकृत
द्वादशीव्रतं

53 / 14622

पे॰ ५ तिथिनिर्णयः॥ ॥तदुक्तं ब्रह्मोत्तरखंडे धर्माचारवर्णने॥ ॥शृणुध्वं ऋषयः सर्वे तिथिनां निर्णयं परं॥ अनिर्णितातिथिं प्राप्य पुनः किं
चित्कर्म सिध्यति॥१॥ श्रौतं स्मार्त्तं व्रतं दानं यच्चान्यत्कर्म वैदिकं॥ निर्णितासु तिथिष्वेव कर्म कुर्वीत नान्यथा॥२॥ प्रायः प्राप्तमुपोष्यं स्यात्तिथेर्दैवफले
षुभिः॥ मूलं द्विपितनुपूर्व्वपित्र्यं वोक्तं महर्षिभिः॥३॥ यां प्राप्यास्तमुपैत्यर्कः सा चेत्स्यात् त्रिमुहूर्त्तिका॥ धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुस्तिथिं
४॥ क्षये पूर्वा त्र कर्तव्या वृद्धौ कार्या तथोत्तरा॥ तिथेस्तस्याश्च वीक्षणायाः क्षयवृद्धित्वकारणं॥५॥ अष्टम्येकादशी षष्टि तृतीया च चतुर्दशी॥ कर्त
व्या परयुक्तास्ता अपराः पूर्वमिश्रिताः॥६॥ वृद्धत्वात्तथारंभासावित्रीवटपैत्रिकी॥ कृष्णाष्टमी च संसृज्य कर्तव्या सम्मुखा तिथिः॥७॥ शुक्ले पू
स्कंद
र्वाह्निके कार्ये कृष्णे चैवापराह्निके॥ नागविद्धा तु या षष्टि शिवविद्धा तु सप्तमी॥८॥ दशम्येकादशी विद्धा नोपोष्या सा कथंचन॥ शांत्येवं चंद्रसूर्या
भ्यां तिथिं स्फुरतरां व्रती॥ एकादशी तृतीया च षष्ठी चोपवसेत्सदा॥९॥ फलमेकादशीं हन्ति विद्धं निदशमीयुता॥ पारणं च त्रयोदश्यामुक्तं
यद्द्वादशीव्रतं॥१०॥ पारणाह्नि न लभ्येत स कलां द्वादशीं व्रतं पिबेत्॥ तदानीं दशमीविद्धा उपोष्यैकादशीं तिथिं॥११॥ शुक्ले वा यदि वा कृष्णे भवेदे
कादशीद्वयं॥ उत्तरां तु यतिः कुर्यात्पूर्वामेव सदा गृही॥१२॥ दर्शं च पौर्णमासं च सप्तमीं पितृवासरं॥ पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते॥१३॥ ति
नी चालीद्विजैर्या ह्यासाग्निके श्राद्धकर्मणि॥ कुहूस्त्रीभिस्तथा शूद्रैरपि चान्यैरनग्निकैः॥१४॥ पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता॥ ति

था वंते पुत्र यात्वा प्रदोषव्यापिनी तिथिः १५ उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः यत्र वा युज्यते विप्राः प्रदोषे हि मरत्रिमिता १६ अर्वाक्
षोडशनाड्यस्तु परतश्चैव षोडशः पुण्यकालो त्र संक्रांतौ स्नानदानतपादिषु १७ आसन्नसंक्रमं पुण्यं दिनार्द्धं स्नानदानयोः रात्रौ संक्रमणे भा
नौ विषुवत्ययने दिने १८ सर्वेषु ग्रहणं यावत्तावत्स्नानतपादिकं न स्वप्यात्र च भुंजीत स्नात्वा भुंजीत मुक्तयोः १९ आदित्यशीतकिरणौ ग्रस्ता
व्यस्तं गतौ यदा दृष्ट्वा न दान्यदिवसे स्नात्वा भुंजीत वाग्यतः २० सूतके मृतके वापि नोपवासं त्यजेद्व्रती यस्माद्व्रतं व्रतोनीव गर्हितो वेदपारगैः
२१ यस्मात्प्रमाद दोषेवा स्नात्वा कार्यं व्रतं द्विजाः देवार्चनादिकं कर्म कार्यं दीक्षान्वितैः सदा २२ नाक्षिपापं यतस्तेषां सूतकं च यदात्मनां शि
वे देवार्चनं यस्य यस्य चाग्निपरिग्रहः २३ ब्रह्मचारी यतीनां च शरीरे नास्ति सूतकं महत्त्व प्रयुक्ता या या च सोपाधिका तिथिः २४ सामावा
स्या समाज्ञेया दानाध्ययनकर्मसु पालनीया प्रयत्नेन शौचीर पितृभिः सुभिः २५ माघाद्य परपक्षे तु पूर्वमध्यानुशब्दिता श्चतुरन्वष्टका
स्तिस्रः सप्तम्यादि यनुक्रमात् २६ माघे पंचदशी कृष्णा नभस्ये चैव योदशी तृतीया माधवे शुक्ला कार्त्तिके नवमी सिता २७ एता युगाद
यः प्रोक्ताः सर्वा चाक्षय्यपुण्यदाः तेषु श्राद्धादिकं श्रेष्ठं सर्वपापविशुद्धये २८ सिंहवृश्चिकयोः कुंभसंक्रांतिषु भवंत्युत क्रमात्कृतयु
गादीनां युगानां च महर्षयः २९ श्राद्धपक्षे त्रयोदश्यां मघास्विंदु करे रविः यदा न दागजच्छायां श्राद्धे पुण्यैरवाप्यते ३० धनुस्त्रीमीनयु

5/1962

ग्मांकाःषडशीतिमुखाःस्मृताः अश्वयुक्शुक्लनवमिद्वादशीकार्त्तिकेसिता ३१ तृतीयाचैत्रमासस्यतथाभाद्रपदस्यच फाल्गुनस्यत्वमावास्यापौ
षस्यैकादशीतथा ३२ आषाढस्यापिदशमीमाघमासस्यसप्तमी श्रावणस्याष्टमीकृष्णातथाषाढीचपूर्णिमा ३३ कार्त्तिकीफाल्गुनीचैत्र्य
ष्टपंचदशीसिता मन्वंतरादयश्चैतादत्तस्याक्षयकारकाः ३४ संक्रांतयस्तथापुण्याभान्तोद्वादशैवतु पर्वस्वेतेषुदानानिधेनुशैलादिका
नि च ३५ प्रयच्छंतिद्विजेंद्रेभ्योऽनंतंवाक्षमांगति एकैकवृद्धितोविप्रान्वैद्वादशभोजयेत् ३६ सहस्रारंमहाभक्तंकर्तव्यंतंदुलैःशुभैः नि
र्दनैर्द्वादशारैर्वाकार्यमुद्यापनेनिधौ ३७ हयदानंपशंसंतिमुनयोत्रमहाशयाः जपाकुसुमसंकाशंमणिंदद्याद्भास्वते ३८ द्विभुजार
विमूर्तिंचसत्नामूर्तिंतथैवच सौवर्णकलशेस्थाप्यताम्रेपूर्णजलेमुदा ३९ एतद्व्रतंमहाश्रेष्ठंसूर्यप्रीतिकरंमहत् मुदामोदकवस्त्रैश्च
दीपैस्ताम्रतलेस्थितैः ४० संयुक्ताश्रवणाःकुंभास्त्रयोदशसुपल्लवाः पूजनीयाप्रयत्नेनद्वादशरविनामभिः ४१ नाम्नापुरुषोत्तमे
नैवमध्यस्थंकुंभमर्चयेत् आरभ्यमकरस्थेनयावद्वर्षमितिभवेत् ४२ मकरेवैसमाप्तिस्यात्तत्रोद्यापनमिष्यते अत्रार्कोमोदकान्द
द्यात्प्रतिसंक्रमवृद्धिगान् ४३ सदक्षिणान्फलैःसार्द्धयत्नसत्रादिभिःक्रमात् एवंयःकुरुतेतस्यरविर्मोक्षप्रदोभवेत् ४४ शैवेनैवं
चरश्चैवरविःप्रोक्तोमहर्षिभिः एतत्कृतेनतुष्टःस्यादुमाकांतोनसंशयः ४५ शिवनक्षत्रयोगस्थौव्यतीपातश्चयेधृतिः तयोरपि

तत्कार्यमेकभक्तादिभोजनात् ४६ सर्वतोभद्रकंवाथलिंगतोभद्रमेवच तत्रपूज्योमहेशानःपार्वत्यासंयुतोनरैः ४७ वर्द्धमानोऽन्ययाचाय
द्वादशीपापनाशिनी साप्येवंविधिनाकार्याधेनुंदद्यात्ततःशुभां ४८ व्यतिपातेसुवर्णस्यदानमुक्तंमहाफलं घृतंगुडंतथाताम्रंवैधृते
ष्यैवंमवतत् ४९ पौर्णिमापर्वविदोपाश्रृणुध्वंकथयामिवः यदनुष्ठानतःसर्वान्कामाञ्जंतुरवाप्नुयात् ५० चैत्रेचैत्राख्यतोग्राह्योश्रा
वणावस्तविपर्ययेः कार्त्तिकोवैश्वरूपेणमाघाद्वुद्धेरनुक्रमात् ५१ तत्सर्वकार्त्तिकीचापिसर्वश्रीस्याद्यथादरं दंपतीभोजनंकार्यंप्रति
पर्वैकवृद्धिमत् ५२ यद्वापंचाशदादिकंयावत्तत्संवर्षभवेत्सदा उद्यापनंचकर्तव्यंयथावांभवसंमतिं ५३ हेमांमूर्त्तिहरेःकार्यालक्ष्याश्चै
वतथाविधां पूजयेत्सर्वतोभद्रेतिथितुल्यद्रानिते ५४ सादीपदक्षिणायुक्तंसवस्त्रंकलशोर्चयेत् चंद्रकांतमणिदानंविप्रायात्मसिद्धि
र्त्तितं ५५ एतानिपंचपर्वाणिप्रतिमासंकरोतियः तस्मैभुक्तिंचमुक्तिंचददातिविष्णुसदाशिवौ ५६ अमावास्यामहापर्वपितॄणांमु
क्तिदायकः प्रतिमासंत्रकर्तव्यंपितृसुपरेतन्द्भिः ५७ एकंचद्वादशीपर्वामावास्यापर्वतद्वयं तस्मात्सर्वथानित्यंपितॄणांमुक्तिदाय
कं ५८ षण्णवतिनभमित्येकेश्राद्धप्रगंवदंति हि वर्षकेनैवकर्तव्यंपितृमोक्षपरंयतः ५९ ह्याधिकांसप्रतीवाह्नःश्राद्धकर्मणिचाप
दे कृत्वानानितरोभवत्यामुच्यतेपत्रकारणात् ६० अमापूर्णास्वनीपातांवैधृतिःसंक्रमस्तथा द्वादश्याश्चद्वयंशुक्लाष्टकापर्वाणिचान्वि

57/1962

रे ६१ दर्शश्राद्धममावास्यांद्वादशाद्देतथाह्निके येकुर्वंतिनराम्तेषांपितरस्वर्गमास्थिताः ६२ अन्नदानानिदेयानियथाविभवसारतः यदिच्छेदात्मनो
मुक्तिंतदाशाद्धंविवर्जयेत् ६३ विपर्ययेईनदानिःस्याद्दानैर्मुक्तिरवाप्यते तद्धनंदानमात्कृत्वामोक्षंगछेन्नसंशयः ६४ पानीयमप्यत्रतिलैर्विमिश्रं
दद्यात्पितृभ्यःप्रयतोमनुष्यः श्राद्धंकृतंतेनसमासहस्रंरहस्यमेतत्पितरोवदंति॥६५

॥२॥ आदि 2210

॥ ॥श्रीपरमात्मनेनमः॥ ॥श्रेयःश्रियंप्रविदधातुसनाभिसुनु॥योदुर्ज्जयारिविजयक्षममुच्चदुर्गं॥एकांतवत्सलतयाजगतांहिता
य॥शत्रुंजयंगिरिपतिंप्रकटीचकार॥१॥अथाकर्णयदेवेश्वरविहितबाह्यारिविजयस्य॥तस्यभरतेशस्याभ्यंतनररिपुविजयंतीर्थस्था
पनादिव्यतिकरंच॥तथाहि॥एकदाश्रीऋषभस्वामीसर्वातिशयशोभितःस्वपादन्यासैः पृथ्वींपवित्रयन्॥श्रीशत्रुंजयसमाःगमत्
तंचमूलेपंचाशद्योजनविस्तीर्णंनुपरिदशयोजनंअष्टयोजनोन्नतंनानातरुलताविराजितं॥नानारत्नमयैःसहस्रसंख्यैःशृंगैर्न
भश्चित्रयंतं॥अनेकनगरीनदीद्रहदीर्घिकाकुंडाद्युपशोभितंदर्शनेनापिमहापापापहं॥अनेकसिद्धगंधर्वविद्याधरादिसेवितं॥अने
कमुमुक्षुमुनिसेवितगुहांतरं॥अनेकसिद्धसंस्थानं॥अनंतसुखप्रदं॥संसारसमुद्रांतरद्वीपमिव॥भव्यजनानामाधारभूतं॥एवंविधं
श्रीसिद्धाचलंभगवान्आरुरोह॥ततःपुंडरीकाद्याःसाधवःसाक्षात्सिद्धिसौधसोपानमिवतमारुरुहुः॥भगवान्राजादन्यास्तले
समवासार्षीत्इंद्रादिभिःसमवसरणंकृतं॥भगवतादेशनाप्रारब्धा॥तथाहि॥तीर्थेजिनेगुरौभक्तिर्धर्मशास्त्रेरुचिःकृपापात्रदानं
प्रियंवाक्यं॥विवेकात्मितलक्षणं॥१॥आर्यदेशोमनुष्यत्वं॥दीर्घायुःसद्धनाकुलं॥न्यायोर्जितानिवित्तानिहेतुःपुण्यार्जनेनृणां॥२॥
धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयी॥साध्यतेयेनतंमर्त्यभवंकःकोतुमीश्वरः॥३॥अ. बुधःक्षणमपिप्रमादतोयेवृथानग

13/1462

मयंनिसोद्यमा॥धर्मकर्मणिचिरंतनायस्ते॥नवंतिभ्रूविसद्विवेकिन॥४॥जैनोधर्मःप्रगटविभवःसंगतिःसाधुलोके॥विद्वद्गोष्टीवचनपटुता
कौशलंसक्रियासु॥साध्वीलक्ष्मीश्चरणकमलोपाशनासद्गुरूणां॥शुद्धंशीलंमतिरमलिनाप्राप्यतेभाग्यवद्भिः॥५॥नधम्मकज्जापरमत्यकज्जं
नपाणिहिंसापरमंअकज्जं॥नपेमरागापरमोत्थिबंधो॥नबोहिलाभापरमोत्थिलाभो॥६॥इत्यादिदेशनांदत्वापुनरपि॥प्रभुःश्रीपुंडरीकग
णधरंप्रत्याह॥श्रृयतांपुंडरीकअसौशत्रुंजयःपर्वतःसर्वतीर्थप्रधिराजःयंसमाश्रिताःप्राणिनःस्वल्पेनैवकालेनलोकाग्रमधिरोहंति॥अना
दिकालीनःशाश्वतोयंगिरिः॥अत्रानंतास्तीर्थकराअनंतामुनयश्चसिद्धाःसेत्स्यंतिचयेचात्रहिंसकाअपिपक्षियश्चसर्पाद्याजीवास्तेपिप्रायो
स्यतीर्थस्यमाहात्म्याद्विशुद्धाशयास्तृतीयभवेसिद्ध्यंतियेचाभव्याःपापिनोजीवास्तेषामिदंतीर्थदृष्टिपथेपिनायातिदृष्टमपिवादर्शक
ियेनभवतिदुःखमाकालेपितीर्थकरकेवल्यादिविरहे॥धर्मेविसंस्थुलेजातेक्षीणेषुधर्मसाधनेषुअयमेवगिरिर्लोकानांतारकोभवि
ष्यति॥यथाजिनेषुअर्हन्मुख्योयथापर्वतेषुमेरुःयथाद्वीपेषुजंबूद्वीपः॥तथासर्वतीर्थेष्विदंतीर्थमनुष्यभवंप्राप्ययेजीवाएततीर्थंन
पश्यंति॥तेमनुष्यरूपेणापिपशवोज्ञेयाः॥पूर्वंकेवलज्ञानिप्रमुखा॥अनंताअतीततीर्थकरा॥अनागतकालेचयेभाविनस्तेसर्वेप्यत्र
समवसृताः॥समवसरिष्यंतिच॥प्रथमंसुराष्ट्रामंडलमेवतीर्थंतत्रापिशत्रुंजयादिः॥तत्रापिराजादनीतरुस्ततोपिवर्त्तमानजिनादि॥अ

तीर्थंदुःषमाकालेसर्वेषुतीर्थेषुनिःप्रभावेषुजातेषुअस्यमहिमाधिकाधिकंवर्द्धिष्यति॥अन्यतीर्थेषुपूजाप्रभावनादानादिनायत्फलंस्या
त्॥तदत्रतीर्थेनंतगुणंस्यात्॥उक्तंच॥पूजार्हतांगुरौभक्तिःश्रीशत्रुंजयसेवनं॥चतुर्विधस्यसंघस्यसंगमःसुकृतैर्भवेत्॥१॥इतिअत्रैकवे
लमपिकृताभगवत्पूजा॥आसंसारकृतान्यपिपापानिव्यपोहति॥अत्रतीर्थेगुरुभक्तिःकृतासतितीर्थकरपदंदत्ते॥यतस्तीर्थकराणामपि
पूर्वभवे॥प्रथमंगुरुवचनादेवसम्यक्त्वप्राप्तिः॥स्ततस्तीर्थकृत्कर्मापि॥ततोगुरुर्विशेषेणपूज्यः॥समान्यमुनिरप्यत्रपूजितश्चक्रिपदंदत्ते॥ए
तत्तीर्थंप्राप्यापियेनगुरुपूजयास्ववित्तंनसफलीकृतं॥तस्यजन्मनिरर्थकंसंपदोपिविपदोज्ञेयाः॥समग्राअपिधर्मक्रियागुरुसाक्षिकाएव
सफलाःस्युः॥येचक्रियापरायणाअपिगुरुपराङ्मुखास्तेषांविफलाःसर्वाःक्रियाः॥शत्रुंजयोजिनप्रासादप्रतिमादिकंचस्थावरंतीर्थंगुरु
स्तुजंगमंतीर्थं॥अतोत्रतीर्थेवस्त्रपात्राऽन्नजलभेषजपुस्तकादिभिर्गुरुःसर्वभक्त्यापूजनीयस्तुःत्रभावादिहलोकेपरलोकेचसर्ववांछितं
फलति॥अभयसुपात्रानुकंपोचितकीर्तिरूपाणित्रअन्नजलज्ञानौषधादिकानि॥सर्वाण्यपिदानान्यत्रयथासंभवयथाशक्त्यादेयानि॥अत्र
दीनानाथाकिनांयोवारितभोजनंदत्ते॥तद्गृहेसदाप्यनिवारितालक्ष्मीर्वसति॥दानमेवहिगृहिणांमुख्योधर्मस्ततोत्रप्रवर्द्धमानपरिणामेन
दानंदेयंकायवाङ्मनोभिःशीलंपालनीयं॥यश्चात्रतीर्थेशीलभंगंकरोति॥तस्यकर्मचंडालस्यकुत्रापिशुद्धिर्नस्यात्॥अत्रतपस्तप्तंसत्॥निका

५९/१९६

विनान्यपिकर्माणिनाशयन्ति॥ततः सर्वसुखेच्छुभिः षष्ठाऽष्टमादिकंतपः कार्यमेवअत्राऽष्टादिकानतपसाविकर्मिणोपिस्वर्गसुखंमोक्षसुखंवाल
भंते सुवर्णहारकोत्रचैत्रप्रर्णिमोऽपवासेनः शुद्ध्यतिवस्त्रापहारकोत्रसप्ताचामाम्लैः शुद्ध्यति॥रत्नचौरो यथाशक्तिदानंकुर्वन्कार्त्तिकेसप्ता
हस्तपसाशुद्ध्यति॥रूप्यकांस्यताम्रलोहपित्तलादिचौर्यपातकीसप्तपुरिमार्द्धपत्याख्यानैः शुद्ध्यतिः मुक्ताफलप्रवालादिचौरस्तु॥पक्षंयाव
देकांतरिताचामाम्लनिर्विकृतिकप्रत्याख्यानैर्भगवत्पूजयाचशुद्ध्यति॥अन्नजलरसाद्यपहर्त्ता॥अत्रतीर्थेतत्रद्वस्तुदनेनैवशुद्ध्यतिवस्त्राभ
रणादिशृंगारहर्त्ता॥भगवतोविशेषपूजां॥भगवदंगेतत्सदाभरणंचधारयन्शुद्ध्यति॥देवद्रव्यगुरुद्रव्याद्यपहर्त्तात्रतीर्थेकृतद्रव्यंप्रत्यर्पयि
ता॥भावेन भगवत्पूजां॥ पात्रदानंचकुर्वाणंशुद्ध्यति॥कुमारीदासीविधवाप्रव्रजितापरदारागोत्रदाराद्यऽगम्यगमनपातकी॥अत्रतीर्थे
षण्मासान्यावदर्हद्ध्यानपरायणस्तपसाशुद्ध्यति॥एवंनार्यपिशीलभंगपातकाच्छुद्ध्यतिगोमहिषीगजतुरगमहीमंदिराद्यपहर्त्ता॥भग
वत्पूजानिमित्तंतत्हस्तुदत्वाशुद्ध्यति॥यश्चपरनिमित्तंचैत्यपुस्तकप्रतिमादिषु॥स्वंनामलिखेत्॥इदंमयाकृतंकारितंवेतिवक्ति॥सषण्मासा
न्यावदत्रतीर्थेसामायिकावश्यकादिकलितविशुद्धतपसातत्पातकान्मुच्यते॥संसारेतत्पापंनास्तियदत्र भगवद्ध्यानेननक्षीयते॥तच्च
पुण्यंपदंवाजगतिनविद्यतेयदत्रभगवद्ध्यानान्नलभ्यते॥अत्रतीर्थेअकृतान्यपिपुण्यानि॥भावनाभिर्भवंति॥ततोत्रशुभध्यानेन

ध्यातव्यं॥त्रिषुयोगेषुयतोमनोयोगएवबलीयान्॥सएवस्वर्गनरकादिहेतुस्ततोत्रकृष्णनीलकापोतारव्यास्तिस्रोलेश्यास्त्याज्याः॥तेजः
पद्मशुक्ललेश्याश्चकर्त्तव्याः॥मनसापिजीवहिंसानकार्याकु—मात्रमपिजीवयोनिर्दयोत्रतीर्थेहंति॥तस्यसप्तमंनरकंमुक्त्वान्यत्स्थानं
नास्तिहिंसातुसाक्षान्नरकस्यदूतिकाधर्मोद्यानदहनेदावानलः हिंसकानांसुगतिर्दूरेभवति॥ततःसर्वजीवेषुमैत्रीचिंतनीया॥तथाप्राणां
तेप्यत्रमृषावादोनवाच्यः॥योत्रतीर्थेमत्यंवक्ति॥तन्मुखेमुखपाकपिटकपूतिकम्यदिताद्याबहवोरोगाभवंति॥परत्रचदुर्गतिंलभते॥वारिद्र
लकमपियोत्रतीर्थेअदत्तंगृह्णातिसजन्मांतरेदरिद्रः स्वल्पजीवितोदुर्भगश्चभवति॥यतोधनंतुप्राणिनांबाह्याः प्राणाःसंतिप्राणहरणा
दपिपुंसांद्रव्यापहारोतिदुःखकृत्॥ततोदत्तंत्याज्यमेव॥स्वदाराश्चपिअत्रतीर्थेनोसेवनीयाः लोकद्वयानर्थकरंकिंतर्हिपरदारसेवनं॥उ
क्तंच॥परद्रव्यापहारित्वं॥परदाराभिसेवनंपैशुन्यंपरविद्वेषःप्राज्यपापायजायते॥१॥संसारसागरेघोरे॥यत्परिग्रहभारतःपोतवन्मज्ज
तिजनस्ततःसोल्पोविधीयते॥२॥अतःपरिग्रहस्त्वल्पात्याज्यादिग्विरमण॥१॥भोगोपभोगा॥२॥नर्थदंडविरमण॥३॥रूपगुणव्रतत्रयम
पिसर्वशक्त्याषालनीयं॥तथासामायिकेकृतेमतिंत्रैलोक्यमपिहितकारिभवति॥दृढसामायिकस्यदुष्टदेवासुराअपिपराभवितुंनशक्नुवं
ति॥स्वल्पेनैवकालेनमहतीनिर्जरावस्यात्॥उक्तंच॥दिवसेदिवसेलक्खंदेइसुवन्नस्सखंडियंएगो॥इयरोपुणसामाइयंकरेइनपहुप्पएतस्स

51/1962

॥५॥तदत्रसामायिकेविशेषयत्नोविधेयः॥अत्रदेशचारित्रग्रहणान्मासिकतपसःफलस्यात्॥परिणामप्रकर्षाच्चकेवलज्ञानमपिलभते॥य
श्चातिथिसंविभागंकरोतिसनरकतिर्यग्गतिद्वयंनिवारयति॥भोजनसमयागतेभ्यःसाधुभ्योतिभक्त्यानंददतःशिवसाम्राज्यंवशीभवति
॥राज्यस्वर्गादिफलंतुतस्यानुषंगिकमेव॥उक्तंच॥तद्भोज्यंगुरुदेवेभ्योयच्चदत्वोपभुज्यते॥अन्यत्स्यश्चुग्रासमिवलंकुक्षिपूरणा॥१॥अन्यच्चदेव
द्रव्यगुरुद्रव्यादिकं॥अत्रसर्वथानग्राह्यं॥उक्तंच॥देवद्रव्यंगुरुद्रव्यं॥दहेदासप्तमंकुलं॥अंगारमिवतत्स्पृष्टं॥भुज्यतेनहिधीमतां॥१॥देवद्रव्या
च्चयावृद्धिर्गुरुद्रव्याच्चयद्धनं॥विषवत्प्रथमंस्वादुपश्चात्तत्तीव्रदुःखदं॥२॥देवद्रव्यंगुरुद्रव्यंयेनित्यंभक्षयंतिहि॥तेषांशुद्धिर्नविद्येत॥सर्व
तीर्थाश्रयैरपि॥३॥देवद्रव्यंगुरुद्रव्यंस्पृष्टंलोभांधचेतसा॥ददातिदुःखदौर्गत्यनैरश्चनरकस्थितिं॥४॥अत्रतीर्थएकेंद्रियाणामपिनिरर्थ
काहिंसानकार्या॥यतःसोनर्थदंडोमहादुःखायभवति॥अन्यच्चात्रवृक्षाणांशाखापत्रपुष्पफलांकुरत्वचादौ॥तथादृषत्कर्करतृणवालुका
स्वपिप्रत्येकंदेवतानांनिवासः॥ततस्तच्छेद्यंनोभेद्यंनचलोभात्कौतुकाद्वाग्राह्यं॥यथाशक्त्याधनेनवचनेनदेहेनजीवितव्येनापिवापरोपका
रःकर्तव्यः॥अत्रज्ञानस्यज्ञानवतांवापुस्तकानांवापूजाबहुमानेनभक्तिकरणादनंतज्ञानावरणीयंनश्यंति॥ततःप्राणीकेवलंल[illegible]
ततोत्रविशेषाद्ज्ञानस्यज्ञानवताचपूजाकार्या॥रात्रिभोजनंसर्वथात्याज्यं॥अत्रयोरात्रिभोजनंकुर्यात्॥सघूकचर्मचटिकादिभव[illegible]

ष्यनरकेयाति॥रात्रिभोजनासक्तस्यापवित्रस्यएतत्तीर्थस्पर्शोपिनयुज्यते॥येचसम्यक्शुद्धानिव्रतान्याराधयंति॥एतत्तीर्थसेवंते
पास्वर्गमोक्षादिसुखानिकरतलगतानि॥यदन्यत्रजपैस्तपोभिर्दानैर्वाफलंभवेत्॥ततोपिकोटिगुणंशत्रुंजयस्यस्मरणमात्रादेवभ
वति॥प्रजार्थयोराज्यार्थेनगजतुरगभूमिस्वर्णरूप्यरत्नादिवस्तुददाति॥यश्चेंद्रोत्सवादिकृत्यानिकुरुते॥सचक्रिशक्रादिसंपदंप्राप्य
क्रमान्मुक्तिंलभते॥ततोमामिवयएनंतीर्थराजंज्ञात्वासेवतेसस्तोकेनैवकालेनमुक्तिपदंप्राप्नोति॥हेपुंडरीकमुनेअस्यांअवसर्पिण्यां
त्वत्तएवेदंतीर्थप्रसिद्धंभविष्यति॥यतःसर्वेंद्रियाणिसंयम्यसर्वाश्रवान्निरुध्यनिर्विकल्पसमाधिनाघातिकर्मक्षयंकृत्वा॥अस्यैवक्षेत्र
स्यमाहात्म्यान्मुक्तिंयास्यति॥इत्येवंपुंडरीकंगणधरंअनुशास्यभगवान्पुनर्भव्यजनानुग्रहार्थं॥अन्यत्रविजहार॥इंद्रादयःस्वस्वस्था
नंगताः॥पुंडरीकस्तुपंचकोटिमुनिपरिवृतस्तत्रैवतिष्ठन्॥परमसंवेगसमतारसपूरितांतरःसर्वसाधून्संबोध्यप्राह॥भोभोतपो
धनाः॥क्षेत्रमाहात्म्यादसौगिरिर्मोक्षसुखैकनिबंधनं॥कर्मरिपुजिगीषूणां॥अस्माकंदुर्गमिवेशार्थसाधकस्ततोत्रसंलेखनाक
र्तुंयुज्यते॥सासंलेखनाद्रव्यभावभेदाभ्यांद्विधा॥तत्रसर्वविषयोन्मादमूलहेतुनांसर्वधातुनांआहारादित्यागेनशोषणंद्रव्य
संलेखना॥यच्चरागद्वेषकषायमोहादीनांनिवारणंसभावसंलेखनेति॥ततःतैःपंचकोटिश्रमणैःसहपुंडरीकमुनिर्भ्रतानांचारा

63/1952

नालोच्य॥महाव्रतानिदृढीकृत्यचतुस्त्रिंशदतिशयकलितास्त्रैलोक्यनाथामुक्तोज्वलप्रभाअर्हंतःशरणं॥१॥पंचदशभेदभिन्ना॥अनंत
मव्ययमरूपंस्थानंप्राप्ताविक्रमकांतयःसिद्धाःशरणं॥२॥पंचमहाव्रतधराःत्युक्तसर्वसावद्याइंद्रनीलमणिकांतयःसाधवःशरणं॥३॥
केवलिप्रणीतोज्ञानदर्शनचारित्रमयःसर्वजगज्जीवहितःस्फटिकोज्वलोधर्मःशरणं॥४॥इतिचत्वारिशरणानिकृत्वाअष्टादशपाप
स्थानानित्रिधाप्युत्सृज्य॥ततःचतुरशीतिलक्षेषुजीवयोनिषुमिथ्यामेदुष्कृतमस्तु॥मानुष्यपुनरपिकदापिसर्वान्जीवानदुःखमया
मितेसर्वेचमयिसाम्यंतुनचास्तिमेकेनापिसहरागोद्वेषोवा॥सर्वसत्वेषुमेमैत्र्यस्तु॥एकोहंनास्तिमेकश्चिन्नचाहमपिकस्यचित्
जिनांघ्रिशरणस्थस्यममदैन्यंनकिंचन॥१॥इत्युक्त्वानिराकारंभवचरमं॥अनशनंसमस्तसाधुभिःसमंप्रत्याख्यायःक्षपकश्रेणि
क्रमेणविशुध्यमानलेश्याबलाद्घातीनिकर्माणिक्षपयित्वा॥तेसर्वेपिमासांतेकेवलमासाद्यचैत्रपूर्णमास्यांआत्यंतिकमनुत्त
रंमोक्षसुखंप्रापुः॥ततःसुरासुरदेव्याइवतेषांनिर्वाणगमनोत्सवंचक्रुः॥ततःप्रभृति॥अस्यामवसर्पिण्यांइदंतीर्थंप्रसिद्धंजातं॥
यत्रैकोमुनिःसिद्धाति॥तत्तीर्थमुच्यते॥अत्रतुअनंताःसिद्धा॥अतएतन्महातीर्थंफाल्गुनसिताष्टम्यामत्रश्रीयुगादीशःसमवसृत
स्ततोष्टमीपर्वजातं॥यदत्राष्टमीदिनेपाक्षिकदिनेप्राणिनःशुभाशुभायुष्कर्मबंधंकुर्वंति॥तेनात्रतीर्थेएतयोर्द्वयोरपिपर्वणोः

स्वल्पमपिदानशीलतपःप्रभृतिकृतंसुक्षेत्रोप्तबीजवत्॥अनंतगुणफलप्रदंस्यात्॥चैत्र्यांपूर्णिमायांतुपुंडरीकःसिद्धस्ततश्चैत्रीपर्व
जातं॥गिरिश्चपुंडरीकइतिनामख्यातं॥उक्तंच॥यश्चैत्र्यांपुंडरीकस्थं॥पुंडरीकंसदार्चयेत्॥यात्रयासंघसहितःसस्यात्त्रैलोकोत्तरस्थि
तिः॥१॥नंदीश्वरादिद्वीपस्थ॥शाश्वतानांयदर्हतां॥पूजनात्सुकृतंतत्स्यात्॥चैत्र्यांशत्रुंजयेधिकं॥२॥दानशीलतपःपूजामुख्यंपुण्यंयद
न्यतः॥तस्मात्कोटिगुणंचैत्र्यां॥पुंडरीकेजिनार्चनात्॥३॥चारित्रं-द्रप्रभोर्हन्॥चैत्रीशत्रुंजयोचलःविनापुण्यैर्नलभ्यते॥नदीशत्रुंज
यापिच॥४॥शांतिकंचध्वजारोपं॥चैत्र्यांकुर्वन्जिनालये॥नीराजनांचलभते॥नीरजस्कान्भवान्तरः॥५॥मुनिर्वस्त्रान्नपानाद्यै
श्चैत्र्यांतुप्रतिलाभितः॥चक्रिशक्रपदंदत्वा॥पश्चान्मोक्षंप्रयच्छति॥६॥इंद्रादयोदेवाअपिश्वरादौ॥एतत्पर्वसत्यापयंतिअतो
त्रपर्वणिविकथाकलहानर्थदंडाब्रह्मसेवादिकमवश्यंत्याज्यमेवजिनचैत्यपूजाप्रभावनासंघवात्सल्यज्ञानभक्तिगुरुभक्त्या
दिसुकृतंकार्यं॥तच्चाक्षयसिद्धयेस्यात्इति॥इतश्चभगवान्पृथिवींपावयन्नेकदाविनीतासीमनि॥सिद्धार्थोद्यानेसमवसृतःइंद्रा
दिदेवैःसमवसरणंकृतं॥उद्यानपालकेनभरतश्चक्रीविज्ञप्तःसोपिद्वादशस्वर्णकोटीः॥पारितोषिकंतस्मैदत्वा॥चतुरंगसेनयापरि
वृतः॥अनेकैःश्रेष्ठिसामंतसार्थपौरप्रमुखैःसहितःछत्रमयंनभस्तलंचामरध्वजमय्योदिशश्चकुर्वन्सैन्यपरेणपृथ्वीश्रय

त्र सर्वद्धासर्वोत्सवे ॥सर्वोद्भृष्टं स्वं भवं स्थापयन् ॥क्रमेण पंचाभिगमपूर्वकं पूर्वद्वारेण समवसरणं प्रविश्य प्रभुं प्रदक्षिणी कृत्य कृ
तांजलिपुटः स्तुतिं चकार ॥जय स्वामिन् युगादीश करुणांबुनिधे जय जय संसार कांतार ॥निस्तारक सुवत्सल ॥१॥ चिरोत्कंठापरस्याद्य
त्वं मे दृष्टिपथंगतः ॥पुरातनं शुभं कर्म तज्ज्ञाने फलितं त्वद ॥२॥ वीतरागस्य ते चित्ते ॥वसाम्येषा कथापि का त्वं चेद् वससि मच्चित्ते ॥त
त्सर्वफलितं मम ॥३॥ सुखे दुःखे पुरे रण्ये ॥जले पि ज्वलने रणे ॥ दिवा रात्रौ च मच्चित्ते ॥भवंतु चरणास्तव ॥४॥ इत्यादिस्तुतिभिः स्तुत्वा
पंचांग प्रणामं विधाय ॥चक्री शक्रस्य पृष्टे ॥तस्य लघुबंधुरिवातिष्टत ॥तत्र प्रभुर्योजनगामिन्या ॥सर्वजन साधारणया वाण्या
देशनां चकार ॥यथा सुपात्रदान श्रीसंघ ॥पूजा प्रौढ प्रभावनाः महोत्सवे ॥कृता तीर्थयात्रा सिद्धांतलेखनं ॥१॥ साधर्मिकाणां वा
त्सल्यं गुर्वागम महोत्सवः समत्वं च शुभध्यान मनंत सुकृतास्पदं ॥२॥ इत्यादि देशनां श्रुत्वा भरतेश्वरो ॥विनयेन प्रभुं प्रणम्य ॥मेघगं
भीराद्इति प्रश्नं चकार ॥स्वामिन् भगवता यत्संघपतिपदं देशनायां बहुवर्णितं ॥तत्कथं भवति ॥कियद्वा तस्य फलं स्यादिति तत्संदे
हापनोदाय पुनः प्रभुराह शृणु चक्रिन् ॥यथा ॥तीर्थंकरपदं दुर्लभं ॥तथा संघपतिपदमपि महा ॥भाग्यैरेव लभ्यते ॥तत्रापि श्रीशत्रुं
जयसंघाधिपत्यं तु अति दुर्लभतरमेव चक्रिपदं इंद्रपदं च ॥श्लाघ्यं परं ततोपि श्लाघ्यतरं संघपति पदं ॥यतः शक्रचक्रि पदे

तु पूर्वं पुण्यव्ययो भवति ॥अत्र तु अनंतं सुकृत मर्जयित्वा ॥तीर्थंकरनामकर्म लब्ध्वा ॥स्वर्गादिसुखानि भुक्त्वा ॥लोकोत्तरं पदं लभते ॥ततः शु
भवासनया ॥चतुर्विधसंघयुतो रथस्थ देवनालयेजिनबिंबानि पूजयन् महोत्सवपूर्वकं ॥ पंचविधं दानं कुर्वन् ॥दीनानाथादिकान् समुद्धरन्
॥ग्रामे२ पुरे२ चैत्यालयेषु विशेष पूजा ध्वजारोपादिकं कुर्वन् ॥गुरुसाक्षिकं जिनचैत्य ॥१ बिंब २ पुस्तक ३ साधु ४ साध्वी ५ श्रावक ६ श्राविका
७ लक्षणेषु सप्तसु क्षेत्रेषु न्यायार्जित वित्तबीजं वपन् ॥ श्रीशत्रुंजये १ रैवते वैभारे ष्टापदे सम्मेतशिखरे चार्हत्सु जां ॥इंद्रोत्सवादिकं कुर्व
न् ॥संघपतिर्भवेत् ॥तेन च मिथ्यात्विषु संसर्गो न कार्यो न च तद्व्र ॥तादिषु विश्वासः कार्यः न च परपाखंडानां निंदा वा स्तुतिर्वा कार्या ॥याव
ज्जीवं निर्मलं सम्यक्त्वं पालनीयं ॥प्रतिवर्षं साधवः साधर्मिकाश्च ॥अन्नवस्त्रालंकादिर्यथायोग्यं पूजनीयाः पाक्षिकादिपर्वसु विशेषतो
दानादिधर्मः कार्यः इत्थं शास्त्रोक्त विधिनाचरन् संघपतिः सुरासुराणां अपि पूज्यो भवति कश्चित्तद्भवएव कश्चिच्च तृतीये भवे सिद्धिं या
ति ॥इति भगवद्वचसा समुत्साहितः शक्रेण च प्रेरितश्चक्री ॥समुत्थाय भगवंतं नत्वा प्राह ॥स्वामिंस्त्वत्प्रसादाद् देहि संघपतिपदेनात्मानं कृ
तार्थी कुर्वे ॥ततः शक्रादि देवैः संघेन च सहितो विश्वरक्षनाम् ॥वासांश्च भरतस्य मूर्ध्नि विक्षिपत् तदा शक्रो दिव्यां मालां तस्य तत्पत्नाः सुभद्रा
याः कंठे क्षिपत् ॥तदनु सकल राजभिः सामंतादिभिश्च पूजितश्चक्री पूरं ययौ ॥ अथ भरतेश्वरो बहुमान पूर्वकं ॥ यात्रिकलोकानाकार्य

65/1962

त्पापशांतुअभिषेणपवित्रप्रयाणमंतांअवादयत्॥पुरमध्येजिनभवनेषुअष्टाह्निकामहोत्सवंकुर्वन्॥श्रीसंघजनान्सन्मानयन्॥अथस्व
गृहेगणधरान्आहूयसर्वोपद्रवशमनंशांतिकर्माकारयत्॥ततस्तन्मंत्रैस्तुष्टादेवाःप्रत्यक्षीभूयंयात्रानिर्विघ्नतार्थंसाहाय्यंअंगीचक्रुः॥
अत्रांतरेशक्रःसुवर्णदेवतालयस्थितां॥श्रीयुगादिजिनप्रतिमांदिव्यांचक्रिणेआर्पयत्॥अथतत्समयेश्रीभरतेशःकिंचिन्मनसिसजात
संदेहःशक्रंपप्रछ॥यदुतश्रीयुगादिस्वामीनिरवद्योपदेशदातापि॥सावद्यव्यापारंसंघपतिपदंकथंउपदिशतिस्म॥इतिश्रुत्वाइंद्रःप्राह
हेचक्रिन्॥अत्रार्थेशंकांमाकुरुय्र यत्कार्यंबहुलाभकारिअल्पमात्रारंभयुक्तंच भवति॥तत्कार्यंश्रावकाणांकर्तुंयोग्यमेव॥यथासुवर्ण
मृत्तिका॥बहुसुवर्णाअल्पमात्रमलसद्भावेपिग्राह्याभवति॥तथैवतीर्थोद्धारंसंघयात्राप्रासादप्रतिमाकारायणसाधर्मिकवात्सल्यादिकार्य
शासनो॰न्नतिचित्तशुद्धिमूर्छापहारस्तीर्थकरसंघादि॥भक्तिप्रमुखबहुगुणहेतुत्वात्॥अनंतगुणलाभाय भवति॥तन्मध्येयःकश्चिदारंभोल
गति॥सतेनैव भावनाप्राग्भारेणशुद्ध्यति॥यथाकूपस्यखननेवस्त्रशरीरादिमलिनंभवति॥तत्पुनस्तस्यैवकूपस्यजलेनशुद्ध्यति॥तथाएतदपि
तथाचहिंसापरिणामरहितस्य॥यतनयाप्रवर्त्तमानस्यशुभभावैकनिष्ठस्य॥यद्यपिकथंचित्सावद्यक्रियालगति॥तथापितस्य॥विहारगो
चरचर्यादिपरस्यसाधोरिवअल्पएवबंधःततोस्यात्॥ततोत्रानंतलाभकारणेकार्येसंदेहलेशोपिनकार्य॥इतिशक्रःतस्यसंदेहंनिवारयित्वा

उपबृंहणांकृत्वा॥चक्रिणंअनुज्ञाप्य॥स्वस्थानंगतः॥चक्र्यपिशुभदिवसेसंघसहितोयो – वर्द्धिर्वर्द्धकिकृतस्वर्णमणिमयावासेप्रस्थानार्थंउत्तर
तिस्म॥अथतत्रप्रथमंसंघस्यमध्यभागेशक्रार्पितःस्वर्णदेवतालयः तस्यदक्षिणदिग्भागेवर्द्धकिनिर्मितपौषधशालायांअनेकसाधुपरिवृ
तागणधराःततोवामभागेचक्रिणआवासमंडपः ततःपरसर्वासुदिक्षुयथायोग्यंचक्रिपुत्रबाहुबलिपुत्रादिमांडलिकसामंतादीनांको
टिशोनिवासाअभूवन्॥एवंमार्गेपिसर्वत्रसंघनिवेशः॥तत्रसंघेबाहुबलिपुत्रःसोमयशाः॥१॥विनमिविद्याधरपुत्रोगगनवल्लभः॥२॥पू
र्वदेशाधिपोवज्रनाभः॥३॥कल्याणकेनृपश्चध इत्येतेचत्वारोमहाधराःसूरिभिःसूरिमंत्रैःप्रतिष्ठिताःअन्येपिसहस्रशोमहाधरायथोचितं
बभुवुः॥अथश्रीभरतेशःशुभदिवसेसाधर्मिकवात्सल्यंसंघपूजांविधाय॥भगवंतमर्चयित्वा सुभद्रादेवीसहितोवनमालामुकुटकुंडला
दिसर्वांगीणाभरणभूषितःकृतप्रस्थानंमंगलोगजारूढःछत्रचामरशोभितःचारणश्रमणमुनिभिःकृतमांगल्यभूषणःचतुर्दिक्षुसा
मानिकमहाधरैःवृतःसुरेंद्रइवजयजीवचिरंनंदेत्यादिवचोभिर्मागधैःस्तूयमानःपुरतोप्सरोभिः॥क्रियमाणानिनाटकानिपश्यन्॥सा
मंतैर्मंडलिकैःकुमारैःमंत्रिसंघलोकैः गजाश्वरथपदातिलक्षणैश्चतुरंगसैन्यैःसाधुसाध्वीश्रावकश्राविकारूपचतुर्विधसंघेन॥नमिविन
मिवंशजैविद्याधरवृंदैरन्यैरपिबहुभिर्भूचरखेचरसमूहैश्चसमंचचाल॥अथासौपुरस्कृतसौवर्णरथस्थदेवतालयःअंतःपुरस्त्रीभिर्गीय

67/1762

मानश्रीयुगादिदेवगुणग्रामः श्रीसंघचरणन्यासैः पृथिवीपावयन् स्थाने२देवपूजागुरुपूजादिकुर्वन् ग्रामे२जीर्णचैत्योद्धरणनवप्रासाद
निर्मापणप्रतिचैत्यपूजाद्रव्यादिमोचनसाधर्मिकोद्धरणादिसुकृतानितन्वानः स्थाने॥२॥जानपदानांलोकानांनानाढौकनानिप्रतिगृ
ह्णन् दीनानाथदुःखितानां दुःखविनिवारयन्॥अर्थिभ्योवांछाधिकंदानंददान॥प्रतिदिनंयोजनावधिप्रयाणैर्व्रजन् देशानतिक्रम्यसुराष्ट्र
देशसीमांप्राप॥ अत्रांतरेचक्रिणो भ्रातृव्यः सुराष्ट्रराजपुत्रः शक्तिसिंहनृपः संमुखमागतः॥ अथतंपंचांगस्पृष्टभूतलंपादयोर्लुठंतं
चक्रीस्वपाणिनासमुत्थाप्यनिजहृदयांतरेसमालिंग्य इतिप्राह॥अहोऽस्यदेशस्यसुराष्ट्रेतिसार्थकंनाम॥यत्रत्रैलोक्यातिशा॥ माहा
त्म्यं॥ अन्यदेशोद्भवानांदुःप्रापं॥श्रीशत्रुंजयसमंतीर्थं॥तथाधन्यस्त्वमपि॥यदस्यतीर्थस्यसेवयांस्वजन्मसफलीकरोषि॥ अस्माकंतु
स्पर्शनंतावद्दूरेपरंदर्शनमपिएकवारंदुर्लभं॥इत्यादिवचनैस्तंप्रशंसयित्वावस्त्राभरणादिभिः सत्कृत्यतंपुरस्कृत्याग्रेप्रचचाल॥अथा
ग्रतःशिखरशतैर्गगनतलंभेदयंतंसंसारभयभीतानांमहादुर्गमिव॥नानामणिकिरणप्रभातिर्नभश्चित्रयंतं॥श्रीसिद्धाचलंदृष्ट्वा॥श्री
भरतेश्वरः प्रमोदपुलकांचितगात्रोविस्मयस्मेरमनाःशिरोधुन्वन्स्वपार्श्वस्थं॥ श्रीसोमयशसंप्रतिइत्याह॥अहोधन्याएतेसौराष्ट्रिकालो
काःयेसदापुंडरीकाद्रेःसमीपेनिवसंति॥अस्यगिरेस्थायापि॥अथवैतद्गिरिनिर्गतःपवनोपिस्पृष्टःसन्महापापानिनिराकरोति॥

अहोएतत्तीर्थस्यदर्शनान्ममनः॥तथैवप्रसन्नंजातं॥यथाहंनाना मियदनादिकालसंचितंसर्वपापमलंमयाप्रक्षालितं॥पशुपक्षिवृक्षादयो
पिनिधन्याःस्वल्पसंसारायेषांअत्रतीर्थेस्थितिः॥अस्माकंतुजन्मजीवितव्यंच॥एतत्तीर्थदर्शनात्॥अद्यैवसफलंजातं॥इत्यादितीर्थप्रशं
सांकुर्वन्॥हस्तिस्कंधादवतीर्यश्रीनाभनामानंगणधरंप्रतिनत्वा॥इतिप्राह॥स्वामिन्अयंपर्वतः॥कथंपूजनीयः॥अस्यप्रथमदर्श
नेकिंकिंकर्त्तव्यं॥तन्ममुपदिशन॥ततोअवधिज्ञानीगुरुःप्राह॥हेचक्रिन्॥दर्शनमात्रादेव॥असौगिरिर्नमस्करणीयः॥यःकश्चि
त्प्रथमंएतद्दर्शनस्यवार्त्तामपिनिवेदयति॥तस्मैसर्वांगाभरणादियथाशक्तितोषिकंदानंदीयते॥तत्पुण्यवृद्धयेभवतिततश्चस्वर्ण
मणिरत्नाद्यै॥स्तंदुलैर्वायथाशक्त्यावर्द्धाप्य॥वाहनानित्यक्त्वापंचांगेनभूतलंसंस्पृश्यवरंतीय॥अथतद्दिनेसंघपतिर्महाधरैःसहकृ
तोपवासःस्नात्वापवित्रवस्त्राणिपरिधायभार्ययासहितोदेवालयेजिनपूजांकृत्वा॥ततःशत्रुंजयसंमुखंसंघाद्बहिर्निर्गत्यपवित्रभू
मौआवासंवस्त्रमंडपंचाययाशक्तिविधायसौवर्णधूपदहनंकरेधृत्वा॥धवलमंगलगीतगानसकलवादित्रवादादिमहोत्सवेनसं
घलोकैःपरिवृतोमंडपांतःप्रविश्य॥तत्रभूमिंसुगंधिनायक्षकर्दमेनालिप्यकुंकुमेनगहूलिकांकृत्वा॥तदुपरिमुक्ताफलैस्तंदु
लैर्वास्वस्तिकुर्यात्॥ततश्चवादित्रादिशब्दान्निवार्यगुरुंपुरस्कृत्य॥तत्पृष्ठानुगतःसंघपतिस्वयंपूजोत्सवंकुर्यात्॥तत्रअष्टौ२

64/1962

राद्दे ॥२॥ ग्रर्ह सिद्दे ३ अथनानाविधैर्नैवेद्यैः सुवर्णरूप्यैर्वस्त्रैः पुष्पमालादिभिः प्रथमं पूजयेत्॥ ततश्चसाधर्मिकवात्सल्यसंघभक्ति
नानासंगीतोत्सवादि कुर्यात्॥ किंचमहाधरैः सामंतैरन्यैरपिमहर्द्धिकैः संघलोकैर्वस्त्रभूषणसुगंधमाल्यादिभिः सभार्यः संघपतिः
पूजनीयः॥ तत्रदिने दुर्ध्यानविकथाप्रमाद निद्रादिपरिहारात् सर्वथात्रिकैराशिषान्नभोजिभिर्जिनगुणगान धर्मकथादितत्परैः स्था
तव्यमिति॥ श्रुत्वाश्रीभरतेशस्तत्रैवसंघनिवेशंकारयित्वा॥ स्वयंपट्टदेव्यामहाधरैश्चसमंस्नातः शुचिश्वेतवस्त्राधरोदेवतालयेपु
ष्पाक्षतस्तुत्यादिभिः पूजांकृत्वासंघाद्दहिः शुचिप्रदेशेमंडपांतयथोक्तविधिनायक्षकर्दमादिमंडलेमुक्ताफलस्वस्तिकंविधाय॥ त
दनंतरं सुवर्णस्थालधृतैर्नानानैवेद्यैः स्वर्णरूप्यमणिरत्नसमूहैर्वस्त्रमाल्यादिभिश्चपूजांचकार॥ इत्येवंगुरुवचनानुसारेणसर्ववि
धिंकृत्वापंचांगप्रणिपातेनतीर्थराजंनमस्कृत्य॥ इत्थंस्तोतुंप्रचक्रमे॥ यथामूलग्रंथे॥ धरणेंद्रमुखानागाः पातालस्थानवासिनः॥ सेवं
तेयंसदातीर्थ॥ राजंतस्मैनमोनमः॥१॥ चमरेंद्रबलींद्राद्याः सर्वेभवनवासिनः॥ सेवंतेयंसदातीर्थराजंतस्मैनमोनमः॥२॥ किंनरकिं
पुरुषाद्याः किंनराणांचवासवाः॥ सेवंतेयंसदातीर्थराजंतस्मैनमोनमः॥३॥ राक्षसानामधीशाश्च॥ यक्षेशाः सपरिछदाः॥ सेवंतेयंस
दातीर्थराजंतस्मैनमोनमः॥४॥ अणपन्नीपणपन्नीमुखाव्यंतरनायकाः॥ सेवंतेयंसदातीर्थराजंतस्मैनमोनमः॥५॥ ज्योतिषांवासवे॥

चंद्रसूर्यावन्येपिखेचराः॥ सेवंतेयंसदातीर्थराजंतस्मैनमोनमः॥६॥ मनुष्यलोकसंस्थानावासुदेवाश्चचक्रिणः॥ सेवंतेयंसदातीर्थराजंत
स्मैनमोनमः॥७॥ इंद्राःपेंद्रादयोप्येते सिद्धाविद्याधराधिपाः॥ सेवंतेयंसदातीर्थराजंतस्मैनमोनमः॥८॥ ग्रैवेयकानुत्तरस्थामनसात्रिदि
वौकसः॥ सेवंतेयंसदातीर्थराजंतस्मैनमोनमः॥९॥ एवंत्रैलोक्यसंस्थाना॥ एतेनरसुरासुराः॥ सेवंतेयंसदातीर्थराजंतस्मैनमोनमः॥१०॥
अनंतमक्षयंनित्यमनंतफलदायकं॥ अनादिकालजंयच्चतीर्थंतस्मैनमोनमः॥११॥ सिद्धास्तीर्थकृतोनंतायत्रसेत्स्यंतिचापरे॥ मुक्ति
लाशृंगंयच्चतीर्थंतस्मैनमोनमः॥१२॥ इमांस्तुतिंपुंडरीकगिरेर्यः पठितासदा॥ स्थानःस्थोपिसयात्रायाल भतेफलमुत्तमं॥१३॥ इत्ये
वंभक्तिनिर्भरवचोभिस्तीर्थराजंस्तुत्वाप्रमोदपुलकितांगः सपरिवारंगणधरंनत्वागुरूणापि पृष्टस्वदानेन॥ प्रवर्द्धितोत्साहः तद्दि
वसंगुरुमुखात्तीर्थमाहात्म्यश्रवणेनभगवद्गुणगानादिधर्मकथातिश्चनिरगमयत्॥ अथप्रभातेचक्रीसंघसहितस्तीर्थकरंगुरुंचन
त्वापारणंचकार॥ तत्रैवस्थानेशत्रुंजयतलहट्टिकारूपेचक्रवर्ती॥ तीर्थप्रथमंदर्शनात्॥ आनंदः संजातइत्यर्थसूचकेनआनंदपुरेति
नाम्नानगरंवासितुंवार्द्धकिरत्नंप्रतिआज्ञांदत्तवान्॥ ततोवर्द्धकिनातत्सुरंविनीतापुरीसदृशं॥ परिखाप्राकाराट्टालिकादिशोभितं॥ सुव
र्णमणिनिर्मितानेकप्रासादसौधहर्म्यचंद्रशालागवाक्षजालिकातोरणपताकादिप्रभासमूहैर्गगनतलंद्योतयत्॥ वापीकूपतडागसरो

71
1962

दीर्घिकोद्यानवाटिकारामप्रपादेवकुलादिभीरमणीयपरिसरं॥षट्‌खंडभरतोत्पन्नसारक्रियाणकैः पूर्णं विनिर्ममे॥तस्यच मध्यभागेस्व
र्णमणिशि॥खरस्थ ध्वजांचलैर्गगनतलमुल्लिखन्॥ श्रीयुगादीशजिनप्रासादः॥समस्तपुरश्रिया॥अवतंसकइवशुशुभे॥एवंविधं त
न्नगरंवासयित्वाश्रीभरतेशेन प्रसादपदे सुराष्ट्रदेशाधिपाय॥श्रीशक्तिसिंहायदत्तं॥ अद्यापितत्पुरं॥सकलसंपदांनिवासभूतं॥अ
त्यंतरमणीयशोभंभानाविलासनिपुणनागरिकजनाकीर्णं॥वडनगरमितियथार्थनामकंविख्यातमस्ति॥तत्रवार्द्धकिनावासितत्वा
त्॥लोकाअपिविश्वकर्मणानिर्मितं॥एतदितिवदंति॥अथचक्रीतीर्थयात्रोत्सुकःसपरिकरं॥श्रीनाभगणधरंपुरस्कृत्यस्वयंतत्स्थ
ष्टानुगः सकलसंघलोकैरनुगम्यमानोनिर्निमेषं॥गिरिराजदर्शनोत्कंठयाउर्द्ध्ववदनः पर्वतमारोढुंप्रचक्रमेतदाच॥सधवस्त्रीणांमं
गलगीतैः॥तंभातिस्वादमृदंगतालकंसालादिध्वनिभिः तत्प्रतिच्छंदकैश्चसर्वजगदपिचाद्वैतशब्दमयमिवअगण्यपुण्यप्रमोदपूरि
तमिवभातिस्म॥इत्येवंउत्तरदिग्मार्गेणस्वयंचक्रवर्त्ती आरोहत्॥अपरेसंघलोकास्तुयथासंभवं॥अन्यान्यमार्गेणाद्रिंपूर्विकया
आरोढुंतिस्म॥अथतेषुसुधर्म्मगणधरशिष्यश्चित्तुणोनाममुनि॥तपःशक्त्यानेकलब्धिनिकेतनंबहुभिः संघलोकैः परिवृतः प
श्चिमदिग्मार्गेणतंगिरिंआरोहत्॥तत्रतेलोकायावद्‌दशयोजनीं आरूढाः॥तावत्‌जलाभावेतृष्णयापीडिताः कंठगतप्राणाः

संतोमुनिः प्राहुः भगवन् तृष्णावशात्‌अस्माकंप्राणा भगवच्चरणांभोजं॥अद्यैवत्यक्ष्यंति॥अंत्रार्थेनकिंचिदस्माकंबलम
स्ति॥अतस्त्वमेवशरणं॥ इत्यादि॥तेषांवचोभिर्दयार्द्रचेतसामुनिनास्वस्यपानायस्वपात्रेरक्षितंपयस्तेषांदर्शितंतैरुक्तं॥एतावता
जलेनास्माकंबहूनांकथंतृष्णोपशांतिःस्यात्॥ततोमुनिःसंघभक्तेर्महाफलंजानन्॥तेनवारिणातत्रतपोलब्ध्याकृत्वा॥सरोवरंकृतवा
न्॥तत्रस्वच्छजलापूर्णसरसियथेच्छेपयः॥पीत्वातेसर्वेपिजनाविगततृष्णाःसुखिनोबभुवुः॥चित्तुणसाधुनिर्मापितत्वात्‌चित्तुण
सरइतितत्प्रसिद्धंजातंयत्‌संघलोकसांनिध्यार्थंमहातपस्विनाकृतं॥तस्मात्‌एतत्सरोजलंमहापावनं॥दर्शनात्‌स्पर्शनात्‌स्नानात्‌॥भ
गवत्स्नानाभिषेकतश्चमहापापापहं यतः॥स्नात्वातस्यैवपयसा॥प्रक्षाल्यचजिनक्रम्॥एकावतारीसंभूय॥नरोभवतिमुक्तिभाक्॥१॥इ
तिमूलग्रंथे॥ततःसंघलोकस्तेनवारिणाविगतखेदः॥सुखेनप्रथमंशृंगंआससाद॥इतश्चश्रीभरतेशउत्तरजिग्‌मार्गेणव्रजत्॥पुर
तोयोजनप्रमाणविस्तारं॥साक्षात्नंदनवनोपमंउत्तरदिग्भागमुखमंडनंलक्ष्मीलीलाविलासास्थंवनंअपश्यत् तन्मनोहरतामोहित
मानसंसादरवीक्षमाणंचक्रिणंवीक्ष्यप्रस्तावज्ञः॥ ॥शक्तिसिंहउवाच॥ ॥स्वामिन्‌इतःपश्यतां॥एतेसहकारबीजपूरकना
रंगपूगपनसप्रभृतिवृक्षाः फलभरनमितास्त्वांप्रणम्यढौकनंकुर्वंतीव॥इतश्चचंपकबकुलमल्लिकाजातीयूथिकादयः॥कुसुमभ

73
1967

रवः कुसुमवर्षिणः कुसुमैस्त्वां वर्द्धापयंतीव॥ इतश्चएता: कदल्यः पवनांदोलितैर्दलैः तीव्रतपतप्तं॥ संघलोकं जयंतीव॥ इतश्चैतद्
नं॥ पक्षिणाकल — स्वागतं करोतीव॥ ततोऽत्रैव वनेनिवासः कर्तुंयुज्यते किंचमध्याह्नार्कमरीचितापाकुला: संघलोका: सुस्नि
ग्धछायासुवृक्षावलीषु॥ सुखछशीतोदकासुनदीषुचनिर्वापयंतुसर्वतापं॥ इत्यादिशक्तिसिंहवचोभिः प्रसन्नमनाश्चक्रीतत्रैववने
चवर्द्धकिना॥ आवासान्॥ अकारयत्॥ ततश्चजलक्रीडाकुसुमावचयनृत्यगीतांदोलनादिक्रीडापरेषु॥ संघलोकेषु॥ चक्रवर्त्यपिस्व
यंशक्तिसिंहेनसमंवनशोभांवीक्षितुंययौ॥ सचतत्रविविधवनशोभांविलोकयन् अग्रतःस्वछजलापूर्णमेकंकुंडंदृष्ट्वाशक्तिसिंहंप्र
तितदुत्पत्तिस्वरूपंप्रभावंचअपृछत्॥ सप्राह स्वामिन्॥ एकदाअत्रश्रीतातपादाः समवासरन् ततोऽहंवंदितुमागतःयावदहंभगवतः
पार्श्वेतीर्थमहात्म्यंश्रोतुमनाअस्मितावत्तत्रायातेनशक्रेणश्रीशत्रुंजयमहात्म्यमविस्तरंप्रकटीचक्रे॥ तन्मध्येएतत्कुंडस्यमहा
त्म्यंयथामयातन्मुखात् श्रुतं॥ तथाकथयामि॥ तथाहि॥ सर्वतीर्थावतारारव्यं॥ एतत्कुंडंपूर्वंउत्सर्पिण्यांकाले॥ अतीतायांचतुर्विंशत्यां
केवलज्ञानीनामाप्रथमतीर्थकरोबभूव॥ तस्यैवप्रासादेन्यदायात्रार्थी॥ सौधर्मेंद्रःसमायातःतेनभगवतःस्नानकरणार्थंगंगासिंधु
पद्मद्रहादितीर्थानाजलान्याहृत्यइदंकुंडंनिर्मितं॥ अस्यजलेनस्नात्वाअस्यैवजलेनभगवतःस्नानंकृत्वाजनःसर्वपापेभ्यो

च्यते॥ सर्वतीर्थफलंचलभते॥ तेनैवस्नानजलेनस्पर्शमात्रात् स्थावर१जंगम२कृत्रिम३चेतित्रिविधमपिविषंनश्यति॥ कुष्टादयोमहारो
गाश्चतत्क्षणाद्विजीर्यंतेदेहेच॥ समधिकाकांतिरारोग्यताचभवति॥ एतच्चबहुकालातिक्रमादिदानींविसंस्थुलंजातमस्तिपरं॥ अस्यप्रभा
वस्तुप्रतिदिनंवर्द्धमानएवास्ते॥ इत्येवंशक्तिसिंहोक्तंतस्यमाहात्म्यंश्रुत्वापरमप्रीतमनाश्चक्रीपुनर्वर्द्धकिनातत्कुंडंसज्जंचकार॥ ततःप्र
भृतितत्कुंडंलोकेभारतंकुंडमितिप्रसिद्धिंप्राप॥ अथचक्रीतत्रसंघावासितांनिशांस्थित्वाप्रभातेतत्रैवकुंडेसपत्नीकःस्नात्वापवित्र
वस्त्रालंकारधरःप्रस्थानभंभावादयित्वासपरिजनःप्रथमंशिखरंरोह॥ अत्रांतरेसुधर्मेशोपित्सेदभक्तिभ्यांप्रेरितोविमानमारुह्यत
त्रागात् तत्रभरतेशंसमालिंग्य॥ श्रीनाभगणधरेणसमंतौशक्रचक्रिणौप्रथमंशृंगंभक्त्यापस्पृशतुः॥ अथशक्रेणसमंचक्रवर्त्तीरा
जादनीक्षीरंरूरंतीप्रदक्षिणीकृत्यतस्याएवतलेपूर्वंशक्रेणकारितांमणिमयपीठस्थितांश्रीभगवतःपादुकांनत्वायरूकर्द्दमैःपा
रिजातकादिपुष्पैश्चापूजयत्॥ ततश्चपादुकाविषयेसारुाद्भगवद्भावमेवांगीकृत्यस्तुतिप्रणतिभावनादिभिःस्वजन्मसफलतांमेने
अत्रावसरे॥ सुधर्मेशश्चक्रिणंप्रतिइतिप्राह॥ अयतांचक्रिन्नवावसर्पिणीकालेप्रायःकालानुभावादेवलोकेषुगुणानांहानिर्द्भवि
ष्यति॥ ततोऽग्रेदुःषमाकालीनालोका: श्रद्धाहीनाभविष्यंति॥ यद्यपिअसौगिरिरेवअनंततीर्थकरपादपवित्रितत्वात् परमं

75/1962

तीर्थमस्ति॥ तथापितेश्रद्धाहीनाः प्रासादंप्रतिमांच विनानश्रद्धास्यंति॥ यदा२येषांतीर्थकराणां॥ अत्रगिरौस्थितिर्भवति॥ तदा२तेषां
मूर्त्तयोभवंति॥ सांप्रतंश्रीयुगादिजिनोनयति॥ तस्यैवप्रासादस्तवकर्तुंयुज्यते॥ यथाश्रीबाहुबलिनातक्षशिलायां॥ चतुरशीत्यांमं
डपैः प्रासादकारितोस्ति॥ तथात्रापिकियतामितिशक्रवचनात्॥ प्रवृद्धभावभरश्चक्री॥ वर्द्धकिंसमादिदेशसोपिश्रीसोमयशसं
नृपंप्राप्य — तत्कथितप्रकारंत्रैलोक्यविभ्रमंनामप्रसादं॥ सुवर्णमणिरत्नमयंएककोशोच्चं॥ सार्द्धकोशदीर्घधनुसहस्रपृथुलंचकार
तत्रचप्रासादेपूर्वदिशिसिंहनादमुखा॥ एकविंशतिमंडपाबभुवुः॥ दक्षिणस्यांभद्रशालप्रमुखाएकविंशतिः पश्चिमायांपुनर्मेघना
दप्रमुखाएकविंशतिः॥ तथैवोत्तरस्यांश्रीविशालाद्याएकविंशतिः॥ एवंसर्वसंख्ययातेचतुरशीतिसंख्यामंडपा॥ मणितोरणमालामं
डिताग्रभागाः शुशुभिरे किंचलक्षगोगवाक्षाः रत्नमयपीठवलानकाद्यालकादयश्च विशेषतः शोभांवर्द्धयामासुः॥ तत्रप्रासादेचतुर्दिगभि
मुखारत्नमय्यश्चतस्रोभगवन्मूर्त्तयः स्थापिताः प्रत्येकंतासांद्वयोः पार्श्वयोः पुंडरीकमूर्त्तीअधिकतरद्युतीशुशुभाते॥ कायोत्सर्गस्थितस्या
पिभगवतोमूर्त्तिस्तत्पार्श्वयोश्चकर्षितखड्गहस्तौनमिविनमीसमवसरणस्थितंचतुर्मुखंदेशकंभगवंतंतस्याग्रतः कृतांजलींस्वमूर्त्तिं
तथाश्रीनाभिमरुदेव्योः अन्येषामपिपूर्वजानांसुनंदासुमंगलाब्राह्मीसुंदरीबाहुबल्यादिबंधूनां॥ तथाअजितादितीर्थकराणांचस्व

स्वदेहप्रमाणवर्णलांछनशासनदेवतादियुताः प्रासादसहितामूर्त्तीः श्रीभरतेशोवार्द्धकिनाकारयत् एवंतत्रतीर्थेचैत्यमालिकांविधाय
पुनस्तत्संस्कारार्थंचित्रकरान्रक्षकान्पूजकांश्चआदिशत्॥ पुनः प्रभोः शृंगारार्थंमुकुटकुंडलाद्याभरणानि तथाभृंगारस्थालकलशछत्रचा
मरारात्रिकरत्नदीपधूपघटीचंगेरिकादीनि पूजोपकरणानिमुमोच तत्रतीर्थेगोमुखोनामयक्षः सुवर्णवर्णश्चतुर्भुजः वरदानाक्षमाला
यांकितदक्षिणभुजद्वयः वामभुजाभ्यांबीजपूरकपाशधरोगजवाहनश्चस्वयंरक्षकोभवत् अथप्रतिचक्राचक्रेश्वरीत्यादिनामभिः प्रसिद्धा
स्वर्णवर्णागरुडासनाअष्टभुजावरदानाक्षमालाचक्रपाशधरैर्दक्षिणभुजैः धनुर्वज्रचक्रांकुशधरैर्वामहस्तैश्चशोभितातीर्थरक्षाकारिणी
शासनदेवताचाभवत् अथतत्रशुभदिवसेप्रतिष्ठार्थं श्रीबाहुबलिश्रीनाभनमिविनमिप्रमुखाः सूरयः शक्राद्यादेवताः चतुर्विधसंघश्च
सर्वेमिलिताः ततः इंद्राज्ञयाआभियोगिकसुरैः गुरूपदिष्टः सर्वौषधिवासचंदनाक्षतादिः सर्वोपिपूजाप्रतिष्ठासमुदायः समानीतः त
तस्तेसूरयः संघेनसमंसूरिमंत्राभिमंत्रितान्वासाक्षतान् ध्वजदंडेषुप्रतिमासुचअक्षिपत् सर्वतीर्थजलैः सर्वौषधिभिश्चशास्त्रो
क्तविधिनानावादित्रधवलमंगलगानादिपूर्वकंप्रतिष्ठोत्सवंकृत्वा ततश्चक्रीजन्मस्नात्रमिवस्वर्णरत्नकलशैर्मंत्रपूतैः स्नातोत्स
वंविधाय ततः कुंकुमचंदनादिभिः पारिजातकमंदारादिकुसुमैश्च संघेनसमं पूजयित्वाततोभगवतोग्रेअक्षतैः फलैर्दीपैर्धूपै

नैवेद्यैर्जलैश्च तेसर्वेपि प्रकारं च कुः॥ ततश्चारात्रिकावसरे श्रीभरतेश्वरोआरात्रिकं करे धृत्वा शक्रादिभिः संघलोकैश्च चंदनति
लकपुष्पवृक्षादिभिः पूजितः॥ जयजयशब्दमिश्रितसर्ववाद्यवादनपूर्वकं आरात्रिकं चकार ततो मंगलदीपं विधाय पंचांगस्पृष्टभूतलप्र
णिपत्य हर्षोल्लसद्रोमांचः कृतांजलिः स्तुतिं चकार यथा काहं बुद्धिधनैर्हीनः क्व चानंतगुणसागरः॥ तथापि त्वां स्तवीम्येष त्वद्भक्तिमुखरीकृतः
॥१॥ शत्रुंजयशिरोरत्नं श्रीनाभिकुलभास्करं॥ स्वर्गापवर्गव्यापारनिदानं त्वां विभो नुमः॥२॥ नाभ्यर्थये स्वर्गसुखं न मोक्षं न नरश्रियं॥ सदा त्व
त्पादपद्मानि वसंतु मम मानसे॥३॥ इत्यादि विशेषस्तु मूलग्रंथोक्तो ज्ञातव्यः॥ एवमन्या मरुदेवीब्राह्मीसुंदरीणां स्तुतयोपि मूलग्रंथोक्ता
ज्ञातव्याः॥ एवं भगवंतं स्तुत्वा॥ ततो मरुदेवीब्राह्मीसुंदरीप्रभृतीनां चैत्येषु तत्तत्प्रतिमाः पूजयित्वा स्तुत्वा अन्या अपि सर्वा जिनप्रतिमाः
पूजयामास ततः स्वर्णरूप्यवस्त्रनिर्मितान् गणधरैः प्रतिष्ठितान् महाध्वजान्॥ सर्वप्रासादेष्वारोपयामास॥ ततः कृतोत्तरासंगश्चक्रव
र्तीगुरुं प्रदक्षिणीकृत्य चंदनेन कृत्वा गुरोः पादौ अपूजयत् गुरुरपि अनामिकांगुल्या चंदनं लात्वा श्रीसूरिमंत्रप्रतिष्ठितं दृष्टिदोषसं
शमनं गुरुकरसरोजजातं तिलकं ते मंगलं दधातु॥१॥ इत्येनं श्लोकं पठन् श्रीभरतेशस्य भाले तिलकं चकार॥ चक्र्यपि पुनर्वंदित्वा
गुरुमुखात् धर्मलाभाशिषं प्राप्य॥ संघसहितो देशनां श्रोतुं तस्थौ॥ ततः श्रीनाभिगुरुस्तेभ्य इति देशनां ददौ॥ भो भव्याः अत्र संसार

त एव धन्याः सुलब्धनरभवाः कृतकृत्याः पुरुषाः ते रेव पुरुषैरियं भूमिर्भूमिताप विवितावये भक्त्या श्रीजिनेश्वरं पूजयंति यदेकातपत्रंसा
म्राज्यं याच रूपलावण्यसौभाग्यादिसंपत् यच्च विद्यामहत्वप्रभुत्वतेजोबलगांभीर्यादिगुणाधिक्यं यच्च नैरुज्यस्वजनधनसन्मानादिसुखं च
यच्च कीर्तिकांतिप्रतापदीर्घायुरारोग्यतादिसंभारः परलोके च स्वर्गसुखं मोक्षसुखं वा प्राणिनां संपद्यते। तत्सर्वं श्रीभगवद्भक्तिकल्पलतायाए
व फलभूतं ज्ञातव्यं यो भव्यो घृतेन दुग्धेन शर्करया चंदनेन वारिणा च इति पंचामृतेन जिनं स्नपयति॥ स स्वर्गलोके भृत भुभ्भवति एकवारम
पि श्रीजिनपूजनेन॥ अनेकभवार्जितं पापं क्षपयंते यः प्राणी भगवत्पादाग्रे चतस्रः कुसुमांजलीर्मुंक्ता॥ तीर्थोदकैः स्नानं कुर्यात्॥ तस्य चतुर्ग
तिदुःखं न भवति अष्टप्रकारपूजाभिः पूजयन् अष्टकर्मक्षयं कुरुते॥ अष्टमहासिद्धिश्च वशीकुरुते॥ अत्र तीर्थे जिनभवनः॥१॥ बिंबप्र
तिष्ठा॥२ ज्ञान ३ साधु ४ साध्वी ५ श्रावक ६ श्राविका ७ रूपेषु सप्तसु क्षेत्रेषु ये भव्या वित्तबीजं वपंति॥ ते स्वल्पेनैव कालेन सप्तरज्जुलोकोपरि
स्थितं मोक्षसुखं लभंते॥ तत्रादौ रत्नस्वर्णरूप्यादिभिर्यथाशक्त्या काष्टपाषाणादिभिर्वा ये भगवतः प्रासादं कारयंति किंच तृणमयमपि
ये जिनगृहं कारयंति ते जना विमानेषु महासौख्यानि विलसित्वा मोक्षभाजो भवंति॥ यदा मूलग्रंथे॥ काष्टादीनां जिनावासे यावंतः परमा
णवः तावंति पल्यलक्षाणि तत्कर्ता स्वर्गभाग् भवेत्॥ नवीनचैत्यकरणे यत्फलं भविनां भवेत्॥ तस्मादष्टगुणं पुण्यं जीर्णोद्धारे विवेकिनां

शत्रुंजयादितीर्थेषु प्रासादान्प्रतिमाश्चये॥ कारयंतिहितत्पुण्यंज्ञानिनोयदिजानते॥३॥ तथामणिस्वर्णरूप्यादिमयानिकाष्टपाषाणलेप्या
दिमयान्यपियथाशक्त्याजिनबिंबानिकारयंति॥ तेषांपुण्यफलंसर्वज्ञएवजानाति॥यदाह॥ एकांगुष्टादिसप्तशतांगुष्टावधिप्रभोःयःका
रयतिबिंबानिमुक्तिश्रीस्तस्यवश्यगा॥१॥ एकांगुलमितंबिंबंनिर्मापयतियोर्हतांएकांतपत्रंसाम्राज्यंसलभतेसभवांतरे॥२॥ यथामेरोरधिकः
पर्वतोनास्तिकल्पवृक्षादधिकोवृक्षोनास्ति॥ तथाजिनबिंबनिर्माणादधिकोधर्मोनास्ति॥ येविधिनाजिनबिंबप्रतिष्ठाकारयंति॥ तेषांस्वर्गमोक्षसं
पदोदास्यइवगृहांगणेलुठंतितीर्थकरत्वंचप्राप्नुवंति॥ यावंतंकालंतद्बिंबंसुरनरैःपूज्यमानंतिष्टतितावंतंकालंतस्यबिंबस्यकारयिता तस्य
फलस्यविभागीभवतिप्रतिष्टिता॥ तामपिबिंबानांयथाशक्त्याविशेषतोदेवद्रव्यादिकरणेनयःपूर्वदर्शनंकुरुतेतस्यलोकद्वयेपिमहाफलं
भवति एतद्बिंबप्रतिष्टादिशुभकार्याणियःस्वयंकरोतियश्चकुर्वंतंप्रेरयतितेषांतुल्यमेवपुण्यफलंजिनैःप्रोक्तंएवंअशुभकर्मकरणेपा
पफलमपितुल्यमेवततःशक्तिमद्भिःप्रतिष्टादिकार्यस्वयंकर्तव्यंमाहाय्यदानादिनाअन्यैरपिकारयितव्यं॥ अशक्त्यातुअनुमोदनापि
कार्या॥ किंचयत्रयत्रदेशेनगरादौवाभगवतोबिंबंप्रतिष्ठितंभवतितत्रतत्रदेशादौनदुर्भिक्षंनरोगाःनचसप्तापिईतयःप्रभवंति॥ इ
तितथाज्ञानावरणीयकर्मक्षयार्थंज्ञानभक्तिःकार्यातत्रपुस्तकलेखना॥ पुस्तक॥ प्रावेष्ट॥ कवलिका॥ कंबीकावचणिकाजपमालादि

कारापणंबहुश्रुतेभ्यस्तत्तद्ज्ञानोपकरणादिदानधूपदीपचंदनादिपूजा॥ एषाद्रव्यतोज्ञानभक्तिः श्रवणंश्रद्धानंपठनंपाठनंज्ञानाभ्यास
पराणांसाहाय्यदानंशासनभक्तिःबहुश्रुतानांभक्तिश्चेत्याद्या भावतोज्ञानभक्तिःएवंअत्रतीर्थेज्ञानभक्तिंकुर्वन्जीवोज्ञानावरणाद्या
दिकर्मक्षयात्केवलज्ञानंमासाद्यमोक्षंलभते॥ तथाचतुर्विधस्यसंघस्ययाभक्तिःक्रियते॥ तदेतत्क्षेत्रचतुष्टयंगतिचतुष्टयदुःखक्षयंक
रोति॥ यथामूलग्रंथे॥ चिंतामणिःकरेतस्यःकल्पवृक्षस्तदंगणेकामधेनुःपुरस्तस्यसंघोभ्यागतियद्गृहे॥१॥ निःकलंकंकुलंतस्यजननीतस्यभा
ग्यभूःकरगातस्यलक्ष्मीःस्यात्संघोभ्येतियदंगणे॥२॥ फलतांबूलवस्त्रैश्चभोजनैश्चंदनादिभिः॥ श्रीसंघपूजितोयेन॥ तेनप्राप्तजनुःफलं
३॥ संघपादरजोयस्यशिरःस्पृशतिसेवनात्तीर्थयात्राफलंतस्य॥ पवित्रस्यभवत्यहो॥४॥ इत्येवंसप्तसुक्षेत्रेषुअत्रतीर्थेयत्॥२॥ धनं
व्यापार्यतेतत्तत्तीर्थमहात्म्यतोदिनेदिनेकोटाकोटिगुणांवृद्धिंलभते॥ इत्यादिविविधोपदेशमयींदेशनांगुरुमुखात्श्रुत्वा श्रीभर
तेशोत्फुल्लमन्मानसोगुरून्सपरिकरान्वंदित्वास्वस्थानंगत्वा॥ भोजनकरणानंतरंक्षणंविश्रम्य॥ ततःसोमयशाःशक्तिसिंहसुषेणा
द्यैःपरिवृतःशकसमीपंतगामशक्रोपिचक्रिणमायांतवीक्ष्यसादरं॥ अभ्युत्थानंकृत्वानिजार्द्धासनेनिवेश्य॥ मधुरोक्तिभिरितिप्राह॥ अ
मात्कश्रीयुगादीशःपरमपूज्यः॥ यतोवयंतस्यकिंकराःपरंत्वंकृतस्यैवत्येष्टपुत्रःचक्रवर्तीचचरमशरीरीतीर्थोद्धारकःसंघपतिश्चेतिक

रणात्॥ हेभरतेश अस्माकंलघुर्त्तासमोवाप्रज्योवाभवसि॥ अतस्त्वयिसन्मानदानंयुक्तमेव॥ किंचत्वयाजिनप्रजायांयोमार्गः प्रवर्तितः॥तंथा
लोकोपितेनमार्गेण अनुवर्तिष्यते॥ परंत्वंतुमयाकृतांइमांप्रजांअनुकुरुइतिचक्रिणातथेतिप्रतिपन्ने॥ अथशाक्रः सुरैः सहविधिवद्भगवं
तंविविधैःकुसुमादिभिःप्रजयित्वाततःसकलसुरैःसमंयथेच्छंअद्भुतमहिमक्रियासमधिकाधिकदेवद्रव्यदानपणेनविविधधनोत्ववैर्गृ
हीतंभगवदाशिषामाल्यंशक्रःस्वकंठेनिक्षिपततोदेवबृंदैर्युतोविमानारूढःक्षीरोदधौगत्वा तज्जलैःकलशानापूर्यविविधोत्सवैःसमा
गत्य भगवतःवंचकार॥ ततःप्रभृतिलोकेइंद्रमालपरिधानंइंद्रोत्सवादिप्रवृत्तिर्जाताय॥ यद्यत्कार्यंमहापुरुषैर्विधीयते॥ तत्तत्कार्यंतद
नुवृत्यालोकोपिकुरुते॥ यत्तदाभरतेशेनप्रजाभक्त्याविहिशक्रेणचआदृता॥ ततोलोकेपिनानामंगिभिःसाद्धिविधाप्रजाप्रसिद्धिंप्राप्ता
ततश्चक्रीगुरुप्रजांसाधर्मिकप्रजांचविशेषतःकृत्वा॥ स्वर्णमणिरत्नालंकाराद्यैः याचकानांवांछितंप्रूरयित्वा॥ तीर्थस्यप्रजार्थंसुराष्ट्रा
देशंमुमोच॥ ततःप्रभृतिसुराष्ट्रादेशोदेवदेश॥ इतिलोकेप्रसिद्धः॥ अथान्यदानेकहंससारसचक्रवाकादिसेवितांपूर्वसमुद्रगामि
नींविकासितकमलवनविराजितानेकगंभीरह्रदशोभिता॥ उभयोःशृंगयोर्मध्यरेखामिवस्थितांशत्रुंजयींनदींसमालोक्यभरतेशःशक्र
पप्रच्छ इयंकानदी भ्योथतिपावना॥ अस्याह्रदानांमहात्म्यं॥ यदिपृथक्॥ २॥ कीर्त्यतेतदाबृहस्पतिरपिवर्षशतेनपारंनप्राप्नोति॥ ४

र्वतेश्चेतोत्सर्पिण्यांकेवलज्ञानीतीर्थकरस्यस्नानकरणार्थं॥ ईशानेंद्रेणवैताढ्यमूलात्भुवोनर्वाहिनीगंगाशत्रुंजयतलहृद्विकायांप्रक
टीकृता॥ ततोलोकेशत्रुंजयीतिख्याता॥ अस्याजलस्पर्शात् कांतिकीर्तिधृतिपुष्टिसमाधयःसर्वसिद्धयश्चसंनिहिता॥ भवेयुःहंससारस
चक्राद्याःपक्षिणोपियेस्याजलंस्पृशंति॥ तेपिपापमलववर्जिताःस्युःएतस्यामृत्तिकापिंदेहेपिलिप्तासर्वरोगान्निहंतिपुनःएतस्यामृ
त्तिकाःकादंबगिरिरोषधीभिर्ध्माताःसुवर्णतांप्राप्नुवंति॥ येचकुष्टादिमहारोगिणःषण्मासान् यावत् एतस्याजलेस्नातिएतत्तीरवृक्षाणांफ
लादिआस्वादयंति॥ तेसुवर्णवर्णदेहाभवंतिसर्वतीर्थाधिकफलप्रदायाअस्याजलस्यस्पर्शेनमहापापिनोपिपापान्मुच्यंते॥ अत्रार्थेशांत
नृपपुत्राउदाहरणं॥ तद्यथा॥ अत्रैवभरतक्षेत्रेश्रीपुरेशांतनोराजा सर्वगुणाश्रयःतस्ययथार्थनाम्नीसुशीलाइतिराज्ञी॥ अन्यदासा
स्वप्नमध्येधूमकेतुंपश्यतिस्म॥ तत्स्वप्नानुसारात्क्रमेणतयाअतिधूसरांगःसाक्षात् धूमकेतुरिवपुत्रोजातः तस्यजन्ममात्रेणसर्वंहस्ति
सैन्यंक्षयंगतं॥ कियताकालेनपुनदुःस्वप्नसूचितोद्वितीयःपुत्रोजातः॥ तज्जन्मनाअश्वसैन्यंसर्वंक्षयंगतं॥ एवंतृतीयेपुत्रेजाते सर्वाप्र
पिराज्यसंपदःकोशाःकोष्टागाराश्चक्षयंगताःचतुर्थपुत्रजन्मनतुशत्रुभिःपुरंवेष्टितंततःसराजाप्रक्षीणकोशबलोरात्रिमध्येराज्ञीं
पुत्रांश्चगृहीत्वापुरान्निर्गत्यकुत्रापिजगामततोदेशांतरेभ्रमतस्तस्यतेनील१महानील२काल३महाकाल॥४नामानश्चत्वारोपिपु

त्राः साक्षात्पापमूर्त्तयः सकलकुलदूषणोपेताः कुबुद्धयः क्रूरकर्माणः सप्तव्यसनासक्ताः पदे पदे दुःखदायिनो भूवन्॥ यदुक्तं मूलग्रंथे॥ द्यू
तं १ मांसं २ सुरा ३ वेश्या ४ चौर्यं ५ पापर्द्धिसेवनं ६ परस्त्रीसेवनं ७ सप्तव्यसनान्याकुरुत्तमाः॥ द्यूतात्सर्वाणि जायंते॥ व्यसनानि पराण्यपि लो
कद्वयाहितकरं॥ तस्मात् द्यूतं विवर्जयेत्॥२॥ द्यूतेनार्थयशोधर्मबंधुवर्गकुलक्षयः भवेत्तैरश्च नरकगतिर्दुःखौघदायिनी॥३॥ श्वभ्रं नरक
गामीयः सभां भजतु मानवः इति श्रुत्वास्वनाश्नैव यत्नान्मांसं परित्यजेत्॥४॥ शृंगालाश्च पिशाचाश्चैते यानरकगामिनः॥ जिह्वास्वादरसान्मांसं
ये भक्षयंति कुबुद्धयः॥५॥ अनर्थमूलं यन्मद्यं मतिकांतयशोहरं॥ मातृभार्यादिविवेकघ्नं कोदद्यात्सन्निषेवने॥६॥ परदाररसस्त्याज्यो लोकद्
यविघातकः॥ वेश्यायां पापवश्यायां रतिः कार्या न नागन हि॥७॥ प्रत्यक्षवधबंधादिकारका नरकप्रदा॥ इहान्यलोके मात्याज्या चार्यबुद्धि
प्रबुद्धिना॥८॥ चौर्येण कर्णनासाङ्घ्रिपाणिपादादिपीडनं॥ भवेदत्र परत्रापि चंडालकुलसंभवः॥९॥ धर्मद्रुमाणां मूलाग्निः कीर्तिसौधमषी
छटा॥ पापर्द्धिः सर्वविद्विष्टा श्रणुयात्सापि वार्त्तया॥१०॥ पापर्द्धिमंडिता प्रीतिये नं नूनं संभवंतिते॥ दुःखदारिद्र्यदुष्टार्त्तिदुर्गतीनां कुलाश्रया
११॥ इत्थं श्रुतैः सप्तभिर्व्यसनैर्दुराचारास्ते चत्वारोपि कुपुत्राः॥ वक्रचारिणः॥ कुग्रहा इव स्वचरित्रैः कृत्वा राजानं नानापराभवभाजनं चक्रुः
ततोसौ नृपो देशग्रामपुरारण्यादिषु भ्रमन् क्वापि रतिं न प्राप॥ अन्यदा राजा चिंतयत्॥ एते मम पुत्रा बल्हादाराना नारोगग्रस्ताश्च तत्र

बलंकृणरूपाणामेषां॥ भरणपोषणादिकं मया कथं कार्यं ततोऽस्माज्जीवितान्मम मरणमेव वरं यतः दारिद्र्योपद्रुतैर्वैरिविकृतैः परजी
विभिः जीविताशा विधीयेत या मा क्लेशाय केवलं॥१॥ ततः कुत्रापि स्थाने राज्ञी पुत्रांश्च प्रतार्य॥ अहं प्राणत्यागं करोमीति निश्चित्य अन्यदा
एकं पर्वतमारूढः॥ तत्र चैत्यं दृष्ट्वा मरणकाले मम एतत् शंबलं भवत्विति ध्यायन्॥ तत्र प्रासादे श्रीसंप्रतिजिनप्रतिमां॥ भक्तिनिर्भरमा
नसः सकुटुंबः प्रणमतिस्म॥ अथ तत्र एकं तेजसा देदीप्यमानं॥ अद्भुताकारकं चित्पुरुषं भगवत्पादौ प्रणमंतं ददर्श सोपि तं राजानं भ
गवत्सेवायां तत्परं दृष्ट्वा इत्युवाच॥ भो भद्र अहं धरणेंद्रास्मि श्रीजिनविषये तव विशेषभक्तिं दृष्ट्वा तुष्टः ततो वरं वृणीष्व॥ इति तस्य वच
श्रुत्वा॥ नृपस्तं धरणेंद्रं नाम पतिं नत्वा प्राह॥ स्वामिन् तव दर्शनादेव मम सर्वमपि कष्टं नष्टं सर्वाः संपदश्च समायाता इति वरं पश्चात्प्रार्थयि
ष्ये॥ सांप्रतं तु॥ भवंतं पृच्छामि॥ यन्मम एतेषु पुत्रेषु जातेषु सर्वमपि राज्यसुखं क्षयं गतं॥ तत्केन कारणेनेति महान् संदेहः तन्निवारणेन मां
कृतार्थयेति ततः धरणेंद्रोवधिज्ञानेन तेषां चतुर्णामपि भवान् विज्ञाय प्राह राजन्॥ तवायं प्रथमः पुत्रः पुरा महाटव्यां जयदत्तिनाम्ना
भिल्लो भूत्॥ स चातिक्रूरकर्मा निर्दयो साक्षादौद्रध्यानमूर्त्त इव नित्यं कुकर्मकारको भूत् अन्यदा यात्रिकाल्लोकान् लुंटितुं इत्ताः ग्रे व्रजन्
पुंखितबाणधनुर्हस्तो मृगाणां मार्गं गवेषन्॥ वनांतरे कंचिन्मुनिं ध्याननिश्चलं दृष्ट्वा॥ तं प्रति मृगाणां गतिं पप्रच्छ परमदयालुना मुनिना

मृगमार्गेकथितेसदुष्टाशयोरुष्टःसन्तेनैवबाणेनतंमुनिंनिर्हतिस्म॥ततःससाधुर्बाणेनविद्धोनमोअरिहंताणमितिवदन्सहसाभूपी
ठेपपातप्राणैर्मुक्तश्चसभिल्लोपितस्मिन्नेवदिनेवने॥भ्रमन्सिंहेनमारितःमरणावसरेचहामयानिरापराधोमुनिर्मारितःतत्फलंअद्यैव
मेफलितमितिकिंचित्पश्चात्तापंचकार॥मृत्वाचसप्तमनरकंगतः तत्रत्रयस्त्रिंशत्सागराणियावन्महादुःखंसहित्वापुनः सिंहव्याघ्रादि
कान्बहून्दुष्टभवान्प्राप्य पुनर्नरकेषुउत्पद्यः॥एवंबहुसोमुनिघातपातकफलंभुक्त्वापूर्वकृतपश्चात्तापप्रभावेणकिंचिल्लघुकर्मा
नरकान्निर्गत्य॥तवपुत्रोयंनीलनाम्नाभवत्॥ अयंतुमहानीलनामातवद्वितीयःपुत्रपूर्वजन्मनिकंकानगर्यांभीमनृपतेःसेवकःश्र
रनाम्नाक्षत्रियोनिर्द्धनआसीत्॥सचराज्ञादत्तांनिजांग्रामादिभुक्तिंप्रधान॥जनेभ्योलभमानअत्यर्थदारिद्र्यपीडितोऽन्यदास्वगृहे
भोजनंकुर्वन्॥कुत्सितान्नभोजनेनखिन्नोभार्यां॥प्रत्याक्रोशंकुर्वन्॥भार्ययाप्रोचेहेस्वान्॥भत्रा आनीतं घृतगुडगोधूमान्नादिस
र्ववस्तुस्त्रियःपाचयंतिनान्यथा॥ततःकोयंममविषयेनिःकारणकोपइत्यादि॥तद्वचसाधिकतरदीप्त॥क्रोधानलोसौतांलोष्टुना
मर्मणिनघात॥तेनमर्म्मघातेनसामृताततस्तस्यआकोलाहलःकृतः॥ततश्रुत्वातलारक्षःसमायातः तेनापितिरपराधस्त्रीहत्या
कारकोऽइतिकृत्वाहठंबद्धाराज्ञोग्रेनीतःनृपेणशूलारोपणायादिष्टःक्षिप्तश्चशूलिकायां॥तत्रमहावेदनामनुभवन्कस्यापिमुनेर्मुखान्न

मस्कारंश्रुतवान्॥ ततोमृत्वाषष्ठीनरकपृथ्वींगतः तत्रानंतदुःखानिभुक्त्वापूर्वंशून्यमनसापिनमस्कारःश्रुतस्तस्यप्रभावेणतवपुत्रोजातः अयंतु
कालनामातवतृतीयःपुत्रःपूर्वंव्यवहारिणःपुत्रोभूत्परंअत्यंतंकामांधोऽगम्यगामी॥अनाचारीदुर्विनीतोमातापित्रादीन्तृणायमन्यते
विशेषतोधनयौवनादिमदगर्वितःप्रत्यहंनिंदतिदेवान्उपहसतिगुरून्तिरस्करोतिधर्मंविडंबयतिधर्मिजनान्ततोदेवगुरुधर्माशातनाभि
स्तेनमहापापंउपार्जितं॥ यदुक्तंमूलग्रंथे॥कारणंदेवधर्माणां॥तत्वेभवतिसद्गुरुः॥सगुरुर्निंदितोयेनत्रयस्तेनावधूनिता॥१॥देवसद्गुरुधर्मा
णां यःकुर्यान्निंदनंनृप॥सचंडालभवान्लब्ध्वाध्रुवंस्यान्नरकातिथिः॥२॥नबोधिबीजंनोमुक्तिर्नस्वर्गःसत्कुलंनहि॥शुक्लद्रव्यस्यनोलब्धिर्दे
वनिंदापरस्यनु॥३॥मूकत्वंकाहलत्वंचपंगुताकुष्ठादिदोषजाः॥मुखरोगाःसप्तषष्टिःजायंतेजिननिंदया॥४॥अयशोकालमरणंदुःखंचक्रवि
गंधिता॥हतांतंतुमुखादोषाः॥भवंतिगुरुनिंदया॥५॥संसारीनरकेतिर्यग्भविस्यान्सपुनःरधर्माणांनिंदकोनैवलभ्यतेभानुषभवं॥६॥त्र
याणामपियस्तेषां॥निंदकोघोरपातकीतस्यसंसर्गमात्रेणमलिनाःस्युःपरेपिहि॥७॥ततस्तस्यातिदुराचारांदुर्द्धिन्नैःपित्रादिस्वजनैर्नृपेण
चनिःकासितोसौगृहात्॥नगराच्चततोशरणोनिराधारोयूथभ्रष्टमृगवत्॥वनांतरेभ्रमन्स्फुटितमुखरोगेणवेदनाक्रांतोमृत्वाषष्टंनरकंग
तःततोनिर्गत्यतवपुत्रोजातः॥चतुर्थोयंतवपुत्रोचतुर्थोयंतवपुत्रोमहाकालनामा॥पूर्वजन्मनिद्विजपुत्रोभूत्परंदरिद्रीकेवलंदुःखपात्रं

दुःपूरोदरगर्त्तापूरणार्थंदेशाद्देशंभ्रमन्क्वापिपुरेकस्यचित्जिनभक्तकस्यगृहेदासोभूत्वास्थितःअन्यदाप्रतिमायाआभरणंचोरयित्वा
कुत्रचिद्गतःतद्विक्रीयगृहीतंधनंततस्तल्लाभेनविशेषात्प्रवृद्धलोभोसौपुनः॥२॥जिनाभरणानिपूजोपकरणानिसाधूनामपिच॥वस्त्र
कंबलाद्युपकरणानिच्छलंलब्ध्वाचोरयति॥नचवेश्यादीनांदत्वाव्यसनानिसेवते॥इत्थंमहापापंतेनोपार्जितं॥यतः॥देवद्रव्यंगुरुद्रव्यंदहेदा
सप्तमंकुलं॥विषंवरंतैलयुक्तंभक्ष्यंदेवधनंनतु॥१॥देवद्रव्यविनाशेनसप्तमंनरकंव्रजेत्॥सप्तवारान्नरस्तत्रदुःखलक्षैःप्रपीडितः॥२॥
यथाग्निविषसंसर्गोदुग्धेकांतिकसंगमः तथास्वस्यधनेल्पोपिसंसर्गोगुरुसंपदः॥३॥जीविनाशात्तुयादेवगुरुद्रव्येणदेहिनः॥धत्तूरकरसोद्
मिश्रविषास्वादोद्भवाहिंसाधननोदेवद्रव्यभक्षणपापात्सकृष्टोजातोभूतानरकचांडालादि॥भवान्भ्रांत्वाइदानींतवपुत्रोभूत्॥एते
कुकर्मकारिणोपियन्मनुष्यत्वंप्राप्ताःतत्कारणंशृणुभिल्लजीवोमरणसमयेपश्चात्तापकरणात्॥१॥क्षत्रियोनमस्कारश्रवणात्॥२
देवादिनिंदकस्तुसुकुलोत्पत्तिवशेनलोकसंज्ञयाकिंचित्कर्यंचित्पुण्यकरणात्॥३॥द्विजपुत्रस्तुचौरस्तुद्धापिजिनदर्शनंजातंतत्प्रभावादि
ति॥४॥एतेषांचतुर्णाअपिभुक्तशेषेणपापेनतवराज्यभ्रंशादिदुःखंजातं॥ततोतःपरंराजन्मरणवांछानकार्यासकुटुंबेनत्वयाश्रीश
त्रुंजयेगंतव्यं॥तत्रशत्रुंजयानदीजले॥तवएतेचत्वारोपिपुत्राःस्नानंकुर्वंतु॥तस्याएवतटेपूर्वसूर्येणप्रासादःकृतोस्तितत्रअस्यापिव

जलेनस्नानंकृत्वा॥भगवंतंपूजयंतुएवंचतेयथाशक्त्याषष्टाष्टमादिकुर्वंतःशत्रुंजयीनदीतीरवृक्षाणांफलैर्वृत्तिंकल्पयंतःत्रिकरण
शुद्ध्याजीवरक्षापराजितेंद्रियाःसंतःक्रमेणत्रि३चतुः४पंच५षड्भि६र्मासैरोगरहितादिव्यदेहाभविष्यंतिक्रमेणसर्वसंपदांभाजनं
भविष्यंति॥ततःषण्मासांतेत्वयाहंस्मर्तव्यः॥अहंमेवशत्रून्जित्वाराज्यंदास्यामीति॥धरणेंद्रमुखात्श्रुत्वासराजाप्रसन्नचित्तस्तं
प्रणम्य॥राज्ञ्यापुत्रैश्चसह॥ततःपर्वतादुत्तीर्याग्रेगच्छन्॥क्रमेणसुराष्ट्रदेशमंडनं॥श्रीशत्रुंजयंप्राप॥तत्रशत्रुंजयातटेसकुटुंबेनतृ
णकुटीरकेवसन्॥धरणेंद्रोक्तरीत्यातीर्थसेवांचकार॥तेचत्वारोपिनीरोगाजाताः॥षण्मासांतेस्मृतोधरणेंद्रःसमागत्यसकुटुंबंनृपविमा
नमध्येआरोप्यशत्रून्निराकृत्यतंशांतननृपंस्वराज्येस्थापयित्वास्वस्थानंगतःसशांतननृपोपितीर्थसेवाप्रभावेणपुनर्लब्धराज्यःसन्ती
र्थयात्राजिनप्रासादप्रतिमाकरणादिनानापुण्यानिकुर्वन्कलत्रपुत्रैःसहचतुःषष्टिवर्षलक्षाणिराज्यंपालयित्वा॥तदंतेराज्ञापुत्रैश्चसमं
दीक्षांगृहीत्वाश्रीशत्रुंजयेअनशनंचकारतेनत्तेसर्वेपिनिर्दोषंअनशनंसमाराध्यकेवलंज्ञानंप्राप्यमुक्तिंययुःएवंभोभरतेशाःइयंशत्रुंजया
नदीअनेकप्रभावमयीसेवनात्॥सर्वबांछितादायिनीइतिज्ञातोहिइतश्चउत्तरस्यांदिशिऐंद्रीनदीदृश्यतेइयंसौधर्मेंद्रेणपद्मद्रहमध्या
त्समानीतातेनमहाप्रभावाइतश्चपूर्वदिशिधरणेंद्रेणपातालमूलात्आनीताउत्तरदिग्भागतःप्रवृत्तादक्षिणदिशिगच्छंतीनागेंद्री

नदीसर्वोद्यानमध्यगतासर्वपापमलनाशिनी॥ विद्यतेइयंचसर्वैःसुरासुरैः॥ श्रीयुगादिजिनस्नानार्थंनिर्मितायमलकदानाम्नीनदीदृश्यतेइ
त्थंहेचक्रीन् श्रीशत्रुंजयपरिसरेएताश्चतुर्दशमहानद्यःशक्राद्यैर्देवैर्भगवतःस्नानार्थंकृता॥ ततएतासांतथाअन्येषामपिकुंडसरो
वरसमुद्रादीनांजलैःकृत्वाअत्रतीर्थेभगवतःस्नानंकर्त्तव्यंअयमेवमार्गःसर्वेषांसंघाधिपानांएवंकुर्वन्इंद्रत्वचक्रित्वादिसंपदोभुक्त्वा
तीर्थकरत्वंलभंतेकिंचएतासांजलैर्भगवतःस्नानकरणेनस्नानेनस्पर्शमात्रेणापिपुंसांसर्वकष्टानिविलीयंतेराज्यसुखसंतानभोगादिसंप
त्रयोभवंतिभूतप्रेतरिपुरोगादयोपिनपराभवंतिदेवाःसेवाकराभवंति॥ अतएवएताःसर्वाअपिनद्यःसर्वतीर्थमय्योज्ञातव्या॥ अन्यत्र॥ अ
त्रतीर्थेअन्यान्यपिचंद्रसूर्यव्यंतरेंद्रादिकारितानिमहाप्रभावाणिबहूनिजलस्थानानिसंति॥ इत्यादिसौधर्मेंद्रवचसाविशेषाद्भक्तिप्रेरि
तश्चक्रीशक्रेणसहितस्तासुनदीषुस्नात्वा॥ तासामेवजलेनपूर्णैःकलशैःकमलैःतत्तीरवृक्षाणांपुष्पफलादिभिश्चप्रभुंपूजयामासुः पु
नश्चक्रीपूर्वस्यांदिशितीर्थमानपुरंदक्षिणस्यांचस्वःपुरंवासयामास॥ तत्रचानेकवनवापिसरोवरमंडितोद्देशंश्रीजिनप्रासादंकारयामा
स॥ ततश्चक्रिणःपुत्रोब्रह्मऋषिर्बहुभिर्मुनिभिःसहयत्रपर्वतेऽनशनंकृत्वासिद्धःतत्ब्रह्मगिरिरितिनाम्नातीर्थंजातं॥ तत्रपर्वतेचक्रिणा
श्रीयुगादिजिनप्रासादःकारितःअथचचक्री गुरून्पुरस्कृत्यमंगलतूर्यनिर्घोषैगगनतलंपूरयन्॥ संघेरिंद्रैभूपालैःसर्वाभीराज्ञीभिः

संघलोकैःसैनिकैश्चसहपरिवृतोनानाशिखरभूमिषुचैत्यपरिपाटिकापूजार्थंचचाल॥ तत्रप्रथमंअत्रशृंगेकपर्दियक्षोऽधिष्ठाताभविष्य
तीतिज्ञात्वा॥ तत्रशृंगेशक्रेणजिनप्रासादःकपर्दिमूर्त्यायुक्तःकारितःपुनःतत्रैवशृंगेइंद्रवचनेन॥ माघपूर्णमास्यांदिनेचक्रिणाश्री
मरुदेवायामूर्त्तिःस्थापिता॥ ततःप्रभृतितस्यशृंगस्यापिमरुदेवीशृंगमितिनामजातं॥ ततोमाघमासेपूर्णमास्यांयेजनाःतांप्रथमजिनमा
तरं॥ आदियोगिनींपूजयंति॥ तेसर्वसंपदोमोक्षंलभंतेनार्योपिसौभाग्यंअवैधव्यंपुत्रपौत्रादिसंततिं प्राप्यक्रमेणमुक्तिगामिन्योभ
वंति॥ ततोऽग्रेयोजनद्वयांतरेस्वर्गगिरिनामानंगिरिंपशुपक्षिप्रमुखाणामपिस्वर्गसुखप्रदंएकयोजनप्रमाणं॥ महाप्रभावंदृष्ट्वाभक्त्या
प्रणम्यचक्रीतत्रापि॥ श्रीयुगादिजिनप्रासादंचकार॥ ततोपरस्मिन्शृंगेश्रीबाहुबलिमुनिः॥ अष्टोत्तरसहस्रसंख्यान्स्वपुत्रान्मु
नीन्॥ इतिप्राह॥ भोमहानुभावाः॥ अत्रैवशृंगेतीर्थमहात्म्यात्॥ यूयंसर्वेपिपुंडरीकगणधरवत्॥ केवलंप्राप्यमोक्षंयास्यथ॥ ततो
यूयंअत्रैवस्थितानिर्यामणांकुरुतइतिश्रुत्वातेसर्वेपि॥ तत्रैवध्यानसमाधिपराक्रमेणकेवलंप्राप्यमोक्षंययुःततस्तत्रबाहुबलिनाम्निशृं
गेचक्रीप्रासादंचकार॥ इतश्चभरतःशक्रंपप्रच्छ॥ यदसौपर्वतःसर्वतोपितीर्थमयःततोत्रपर्वतेभीषांमुनिदेहानांदाघःकथंक्रियते॥ त
तःशक्रःप्राह॥ भोभरतेशःअद्ययावत्मरुदेव्यादिपुंडरीकांतानांसिद्धानांतुशरीराणि॥ मयाक्षीरसमुद्रेप्रवाहितानि॥ अतःपरंसर्वकालं

यावत्तनु अपमाचारोनभविष्यति॥ ततःसिद्धानामपिदेहानांअग्निसंस्कारोयोग्यएवपरंसर्वदेवमयेत्रतीर्थेदाहदानादिकंनिषेधंकर्मकर्तुंनयो
ग्यं॥तस्मिन्कृतेसतिजिनाज्ञा भंगःतीर्थलोपश्च भवति॥ ततोमुख्यशृंगात्॥ योजनद्वयंमुक्तास्वर्गगिरिनाम्निपर्वतेदेहिनांअग्निसंस्कारःक
र्तव्यःतत्रतेषांपाषाणमयीमूर्त्तिश्चकर्त्तव्या यतोग्रेपिसर्वेषांअयंव्यवहारःप्रवर्त्तते इतियुक्तियुक्तं॥इंद्रवचनंश्रुत्वाचक्रीतत्रैवतेषांदाह
कर्मकृत्वा प्रासादंप्रतिमाश्चकारयामास सोमयशान्नृपोपिस्वबंधूनांजिनस्यचप्रसादान्कारयामासततश्चक्रीतालध्वजनाम्निगिरौ तालध्व
जनाम्नोमेसुरंचतुर्द्धांक्रमेणखड्ग१खेटक२शूल३सर्प४धरंसप्रभावंस्थापयामास ततोग्रेकादंबगिरिंवक्रदुःखानिमयं दृष्ट्वाचक्रीश्रीनाभं
गणधरंप्रप्रच्छस्वामिन्कोयंपर्वतःकीदृशोवाअस्यमहिमाततोगुरुराह चक्रिन्महाप्रभावोयंगिरिःपूर्वंउत्सर्पिणीकालेअतीतचतुर्विंशत्यां
संप्रतेस्तीर्थकरस्यकदंबनामागणधरःअत्रगिरौमुनीनांकोटिभिःसमंसिद्धःततःप्रभृति अस्यकादंबकेतिनामप्रसिद्धं॥ अत्रपर्वतेदिव्यौष
धयोरसकूपिकाःरत्नस्वर्णादीनांखानयःकल्पवृक्षाश्च अनेकेसंतिपृथ्वीतलेयायाउषधयोरसकूपिकायाश्चसंतिताःसर्वाअत्रलभ्यंते॥ किंच
दीपोत्सवादिनेउत्तरायनदिनेवाम ः अत्रमंडलंकृत्वासाधनंकुर्यात्तस्यदेवताःप्रत्यक्षीभूयवांछितंपूरयंति॥ यस्यपुंसोयंपर्वतःफलितःत
स्यकामधेनुकल्पद्रुमचिंतामण्यादयःसर्वेपितुष्टाः॥अत्रमहाप्रभावा॥अनेकाउषधयोरसकूपिकाश्चसंतिपरंविषमकाले भाग्यहीनजना

नांदृष्टिगोचरानभविष्यंति ततोयंपर्वतोजनानां॥ इहलोकेपरलोकेपिचउपकारकारीवर्त्ततेइत्यादितत्प्रभावं॥गुरुमुखात्श्रुत्वाचक्रवर्ती
तत्रगिरौधर्मोद्याननाम्निवनेश्रीवर्द्धमानस्य भाविनश्चतुर्विंशतिजिनस्यप्रासादंकारयामास॥ इतश्चकादंबगिरेःपश्चिमेशृंगेशत्रुंजयीन
दीतटेचक्रवर्त्तिनोगजसेनाअश्वसेनाश्चस्थिता भूत्तन्मध्यात्केपिराजाश्ववृषभपदातयोरोगवशात्मृतास्तेअविवेकिनोपितीर्थमहात्म्या
त्स्वर्गगताःततस्तेदेवत्वंप्राप्ताःसंतःतीर्थमहात्म्यप्रकटनार्थं पुनस्तत्रागत्यस्वस्वदेवपदप्राप्तिप्रकटीकृत्यप्रसादानकारयन्॥ततःप्रभृ
तितस्यशृंगस्यहस्तिसेनगिरिः॥इतिनामजातं॥क्रमेणचक्रवर्त्तिनासर्वेष्वपिशृंगेषुप्रासादाःकारिताःइत्थंमुख्यंशृंगस्यप्रदक्षिणांदत्वा पुनःस्व
स्थानंआगत्य भगवंतंअनमत्॥ ततश्चमुख्यशृंगस्याधःपश्चिमदिशिसुवर्णगुफायांइंद्रदर्शितमार्गेणप्रविश्य॥ अतीतानागतवर्त्तमानानां
सर्वेषामपिजिनानांरत्नमयीःप्रतिमाश्चक्रीअप्रूजयत्॥ अथश्रीभरतेशेगिरिनारयात्रार्थंप्रस्थिते नमिविनमिमुनींद्रौइतिऊचतुःचक्रि
न्अस्माकं॥ अत्रैवक्षेत्रेमुक्तिर्भविष्यति॥ इतिकारणात्॥ आवांमुनिकोटिद्वयसहितोअत्रैवस्थास्याव॥इतिचक्रिणंअनुज्ञाप्यतत्रस्थि
तौतौद्विकोटिमुनिसहितौपुंडरीकगणधरवत्॥ फाल्गुनशुदिदशमिदिनेमोक्षंप्रापतुः॥ततोत्रतीर्थेतस्मिन्दिनेस्वल्पमपिदानशीलतपोभा
वनादिधर्मकार्यंयत्क्रियते॥ तत्सुक्षेत्रेबीजवपनवत् अनंतगुणंभवतिअथश्रीभरतेशःसुराश्चतेषांमुनीनांनिर्वाणोत्सवंकृत्वा रत्नमयोत

23/1962

मिविनमिमूर्त्तीस्थापयित्वा मासद्वयांते अप्रेचलंतिस्म तदाशत्रुंजयस्य पश्चिमदिग्भागेचतुर्थश्रृंगेतीर्थरक्षार्थं नंदिनामानंसुरं अस्थापयत्
ततःप्रभृतितस्यश्रृंगस्यनंदिगिरिरितिनामजातं॥ अथश्रीनमेःपुत्र्यैःकनकाचर्चाप्रमुखाश्चतुःषष्टिःएकस्मिन् श्रृंगेसमकालंचैत्रमा
सस्यकृष्णचतुर्दश्यांमध्यरात्रौस्वर्गंययुः॥ ततस्तस्यश्रृंगस्यचर्चगिरिरितिनामजातं॥ ततस्तु चतुःषष्टिरपिदेव्यःएतत्तीर्थभक्तानां वि
घ्ननिवारकाःसर्वाभीष्टदायिकाश्चभवंतिस्म॥ ततःसंघलोकःपश्चिमायांदिशिचंद्रोद्यानमध्येशालीनदीतटे॥ आवासान्चक्रे तत्रवने
वनशोभावलोकनार्थंश्रीसोमयशानृपोनेकैःसमानवयोभिःकुमारैःपरिवृतोगतःततोग्रास्याम्लीरेनानाविधंपुष्पितफलितवृक्षाणांशो
भांविलोकयन्॥ यावद्दूरेयाति॥ तावदग्रेतापसानांउटजान् ददर्श॥ तत्रजटाधरान्भस्मोद्धूलितगात्रान् जितेंद्रियान् मूर्त्तान्शांतरसानि
वालोक्य हृष्टःसोमयशानृपःतेषांस्वरूपं आचारंच पृछतिस्मतेप्राहुः राजन्वयंविद्याधरावैताढ्यवासिनःपूर्वअज्ञानात् अस्माभि
र्मुनिहत्यादिबहूपापानिकृतानि॥ ततःकथंचिद्विवेकेप्राप्तेपापभीरुतयातापसीदीक्षांप्रसन्नाः अन्यदास्माभिर्भाग्यबलात् श्रीयुगादि
जिनोवंदितःपृष्टंचभगवन् अस्माकंकदाकुत्रस्थानेमोक्षोभविष्यतीति ततःप्रभुणोक्तंचंद्रप्रभजिनस्यतीर्थे॥ श्रीशत्रुंजयसमीपेभवतां
मुक्तिरितिप्रभोमुखात्श्रुत्वा॥ वयंभाविनोऽष्टमतीर्थंकरस्यचंद्रप्रभस्वामिनःप्रतिमांकारयित्वा अत्रसमागत्यनित्यंतत्पूजांकुर्वंतः॥

स्थिताःस्म॥ अत्रैवस्थानेश्रीचंद्रप्रभस्वामिनःसमवसरणंभविष्यतीतिमहाप्रभावंएतत्क्षेत्रमितिश्रुत्वाप्रसन्नचित्तःसोमयशास्तत्रोपल
क्षित्वानत्सर्वंचक्रिणेकथयत्॥ श्रीभरतेशोपिवार्द्धकिनातत्रश्रीचंद्रप्रभस्यप्रासादंकारयित्वा पुरंअवासयत् एवंतत्रतीर्थस्थापनांकृत्वाच
क्रवर्त्तीसंघसहितोरैवताचलयात्रार्थंचचाल अथतेसर्वेपियात्रिकामेरुगिरिस्पर्द्धमानमिवउच्चैस्तरंसुवर्णरत्नमाणिक्यकिरणैर्गगनतलंचि
त्रयंतं॥ सर्वतोनीलमणीमयंमध्ये२सुवर्णरेखांकितंविद्युल्लेखाविभक्तंसमुन्नतंश्यामंमेघमंडलमिव भूभामिन्याःकुंकुमरेखांकितंकस्तूरी
तिलकमिव॥ एवंविधंनानाप्रभावनिकेतनं श्रीगिरिनारगिरिंपश्यतिस्म॥ यत्रपर्वतेअष्टादशभारावनस्पतयोनित्यंपुष्पितफलितपल्ल
वितानंदनोद्यानशोभांदर्शयंति॥ यश्चपर्वतोपिझरन्निर्भरैर्मुक्ताफलहारैरिवविभूषितःयत्रचकल्पद्रुमछायासुमणिमय-लासुनिवि
ष्टाः॥ सिद्धविद्याधरयक्षकिंनरमिथुनानांगणाःश्रीयुगादिजिनयशोगायंतियत्रचस्थाने२सिद्धरसकूपिकाःस्थाने२दिव्योषधयःस्थाने
२रत्नखानयःपुण्यवतांदारिद्र्यंचूरयंति॥ यत्रचचंद्रकांतमणीमयानिश्रृंगाणिचंद्रकिरणसंगात्झरन्निर्झराणिसर्वतोपिवनानिसिंचं
तीव॥ यत्रकृष्णनिशायामपिदिव्योषधिप्रकाशैःरत्नानांतेजोभिःकृत्वाअंधकारःप्रवेशमपिनलभतेयश्चकदलीपत्रैर्ध्वजैरिवस्वस्य
अत्यंतसमृद्धधनाधिपतित्वंसूचयतीव॥ यत्रछायावृक्षाःफलवृक्षाःपुष्पवृक्षाश्चछायाफलपुष्पपल्लवादिभिश्चसमागतान्जन

त्रजान् स्वागतं कुर्वतीव॥ एवंविधंरोहणवेनाढ्यमेरुप्रभृतिपर्वतेभ्योप्यधिकशोभंश्रीरैवतगिरिंदृष्ट्वाहर्षोल्लसन्मनाश्चक्रीत
द्दिने उपवासान् कृत्वा तत्रैव संघावासान् अकारयत्॥ सकलसंघेनसमं गुरूपदिष्टविधिनाश्रीशत्रुंजयवत् पूजांचकार॥ प्रभाते
मिष्टान्नपानादिभिः शक्तिसिंहनृपः श्रीसंघस्यपारणाः कारयतिस्म॥ अथतंपर्वतंदुरारोहं विज्ञायश्रीभरतेशोयक्षसहस्रेण
श्रीसंघस्यसुखारोहणार्थंचतस्रः पद्याश्चकारयत्॥ पद्यानांमुखेचएकैकं पुरं अवासयत्॥ अथताभिः पद्याभिः सुखंसुखेनसंघ
लोकारैवताचलंआरोहंतिस्म॥ अथ भाविनोनेमिजिनस्यतत्रकल्याणकत्रयंजानन्॥ श्रीभरतेशोवर्द्धकिनाप्रोत्तुंगंश्रीनेमिजिन
प्रासादंअकारयत्॥ सचप्रासादः स्फटिकमणिमयश्चतुर्द्वारश्चतस्रुषुदिक्षुप्रत्येकं एकादश२ मंडपैर्मंडितोनेकगवाक्षजालकव
लानकतोरणैर्विमानश्रीभांङसन्निवसुरसुंदरइतिनाम्नानीलमणीमयश्रीनेमीश्वरमूर्त्याधिकतरं शुशुभेमुख्यशृंगात् अथः
एकयोजनंमुक्त्वापश्चिमदिशिप्रासादोभूत् अथतत्रैवसल्लिकावर्त्ताभिधः श्रीआदिदेवस्यापिप्रासादश्चक्रिणाकारितः तत्रप्रासादेश्री
त्रुंजयवत् रत्नस्वर्णरूप्यादिमय्योनेकशोजिनप्रतिमाः स्थापिताः॥ श्रीनाभादिगणधरैः समहोत्सवंप्रतिष्ठिताश्च॥ अथश्रीनेमिनाथप्र
थानिप्रजोत्सुकः शक्रऐरावणमारुह्यतत्रागतः सचऐरावणस्यएकपादेनभूमिंआक्रम्य॥ भगवतः स्नानार्थंकुंडंअकरोत्॥ तत्रच

दिव्यानुभावान्सर्वनदीनांप्रवाहाः समाजग्मुः॥ ततः प्रभृतिलोकेतत्कुंडंगजेंद्रपदमितिनाम्नाप्रसिद्धिंययौ॥ यस्यजलंतत्रादृत्यास्वादुसुर
भिगंगादिसर्वतीर्थजलेभ्योप्यधिकप्रभावंस्पर्शमात्रेणापिसकलदोषापहं भवदहितकारिभवति॥ इतश्चधरणेंद्रनागेंद्रेण भगवद्भक्तिवशा
त्स्ववाहननागस्यफणाबलेनकृतं॥ नागझरीइतिलोकेप्रसिद्धंकुंडंकारितं॥ ततश्चमरेंद्राणापिस्ववाहनेनमयूरेणकुंडंकारितं॥ मयूरपादाक्र
मणात्॥ तत्रकुंडेनिर्झराः प्रकटिताइतिलोकेमायूरनिर्झरमितितस्याभिधानंजातं॥ एवंचंद्रकुंडसूर्यकुंडादाभ्योपिमहाप्रभावाणिस्पर्श
मात्रात्कुष्टादिरोगहराणिबभूवुः॥ तेषुचयत्॥ अंबाकुंडं॥ तस्यजलेनहत्यादोषोपिदूरंव्रजति॥ एवमन्यैरपिदेवैः स्वस्वनाम्नाबहूनिकुं
डानिकृतानि॥ तेषांप्रभावविस्तारंज्ञानिनएवजानते॥ अथभक्त्युल्लसितमनसस्ते॥ शक्रचक्रिप्रमुखाः सुरासुरमनुष्याः श्रीनेमिनाथंसर्वो
पचारैः पूजयामासुः॥ श्रीभरतेशोगजेंद्रपदकुंडेस्नात्वाशुद्धश्वेतवस्त्रधरः श्रीनेमीश्वरंपूजयित्वा॥ पूर्ववत् आरात्रिकमंडलप्रदीपदाना
दिकंविधिंपरिसमाप्य॥ भगवत्संमुखंकृतांजलिः अनिमेषदृष्ट्याभगवन्मुखचंद्रचंद्रिकांचकोरइवपिबन्हर्षोत्कर्षात्॥ इतिस्तुतिचका
र॥ श्रीवीरविजयजवामेव॥ गुणरत्नमहोदधे॥ जयापारकृपाधार॥ स्फारसंसारतारक॥१॥ श्रीमन्नेमिजिनस्वामिन्॥ सहजेनात्मतेजसा॥ तमोम
नं भवोद्विग्नं मामुद्धरकृपाकर॥२॥ रागादिशत्रवोदेवनिर्जितायेत्वयापुरा॥ तएवनववैरेण मांबाधंते त्वदाश्रयं॥३॥ सर्वभावैकसामा

९७/१०६२

न्य॥मैदासीन्यमिहाश्रयन्॥त्वंचेदुपेक्षसेतन्मेकुतःसुस्वामितास्थिता॥४॥उदेतिनमुदेयावत्तन्मयंचिन्मयंमहः स्वामिन्मोहतमस्तावच्छि

न्नांतर्नायतेंगनां॥५॥संसारसागरस्यांतर्मोहावर्त्तगतःप्रभोकदामात्रभवद्ध्यानयानपात्रमहंश्रये॥६॥अहोमहोद्वतंचित्रं॥सदाकृतकदाग्रहं

॥तथाप्रसीदविश्वेशयथासीदतिनिकचित्॥७॥त्वत्प्रयानरलंस्वामिन्॥विकलंस्मरतापतः॥शांतिमेतियदिस्वांतं॥त्वद्ध्यानामृतमज्जनात्॥८

॥जातुकिंजंतवोयांतिक्रोधक्रूराधनाविभो॥शमैकसारंत्वन्मार्गं॥मार्गयंतेयदिरूणं॥९॥मधुनास्पर्द्धिनानेनाध्वनाध्यानंधुनातिनि॥अना

हतेननादेन॥निनकर्माणियोगिनां॥१०॥पार्थिव्यादिस्फुरत्पंच॥पिंडस्थध्यानधारणाः॥अभ्यस्यतितवाधीश॥परज्ञानाययोगिनः॥११

॥यथोपदेशांचक्रांत॥रर्हबीजादियोजनात्॥ध्यायंतित्वांमहात्मानः पदस्थध्यानसिद्धये॥१२॥रागद्वेषविनिर्मुक्तंयोगमुक्तंनिराश्रयं॥निका

चितस्फुरद्वातिकर्मणांकरुणापरं॥१३॥आत्मानंकेवलालोक॥लोकालोकावलोकिनं॥ध्यायेद्यस्तन्मयत्वेनसस्याद्रूपस्थवित्मुनि॥१४॥

युग्मं॥नानाश्रुतविचारस्यादेकश्रुतिविचारकं॥सूक्ष्मक्रियाभिधंचैवसमुछिन्नक्रियंतथा॥१५॥इतिमत्वात्मसंवेदाछुक्लध्यानंचतुर्विधं

॥योगिनोगतरूपंत्वा॥मंतःपश्यंतिचिन्मयं॥१६॥ युग्मं॥ नानाध्यानैःपुरादेव॥येनध्यातोसिचेतसा॥क्रमेणात्मानमाविश्य॥तन्मारयसि

चारुतत्॥१७॥निराकारंनिराधारंनिराहारंनिरंजनं॥विंदंतिपरमार्थेन॥देवत्वांतत्ववेदिनः॥१८॥अनिह्नपरमब्रह्ममयतेजश्चयस्तवकिंसर्व

गोपिमेमोह॥तमोहरतिनप्रभो॥१९॥भवग्रीष्मभवस्तापव्यापःस्याद्दिवदेहिनां॥तदायदाचिदानंदचंद्रस्त्वमसिदूरगः॥२०॥शून्यतास्वप

नेदेवजागरेनल्पकल्पना॥एतद्वयातिगंकिंचिद्दंतित्वत्पदंबुधाः॥२१॥त्वयिध्येयेभ्रतेध्याताध्यानंचविलयंविभो॥अतोबहिर्मुखालोकावि

मुखास्त्वच्चिंतने॥२२॥येतुतत्वविदोदेव॥कल्पनातीतचेतसः॥ध्येयादित्रिकभेदांस्ते॥नविंदंतिमनागपि॥२३॥इदंध्येयमिदंध्यान॥महंध्या

तेतिधीर्भवेत्॥ तेषांयेषामुदासीन॥पदासीनंमनोनहि॥२४॥यस्त्यक्तकर्मानिःसंगो॥नित्यतृप्तोनिरंजनः॥सदानंदमयःसत्वं॥त्वंसए

वेतिमन्मतिः॥२५॥विपक्षेचस्वपक्षेचमूर्खेचैवविचक्षणेदुःखेसुखेसमस्तांना॥नाथत्वंद्वेदिनोजनाः॥२६॥किंतेनतपसातेन॥श्रुतेनवि

नयेनवा॥जपेनतेनकिंयेन॥नाथत्वंनोपलक्ष्यसे॥२७॥पापकर्मकृतोनाथ॥नाथतत्कुरुयेनमे॥स्वस्मीभवंतिसंकल्पाविषयग्रहगो

चराः॥२८॥परानंदह्रदेमेस्तु॥निमग्नस्यजगत्प्रभो॥वेद्यवेदकभेदैक॥शून्यतात्वत्प्रसादतः॥२९॥नाथयेन्यद्विभोकिंचि॥द्यांचेत्वामेत

देवहि॥समुल्लसतुमच्चित्ते॥त्वत्प्रसादात्परंमहः॥३०॥श्रीत्रपेयामृतंस्तोत्र॥मेनयःसुकृतीपठेत्॥त्रिकालंपार्श्वाधीश॥सभवेत्तत्त्व

रूपवित्॥३१॥करोत्करोनभोरत्न॥चंद्रस्फुरिहदीप्यते॥यावत्तावच्छितौदेवा॥मोत्सवस्तवनंदतात्॥३२॥करोत्करोनभोरत्न॥चंद्रस्फुरिहदी

प्यते॥यावत्तावच्छितौदेवा॥मेत्सवस्तवनंदतात्॥३३॥इतिमहार्थगंभीरस्तवेन॥श्रीनेमिंस्तुत्वा॥पंचांगस्पृष्टभूतलश्चक्रवर्त्तीपुनः॥२॥

19/1962

प्रणमन्निस्म॥ततोयाचकेभ्योवांछाधिकंदानंददानः॥स्वस्यआवासंआगत्यकृतभोजनःसुखासीनः॥श्रीभरतेशःपुनःपुनःपर्वतस्यशो
भांआलोक्यालोक्यहृष्टचित्तः॥शक्तिसिंहंप्राह॥अहोएतत्पर्वतशोभयावशीकृते॥ममनसिमेरुरपिनाधिकोभाति॥ततःकियन्मात्रं
अन्येपर्वताः॥असौगिरिः॥समवसरणशोभांधत्ते॥तद्यथा॥अस्यपरितःएतेपर्वताः॥प्राकारभावंदधते॥चतुर्दिक्षुनिर्झरप्रवाहाःच
तुर्द्वारभावंभजंते॥मध्येमुख्यशृंगंचैत्यतरुभावंधत्ते॥यत्रनित्यवैराअपिजंतवोमुक्तवैराःपरस्परंस्नेहासक्ताःक्रीडंतिऋतवःसर्वेपि
समकालंस्वस्वशोभांप्रकटयंति॥ततश्चैनंपर्वतंदृष्ट्वामेमनसितथाकश्चित्॥वक्तुमशक्यःपरमानंदःसमुल्लसति॥यथाहंजानेममसर्वा
ण्यपिपापानिक्षयंगतानिप्राप्तोहंपरमनिर्मलतामितिश्रुत्वा॥शक्तिसिंहोवदत्स्वामिन्अयंरैवताचलः॥श्रीशत्रुंजयस्यपंचमंशृंगं
ज्ञानिभिः॥प्रोच्यते॥अस्यच॥उत्सर्पिणीकालेप्रथमेअरकेधनुःशतं॥१॥द्वितीयेयोजनद्वयं॥२॥तृतीयेदशयोजनानि॥३॥चतुर्थेषोडश
योजनानि॥४॥पंचमेविंशतियोजनानि॥५॥षष्ठेत्रिंशत्योजनानि॥६॥इतिउच्चत्वमानंएवमेवावसर्पिणीकालेहीयते॥ततोयंपर्वतः
शाश्वतप्रायः सर्वपापहरः॥अस्यअवसर्पिण्याःषट्सुअरेषुक्रमेणनामानि॥यथा॥कैलाश॥१॥उज्जयंतो२रैवतः३स्वर्णपर्वतः॥४॥
गिरिनारो॥५॥नंदभद्र॥६॥श्चेतिअनंताजिनाअत्रागताः॥आगमिष्यंतिच॥तथाअनंताःसाधवोत्रसिद्धाःभाविकालेसिद्धिंयास्यंतिच

अस्यचतुर्दिक्षु॥श्रीदः॥१॥सिद्धिगिरिः॥२॥विद्याधरः॥३॥देवगिरिश्चेति॥४॥चत्वारःपर्वताःपूर्वस्यांदिशि॥श्रीदसिद्धगिर्योरंतराले॥उदयं
तीनाम्नीनंदी॥दक्षिणस्यांउज्जयंती॥पश्चिमायांसुवर्णरेखा॥उत्तरस्यांलोलानाम्नीएवंएताअन्याअपिबह्व्योनद्यःपर्वतस्यसर्वतःस्व
च्छशीतोदकाः॥महाप्रभावानेकद्रहमंडिताःदर्शनात्स्पर्शनात्॥स्नानात्जिनस्नानकरणाच्चदारिद्र्यदौर्भाग्यदुर्गतिवारकाःश्रीसंप
त्कारिकाश्चभवंति॥अत्रतीर्थेविद्याधराःकिंनराःदेवाअप्सरसोयक्षाद्याःस्वस्ववांछितकार्यसिद्ध्यर्थेनित्यवसंति॥अथवापश्चिमदि
शिकोयंपर्वतइतिचक्रिणापृष्टे॥शक्तिसिंःप्राह॥स्वामिन्पूर्वंवरटोनामविद्याधरोदुष्टबुद्धिःअत्रपर्वतेराक्षसीविद्यांसाधयित्वाअत्रैवप
र्वतेस्थितवान्॥तेनातिक्रूरेणवरटेन॥अधिष्ठितत्वात्॥पर्वतोपिलोकेवरटद्रइतिनाम्नाविख्यातः॥असौदुर्दांतोमहाक्रूरकर्माबहुभिरसु
रैःपरिवृतोनेकविडंबनाभिः॥सुराष्ट्रादेशंविडंबयति॥ममाज्ञांचनमन्यतेइतिश्रुत्वाचक्रीक्रोधात्सुखेणसेनान्यंतस्यजयायसमादिशत्
अथसेनानीःस्वामिनआज्ञांमस्तकेधृत्वा॥विमानमारुह्यचचलितस्म॥वरटासुरोपितंसमागतंज्ञात्वातिक्रुद्धोवक्रराक्षसैःपरिवृतोयुद्धार्थं
समागतः॥अथक्षणंतैःसहयुद्ध्वासुखेणसंराक्षसंबध्वाविमानमध्येप्रक्षिप्यचक्रिपार्श्वेआगत्यचक्रिणःपादपीठेतंलुंठयामास॥अ
थतंदीनम्लानमुखंगाढबंधनबद्धं॥अशरणंदृष्ट्वासंजातकरुणारसःशक्तिसिंहःप्राह॥अरेविद्याधराधमयत्त्वयापशुवत्पूर्वआरोपित

51/1962

हिमाजलेन सिक्तश्चसोयंसांप्रतं पल्लवितोजात:॥ तस्यपुष्पफललाभस्तुनारभविभविष्यति॥ ततोद्यापिजीवहिंसांत्यज ममांज्ञांच् अं
गी कुरुयेन तवजीवितव्यदानं दापयामीतिश्रुत्वा सप्राह॥ स्वामिन् अद्यप्रभृतितवाज्ञांमस्तके धारयिष्यामिजीवहिंसांचनकरिष्यामी
ति॥ ततः शक्तिसिंहेन मोचितोसौ चक्रिणं शक्तिसिंहंच प्रणम्य स्वभक्तिप्रकाशनार्थं तत्रपर्वते श्री आदिनाथनेमिनाथयोः प्रात्तुंगप्रासा
दौ अकार्षीत्॥ समीपेच पूर्वदिग्गामिनीं शत्रुंजयातुल्यानदीं अकरोत्॥ यस्तत्रस्नात्वा॥ श्री आदिनाथंनेमीशंचपूजयति॥ तस्यासौ सर्व
कामान् पूरयति॥ इत्थंचक्री तत्तीर्थंस्थापयित्वा बरटासुरंच॥ रक्षायांनियोज्य स्वयंसंघलोकसहितो मुख्यश्रृंगेस्वयंकारितेप्रासादे॥ श्री
नेमिपूजार्थंसमाजगाम॥ अत्रांतरे पंचमदेवलोकेशो ब्रह्मेंद्रः सुरकोटिभिः परिवृतस्तत्रागतः॥ श्रीभरतेशं भगवद्भक्तितत्परं दृष्ट्वा॥
स्नेहोल्लसन्मना मधुरवाण्या इत्युवाच॥ भोयुगादिजिनवंशभूषण अखंडभरतेश्वर वरमशरीरत्वंजयवान्भव॥ यथाश्री आदिना
थस्तीर्थकराणांप्रथमः तथा अस्यांचतुर्विंशत्यांत्वमेवप्रथमसंघपतिः तीर्थमहिमाप्रकाशकः॥ अत्रतीर्थेशत्रुंजयेचप्रथमोद्धारक
रणात्॥ नवंतीर्थंप्रवर्त्तितं॥ ततस्त्वंअस्माकंमान्योपि पूर्वं अतीतायांउत्सर्पिण्यां तृतीयतीर्थकर श्रीसागरजिनमुखात् ब्रह्मेंद्रः इति
ततस्तेन ब्रह्मेंद्रेण श्रीनमेः प्रतिमाकृत्वा॥ स्वदेवलोके यावज्जीवंपूजिता॥ ततो विछिन्नपरंपरया अद्ययावत्॥ अस्माभिरपिसापूज्यते॥

अत्रच श्रीनेमेः त्रीणिकल्याणकानि भावीनि इति भक्त्या सदाप्यागछामः वयंश्रीजिनभक्ताः त्वंतुप्रथमजिनपुत्रो अस्माभिर्दृष्ट इतिम
हन्मंगलं॥ इत्येवंमधुरोक्तिभिश्चक्रिणंबहुधाभिनंद्य॥ भगवंतंविशेषभक्त्यावंदित्वार्चयित्वा॥ ब्रह्मेंद्रः पुनर्देवलोकंगतः॥ ततः सौधर्मे
द्रोपि श्रीभरतंआपृछ्य स्वस्थानंगतः॥ अथभरतोपि॥ तत्रध्वजदानेंद्रोत्सवादिकृत्यंसमाप्य अनर्गलदानैः॥ कृत्वा याचकजनानांवां
छितंपूरयामास॥ एवंएकमासंयावत्तत्तीर्थसेवया॥ स्वजन्मसफलतांकृत्वा॥ चक्री रैवतगिरेः श्रृंगात् उत्तरतिस्म॥ ततः शक्तिसिंहस्या
त्याग्रहवशात्॥ गिरिदुर्गपुरंप्राप्तः तत्रापि प्रासादे श्रीऋषभजिनपूजया॥ आत्मलक्ष्मीं सफलीकृत्य॥ शक्तिसिंहेन नानाविधभक्ति
भिर्गौरवितः सैन्यसमूहैः संघलोकैश्चसह॥ आनंदपुरंप्रतिचचाल॥ अथमार्गेव्रजन्॥ श्रीभरतेश्वरः पुनः२ पश्चाद्विलोक्य रैवताद्रिशोभा
द्भुतचित्तः॥ सविस्मयंशिरोधूनयित्वा॥ इतिप्राह॥ भोशक्तिसिंह अयंगिरिर्नूनंमेरुरोहणवैताढ्यादिगिरीणांसारैर्निर्मितः॥ यतः सर्वत्रायंहे
मरत्नरूप्यमय एवविलोक्यते अस्यदेशस्यापि सुराष्ट्रा इति सार्थकंनाम॥ यत्रराष्ट्रे॥ शत्रुंजयरैवतादितीर्थानांनिवासः षट्खंडमेदिनी
मध्ये सुराष्ट्रासमोन्यः कोपिसर्वतीर्थमयोदेशोनविद्यते॥ येनअत्राप्यागत्य हत्यादिपातकैर्नमुक्तास्तेषां अन्यत्रतीर्थलक्षेपि अनेकतपो
दानादिभिरपिशुद्धिः कथंस्यात्॥ यत्रदेशे सर्वोपिलोकः कूटकापट्यरहितः सरलस्वभावः॥ दयावान्॥ यत्रनकदापिदुर्भिक्षभयं॥ ततश्चि

103/1982

रंजयनान्॥ अमोसर्वदेशशिरोमणिःरित्यादि॥स्तवनांकुर्वन्चक्री॥श्रीशत्रुंजयंप्रदक्षिणीकृत्यकतिचित्प्रयाणैःआनंदपुरंप्राप ततःशक्ति
सिंहःआहूयधन्यस्त्वमेवयत्सर्वतीर्थमयस्यसुराष्ट्रादेशस्यपालनंकरोषि॥ जगत्पितामहं श्रीयुगादीशंसेवसे ततोमदाज्ञयात्रसाम्राज्यं
प्राप्तःसन्॥विशेषात्तीर्थरक्षाकरोभव इत्युक्तातस्यतीर्थरक्षावद्धमानस्तवकं॥तीर्थद्वयस्यायंरक्षकइत्यभिज्ञानार्थंछत्रद्वयंददौ॥अन्यद
पिगजाश्वरथालंकारादिकंधनंप्रीतिदानंदत्वा॥विसृष्टःसोपचक्रिणंनत्वा॥स्वपुरेआगत्यन्यायमार्गपरःसाम्राज्यंपालयामासचक्रवर्त्ते
पि॥ततोर्बुदाचलेगत्वातीर्थयोग्यतांज्ञात्वा॥गुर्वाज्ञयाप्रेरितोतीतानागतवर्त्तमानजिनानांप्रासादान्॥प्रतिमाश्चअकारयत्॥अथसर्व
तोपिसमागतान्॥स्वभ्रातृव्यान्नानाविधदानसंमानैःप्रीणयन्स्थाने॥२जिनभक्तिसाधुसाधर्मिकवात्सल्यादिसुकृतंवर्द्धयन्॥दीनानाथा
दिदुःखितानांदुःखनिवारयन्स्थाने २तीर्थानिनमस्यन्पूजाभक्तिदानादिभिःपरितुष्टानांमुनीनांधर्मलाभाशिषोगृह्णन्॥अवच्छिन्न
प्रयाणैःक्रमेणमगधदेशंप्राप॥तत्रापिमागधोनाम॥स्वभ्रातृव्यःसंमुखमागतः॥तेनचकृतप्रौढप्रवेशोत्सवःश्रीभरतेश्वरोराजगृहपु
रप्रविवेश॥मागधनृपेणसपरिजनस्यचक्रिणोभोजनादिवहुभक्तिःकृता॥अथचक्रीराजगृहपुरसन्निवेभारगिरोयात्रार्थंगतः॥तत्रापि
तंगिरितीर्थभूतंमत्वाभाविनःश्रीमहावीरस्यप्रासादंकारितवान्॥पुनस्तत्रशत्रुंजय॥१॥उज्जयंत॥२सम्मेत३ इतिनामकेषुशिखरेषुवि

पुलगिर्वतेपिप्रासादान्॥कारितवान्॥एवंतत्तीर्थसंस्थाप्य॥पूजोत्सवदानादिमहासुकृतानिचविधायमागधनृपंअनुज्ञाप्यप्रयाणभंभांता
पयित्वाचक्रीप्रयाणंचक्रे॥ततःसर्वसुरासुरनरैःपरिवृतःकतिचित्प्रयाणैःसम्मेतशिखरगिरिमाप॥तत्रापिगुरुवचनात्॥भाविविंशतिजि
नानांनिर्वाणस्थानंविज्ञाय॥तेषु२शृंगेषुविंशतिप्रासादान्कारयामास॥ततोष्टाह्निकामहोत्सवं॥पूजास्नानारात्रिकध्वजकलशदानसाधु
भक्तिसाधर्मिकवात्सल्यादिसुकृतकरणेनाराध्यतीर्थमहिमानंप्रकटीकृत्य॥पुनःशुभदिवसेअयोध्यांप्रतिप्रतस्थेकतिपयैःप्रयाणैःअ
योध्यापरिसरोद्यानंप्राप्तः॥ततोभरतेशस्यागमनसमाचारंविज्ञाय हर्षोल्लसद्गात्रःश्रीसूर्ययशास्तनूरूणंसकलपौरजनसामंतादिपरि
वृतःतत्रागत्यचक्रिणःपादयोरलुठत् तत्पितंसमालिंग्य॥यथायोग्यं॥आभाषणप्रसाददृष्टिनिरीक्षणादिभिःपौरजनांश्चप्रीणयतिस्म॥त
तश्चहर्षोल्लसन्मानसैःपौरजनैःशृंगारिताहट्टश्रेणयःचंदनकुंकुमजलैःसिक्तामार्गभूमयःनिःक्षिप्ताःसर्वत्रपुष्पप्रकराःउच्छ्रिताःस्थाने२
ध्वजतोरणवंदनमालिकाःकृताश्चत्रिकचत्वरादिषु॥उल्लोचमंचमहामंचदर्पणादिशोभाःअथचक्रीगजरत्नमारूढःध्रियमाणातपत्रः
चामराभ्यांवीज्यमानःवंदिभिर्जयजयारवेणाभिनंद्यमानःस्तूयमानःकविजनैःनिरीक्ष्यमाणोगवाक्षस्थितैःपुरपुरंध्रीजनैःअनुगम्यमानःस
कलसामंतपौरजनैःविधीयमानेषु गीतनृत्यवादित्रादिमहोत्सवेषु॥अपरिमितदानैरर्थिजनमनोरथान्पूरयन्॥संमानयन्साध

105/1952

र्मिकान् पुरस्कृत्य शक्रार्पितं देवतालयं॥ श्री गुरुं च पृष्टतः सधवस्त्रीभिर्धवलगानं च चितत्त्र भोदकं॥ इत्थं महाडंबरेण सुरासुरसर्वलोकैः
समं पुरीं अयोध्यां प्रविवेश॥ ततः प्रथमं मुख्यचैत्येषु जिनान्नत्वा गुरून्वंदित्वा॥ उत्तुंगतोरणं स्वसौधोत्संगं विभूषयामास॥ अपास्तनिःशेषत
मःप्रचारः प्रोच्चैः पदं प्राप्य विवृद्धतेजाः मध्याह्नकालार्क इवात्र मध्यमध्यास्त सौधाग्रम सौ श्रितश्रीः॥१॥ ॥इतिश्रीशत्रुंजयमहात्म्यो
ल्लेखे पंडितश्रीहंसरत्नविरचिते श्रीरतयात्रातीर्थोद्धारवर्णनो नाम पंचमोधिकारः॥ ५ ॥ ॥श्री आदिनाथाय विजित्य भावद्विषतोखि
लानपि॥ श्रितो रूया नंतसुखं परं पदं॥ नमोनिमग्नं जगदुद्धारय॥ सनाभिसुनुः सततं श्रियेस्तुनः॥१॥ अथ शृणु देवेंद्र॥ श्री भरतेशस्य केव
लोत्पत्तिनिर्वाणपदप्राप्त्यादि स्वरूपं॥ तदाह॥ अथ श्री भरतेश्वरः सोमयशः प्रमुखान् देशादिदानेन बकृधा सत्कार्य सकलसंघलोकान
पि॥ भोजनाच्छादनादि सन्मानदानैः प्रीणयित्वा स्वस्वस्थानं प्रतिव्यसृजन्न् स्वयं राज्यचिंतायां सावधानो भूत्वा षट्खंडावनीं पालयन् सुखं भु
जे॥ अथन्यदा भगवान् श्री युगादीशो विहरन्॥ अष्टापदपर्वते समवसृतः उद्यानपतिना चक्रिणे वर्द्धापनिका दत्ता॥ तस्मै पारितोषिकं दानं दत्वा
श्री भरतेशः सपरिकरो वंदनार्थं आगतः॥ भगवता देशना दत्ता यथा चारित्रं वितनुते धिनोति विनयं ज्ञानं नयत्युन्नतिं॥ पुष्णाति प्रशमं तपः प्रब
लयत्युल्लासयत्यागमं॥ पुण्यं कंदलयत्यघं दलयति स्वर्गं ददाति क्रमान्निर्वाणश्रियमा॥ तनोति निहितं पात्रे पवित्रं धनं॥१॥ इत्यादि दानफल

प्रकाशिनीं॥ देशनां श्रुत्वा॥ चक्रवर्ती प्राह स्वामिन्॥ अहं नित्यं सर्वसाधून् अशनपानादिभिः प्रतिलाभयामि॥ ततो भगवान् प्राह चक्रिन् मुनीनां
तु राजपिंडो न कल्पते॥ आस्तां सर्वसाधुभ्यो दानं॥ परं एकोपि साधुस्त्वद्गृहे आहारादिकं न गृह्णाति॥ ततः स्मृतं एतया तवाभ्यर्थनया॥ ततः पुन
श्चक्री प्राह॥ स्वामिन् पात्राणां उत्तमं पात्रं तु तावत्साधवः तेषां यदि मदीयं दानं न कल्पते॥ तदा कथं मम सुपात्रदानस्य लाभो भवति॥ अत्रांतरे
सौधर्मेंद्रः प्राह चक्रिन् यथा साधवः सुपात्रं तथा॥ श्रावका अपि सुपात्रं कथ्यंते॥ यतः उत्तमपत्तं साहू॥ मज्झिमपत्तं च सावया भणिया इति सिद्धां
ते॥ साधुनां पृष्टतः श्रावका अपि सुपात्र तया भणिताः ततस्त्वं साधर्मिणां श्राद्धानां भक्तिं कुरु॥ इति शक्रेणादिष्टं तच्च भगवतापि अनिषिद्धं त
न्निशम्य चक्री गृहमागत्य॥ ततः प्रभृति नित्यं श्रावकान् स्वगृहे भोजयामास इत्थं च प्रतिदिनं भोज्यमानान्॥ श्राद्धान्वीक्ष्य॥ अन्येपि बहवो भो
जनलालसा॥ वयं श्रावकाः इति कृत्वा चक्रिणो रसवत्यां भुंजंति॥ एवं च नित्यवास्तेषां परोलक्षाणां॥ भोजनपरिचर्याकरणेन उद्विग्ना रसवती
काराः॥ श्री भरतेश्वरं प्राहुः॥ स्वामिन् एते लक्षशो भुंजते तेषां मध्याते॥ श्राद्धाश्राद्धयोर्विभागस्तु॥ अस्माभिर्न ज्ञायते इति श्रुत्वा चक्रिणा श्राव
काणां जीवाजीवादि विचार पृच्छाकरणेन परीक्षा कृता॥ तत्र ये सम्यक् परीक्षां प्राप्ता॥ स्तेषां कंठे काकिणीरत्नेन रेखात्रयं कृतं॥ उक्तं च॥ ये एते रे
खांकितास्ते श्राद्धा॰ विशेषतो भक्त्या भोजयितव्याः॥ अपरे तु एभ्यः॥ पृथक् पंक्तौ॥ अनुकंपादानमीत्या भोजयितव्याः॥ ततः श्चक्रीषड्भिः

२नमिः॥सर्वश्रावकाणांपरीक्षांपूर्वरेखात्रयंकृत्वा॥सेवकान्प्रतिइतिआह॥एतेपरीक्षांप्राप्ताः॥सुश्रावकाः॥एतान्भोजनार्थंआगतान्॥माह

नमानेहे इतिमानिवारयत॥इत्यर्थः॥ततस्तेषांलोकेमाहना॥एतेइतिप्रसिद्धिर्जाता अथचक्रीतान्॥अर्हद्यतिश्राद्धधर्मगुणसूत्रप्रकाश

कान्॥चतुरोवेदान्पाठयामास॥एवंश्री।भरतेशात्परंपरयासाधार्मिकवात्सल्यप्रवृत्तिर्जाता॥अथश्रीयुगादिस्वामिनःपंचाशीतिसहस्रा

धिकंलक्षंसाद्धीनिषट्त्रशनानिसाधवः॥लक्षत्रयंसाध्व्यः॥सार्द्धानित्रीणिलक्षाणिश्रावकाःपंचलक्षाणिचतुःपंचाशत्सहस्राधिकानिचश्रा

विकाःस्वप्रतिबोधिताअभूवन्॥एतन्मानंग्रंथांतरेतुअन्यथादृश्यतेमयातुमूलग्रंथोक्तंलिखितमस्ति॥एवंचतुर्विधंसंघंस्थापयित्वा॥एकं

पूर्वलक्षंव्रतंपालयित्वा॥स्वकीयनिर्वाणसमयंज्ञात्वाअष्टापदपर्वतंप्राप्य॥तत्रशुद्धप्रदेशे दशभिरनगारसहस्रैःसमंअनशनंचकार

अथोद्यानपतिःशीघ्रंभरतचक्रिपार्श्वेगत्वा॥तत्सर्वंकथयामास॥चक्र्यपितज्ज्ञात्वातिदुःखितःसहसोत्थायवाहनपरिवारादीन्विने

व॥पादचारेणशीघ्रंअचलत्॥ततश्चक्रीअश्रुपूरणेरुद्धकंठोनेत्रजलैर्भुवंसिंचन्॥तथावस्थान्ध्यंतःपुरिपरिजनपौरजनादीन्॥समाग

तान्॥अप्रतिक्रमाणोवेगात्अष्टापदशैलंआरूढः॥तत्रपर्यंकासनस्थितंसर्वेदियाणिसंवृत्यस्थितंप्रभुंदृष्ट्वा॥नेत्राभ्यांअश्रुधारांमुंच

न्प्रणमतिस्म॥अत्रांतरेसर्वेइंद्राअपिचलितासनाःतत्रागताःअतिशोकाकुलाःप्रभुंप्रदक्षिणीकृत्यप्रणमंतिस्म॥अथभगवान्द्रती

पारकस्य॥एकोननवतिपक्षेषुशेषेसु॥माघमासेकृष्णत्रयोदशीदिनेपूर्वाह्नकाले॥अभिजित्नक्षत्रस्थेचंद्रेशुक्लध्यानस्यचतुर्थविकल्पं

प्राप्य॥मनोवाक्काययोगान्॥श्वासोच्छ्वासंचनिवर्त्तयित्वाशैलेशीकरणेनसर्वकर्मक्षयंकृत्वा॥लोकाग्रपदंमोक्षंप्राप्य॥तेबाहुबल्यादयःसा

धवोपिसर्वेतेनैवक्रमेणक्षणात्॥सकलकर्मक्षयंकृत्वामुक्तिंप्रापुः॥तदाप्रभुनिर्वाणसमयेत्रैलोक्येपिउद्योतोभूत्नारकाअपिमुहू

र्त्तयावत्दुःखरहिताबभूवुः॥अथचक्रीभगवतोनिर्वाणंवीक्ष्यसंजातशोकातिशयोमूर्च्छांप्राप्यभूमौपपात॥ततःक्षणाल्लब्धचैतन्यः

पुनर्विललाप॥हाहाजगदेकपूज्यःपितातथाबाहुबल्यादयोबांधवाः॥ब्राह्मीसुंदर्यौभगिन्यौपुंडरीकाद्याःपुत्राःश्रेयांसाद्यापौत्राःएते

षुसर्वेष्वपिमोक्षंगतेष्वद्यापिअहंजीवामि॥इत्यादिविलपंतंतंवीक्ष्य॥शक्रःशोकनिर्गमनोपायदर्शनार्थं॥महताआक्रंदेनकृत्वास्वयंरो

दितिस्म॥तत्पृष्टतः॥सर्वेदेवाअपिरुदुःतद्दृष्ट्वा॥भरतेशोपिरोदनकर्मणिअभिज्ञोभूत्॥अद्यापिलोकेतथैवतद्व्यवहारःप्रवर्त्तते

॥अथचक्रिणंअतिशोकाक्रांतंमरणोन्मुखमिववीक्ष्य॥इंद्रस्तत्प्रतिबोधार्थंउवाच॥भोचक्रिन्त्रिजगन्नाथस्यपुत्रःधैर्योदार्यादिगु

णानामेकआश्रयःत्वमपिकथमेवंपामरजनवत्॥शोकाकुलोसियःस्वामीत्रिजगतोप्याधारभूतोजगतःस्थितिकारकोविश्वोपका

रकृत्वा॥कृतकृत्यः॥अनंतसुखंप्राप्तःसकथंशोचनीयोभवति॥अन्यच्च॥हर्षशोकौद्वावपिस्वार्थहानिकरौभवतः॥ततोविवेकिना

111/1962

दूरंपरिहर्त्तव्यो॥ततःशोकंत्यक्त्वापुनर्द्धैर्येणआत्मानंस्थिरीकुरुइतिचक्रिणंसमाश्वास्यशक्रस्वामिनोमुनीनांचदेहानांदाहकर्मार्थं॥सुरैश्च
दनकाष्टभरान्॥आनाययामासपूर्वस्यांदिशिप्रभोःचितांवृत्ताकारांअरचयत्॥इक्ष्वाकुवंशोद्भवानांत्रिकोणांदक्षिणस्यांअन्येषांपश्चि
मेचतुरस्रांचितांरचयित्वा॥ततःशक्रोभगवतःशरीरंक्षीरसमुद्रजलैःसंस्नाप्यवस्त्राभरणैर्भूषयित्वा॥शिबिकामध्येअक्षिपत्॥ततःप
रेसुराःइक्ष्वाकूणांशरीराणि॥अन्यसाधूनांचशरीराणि॥तथैवशिबिकागतानिकृत्वा॥वादित्राणिवादयंतः॥केचित्पुष्पवृष्टिंकुर्वंतःकेचिन्न
त्यंतः॥एवंनानाभक्तिपरायणास्तेइंद्रादयोदेवाःचितासुप्रक्षिपंतिस्म॥ततोग्निकुमाराअग्निंवायुकुमाराश्चवातं॥विकुर्वंतिस्म॥मेघमालिनश्च
अस्थिशेषनिर्वापयामासुः॥ततःप्रभोर्दंतास्थीनियथायोग्यंसर्वेशक्रादयःस्वसभासुपूजयितुंजगृहुः॥एवंपरैरपिदेवैःपरेषांसाधूनांय
थायोग्यंतद्गृहे॥तत्प्रार्थनापरेभ्यःश्रावकेभ्योपिदेवैःयथायोग्यंतस्मात्कुंडत्रयात्॥अग्निःअर्पितः॥ततःप्रभृतिनिअग्निहोत्रकाब्राह्मणा
इतिलोकेख्याताः॥केचिच्चतदीयंभस्मापि॥वंदनीयत्वान्मस्तकेधृतंकमात्तेभस्मोद्धूलनपराःतापसाःइतिलोकेख्याताः॥अथतत्रचितात्रय
स्वस्थानेरत्नमयान्स्तूपान्विधायइंद्रादयसुराःसर्वेपिनंदीश्वरेष्टाह्निकांकृत्वा॥भगवद्गुणान्स्मरंतःस्वस्वस्थानंप्राप्यसर्वविप्रोपशांत्यर्थं
भगवतोदंष्ट्रादंतादिपूजनपरास्तस्थुः॥इतश्चभगवतश्चितासमीपभूमौश्रीभरतेशोवर्द्धकिनासिंहनिषद्यानामकं॥दैर्घ्यविस्ताराभ्यां

योजनप्रमाणंगव्यूतित्रयोच्चं॥महाप्रासादंअकारयत्॥तत्रप्रासादेचत्वारिद्वाराणिध्वजतोरणादि॥भूषितानि॥अभूवन्॥प्रतिद्वारंमुखमं
डपस्ततःप्रेक्षामंडपस्तदग्रतोमणिपीठिकातदुपरिचैत्यस्तूपस्तत्रचसर्वांगरत्नमय्यश्चतस्रोजिनप्रतिमाःपंचशतधनुःप्रमाणाऋषभ
१.चंद्रानन२वर्द्धमान३वारिषेण४नामकाअभूवन्॥तदग्रतोपिमणिपीठिकासुचैत्यवृक्षास्तत्पुरतोमणिपीठिकासु॥इंद्रध्वजा॥स्तदग्रतो
पिनंदापुष्करिणीवाप्योभूवन्॥अथमुख्यप्रासादस्यमध्येमणिमयपीठिकाया॥उपरिदेवछंदके॥स्वस्वदेहमानवर्णादिशोभिताश्चतुर्विंश
तिजिनानांप्रतिमामणिरत्ननिर्मिताःछत्रत्रयादिशोभाकलिताअभूवन्॥तत्रऋषभाजितौपूर्वदिशिसंभवाद्याश्चत्वारोजिनादक्षिण
स्यांसुपार्श्वाद्याअष्टजिनाः॥पश्चिमायांधर्मनाथाद्यादशजिनाउत्तरस्यांइतिअत्रचसर्वासामपिप्रतिमानांपरिकरेषु॥एकश्छत्रधरः
द्वौचामरधरौ॥द्वेद्वेनागभूतयक्षकुंडधरमूर्त्तीभवंति॥इत्यंअत्रप्रासादवर्णकःसर्वोपिशास्वतसिद्धायतनवद्देदितव्यः॥विस्तरार्थि
भिः॥श्रीहेमाचार्यकृतश्रीऋषभचरित्रतोविलोकनीयः॥अथतत्रअन्याअपिबंधूनांपूर्वजानांब्राह्मीसुंदरीभगिन्योश्चस्वकीयांचसर्वाः
प्रतिमामणिस्वर्णमयोकारयत्॥प्रासादस्यसर्वदिक्षुचैत्यवृक्षाःकल्पवृक्षाःसरांसिदीर्घिकाश्चेत्यादिरचनाशुशुभे॥प्रासादाद्बहिः
एकंभगवतःस्तूपंमणिमयंविशालंअकार्षीत्॥तथैवंबंधूनामपिसर्वेषांस्तूपान्अकार्षीत्॥तेषांचरक्षार्थंयत्रार्पितवाणहस्तान्

लोह पुरुषान् सर्वदिक्षुस्थापयामास॥यःकश्चिदाशातनाबुद्ध्या॥तत्रयातिसतत्कालंतैश्चमुक्तैर्बाणैर्भिद्यते॥ततोभूत्तराणां॥तत्स्थानेऽग
म्यंअभूत्॥पुनःश्रीभरतानयाअधिष्टायकादेवास्तत्रतस्थुः॥एवंतंप्रासादंसपरिकरंनिर्माप्य॥चक्रीमहामहोत्सवपूर्वकंगणधरमुनिग
णैःप्रतिष्टांकारयामास॥ततःश्रीभरतेशःशुचिर्भूत्वाश्वेतवस्त्रधरःनिषिधकीत्रयपूर्वकंप्रासादांतःप्रविश्यत्रिःप्रदक्षिणांकृत्वा॥पवित्रजले
प्रतिमाःसंस्थाप्यसुगंधिकोमलवस्त्रैःअंगरूक्षणंकृत्वा॥चंदनघनसारपुष्पदामप्रमुखैःअपूजयत्॥ततोधूपंततोऽष्टमंगलालेखनंफल
ढौकनंमंगलप्रदीपं॥आरात्रिकादिकंचसमग्रंविधिंकृत्वाविशेषभक्तिभरोल्लसितमानसः॥इत्थंस्तुतिंचक्रेस्वामिस्त्रिजगदाधारधर्मोद्धारधु
रामिमांमुक्त्वाऽस्वःश्वभ्रयोःसीमाःलोकाग्रंदुर्गमंगतः॥१॥त्रिलोकीयद्यपिस्वामिन्मुक्त्वाऽगतवानसि॥मातथापिचलाच्चित्तेभवंतंभा
स्यतिस्फुटं॥२॥त्वद्ध्यानरज्जुमालंब्य॥मादृशोदूरगाअपित्वदीयसन्निधांचैव॥तत्कथंप्रथमंगतः॥३॥मदमेवयथामुक्तानिःशरण्यानिदैव
नःयातोसितद्भ्मायामाश्चित्राद्यावत्त्वदंतिके॥४॥इत्यादिभिर्भाविसाराभिःस्तुतिभिर्भगवंतंस्तुत्वाक्षणंस्थिरमनाइत्यचिंतयत्॥अग्रे
विषमकालानुभावात्॥धनलुब्धेभ्योमनुष्येभ्योमाभूत्॥अस्यमणिमयस्यप्रासादस्यआशातनाइतिविचिंत्य॥दंडरत्नेनकृत्वासपर्व
तो॥दंतकान्छिलास्तंभसदृशान ... त ... तेरचणकेकंपदंकृतं॥एवमष्टापदानिजातानि॥ततोऽष्टापदइतिनाम्नालोकेख्यातः

इत्थंसतत्तीर्थंसंस्थाप्यसचक्री॥श्रीतातपादानांवियोगदुःखंअविस्मरन्॥तत्रैवमनोमुक्त्वादेहमात्रेणपुनःअयोध्यांप्राप॥अथचक्रीलोक
रक्षायै॥राज्यंपालयन्नपिनृत्यगीतवादित्रकौतुकक्रीडागोष्ठ्यादिषुकुत्रापिरतिंनलभतेस्म॥नचस्त्रीणांविलासविभ्रमादिषुनचभोजनव
स्त्रशयनासनवाहनादिषु॥नचवनवाटिकाविहारादिषु॥तस्यमनः॥प्रमोदंप्रापदिवारात्रौनिद्रायांजागरेवासर्वावस्थासु॥श्रीयुगादिजिनस्म
रणेएवासक्तंतस्यमनोभवत्॥ततःप्रधानपुरुषाश्चक्रिणंशोकाक्रांतंवीक्ष्य॥नीतिवाक्यैःप्रतिबोधयामासुः॥ततोनिरंतरंतेषांवचनैःकथं
चित्॥शोकमपसार्यचक्रीचिरेणराज्यव्यापारे॥सावधानोबभूव॥अथातुलपुण्यप्राग्भारोनीतविश्वातिशायिसाम्राज्यभोगःसप्रमोदंप्रतिदिनं
नवनवविलासान्विलसन्॥अन्यदाकृतस्नानःसर्वांगभूषणधरोदेहाभरणादिशोभावलोकनार्थंआदर्शभवनंप्रविवेशतत्रचस्वदेह
प्रमाणेरत्नदर्प्पणे॥लीलयाप्रत्यंगंसर्वांगशोभांविलोकयन्॥एकांअंगुलींमुद्रादिभूषणरहितांहिमदग्धांवृक्षशाखामिवनिःश्रीकांदृ
ष्ट्वा॥इत्थंअचिंतयत्॥अहोयथाइयंअंगुलीशृंगाररहितानशोभते॥तथामन्येमस्तकादिषुसर्वेष्वपिअंगेषुआभरणैःकृताःशोभा
दृश्यते॥नचैतानिसहजशोभयासुंदराणि॥ततोधिगदोपरपुद्गलानांकृत्रिमशोभायामेवसंसारीरज्यति॥इतिविचिंतयन्॥सर्वा
ण्यपिभूषणानिउत्तारयामास॥यदाहमूलग्रंथेमौलिमौलिमयःकरोत्॥अ ... तोनिष्कंहारमुरःस्थलान्नसद

सैवांमहृयादंगदे॥चक्रीपाणियुगाद्भवीरवलयेमुद्रावलीमंगुली वर्गाद्धारमिवप्रशांतहृदयोवैराग्यभागित्यय॥२॥ततः फाल्गुनेमसिनि:
पत्रकवृक्षवन्निःश्रीकंस्वदेहंवीस्यइत्यचिंतयत्॥अहोयंकायोभूलिभिन्निसदृशोनेकबाह्यशोभाभिश्चिवितःक्षणमनोहरतांप्राप्नोपि॥अ
वस्यंअनित्यरूपवृक्ष्याभेदिनः॥मन्पतन्त्येव॥अहोसंसारिणांमोहमूढता॥यतःपांडुपत्रवत्॥पतनशीलेपि॥देहेशास्तवस्तुवन्मदा
ममता॥देहोयंमलमूत्रश्लेष्मजंबालरमरक्तप्रभृतिविरूपधातुभिर्भृतः॥कथंचिन्मनसिविचारितः॥सन्केवलंजुगुप्साकारकः॥बहिस्त्व
चामात्रेणमुग्धलोकानांमनसिसुरूपतांप्रकटयतिसात्वचापिचंदनादिसुगंधिभिर्द्रव्यैर्लिप्तापिक्षणमात्रात्दुर्गंधिपिच्छिलतांदर्शयति
एवंविधेशुचिसंभवेशुचिमयेचअस्मिन्देहे॥तत्त्वभावंजानंतोपिजना:पुनःर्गर्त्ताशूकरवन्निमज्जंतितस्यपोषणार्थंसर्वाणिअकृत्यानि
चकुर्वंति॥परंपद्मिनीपत्रस्थितजलबिंदुवत्॥जीवितव्यंअतिचपलंनजानंते॥अहोमयाषष्टिवर्षसहस्राणियावत्पृथ्वीतले भ्रांत्वाअस्य
देहस्यैवकृतेमहान्पापभरः॥समुपार्जितः॥धन्यास्तेममबाहुबल्यादयोबांधवा॥येपादलग्नरेणुवत्॥राज्यादिममत्वंत्यक्त्वा॥स्वयंकृतकृ
त्यामोक्षंप्राप्ताः॥अहंतुपंकमग्नोहस्तीव॥अद्यापिआत्महितंनसमाचरामि॥हेतातहेश्रीयुगादीश॥सांप्रतंसंसारकूपात्समुद्धर॥अथवाकिं
जल्पामि॥किंवाविलापयामियत्त्वयानवनवतिपुत्रास्तावन्मोक्षंप्रापिता:॥तत्रएकोहंअयोग्यइतिकृत्वा॥प्रथममतएवअपेक्षितोस्मि॥त

तोधिकसंसारमसारं॥एकोहं॥देहधनस्वजनादिकंममकिंचिन्नास्ति॥अहमपिनकस्यचित्ज्ञानानंदस्वरूपोहं॥एतेसर्वेविभावाद्दूरेतिष्ठंतु
स्वभावसुखमग्नस्यमे॥नकाचिदपितृष्णाज्वरार्त्तिः॥इत्यादिभावनामग्नस्यचक्रिणःध्यानाग्निबलात्घातिकर्मवनेभस्मीभूतेसतिकेवलज्ञानं
समुत्पन्नं॥ततःशक्रादेशात्सुरैर्यतिवेषःसमर्पितः॥तंवेषंधारयित्वासर्वविरतिदंडकंउच्चरतिस्म॥तस्मिन्समयेदशसहस्राणिनृपाःचक्रिणः
पृष्टेव्रतंजगृहुः ततःशक्रेणश्रीआदित्ययशा:॥श्रीभरतेशस्यपदेस्थापितःसोपिपितृवत्न्यायनीत्याप्रजांपालयामास॥अथश्रीभरतस्वा
मी॥श्रीऋषभस्वामिवत्सपरिकरःसुरासुरनरेंद्रादिभिःसेव्यमानःस्वपादन्यासैःपृथ्वीतलंपावयन्॥धर्मदेशनयानेकभव्यजनानांअनुग्र
हंकुर्वन्॥इत्यंकेवलोत्पत्तिकालादारभ्य॥एकंपूर्वलक्षंयावद्विहरतिस्म॥ततःस्वनिर्वाणकालंविज्ञाय॥अष्टापदपर्वतेनशनंचकार॥एक
मासं॥यावत्निरतिचारंअनशनंप्रपाल्य॥सकलकर्मक्षयंकृत्वा॥मासांतेश्रवणनक्षत्रेमोक्षंप्राप्यकमात्अन्यपिसाधवःसिद्धिंययुः॥त
तोदेवेंद्रास्तत्रागत्ययुगादिस्वामिनइवस्वामिपुत्रस्यश्रीभरतस्वामिनोपिनिर्वाणमहिमानंचक्रुः॥चैत्यादीनिचकारयामास॥श्रीभरतेशःकु
मारत्वेसप्तसप्ततिपूर्वलक्षाणि॥तथावर्षसहस्रंमंडलीकत्वेवर्षसहस्रेणऊनानिषट्पूर्वलक्षाणिचक्रित्वेस्थित्वा ततःपूर्वलक्षंकेवलित्वं
सर्वायुश्चचतुरशीतिपूर्वलक्षाणिपालयित्वा॥श्रीअष्टापदेऽष्टकर्मक्षयंकृत्वाक्षयसुखंप्रपेदे॥ततोऽष्टापदगिरिर्महातीर्थंज्ञानिभिःकथ्यते

117/1962

यश्च अष्टापदे अष्टप्रकारपूजाभिः अष्टप्रातिहार्योपेतं जिनं पूजयति सोऽष्टमहासिद्धिः प्राप्य क्रमेणाष्टभिर्भवैरष्टकर्मक्षयं कृत्वा मोक्षं लभते
ततः श्रीसूर्ययशास्तं वृत्तांतं ज्ञात्वाऽतिशोकाक्रांतस्तत्राऽगत्य उत्तुंगप्रासादश्रेणीं अकारयत्॥ ततो मंत्रिप्रमुखैर्नयोक्तिभिः प्रतिबोधितः सन्
शनैः २ पितुः शोकं विहाय पुनः प्रजापालनव्यापारे तत्परो बभूव ततः श्रीसूर्ययशाः॥ मार्त्तंड इव प्रतापवान् अखंडाज्ञः स्वप्रतापवशी
कृतसकलराजन्यमंडलः त्रिखंडपृथ्व्याः राज्यं पालयामास॥ श्रीयुगादीशराज्याभिषेकाऽवसरे शक्रेण यो मुकुटः स्वामिनः शिरसि धृतो भूत्
स एव मुकुटो भरतेन धृतः॥ ततः श्रीसूर्ययशा धारयामास॥ तत्प्रभावात्सुराणामपि सेवनीयो माननीयश्चाभूत्॥ तस्य च राधावेधपण पू
रणेन प्राप्ता कनकचूड विद्याधरपुत्री जयश्रीनाम्नी पट्टदेवी बभूव अन्या अपि भूचरखेचरवंशजाः द्वात्रिंशत्सहस्राणि राज्ञो भवन्॥ स रा
जा अष्टमीचतुर्दशीच प्रत्याख्यानपौषधोपवासकरणादिना अत्यादरेणाराधयामास॥ स्वान्तथाऽन्यान् निजनगरदेशवासिनोपि जनान्
तत्पालनेरतानादरान् चकार॥ किं वाधिकं वाच्यं॥ यदुत तस्य राज्यमध्ये पक्षिपश्वादयो विवेकिनोऽपि जीवास्तथाविधसत्संगानुभावात्तेषु दि
नेषु आहारं न गृह्णंति॥ अथैकदा सौधर्मेन्द्रोऽवधिना तथाविधां तस्य पर्वणि भक्तिं ज्ञात्वा॥ संजातचमत्कारः शिरो धूनयित्वा मनसैव तत्प्र
शंसां चक्रे॥ तदवसरे उर्वशी मारुहादिश्ववशीकरणौषधमिव मधुरालापैः शक्रं प्रति प्राह स्वामिन् इदानीं सभामध्ये बृहस्पतिः शुक्रो वा

चित्रालंकारादिमयानि काव्यानि न प्रकाशयति॥ नर्त्तं रंभाप्सरःप्रभृतयो विश्वमनोहरं नृत्यं कुर्वंति॥ न च हाहाहूहूप्रभृतयो गंधर्वाः स्वरग्राममू
र्छनादिसरसंगानं कुर्वंति अन्यदपि आश्चर्यकारणं किमपि न दृश्यते॥ तत्र केन विस्मयेन स्वामिना शिरः कंपितमिति॥ ततः शक्रेणोक्तं॥ शृणु
भद्रे सांप्रतं ज्ञानोपयोगेन मया मर्त्यलोके वीक्ष्यमाणे॥ श्रीऋषभस्वामिपुत्रभरतचक्रिणः पुत्रः सूर्ययशा अयोध्यायां राज्यं पालयन् दृष्टः
स राजाऽष्टमीचतुर्दश्योर्नियमोऽपवासादिकृतनिश्चयः सुरासुरैरपि चालयितुं न शक्यो यतस्तस्य तीव्रिनादपि नियमपालनं अधिकं प्रियं वर्त्त
ते॥ ततोऽसौ जीवितनाशेऽपि नियमं न मुंचति कदाचित्सूर्योऽपि पश्चिमदिशि उदेति न कदाचित्समुद्रोऽपि मर्यादां मुंचति॥ कदाचिन्मेरुरपि चलति
परं असौ राजा प्राणांतेऽपि सर्वस्वनाशेऽपि नियमभंगं न करोति॥ अयमेव मे मनसि महान् विस्मय इति श्रुत्वा॥ उर्वशी मनसि किंचि- -त्वा॥ तद्व
चनं अश्रद्दधानाऽपि प्रभोर्मुखे प्रत्युत्तरं दातुं असमर्था इत्यचिंतयत्॥ अहो प्रभुत्वस्य महिमा॥ यतोऽयुक्तमपि स्वामिनो वचनं तदनुजीविभिः
सेवकैः अनुलंघ्यं स्यात्॥ विबुधाधिपोऽपि कथं एवं असमंजसं ब्रूते कियन्मात्रं असौ नरकीटः॥ अन्नमात्रजीवनः कियन्मात्रं तत्र धैर्यं यत्सु
रैरपि न चाल्यते केवलं मदीयगानरसप्रेरणं आविना॥ वालुकाकणा इव तस्य विवेकादयो गुणाः क्वापि दूरे यांति इत्यादि चिंतयित्वा सा न
दीव त्वरितैश्चलात्॥ तं पाषाणखंडमिव पातयितुं॥ कृतादरा रंभा समद्विता वीणां धारयंती मर्त्यलोकं प्राप॥ तत्र अयोध्यासन्नोद्याने श्रीऋ

वभस्वामिप्रासादेमोहिनीरूपंकृत्वाअतिमधुरस्वरेणप्रबंधान्गायतिस्म॥तस्यश्रवणमात्रात्वृक्षशाखास्थिताःपक्षिणोपिचित्रलिखिताइव
बभूवुःभुजंगगोधानकुलादिजीवाःस्वस्वस्थानानित्यक्त्वा॥तत्रागत्यपाषाणघटिताइवतस्थुःअर्द्धचर्विततृणकवलामृगाअपिगानश्र
वणोत्कर्णाःभयंत्यक्त्वाचाजग्मुःइतश्चश्रीसूर्ययशाःअश्वक्रीडांकृत्वापश्चाद्वलितःसन्मार्गेअश्रुतपूर्वंतयोगीतंअशृणोत्॥तदासैनिकाः
सुभटाहस्तिनस्तुरंगमाश्चापिनादमोहिताःसंतोमूर्च्छिताइवध्यानमग्नाइवपदमात्रंचलितुंनशक्नुवंतिस्म॥एवंसर्वमपिबलंस्वस्वकार्यविक
लंवीक्ष्यराजामंत्रिणंप्रतिप्राह॥अहोमंत्रिन्नादमोहिताअमीगजतुरंगपदातयोपि॥पक्षिपश्वादयःस्वात्मानंविस्मृत्यस्तंभिताइवमूर्छि
ताइवतिष्टंति॥तन्मन्येत्रिजगज्जयेजगदेकवीरस्यकामदेवस्यरागएवपरमास्त्रं।उक्तंचसुखिनिसुखनिधानंदुःखितानांविनोदः॥श्रवणहृ
दयहारीमन्मथस्याग्रदूतः॥अतिचतुरसुगम्योवल्लभःकामिनीनां॥जयतिजगतिनादःपंचमश्चोपवेदः॥१॥इतिततःप्रासादेभगवद्वं
दनार्थंगच्छामः॥तत्रअस्यगीतस्यापिप्रयोक्तारंगवेषयामःइतिकृत्वानृपःसपरिकरःप्रासादांतःप्रविवेश॥ततस्तत्रसारूप्यकामपत्न्यो
इवलोकातिशायिलावण्यसुंदरांगयौवीक्ष्य॥सहसाकामबाणैर्विद्धश्चित्तेचिंतयामास॥अहोएतयोःकंठकुंडात्गीतामृतंप्रवर्त्तते॥ततो
नादमयामूर्त्तिरेवनिर्मितेलक्ष्येतेएतयोःईदृशंनिरुपमंरूपंलावण्यंतारुण्यंच॥तादृशंगानामृतंकसुकृतिनोभोगायभविष्यति॥

इत्याद्यालोचपरःपुनःपुनःचक्षुःक्षिपन्॥भगवतःपादान्वंदित्वापुनर्व्यावृत्यबहिर्मंडपवलानकेउपविश्यसचिवंप्रतितयोर्ज्ञातिकुला
दिपृच्छार्थंआदिशतिस्म॥अथमंत्रीतयोःपार्श्वेगत्वामधुरवचनैर्वृत्तांतंअपृच्छत्केयुवांपरिणीते॥अथवाकुमार्यौस्तः।किमर्थंचअत्रा
गतेइत्यादितद्वचःश्रुत्वा॥तयोर्मध्यातएकाप्राह॥शृणुमंत्रिन्आवांमणिचूडस्यविद्याधरपतेःपुत्र्यौबाल्यादारभ्यसकलाप्रवीणेविशेषे
णच॥वीणावादनरसिकेविद्याविनोदेनबाल्यंअतिक्रम्ययौवनंप्राप्तेनदृष्ट्वापिताचिंतातुरोजातः॥अहोएतयोःअनुरूपकुलशीलगुण
रूपादिकलितोवरःकःभविष्यतीतिचिंतयासर्वत्रापिगवेषयन्॥कुत्रापियोग्यंवरंनप्राप॥ततआवाभ्यांकथितंतातआवयोःवरचिंता
नकार्यादुर्लभंमानुष्यंप्राणिनां॥ततोपिदुर्लभतरोजिनधर्मः॥तंधर्मंप्राप्यस्थानेरतीर्थयात्रयाकृत्वानिजंजन्मसफलंकरिष्यावः॥इति
कृत्वानिर्गते॥ततःक्रमेणगगनमार्गेणयात्राकुर्वत्यौ॥इयंअयोध्यातीर्थभूताइतिमत्वा॥श्रीभरतकृतेर्हच्चैत्ये॥श्रीयुगादिजिनंनंतु
इहागते॥इतितस्यावचनंश्रुत्वामंत्रीप्राह॥युवयोर्योग्योवरः॥श्रीसूर्ययशाभवतु॥यतोयंराजाश्रीऋषभस्वामिनःपौत्रायस्यपिताश्रीभर
तश्चक्रवर्त्ती॥स्वयंचत्रिखंडभोक्तासकलगुणनिवासःयदायुवयोःश्रीऋषभस्वामीतुष्टोभवतितदाएनंवरंलभेथां॥यथाचंद्रेणचंद्रिका
विभावर्यैशोभानेनत्वायुवामपिश्रीसूर्ययशसावरेणशोभांलभस्यथः॥इतिमंत्रिवचःश्रुत्वातेस्त्रियौऊचतुःमंत्रिन्आवाभ्यांप्रतिज्ञाकृता

स्त्रियः पुमान् ॥ अस्माकंवचनंनोलंघयति आवयोर्वशावर्त्तीतिष्टनितमेवपतिंवृणुवहे ॥ अन्यथापतिरेषनकार्यः इतिततोमंत्रिणापि
नृपा अयोक्तहत्त्वः प्रतिज्ञातंभवत्योर्वचनंनृपोनान्यथाकरिष्यतीति ॥ अथमहोत्सवेनगृहमानीयमोहरसाकृष्टमनाः ॥ तदेवसंसा
रस्यसारंफलंमन्यमानः धर्मार्थौशिथिलीकृत्यकेवलंकाममेवपुरुषार्थंजानन् ॥ भोगासक्तोभवत् अन्यदामायंकालेताभ्यांपल्ली
भ्यांसहितोनृपोगवाक्षेस्थितोस्ति ॥ अत्रावसरेभोभोलोकाः प्रभातेष्टमीपर्वभविष्यति ॥ ततः पौषधोपवासजीवाभयदानस
च्चित्ताहारवर्जन दलनखंडनवस्त्रक्षालनलिंपनकेशग्रथनकर्मादानादिपरित्यागदेवगुरुपूजनवंदनादिकृत्येषुसावधानाभवतइ
तिउद्घोषणापूर्वकंपटहंवाद्यमानंश्रुत्वा तेकपटस्त्रियौपरीक्षायाअवसरंज्ञात्वा नृपंउचतुः ॥ तत्ररंभाअजानतीव स्वामिन्कि
मर्थंअयंकपटहोवाद्यतेइतिपप्रच्छ ॥ ततोनृपः प्राहश्रृणुरंभे भंभावादनस्यकारणंयदुतनातेन अस्माकंपक्षमध्येअष्टमीचतुर्द
शीलक्षणंपर्वद्वयंप्रोक्तमस्ति ॥ वर्षमध्येचपर्यूषणाष्टाह्निका ॥ १ ॥ त्रयाणांचतुर्मासकानांतिस्रोष्टाह्निका ॥ ४ ॥ अश्विनचैत्रयोः शु
क्लपक्षेसप्तम्याआरभ्यपूर्णमासींयावत्द्वेअष्टाह्निके ॥ ६ एवंवर्षमध्येषट्अष्टाह्निकाः एतानिपर्वाणिसर्वथासचित्तपरिहारविशे
षारंभवर्जनब्रह्मव्रतपालनविशेषधर्मोद्यमेकरणादिनाराधनीयानि ॥ अन्यच्चपक्षमध्येद्वितीया ॥ १ ॥ पंचमी ॥ २ ॥ अष्टमी ३ एकादशी

४ ॥ चतुर्दशी ५ ॥ पंचदशी ६ रूपाणिषडपि पर्वाणिशास्त्रानुसारेणपालनीयानि यतोभगवताद्विविधोधर्मः प्रोक्तोस्तिएकः साधुधर्मो ॥ १ ॥
द्वितीयः श्राद्धधर्मः ॥ २ तयोआराधनार्थंद्वितीयाराध्यते ॥ तथाज्ञान ॥ १ ॥ दर्शन ॥ २ ॥ चारित्राणि ॥ ३ ॥ मोक्षमार्गः ॥ तेषांमध्येज्ञानंमुख्यं ॥ ज्ञानं
चपंचविधं ॥ मति ॥ १ ॥ श्रुता ॥ २ ॥ वधि ॥ ३ ॥ मनः पर्याय ॥ ४ ॥ केवल ॥ ५ ॥ रूपं ॥ ततः पंचविधज्ञानाराधनार्थंपंचमीपर्व ॥ अष्टकर्मक्षयार्थंअष्ट
मीपर्व ॥ एकादशांगाराधनार्थंएकादशीपर्वचतुर्दशपूर्वाराधनार्थंचतुर्दशीपर्व ॥ अमावास्यापूर्णिमेतुपक्षांतत्वात् लोकेलोकोत्त
रेपिचधर्मकरणयोग्येएवेति ॥ अन्यच्च ॥ एषुपर्वदिनेषुप्रायः सर्वेजीवाः परभवयोग्यायुः समुपार्जयंति ॥ ततस्तद्दिवसेसर्वसावद्य
रूपंगृहव्यापारंपरित्यज्य ॥ धर्मोद्यमएवकार्यः पर्वदिनस्नानंनकार्यं ॥ नचस्त्रीसेवानकलहो ॥ नचद्यूतपरहास्यादि ॥ नचानर्थदंडविक
थादिकं ॥ किमपिसावद्यंकार्यं ॥ ततः शुभाध्यवसायेनसामायिकपौषधोपवासस्वाध्यायदेवगुरुभक्तिजिनमुनिगुणकीर्त्तनादिसुकृत
परायणैरेवगुरुपादमूलेस्थातव्यं ॥ यतोन्यदिनेषुयत्पुण्यकार्यंक्रियते ॥ तत्रदैवमोक्षादिफलदंभवति ॥ यदापर्वदिनस्यविराधनासर्व
थानिवार्यते ॥ इतिहेतोः ॥ त्रयोदश्यांसप्तम्यांचलोकानासावधानकरणार्थंमयासदैवअहंपटहः घोष्यते ॥ श्रृणुदेवि ॥ त्रैलोक्येपिचतुर्दश्य
ष्टमीपर्वाराधनंअतिदुर्लभं ॥ पूर्णपुण्योदयंविनानलभ्यते ॥ यएतत्पर्वद्वयसमाराधयति ॥ सस्वर्गादिसुखानिभुक्त्वामोक्षंप्राप्नोति ॥

23/1962

॥६८॥

इतिश्रुत्वा॥नृपस्यपर्वणिदृढंनिश्चयंविज्ञाय॥कपटप्रपंचचतुराउर्वशीइतिमायावचनं॥प्रोवाचहेनाथ॥इदंलोकोत्तरंरूपंसौभाग्यंतारु
ण्यं॥सर्वोत्कृष्टंचसाम्राज्यंप्राप्यापि॥तपःक्लेशादिभिःकिंसर्वंविफलीकरोषि॥यथेच्छंभोगान्भुंक्ष्वदुर्लभंहिपुनःपुनर्मानुष्यं॥एतेसर्वोत्त
माभोगाश्च॥ततोदुर्लभावसरंविफलंकृत्वा॥पश्चात्पश्चात्तापप्राप्स्यसि॥इतितस्यावचनंकर्णयोः॥त्रपु इवांश्रुत्वानृपोतिव्यथित
चित्तः॥सत्रसखेदंतांप्रतिप्रत्याह॥रेरेअधमेधर्मनिंदामलिने॥इयंतववाणीविद्याधरकुलयोग्यानसंभाव्यते धिगस्तुतवकुलंरूपंपांडित्यं
चयेनजगत्रयैकसारंधर्मनिंदसिधर्माद्देवमानुष्यंरूपंआरोग्यंराज्यंपरलोकेस्वर्गमोक्षादिसंपदश्चलभ्यंते॥सधर्मस्तुमनुष्यभवसुकुल
जन्मनीरोगतादिसामग्रीविनानभवति॥यदुक्तंच॥धर्मोजगतःसारःसर्वसुखानांप्रधानहेतुत्वात्॥तस्योत्पत्तिर्मनुजात्॥सारंतेनैवमा
नुष्यं॥१॥इतितनोमानुष्यादिसामग्रींप्राप्यापियोधर्मंनकरोति॥सपश्चात्पश्चात्तापंप्राप्स्यते॥किंचयेधर्मरहितानिःपुण्यकाःप्राणि
नस्तेषांभोगराज्यादिप्राप्तिरपिकुतोभविष्यति॥अन्यच्चममराज्येपशुपक्षिमृगसिंहादयोपि तथास्तानवृद्धबालबालनिर्बलादयोपि
जनाअष्टम्यांचतुर्दश्यांचआहारंनगृह्णंति॥तदाअहंकथंगृह्णामि॥धिगस्तुतेषांज्ञातृत्वं॥धिकचतेषांजन्मजीवितव्यंचयेपर्वफलस्वरू
पंजानंतोपि॥तदाराधनांनकुर्वंति॥ततोहेप्रिये॥एतद्राज्यंशरीरंजीवितंचयदियातितदायातुपरंतथापि॥पर्वदिनंनविराध

॥६९॥

यंकोधाकुलंभूपतेर्वचनंश्रुत्वा॥उर्वशीमायांकृत्वा॥एवंप्राह॥स्वामिन्मयातुस्नेहातिरेकवशात्॥स्वामिनःकायक्लेशोमाभूदितिविचिंत्य
इदमुक्तंनयुज्यतेत्रकोपकरणंकिंचआवाभ्यांपितृवचनमपिअनादृत्यनिर्गताभ्यांपूर्वजन्मसंबंधवशात्त्वंपतिवृतः॥त्वयापिश्रीयुगा
दिजिनसमक्षंमयावचनं॥अन्यथानकार्यंइतिप्रतिज्ञाकृता॥भूतूतत्परीक्षार्थंमयाएकदिवसप्रार्थनार्थंएतत्कथितं॥नेतात्वमात्रेणा
पित्वं॥कोपवशंगतः॥ततोहहाअस्माभिःशीलंसंसारसुखं॥एतद्द्वयमपिहारितंस्त्रीणांहिस्वाधीनपतित्वमेवपरमसुखं॥यदितदेवना
स्तितदासर्वमपिविषवद्भवति॥ततोहंउभयभ्रष्टाजाता॥इदानींवह्निंप्रविश्यमरिष्यामि॥इत्यादितद्वचनंश्रुत्वा॥नृपोमोहपरवशःस्व
कृतप्रतिज्ञांस्मरन्॥पुनःप्राहभद्रेममपितामहेनपित्राचयत्पर्वपालितंअद्याहंतत्पुत्रोभूत्वाकथंपर्वनाशनंकुर्वे॥ततोहेप्रियेममैतन्निखि
लंराज्यंगजतुरंगहिरण्यसुवर्णादिकंकोशंचाखिलंगृहाणपरंममधर्मेंतरायमाकुरुततःकिंचिद्विहस्यउर्वशीप्राह॥नाथसत्पुरुषा
णांस्ववचनपालमेवसर्वतोधिकंतद्विघातकारीतुसर्वेभ्योऽधमःयदित्वद्वचनविश्वासेनपितृसंबंधिविद्याधरैश्वर्यमपितृणीकृतंतदाए
तेनराज्यादिनाकिंकुर्वेवरंयदिपर्वभंगंनकरोषि॥तदायुगादीशप्रासादंपातय॥इतितस्यावाक्यश्रवणमात्रेणैवमूर्छांप्राप्य॥नृपोभूमौ
पतितःवज्राहतइवनिश्चेष्टोबभूव॥पुनःअतिशोकाकुलैःपरिजनैःशीतोपचारैःसचेतनीकृतोतिखेदवशःप्रचिंत्योःप्रेरितांपुनस्तांप्र

स्तुवाचरे अधमे॥ अयं तव आचार एव हीनकुलत्वं प्रकटयति॥ न हि विद्याधरकुलोत्पन्नानां इयबुद्धिर्जायते॥ त्वं तु चांडालकुलप्रसूता
एव ज्ञायते॥ मयानुमोहपरवशेन मणिभ्रांत्या काचखंडो गृहीतः॥ परं किं कुर्वे इदानीं तु वचनेन प्रतिबद्धः॥ ततो हि एकं धर्मलोपं विहाय॥ अ
न्यद्यत्किंचित्तुभ्यं रोचते तत् याचस्व॥ येन तत् दत्वा अहं स — तदानस्य अनृणी भवामि॥ ततः सा प्राह॥ वरं यदि तव स्ववाक्यपालने एव प्रयो
जनं॥ स्वपुत्रस्य मस्तकं छित्वा॥ अर्पय इति तत् श्रुत्वा॥ नृपो विचार्य पुनः प्राह॥ भद्रे पुत्रस्तु तावत् मम देहादेव उत्पन्नः॥ ततो मदीयमेव शि
रो गृहाण॥ इत्युक्त्वा वेगात् नृपः खड्गं गृहीत्वा यावत् स्वकंठे वाहयति॥ तावत्तया खड्गस्य धारा स्तंभिता॥ तथापि दृढप्रतिज्ञः सन् नवं नवं खड्गं
समानाय्य॥ स्वकंठे आछोटयति दिव्यानुभावात्तत्सर्वं विफलीभवति राजा तु किंचिदपि स्वसत्त्वान्न चलति स्म॥ तदा तस्य दृढं निश्चयं ज्ञात्वा विस्मि
ते॥ ते रंभाउर्वश्यौ स्वरूपं प्रकटीकृत्य गगने स्थित्वा॥ जयजयशब्दपूर्वकं इति प्रोचतुः॥ जय त्वं वृषभस्वामिकुलसागरचंद्रमः जय सत्त्व
तां धुर्य तयनक्षीशनंदन॥१॥ अहो सत्त्वमहो धैर्यं॥ महो मानसनिश्चयः॥ तव यत्प्राणनाशेपि नत्यक्तं स्वव्रतं मनाक्॥२॥ आवाभ्यां इंद्रस
भासव प्रशंसां श्रुत्वा॥ अविश्वासवशात् इत्थं तव परीक्षा कृता॥ परं नदीभ्यां मेरुः कथं चाल्यते॥ इत्येवं आवाभ्यां त्वं कथं चालयितुं शक्यसे ध
श्रीयुगादीशकुलमुकुटमणे भवादृशैरेव पुरुषैः पृथ्वी रत्नसूरित्युच्यते॥ अत्रांतरे इंद्रोपि तत्रागतः नृपोपरि पुष्पवृष्टिं कृत्वा तय

जयेति प्रशंसां चकार॥ अथोर्वशी स्वप्रतिज्ञानाशात् विलक्षमुखी इंद्रेण सोपहासं विलोकिता सा इंद्रस्याग्रे तस्य सत्त्वं अधिकाधिकं वर्णया
मास॥ अथ शक्रो राजानं बहुधा स्तुत्वा मुकुटं॥१॥ कुंडलयुगलं॥२॥ अंगदयुगलं॥३॥ हारं॥४॥ च दत्वा॥ सपरिकरः स्वर्गं जगाम सूर्ययशा
अपि स्वधर्मपालनपरायणश्चिरं राज्यं पालयामास॥ श्रीभरतेशवत्पृथ्वीं जिनप्रासादमंडितां संघयात्रां च कृत्वा॥ जन्म सफलं चकार॥ निरं
तरं अष्टमीचतुर्दशीनियमपालने सादरः प्रत्यहं ज्ञानदर्शनचारित्रधरान्॥ सुश्रावकान् स्ववेश्मनि भोजयामास श्रीभरतेशेन यथा काकि
णीरत्नेन रेखात्रयं चक्रे॥ तथा श्रीसूर्ययशास्तेषां गले सुवर्णमयं उपवीतं स्थापयामास॥ इत्थं अग्रे महायशःप्रमुखा रूप्यमयानि॥ पट्टसूत्र
मयानि सूत्रमयानि च क्रमेण चक्रुः तस्य श्रीसूर्ययशसो महायशःप्रमुखा महाबलवंतः सपादलक्षं पुत्रा बभूवुः॥ तत्पुत्रपौत्रादीनां लोके सूर्यवं
श इति ख्यातिरभूत्॥ अन्यदा श्रीभरतेशवत्॥ दर्पणागारे रूपं पश्यत एव संसारासारताभावतया श्रीसूर्ययशसः केवलज्ञानं समुत्पन्नं॥ ततो गृ
हीतसाधुवेषश्चिरकालं स्वविहारेण पृथ्वीं पावयित्वा॥ अनेकभव्यजनान् प्रतिबोध्य॥ क्रमेण सकलकर्मक्षयान्मुक्तिं प्राप॥ श्रीभरतेशात् आ
दित्ययशाः ततो महायशाः एवं क्रमेण॥ अतिबलो बलभद्रः कीर्तिवीर्यो जलवीर्यश्चाभवन्॥ ततः श्रीभरतस्याष्टमे पट्टे दंडवीर्यो नृपो भ
वत्॥ इमान् अष्टपुरुषान् यावत् सार्त्विकभक्तिरखंडिता भूत्॥ एतेऽष्टावपि इंद्रार्पितमुकुटधारणमहात्म्यात् त्रिखंडभोक्तारो भूव

127/136

नाभूपास्तुमहाप्रमाणंशक्रदत्तमुकुटंधारयितुंनसमर्थाबभूवुः किंचएते अष्टावपिआदर्शभवनेएवकेवलंप्राप्य॥ क्रमेणमुक्तिंययुः एवंश्रीऋष
भवंशे॥ श्रीअजितस्वामिनंयावत्॥ असंख्याताभूपालामोक्षगामिनोःनुत्तरगामिनएववभूवुः॥ तत्स्वरूपंतुसिद्धदंडिकाविवरणात्ज्ञातव्यं॥ ते
सर्वेपिसंघपतयःप्रासादकारकाःयथाशक्तितीर्थोद्धारकराःदृढधर्माणश्चाभूवन्निति॥ श्रीमत्सर्वज्ञधर्मोद्योतनचलत्यंशमात्रकंसप्राप्नोतिपरान्द
र्द्धि॥ नृपःसूर्ययशाइव॥१॥ ॥इतिश्रीशत्रुंजयमहात्म्योल्लेखेपंडितश्रीहंसरत्नकविविरचितेश्रीऋषभस्वामिश्रीभरतनिर्वाणाःशायदोद्धारश्री
सूर्ययशाद्यरित्रवर्णनोनामषष्टोधिकारः॥६॥ ॥ ॥शाखाशतभरेणोर्वीशरस्तीर्णयेनभूतलं॥ नाभेयवंशकल्पद्रुरभीष्टप्रदास्तुनः
॥१॥ अथशृणुदेवेंद्र अयेधिकारं॥ तथाहि॥ श्रीऋषभस्वामिनोद्रविडइतिपुत्रोभूत्॥ यस्यनाम्नालोकेद्रविडदेशःप्रसिद्धः॥ तस्यद्रविडस्य
पुत्रौसकलगुणगणाधारौद्राविडवालिखिल्लनामानौद्वौभ्रातरौअभूतां॥ अन्यदाद्रविडोद्राविडायमिथिलाराज्यंवालिखिल्लायच॥ ल
क्षग्रामान्दत्वास्वयंप्रभोःपार्श्वेदीक्षांजग्राह॥ अथान्यदाद्राविडोवालिखिल्लराज्यसंपदावर्द्धमानंनिरीक्ष्य॥ तदुन्नतिंअसहमानोह्द
वहति॥ ततोवालिखिल्लोपिद्राविडस्यमनोविद्वेषंज्ञात्वा॥ तस्यराज्यग्रहणोपायंचिंतयतिस्म॥ एवंतौपरस्परंवैरभाववहतौ मुखेमधु
रंवदंतौ॥ ह्रदिदुष्टाशयौविषमिश्रितदुग्धकुंभतुल्यौअभूतां॥ अहोधिग्२लोभस्यविलसितं येनएवंविधानांउत्तमपुरुषाणामपि

मतिर्मलिनाभवति॥ उक्तंचपितरंमातरंबंधुंमित्रंभार्यासुतंगुरुं लोभाभिभूतोभूतार्त्त इवाबाधायतेक्षणात्॥१॥ एवंनित्यंदुर्जनशिक्षया
अन्योन्यस्यछलंपश्यंतौ॥ अन्योन्यंअविश्वसितव्यौजातौ॥ अन्यदाद्राविडेनस्वकीयपुरमध्येवालिखिल्लस्यप्रवेशोनिषिद्धः॥ सोपिसंजा
तकोपाटोपःस्वपुरेगत्वा॥ स्वसैन्यंयुद्धार्थंअमेलयत्॥ ततोद्राविडस्तंवृत्तांतंज्ञात्वा॥ अतिक्रुद्धः प्रयाणभंभांवादयित्वासैन्यंरणार्थंप्र
गुणीचकार॥ अथासौद्राविडभूपतिश्चतुरंगांसेनांलात्वाअगण्यसैन्यपूरैःपृथिवींविस्तीर्णामपिसंकीर्णांकुर्वन्॥ ब्रह्मांडमपिक्षोभय
न्कुलाचलान्अपिचालयन्अश्वखुरोद्धूतैरजोभिर्गगनमंडलछादयनिःस्वानानांनिर्घोषैश्चतुरोपिजलधीन्कल्लोलमालाकुलान्
कुर्वन्॥ अविछिन्नप्रयाणैर्वालिखिल्लदेशस्यसीमासमीपंआजगाम॥ इतोवालिखिल्लोपितंसंमुखंआयातंज्ञात्वा॥ स्वसैन्यैःपरिवृतः
स्वदेशसीमापर्यंतंआगत्यस्थितः॥ ततस्तौविचालेपंचयोजनप्रमाणंरणक्षेत्रंविमुच्य॥ कृतसेनानिवेशौसंग्रामायोत्सुकौस्थितौ ता
वत्तयोः प्रधानपुरुषैर्निजंनिजंस्वामिनं॥ अष्टौइवसंधिकरणार्थंदूताःप्रेषिताः॥ तैस्तौसामदानभेदवाक्यैर्बहुधाप्रतिबोधितौ॥ तथापि
अपरित्यक्तकोपौकेवलंयुद्धकरणमेवांगीकृत्यस्थितौ॥ ततोवालिखिल्लोद्राविडनृपस्यकतिचित्सैनिकान्॥ द्रविणादिदानेनभेदयित्वा॥ स्व
सैन्येनिनाय॥ तयोर्द्वयोःसैन्ययोःप्रत्येकंदशलक्षगजानांदशलक्षरथानांपंचाशल्लक्षास्तुरंगाणांदशकोटयःपदातीनांवाभूवन्॥ अ

पयुंद्धदिनेप्राप्तेसमुल्लसद्वीररसावीरा:स्वस्वस्वामिप्रवर्द्धितोत्साहा:स्वभुजबलगर्वेणविश्वंतृणयंत:॥सिंहनादंमुचंतोध्वनसर्वा-णस
न्नाहा:नानायुधधारका:शस्त्राणिनर्त्तयंतोत्युद्भटा:समुद्रकल्लोलाइवसमरांगणभूमिंसमाजग्मु:॥तत:प्रवृत्त:सुभटकोटिक्षयंकरोम
हासंग्राम:गजागजे:॥तुरगास्तुरंगै:रथिनोरथिभि:पदातयपदातिभि॥एवंतुल्यपराक्रमाणांसंघट्ट:समजायत॥पतंतिपरस्परंशस्त्रप्र
हारा:भिद्यंतेच॥गजाश्वभटादीनांदेहा:प्रसरंतिचसलिलवाहाइवरक्तवाहा:प्रीयंतेचयोगिनीभैरवगृध्रफेत्कारादय:केवलबीभत्स
रौद्रभयानकरसानामेकछत्रंसाम्राज्यमिव॥तद्रणक्षेत्रंबभूव॥एवंचसप्तमासान्यावत्युद्ध्यमानयोरुभयो:सैन्ययो:सुभटानांद
शाकोटय:क्षयंययु:॥अत्रांतरेतयो:संग्रामनिवारणकारणंकोवर्षाकाल:समागत:मुशलधाराभिर्धाराधरोवर्षितुंलग्न:जाताजल
पूरतापृथ्वीपूरंप्राप्तास्तटिन्य:रुद्धा:सर्वत्रपथिकानामार्गा:॥तत:तेउभेअपिसैन्येयुद्धान्निवर्त्य॥उच्चस्थलेषुपटमंडपान्॥तृणपर्णादि
कुटीरकाश्चकृत्वातस्थतु:॥अथवर्षाकालेनिवृत्तप्राये॥शरत्कालेप्रवर्त्तितलेषुजलाशयंप्राप्तेषु॥मार्गेषुशुष्ककर्द्दमेषुनिरभ्रप्रसन्ने
दिग्मुखेषुनिर्मलीभूतेषुसर:सलिलेषुविशेषोकोंसुभगेषुकमलाकरेषु॥श्रुतिसुखंनदत्सुकलहंसेषु॥धान्यानांऔषधीनांचपरि
पाकात्॥पांडुरतांप्राप्तेपृथ्वीतलेशरच्चंद्रचंद्रिकापूरेणप्लाव्यमानासुवनस्थलीसु॥इत्थंचसर्वजनमनोहरेतस्मिन्कालेद्राविडनृपति:

सपरिकरोवनशोभावलोकनार्थं॥अन्यदानिर्जगाम॥तत्रविमलबुद्धिनाम्नास्वचिंतनप्रेरितस्तापसाश्रमंगत:॥तत्रजटामुकुटभूषितंव
ल्कलवस्त्रपरिधानंजपमालाव्यग्रहस्तंपर्यंकासनस्थितं॥अतिवृद्धंसुवल्गुनामानंकुलपतिं॥बहुभिस्तापसै:परिकरितंमूर्त्तंशांतरसमिव
तंवीक्ष्य॥भूपतिर्भक्त्यातस्यपादौप्रणनाम॥मुनिरपिध्यानंमुक्त्वाराजानंआशीर्वचनेनाभिनंदतिस्म॥अथनृपस्तस्यवचनामृतंपातुमिच्छु:
सपरिकरस्तदग्रेनिषसाद॥तापसोपि॥तदनुग्रहबुद्ध्याधर्मविशेषांप्राहराजन्॥अयंसंसारसागरोनंतदु:खजलापूर्ण:कामक्रोधादिमक
रसमूहैरतिभयंकर:लोभवडवानलज्वालाभिर्जगद्ग्रसनलालस:॥अत्रविषयेषुआवर्त्तेषुमग्ना:॥सर्वसुरासुरनरेश्वरमध्याअपिकथमपि
निर्गमंनप्राप्नुवंति॥एतेविषया:प्रथमंकिंचित्सुखोभयित्वा॥पश्चात्प्राणिनोराक्षसाइवदुर्द्दशांप्रापयंति॥तत्त्वैषयिकंसुखंतुस्वल्पमात्र
स्वल्पकालमेवतदपिविघ्नशतैरंतरितंपरंतदुद्भवं॥नारकनिगोदादितज्जदु:खंतुअनंतअनंतकालंयावत्सोढव्यं॥ततोधिग्२इमांभोग
तृष्णां॥यद्वशात्जीवामहापापशतान्यर्जयंति॥तत्रहिंसानुप्रमादमात्रेणापिकृतामहद्दु:खायभवति॥तत्क्रोधाधैर्यन्निष्ठुरपरिणा
मात्जीवघात:क्रियते॥तस्मात्तुअनंतकालंनरकनिगोदादिषुजीवोदु:खै:पच्यते॥राज्यंभुक्त्वांतेनरकप्रदंदेहोनित्य:संपदरूपंश
चपला:जीवितंजलबुद्बुदोपमंप्राणा:क्षणमात्रध्वंसिन:ततोनयुज्यतेतवापिएतेनरकाद्यनर्थकारिणाराज्यलोभेनआत्मासद्म

गादीशंस्मरंतः परस्परंधर्मकथाः कुर्वतौ॥ वर्षलक्षाणितत्रैवनिर्गमयंतिस्म॥ अथाऽन्यदाश्रीनमेर्विद्याधरराजर्षेः प्रतिशिष्यौद्वौवि
द्याधरमुनी॥ आकाशमार्गेणतत्रायातौतौमासक्षपणतपःसंयमाविवचीक्ष्यतेसर्वेपितापसाः प्रणामंकृत्वायुवांकुतःसमागतौकुत्र
यायास्यथः इत्यादिपृच्छांचक्रुः॥ ततस्तौमुनीतेभ्योधर्मलाभाशिषंदत्वाइतिऊचतुः॥ आवांश्रीपुंडरीकगिरौ॥ यात्रार्थंयास्यावइ
तिपुनस्तैः पृष्टंतस्यतीर्थस्यकीदृशंमहात्म्यमिति॥ ततस्तौतेषांअग्रेयदूचतुः ऊचतुः॥ अनंतसुकृताधारः संसाराब्धौतरंडवत्
शत्रुंजयः सुराष्ट्रायां॥ गिरिर्जयतिशाश्वतः॥१॥ अनंतामुक्तिमासेदुरत्रतीर्थप्रभावतः॥ सेत्स्यंतिवहवोप्यत्रशुद्धचारित्रभूषिताः
॥२॥ कपिहत्यादिपापानि॥ क्षयंयांतिरुणादपि॥ पशूनामपिदेवत्वं॥ मृतानामत्रजायते॥ ३॥ शैलदुर्गेस्थितंतत्र॥ नरंनाभिभवं
त्यहो॥ कुकर्मरिपवक्रूराअप्यनंतभवानुगाः॥४॥ एवंवर्षसहस्रलक्षं॥ वायावत्कथनेपि॥ अस्यमहिम्नः पारोनप्राप्यतेइत्यादि
महात्म्यंश्रुत्वा॥ तेसर्वेपितापसास्तीर्थयात्रोत्सुकाः ताभ्यांसहपादचारिणः प्रतस्थिरे॥ अथतेश्रीशत्रुंजयध्यानेकाग्रमनसोवि
लंबनमार्गेनक्लांतोग्रतः श्री॥ शत्रुंजयसमीपेएकस्मिन्सरोवरे चक्रहंसगणाकीर्णेएकंदृष्टसंशिथिलांगं॥ भुविलुठंतंमरणावस्थां
प्राप्तं॥ पश्यंतिस्म ततस्ते [illegible] गात्रान्॥ जलपानेनस्वस्थीकृत्य॥ परमकरुणाबुद्ध्या॥ नमस्कारः श्रावितः चत्वारिशरणानिकृ

॥ तानि पुनरपिउक्तं देहंसशत्रुंजयंश्रीयुगादीशंचस्मरयेनतेदुःखक्षयःस्यादित्यादिमुनिवचोभिः संजातशुभभावनो
सौ समाधिनामृत्वासौधर्मकल्पेसुरोभवत् अथतेसर्वेपितापसाविद्याधरमुनिमुखोपदेशात् मिथ्यात्वक्रियांत्यक्त्वा लोचं
कृत्वापंचमहाव्रतरूपंसाधुधर्मअंगीचक्रुः ततस्तेविमलाद्रिंदृष्ट्वासमुत्पन्नहर्षातिरेकाः स्वात्मानंधन्यंमन्यमानाः तं
गिरिमारुहंतिस्म तत्ररागद्वादशीत्रिःप्रदक्षिणीकृत्यसमुल्लस----द्भक्तिरोमांचाः श्रीयुगादीशंनत्वासर्वचैत्येषुजिनान्

135/1962

हानर्थकारणंसंग्रामकरणंखंडमात्रपृथिव्यालोभेनयेमूढाःस्वंभ्रातृन्विनाशयंति॥तेभवद्वयमपिविनाशयंतिउक्तंचयेराज्यादिन्नतेवं
भ्रातृनिघ्नंरापूंनिकोपतःतैस्वांगानिस्वयंछित्वा॥भुंजतेस्यतिलोल्यतः॥१॥इतिततोनिवर्त्तस्वजंतुकोटिक्षयंकरात्संग्रामात्॥अतुनय
स्तनिजंबंधुनयुज्यते॥श्रीयुगादीशपौत्रस्यतवकुटुंबकलहकरणंइत्यादिकुलपतेर्वचनंश्रुत्वापुनर्नृपःप्राह॥स्वामिन्पूर्वंश्रीयुगादी
शस्यपुत्राःभरतबाहुबल्यादयोपिकारणवशात्परस्परंविग्रहंकृतवंतएवेतव॥नर्हिकोस्माकंतन्मार्गानुयायिनांदोषः॥इतिश्रुत्वापुनर्मु
निःप्राह॥यत्त्वयाउक्तंतद्विचार्यमाणंनप्रमाणंभवति॥यतःश्रीभरतेशेनपूर्वजन्मनिसाधूनांआहारदानभक्त्याचक्रित्वंउपार्जितमभूत्
बाहुबलिनातुवैयावृत्यकरणात्॥बाहुबलंअर्जितंततस्ताभ्यांस्वस्वफलंप्राप्तं॥तदाचक्रवर्त्तीचक्रस्याप्रवेशात्युद्धंचकार॥बाहुबली
तुकिमहंनिर्बलोस्मियदयंपित्रुदत्तमपिराज्यंमत्सकाशाद्गृहीतुमिछति॥अथवाताततंपादान्मुक्त्वा॥अन्यस्यकस्यापिमस्तकंनना
मयामिइतिकारणात्युद्धंकृतवान्॥एवंसत्यपि॥देववाक्यात्सुभटकोटिक्षयंकरंयुद्धंत्यक्त्वातियुद्धमात्रंअंगीकृत्य॥अयुद्ध्यतां॥अन्य
च्चततःपरंयथाश्रीबाहुबलिनायथाचश्रीभरतेशेनभवोदधेःस्वात्मानारितः॥तथापरःकःकर्त्तुंक्षमःस्यात्॥ततोनयुज्यतेतव
स्वल्पमात्रराज्यलोभात्[illegible]तादृशानांपुरुषसिंहानांस्पर्द्धाकरणं॥इतिश्रुत्वालज्जितःसंजातपश्चात्तापोनृपःपुनःप्राह॥मु

नेमयामूढेनअज्ञानात्तेषांमहापुरुषाणांसाम्यतागृहीतानप्राप्तोनिहिकदापिकाचमणिश्चिंतामणेःप्रभावंउद्धरितोहंत्वयानर
कपातात्उन्मीलितामेविवेकदृष्टिःइत्युक्त्वास्वयंपादचारिणएकाकीवप्रस्थितोलघुबंधुंक्षामयितुं॥ततोबालिखिल्लोपिज्येष्ट
बंधुसमायातंवात्त्वससंभ्रमंसंमुखमागत्यज्येष्टस्यपादयोर्लुठतिस्म॥तेनसमुत्थाप्य॥अतिस्नेहेनालिंगितः॥ततोबालिखिल्लःप्रा
ह॥भ्रातःत्वंमेज्येष्टबंधुःप्रत्यमद्भाग्यवशान्ममगृहंआगतः॥ततएतन्मदीयंराज्यंगृहाण॥ततोद्राविडोपिगद्गदगिराप्राह॥भ्रातर्म
मतुनकिंचित्प्रयोजनंवर्त्तते॥अहंतुनरकांधकूपेपतन्कुलपतिनाधर्मोपदेशावलंबदानेनरक्षितःतेनराज्यंकेवलनरककारण
मितिजानामि॥संसारेदेहधनस्वजनादिकंसर्वमपिक्षणभंगुरंअनित्याःकामभोगाःदुर्गतिपतनंप्राणिनांधर्मविनानास्तिकिंचि
दन्यछरणं॥ततो—गीकर्त्तव्यंमयाचुतसाम्राज्यंभवंतंक्षमयितुमिहागतोस्मि॥इतितस्यवचःश्रुत्वाबालिखिल्लःप्राह॥भ्रातर्यदित्वया
सर्वथाश्रेयस्करंव्रतंआद्रियते॥तदामयापितवसेवापरेण॥तदेवांगीकर्त्तव्यं॥इत्थंतौव्रतग्रहणार्थकृतनिश्चयौ॥स्वस्वपुत्रंराज्येस्था
पयित्वास्वस्वमंत्रिसहितौदशकोटिपुरुषैःसमंसुवल्गुकुलपतेःपार्श्वेतापसव्रतंजगृहतुः॥ततःतेसर्वेपितापसाःजटाधारिणःकंद
मूलफलाद्याहाराःगंगामृत्तिकयालिप्तांगाः॥अल्पकषायाः॥अल्पभोजिनोअल्पनिद्राःकरुणार्द्रमनसोहर्निशंजपमालयाश्रीयु

गादीशंस्मरंतः परस्परंधर्मकथाः कुर्वंतौ॥ वर्षलक्षाणितत्रैवनिर्गमयंतिस्म॥ अथाऽन्यदाश्रीनमेर्विद्याधरराजर्षेः प्रतिशिष्यौद्वौवि
द्याधरमुनी॥ आकाशमार्गेणतत्रायातौतौमाक्षान्नपःसंयमाविवर्वीक्ष्यतेसर्वेपितापसाः प्रणामंकृत्वायुवांकुतःसमागतौकुत्र
चायास्यथः इत्यादिपृछांचक्रुः॥ ततस्तौमुनीतेभ्योधर्मलाभाशिषंदत्वाइतिऊचतुः॥ आवांश्रीपुंडरीकगिरौ॥ यात्रार्थयास्यावइ
तिपुनस्तैः पृष्टंतस्यतीर्थस्यकीदृशंमहात्म्यमिति॥ ततस्तौतेषांअग्रेयद्बुद्ध्याऊचतुः॥ अनंतसुकृताधारः संसाराब्धौतरंडवत्
शत्रुंजयः सुराष्ट्रायां॥ गिरिर्जयतिशाश्वतः॥१॥ अनंतामुक्तिमासेदुरत्रतीर्थप्रभावतः॥ सेत्स्यंतिबहवोप्यत्रशुद्धचारित्रभूषिताः
॥२॥ कपिहत्यादिपापानि॥ क्षयंयांतिक्षणादपि॥ पशुनामपिदेवत्वं॥ मृतानामत्रजायते॥ ३॥ शैलदुर्गेस्थितंतत्र॥ नरंनाभिभवं
त्यहो॥ कुकर्मरिपवक्रूरा अप्यनंतभवानुगाः॥४॥ एवंवर्षसहस्रलक्षं॥ चायावत्कथनेपि॥ अस्यमहिम्नः पारोनप्राप्यते इत्यादि
महात्म्यंश्रुत्वा॥ तेसर्वेपितापसास्तीर्थयात्रोत्सुकाः ताभ्यांसहपादचारिणः प्रतस्थिरे॥ अथतेश्रीशत्रुंजयध्यानैकाग्रमनसोवि
लंबेनमार्गेनलंतोग्रतः श्रीशत्रुंजयसमीपेएकस्मिन्सरोवरेबकहंसगणाकीर्णेएकंहंसंशिथिलांगं॥ भुविलुठंतंमरणावस्थां
प्राप्तं॥ पश्यंतिस्म ततस्ते [illegible] रात्रान्॥ जलपानेनस्वस्थीकृत्य॥ परमकरुणाबुद्ध्या॥ नमस्कारःश्रावितःचत्वारिशरणानिको

॥रतानि पुनरपिउक्तं हेहंसशत्रुंजयंश्रीयुगादीशंचस्मरयेनतेदुःखक्षयःस्यादित्यादिमुनिवचोभिः संजातशुभभावनो
सौ समाधिनामृत्वासौधर्मकल्पेसुरोभवत् अथतेसर्वेपितापसाविद्याधरमुनिमुखोपदेशात् मिथ्यात्वक्रियांत्यक्त्वा लोचं
कृत्वापंचमहाव्रतरूपंसाधुधर्मअंगीचक्रुः ततस्तेविमलाद्रिंदृष्ट्वासमुत्पन्नहर्षातिरेकाःस्वात्मानंधन्यंमन्यमानाः तं
गिरिमारुहंतिस्म तत्रशत्रुशादनांत्रिःप्रदक्षिणीकृत्यसमुल्लस---भक्तिरोमांचाः श्रीयुगादीशंनत्वसर्वचैत्येषुजिनान्

135 / 1962

वंदंते स्म इत्थं तत्र भगवद्भक्तिस्तुतिपराणां तेषां॥ मासक्षपणपर्यंते॥ तौ विद्याधरमुनी इति प्रोचतुः॥ हे साधवो भवतां अनंतकाल
संचितं पापकर्म एतत्तीर्थसेवया क्षयं यास्यति॥ मोक्षं च स्वल्पकालेन यास्यथ॥ तदत्रैव तीर्थे भवद्भिस्तपःसंयमतत्परैः स्थातव्यं॥ इ
त्युपदेशं दत्वा तौ विद्याधरमुनी अन्यत्र विहारं चक्रुः॥ ते च द्राविडवालिखिल्लप्रमुखाः तापसमुनयस्तु॥ दशकोटिमिता अपि॥ त
त्रैव तपः कुर्वंतः क्रमेण मासिक्यासंलेखनया कर्मक्षयात्केवलं प्राप्य मोक्षं प्रापुः॥ ततः सहंसजीवो देवः सौधर्मदेवलोकादागत्य
तेषां मुनीनां महांतं निर्वाणमहोत्सवं चकार जनेभ्यः सविस्तरं स्वस्वरूपं उक्त्वा॥ तीर्थमहात्म्यं दर्शयित्वा॥ तत्र स्थाने हंसावताराख्यं
तीर्थं स्थापयित्वा॥ पुनः स्वर्गं ययौ॥ ते मुनयः कार्त्तिकशुक्लपूर्णिमास्यां कृत्तिकानक्षत्रे मुक्तिं गताः॥ ततो यथा पुंडरीकगणधरनिर्वा
णात् चैत्रपौर्णमास्यां महिमा प्रथितः॥ तथा द्राविडवालिखिल्लादिमुनिनिर्वाणतः कार्त्तिक्या अपि महिमा विस्तृतः॥ तेन कार्त्तिके पूर्ण
मास्यां श्रीशत्रुंजये यत् २ तपोदानजिनपूजादि सुकृतं क्रियते तेन तत्॥ अनंतगुणफलप्रदं भवति यदुक्तं मूलग्रंथे॥ कार्त्तिके मासपक्ष[illegible]
[illegible]कर्म क्षपयत्यहो नरके सागरशतेनापि यन्न क्षीयते नरैः॥ १॥ एकेनाप्युपवासेन कार्त्तिक्यां विमलाचले॥ ऋषिस्त्रीबालहत्यादि
[illegible]व्यनेजनः॥ २॥ यः कुर्यात्कार्त्तिकीराका॥ मत्रार्हद्ध्यानतत्परः॥ स भुक्त्वा सर्वसौख्यानि॥ निर्वृतिं लभते ततः॥ ३॥ वैशाखकार्त्ति

कमधुप्रमुखेषु मासेषु॥ राकास्वपि समधिगम्य समं च संघैः श्रीपुंडरीकगिरिमादरतो विदध्युद नितपांसि शिवसौख्यभुजो हि ते
षुः॥ ४॥ कालक्रमेण तु सम्यक्तत्त्वरूपं॥ अजानंतो कार्त्तिकीदिनमात्रमोहिता अनेके मिथ्यादृष्टयः॥ श्रीशत्रुंजयं मुक्त्वा अन्य
त्र कुतीर्थशतेषु भ्रमंति॥ अथ द्राविडवालिखिल्लादीनां पुत्रैस्तत्रागत्य॥ तेषां निर्वाणस्थाने प्रासादाः कारिताः इत्थं श्रीभ
रतेशस्य निर्वाणात्॥ पूर्वकोटिवर्षगमनानंतरं द्राविडवालिखिल्लादीनां निर्वाणं च भूव॥ सांप्रतं हे देवेंद्र अत्रावसर्पिण्यां प्रथमोद्धा
रकर्त्ता श्रीभरतेशः तत्पश्चाद्ये उद्धारजातास्तेषां स्वरूपं समाकर्णय॥ तथाहि श्रीभरतवंशे अष्टमे पट्टे दंडवीर्यनृपो भूत्॥ स च
महातेजस्वी त्रिखंडभरतभोक्ता भरतादिनृपैः समाचरितं॥ श्राद्धपूजाधर्मिकवात्सल्यादिकार्यं सर्वं अखंडं पालयामास॥ अन्य
दा षोडशसहस्रराजन्यनिरंतरायां सभायां मरालच्छत्रचामरालंकृतसिंहासने यावत् स्थितोस्ति॥ अत्रांतरे श्रीभरतकाला
त् षट् पूर्वकोटिषु गतासु तत्समये॥ श्रीसौधर्मेंद्रो वधिज्ञानेन तं दंडवीर्यनृपं दृष्ट्वा॥ साधर्मिकवात्सल्यकरणानंतरमेव भोक्तव्य
मिति तस्य दृढनियमं च विज्ञाय॥ सभामध्ये प्रसंसां चकार॥ अहो महासत्वोयं॥ श्रीयुगादीशवंशशृंगारहारः श्रीदंडवीर्यनृपो यः
सुरासुरैरपि साधर्मिकवात्सल्यानंतरं॥ एव भोक्तव्यमित्यस्मान्नियमात्कथमपि न चालयितुं शक्यः॥ ततः परीक्षयामि इत्थं स च

इतिशक्रः स्वयंश्रावकरूपंविधाय॥अयोध्यामागतः॥ततः कृतोन्नरासंस्वर्णयज्ञोपवीतधरंद्वादशशव्रतधारित्वप्रकटनाय द्वाद
शतिलकभूषितंशिखामात्रकेशधारिणं॥परिहितकाषायवस्त्रंयतिश्रावकाचारमथात्॥चतुरोपिवेदानुद्गृणंतं एवंविधंतंपर
मश्रावकंसमागच्छंतंवीक्ष्य॥दंडवीर्यनृपःसादरंतद्भोजनार्थंरसवतीकारान्॥आदिशत्सोपिंनेःसार्द्धदानशालायांसमागतः तत्र
चभोजनार्थमायातेःकोटिसंख्यैःश्रावकोत्तमैर्दत्तचक्रमानो भोक्तुंउपविष्टः॥ततःकोटिश्राद्धभोजनार्थंनिःपादितंयदन्नपानादि॥त
त्सर्वंदिव्यानुभावात्तेनएकेनैवभक्षितंतथाप्यतृप्तःममायाश्राद्धःपुनःसूदानप्राह॥अरेशीघ्रंआनीयतां॥अन्नानादिबुभुक्षाकुलि
तस्यमेकिंस्यादेतावन्मात्रेणइतितद्वाक्याद्विस्मितास्तेरसवतीकारानृपायतत्स्वरूपंकथयामासुः॥नृपःस्वयंतत्रागत्यतत्क्षुधाक्षाम
कुक्षितयैवदृष्ट्वाविस्मितमनाजातःसोपिराजानंवीक्ष्यतद्भावपरीक्षार्थं॥निष्ठुराक्षरंप्रोवाच॥राजन्॥त्वयाएतेसूदाःकेवलंश्राद्धा
नांवचनार्थंनियुक्ताःसंतियदिमांएकमपिक्षुधार्तंपूर्णान्नदानेननतोषयंति॥तर्हिएतेस्वोदरपूरकाःअन्येषांकोटिसंख्यश्राद्धानांभर
णपोषणादिषुकथंसादराभविष्यंति॥तच्छ्रुत्वानृपःकिंचित्सूदानप्रतिकोपंकृत्वापुनःशतमुदकप्रमाणंअन्नंआत्मनःप्रत्यक्षंत
त्कालमेवपाचयतिस्म॥तच्चसर्वमपिनृपस्यपश्यतएवतेनमायाश्राद्धेनभक्षितंतथापिअग्निवदतृप्तःसपुनरुवाचहेराजन्भ

रतान्वयशृंगार॥पूर्वजानांकीर्त्तिवर्द्धयितुंदानंददामि॥परंमांएकमपिनतृप्तंनकरोषि॥तर्हिकिंतेदातृत्वं॥इत्थंचकीर्त्तिरपिकथंवर्द्धि
ष्यति॥अद्ययावत्तवपूर्वजाःसर्वेपिनिरर्गलदानदातारोभूवन्॥तेषांकुलेत्वंइदृशोकिंचित्करोजातः॥तर्हिकिंत्वयाजातेन॥उक्तं
पूर्वेषांयःकुलंकीर्त्तिपुण्यंनाधिकतांनयेत्॥जातेनाप्यथकिंतेनजननीक्लेशकारिणा॥इत्यादिवचोभिस्तेनबहुधानिर्भर्त्स्यमानो
पिराजानकिंचिदपिमनसिकोपंदधौ॥किंचप्रत्युतस्वस्यप्रतिज्ञांअपूर्णांविचिंत्य॥आत्मनिंदांचकार॥ततोमंत्रिभिर्बुद्ध्यातत्स्वरूपंवि
ज्ञायनृपःप्रोचेस्वामिन्अयंकश्चिद्देवोदानवोवा॥श्राद्धरूपंविधायछलनार्थमागतोस्तितत्तुश्राद्धवेशेभक्तिरस्ति॥ततोभक्तिकरणेन
प्रमादिनःसन्॥अयंस्वस्वरूपंप्रकटयिष्यति॥राजापितच्छ्रुत्वाअगुरुवंदनादिपूर्वंतदग्रेतोमुक्त्वामधुरवचनैःप्राह॥भोमहाभागक
स्त्वंश्रावकवेषेणमद्गृहंपावनीकर्त्तुमागतोसि॥ततःकृपांविधायप्रकटयनुभवान्स्वस्वरूपंनयुज्यतेहिभवादृशां॥स्वधर्मैकनिष्ठे
मयिखेदोत्पादनं॥यदिदेवगुरुधर्मेषुममभक्तिर्निश्चलास्ति॥तर्हित्वंनिजस्वरूपंप्रकटीकृत्य॥ममपुण्यंसफलीकुरु॥इत्यादिवचनेस्तु
ष्टः॥शक्रोमायारूपंमुक्त्वास्वरूपंसाक्षात्कृत्वा॥प्रशंसांचकार॥नृपोपिशक्रंउपलक्ष्यससंभ्रमंप्रणमतिस्मशक्रस्तंप्रणमंतंसस्नेहंस
मालिंग्य॥धन्यस्त्वंयेनत्वयाश्रीयुगादीशवंशोधिकतरंविभूषितःत्वयापूर्वजानांसकलकरणीयंसविशेषंपाल्यते॥ततःइदानींत

139/1762

वश्री।शत्रुंजयतीर्थसंघपतित्वंचैत्योद्धारश्चकर्त्तुमुद्यतो॥ अहमपितवसाहाय्यंकरिष्यामीत्यादिशक्रवचसाप्रेरि तोनृपस्तीर्थया
त्रार्थसमुत्सुकोभवत्॥ ततःशक्रस्तस्मैदिव्यंधनुःरथंहारंकुंडलयुगलंचदत्वा॥पुनःशत्रुंजयोपरिआवयोःसंगमोभविष्यतीत्यु
क्त्वास्वर्गंजगाम अथदंडवीर्यनृपोदूतमुखेन॥स्वाज्ञावर्त्तिनोनृपान्संघलोकसहितान् आकारयामास॥ अथशुभदिवसेजिनपूजां
कृत्वागजारूढोधृतातपत्रचामरःसकलराजवर्गैःसमनुगम्यमानश्चतुर्विधसंघदेवालयंचपुरस्कृत्यश्रीभरतेशवत्सर्वविधिकरण
पूर्वकंमहाधरादिभिःपरिवृतोयात्रार्थंप्रतस्थे॥ ततोविच्छिन्नप्रयाणैर्मार्गमतिलंघयन्॥क्रमेणकाश्मीरदेशंप्राप्य॥ तत्रचशैलमहा
शैलोपर्वतौअंतरालेआगत्यमार्गंरुरुध —ः॥ ततोलोकेषुभयात्रस्यत्सुकोलाहलेजाते॥नृपःस्वयंयावत्तत्समीपंयाति॥तावत्तौप्रल
यशैलौइवपरस्परंआस्फलतां॥तदास्फलनोद्भवेनवह्निनाच॥समंतात्गगनमंडलंछादितं॥तदेतद्भयंकरंवीक्ष्य॥शंकितचित्तोराजा
अनेकाचशांतिकोपायानचकार॥तथापियदिसउत्पातोनशाम्यति॥तदान्नृपःशक्रदत्तंधनुःसमारोप्यटंकारंकृतवान्॥तेनकृत्वातौ
पर्वतौवज्रपातभयेनेवकिंचित्॥अपसृतौ॥ततोवज्रेपि॥ अकुंठितंदिव्यंबाणंधनुषिसंयोज्य॥किंजीर्णपर्णमिवरेवैर्विनिराकरि
ष्यति॥किंवार्कतूलमिवचंद्रंदूरेक्षेप्स्यति॥किंवाजीर्णभांडमिवब्रह्मांडंस्फोटयिष्यति॥इत्यादिशंकापरैःपार्श्वस्थितजनैःसाश्च

र्यंवीक्ष्यमाणं नृपोयावद्धनुःकर्णांतमाकृष्यबाणंमुंचति॥तावत्कश्चित्॥अतिकरालरूपोज्वलत्पिंगलनेत्रोबंध्याचलइवदीर्घवान
लज्वालापिंगलान्केशान्बिभ्रत्॥गुहोपमनासिकाविवरनिर्गतेनवायुनावृक्षान्भंजन्विकरालान्दंतान्घर्षयन्॥मुखमध्या
द्वह्निज्वालाउद्वमन्॥तालप्रलंबहस्तपादःशिलातलसमहृदयस्थलोतिबीभत्सश्यामांगोवेतालःरुरुरुरुइतिकथयन्॥प्रकटी
बभूव॥ततस्तद्वचनात्॥नृपोबाणंतथैवरक्षयित्वातंप्रतिप्राह॥अरेदुष्टत्वंकोसिकथंचास्माकंमार्गरोधःकृतइति॥ ततःसप्राह
स्वामिन्त्वंप्रणतवत्सलोसि॥ततःशरणागतेमयिकोपंपरित्यज॥यन्मयाज्ञानमूढेनत्वयिअपराधःकृतस्तत्कारणंशृणुपूर्वंअहंवि
यद्गतिर्नामविद्याधरपतिः अभूवंअन्यदात्वयासंग्रामेनिर्जितःतेनआर्त्तध्यानेनमृत्वाबहून्तुच्छभवान्भ्रांत्वाअत्रपर्वतांतरालेहंवे
तालोजातः॥सांप्रतंत्वांदृष्ट्वाविभंगज्ञानेनचपूर्ववैरंस्मृत्वा॥अज्ञानात्स्वशक्तिंअविचार्यैवमार्गरोधंअकार्षंतवधनुष्टंकारेणैवाहं
तवाधीनोजातः॥पुराहंदानवमानवराक्षसादिभिःकैरपिनजितःसांप्रतंत्वयानुहेलामात्रेणैवजितः॥ततोद्यप्रभृतितवकिंकरोस्मि
तवादेशात्॥अत्रस्थाने॥आरक्षकोभूत्वास्थास्यामीतिवदंतं॥तंतत्रैवसंस्थाप्यनृपतिःपुरतोगच्छन्॥कतिपयैर्दिवसैः॥श्रीशत्रुं
जयतलहट्टिकां॥आनंदपुरंप्राप्य॥कृततीर्थदेवगुरुसंघादिपूजोपचारःशत्रुंजयीनदीभारतकुंडादितीर्थोदकानिगृहीत्वा

१४।१।१९५२

हामहोत्सवपूर्वकंसर्वसंघजनैःसमंतीर्थराजंसमारोह॥ततोमुख्यशृंगेस्थितःप्रदक्षिणादत्वाश्रीभरतेशविनिर्मितप्रासादान्प्राप्य॥प
रमप्रमोदंप्राप॥इतश्चशक्रोपितत्रागाम॥ततःशक्रोक्तविधिनाप्रासादेराजादनीवृक्षेपादुकायाश्चपरेष्वपिसर्वचैत्येषुसर्वोपचा
रैःपूजांकृत्वाध्वजदानमालापरिधानादिकंसर्वकृत्यंसंपूर्णंचकारइत्थंजिनतीर्थभक्तितत्परोनृपःनित्यंगुरुमुखात्तीर्थमहात्म्यं
शृण्वन्॥अष्टाह्निकाचयथावत्तत्रतस्थौततःप्रासादान्जर्जरान्वीक्ष्य॥खेदमुद्वहन्चक्रिणचप्रेरितःसन्॥पुनःतेषांप्रासादानांउ
द्धारंकारयामासपुनस्ततोरैवतगिरौगत्वायात्रापूजादिकंविधाय॥उद्धारंचकारइत्थंअर्बुदगिरौवैभारगिरौचयात्रांउद्धारंचकार
यित्वास्वजन्मसाफल्यंमन्यमानःक्रमेणस्वराज्यमागत्य॥विशेषाद्धर्मतत्परोबभूव॥ततस्तेनस्वयशःसमूहैरिवमहोज्वलैःकोटिशःप्रा
सादैर्मेदिनीमंडिता॥इत्थंचधर्मकरणैकपरायणस्यतस्यान्यदाश्रीभरतेशवत्॥आदर्शभवने॥शरीरशोभांपश्यतःकेवलज्ञानंस
मुत्पेदे॥ततोदेवनादत्तलिंगःपृथिव्यांअनेकभव्यप्राणिनःप्रतिबोधयन्॥पूर्वाईयावद्विहृत्य॥सकलकर्मक्षयंकृत्वादंडवीर्यके
वलीमोक्षलक्ष्मीप्राप्य॥सुरेंद्रसोयंखलुतीर्थराजे॥द्वितीयकोद्धारकरोनृपोभूत्॥श्रीदंडवीर्योभरतस्यवंशेयशोततमङ्गवर
ल्गोस्तं॥१॥इतिद्वितीयोद्धारः॥२॥अथान्यदाईशानेंद्रोमहाविदेहक्षेत्रेभगवंतंवंदितुमागतः॥तत्रसमवसरणमध्येसिंहास

नासीनं॥सर्वातिशयशालीनंश्रीजिनंनत्वा॥देशनांश्रोतुंउपविष्टः॥तत्रचभगवतादेशनामध्येश्रीशत्रुंजयमहात्म्यंवर्णितं॥यथा॥य
थाभवेषुमानुष्योग्रहेष्विवदिवाकरःतथाद्वीपेषुजं—म्बोद्वीपःसर्वोत्तमोगुणैः॥१॥सुराष्ट्रासर्वदेशेषु॥पुंडरीकोनगेषुच॥देवे
षुचयुगादीशःकीर्तनादपिपापहृत॥२॥कृतंतुभारतंधन्यं॥धन्यास्तेपुजनानतु॥यत्रशत्रुंजयंतीर्थं॥पूजयंतीचयेजिनं॥३॥सर्वपा
पानिनश्यंति॥स्मृतेपिविमलाचले॥अंधकारःकथंतिष्टे॥दुदितेसूर्यमंडले॥४॥यद्दोधर्वाजंदुःप्रापंभवैःकोटिभिरप्यहो॥शत्रुंजयेजि
नध्यानाल्लभ्यतेतत्क्षणादहोसम्यक्त्वंसर्वतत्त्वेषु॥देवेषुचयथाजिनः॥दुर्लभःसर्वतीर्थेषु॥तथाशत्रुंजयोगिरिः॥५॥इत्येवंभगवन्मुखा
त्महात्म्यंश्रुत्वा॥ईशानेंद्रोदेवानांते॥जिनंनत्वातीर्थभक्तिसमुल्लसन्मनाःक्षणादेवश्रीशत्रुंजयंप्राप्य॥तत्रसमस्तसुरैःसहपूजाम
कि॥तत्पराष्टाह्निकोत्सवान्तस्थौ॥अथप्रासादान्जर्जरान्वीक्ष्य॥दिव्यशक्त्यापुनर्नवीचके॥दंडवीर्यनृपात्सागरशतेगतेसति॥इ
त्येवंश्रीशत्रुंजयेईशानेंद्रेणतृतीयउद्धारःकृतःइतितृतीयोद्धारः॥३॥अथान्यदाचैत्रपूर्णिमायांसर्वसुराःश्रीशत्रुंजयेभगवद्वंदना
र्थंसमागताः॥तदाचहस्तिसेनाख्येपुरे॥सुहस्तिनीदेवीकालवशान्मिथ्यादृष्टिर्जातास्ति॥साचकोटिसंख्यदेवीभिःपरिवृतामहाब
लवतीक्रूरादुष्टाशयाजैन्यधर्मद्वेषंवहंती॥तालध्वजप्रमुखान्क्षेत्रपालान्॥अपिस्ववंशवर्त्तिनश्चकारःतथाचमद्यमांसादिभोगा

143/1962

सकयातीर्थविसंस्थुलंकृतं आसीत्॥ अथतयादेवानां आगमनात्पूर्वमेवतीर्थद्वेषाद्देवान्वंचयितुंमाययाकृत्वाबहव:शत्रुंजया:
कृता:देवास्तुतत्रबहून्शत्रुंजयान्दृष्ट्वाविस्मिताश्चिंतयामासु:॥ अहोकिमेतेबहव:शत्रुंजया:संतिकिंवास्माकंभक्तिवशात्स्व
यंबहुरूपंधरोभवत्॥ किंवास्मान्वंचनवीक्ष्य॥ एतेषांसंकीर्णनामाभूदितिज्ञात्वाबहुरूपोजात:इत्यादिचिंतयस्तेवधिज्ञानंअप्रयु
ज्यैव॥ रभसासर्वपर्वतेषुस्नात्रस्नानादिका:क्रियाश्चक्रु:॥ ततोष्टाह्निकांकृत्वा॥ यावद्गंतुमिच्छंति॥ तावदेकमपिशत्रुंजयंन अपश्यन्॥ त
तस्तेविस्मितेश्चिंतितं॥ अहोकिमेतत् इंद्रजालं॥ अथवाकिंअस्माकंअपराधदोषात्विमलाचलोदृश्योजात॥ इत्यादिचिंतापरास्ते अ
वधिज्ञानोपयोगंददु:॥ ततस्तस्यादुष्टदेवताया:कपटस्वरूपंविज्ञाय भृशंकुपिता॥ प्रलयकालार्कवत्कोपज्वालांतांप्रतिमुंचतिस्म॥ सा
दुष्टातेनकोपज्वालासमूहेनदह्यमानादीनवदनादीनाकृशरणिवदंतीसपरिवारासमागत्यतेषांसुराणांपादयोर्लुठित्वा इतिप्राह
यूयंअस्माकंस्वामिन:वयंतुभवतांकिंकर्य:नयुज्यतेस्मासुअबलासुभवतांमदासत्वानांकोपकरणं॥ नयुज्यतेतृणछेदार्थंकुठारस्या
…:अज्ञानात्अयंअपराध:कृत:॥ अत:परंतुनकदाप्येवंकरिष्याम:॥ सांप्रतंक्षम्यतांएषोअपराधइतितयोक्ते॥ देवा:प्रोचु:॥ रेदुष्टेत्वं
…निपूर्वंश्रीभरतेशेनतीर्थरक्षार्थंमुक्तासि॥ इदानींतत्तीर्थंविनाशयितुंउद्यतासि॥ मद्यमांसादिसेवयातीर्थंमलीमसंकरोषि

ततोधुनाअस्मत्कोपानलेपतंगत्वंप्राप्स्यसि॥ तितर्जनावाक्यै:साभीतासतीभयविह्वलांगी॥ अनन्यशरणाश्रीवृषभस्वामिन:शरणंजग्राह
॥ अत:परंमनसापिएवंचिंतयामि॥ तर्हिश्रीश्रीयुगादीशपादयो:शपथोस्तु॥ अत्रार्थेयूयंसाक्षिण:इत्यादितस्यादीनवचसासुरा:कोपंप
रित्यतांव्यसृजन्॥ ततस्मादस्मिंसेनपुरेपूर्ववत्तीर्थरक्षातत्परासंघोपद्रवहराबभूव॥ अथतदाचतुर्थदेवलोकस्वामीमाहेंद्र:प्रासादा
नविसंस्थुलान्वीक्ष्यदिव्यशक्त्यानवंउद्धारंकारयामास॥ तथैवबाहुबलिगिरौनालध्वजेकादंबकेरैवताचले अन्येष्वपिशृंगेषुउद्धारं
कारयामास॥ ईशानेंद्रोद्धारकालात्कोटिसागरोपमेषुगतेषु॥ माहेंद्रकृतोद्धारोभवत्॥ इतिचतुर्थोद्धार:॥४॥ अथान्यदासर्वेसुरा:महावि
देहेजिनजन्मोत्सवंविधाय॥ नंदीश्वरेष्टाह्निकांकृत्वा॥ श्रीशत्रुंजययात्रार्थंआजग्मु:॥ तत्राप्यष्टाह्निकायावत्॥ भगवद्भक्तितत्परास्तस्थु:
तदाचप्रासादान्जर्जरान्वीक्ष्य॥ पंचमस्वर्गपतिर्ब्रह्मेंद्रोदिव्यशक्त्यापुनर्नवोद्धारंकृतवान्॥ अयंउद्धारस्तुमाहेंद्रोद्धारसमयात्॥
दशकोटिसागरांतेबभूव॥ इतिपंचमोद्धार:॥५॥ अथब्रह्मेंद्रोद्धारकालात्॥ एककोटिलक्षसागरेषुगतेषु॥ अन्यदाचमरेंद्रादयो
भवनपतय:श्रीनंदीश्वरयात्रार्थंययु:तत्रायातविद्याधरमुनिमुखात्विमलाचलमाहात्म्यंश्रुत्वासमुत्पन्नभक्तिप्रकर्षा:सर्वेपिश्रीश
त्रुंजयंसमाजग्मु:॥ तत्रपूजाभक्तिकरणानंतरंमुख्यशृंगादिसर्वशृंगेषुउद्धारंचक्रु:॥ इतिषष्ठोद्धार:॥६॥ ततोप्यंतरांतरा…

र्थमनुष्यैः सुरैश्च कृता बहवः स्वकृत्योद्धारा बभूवुः॥ तेषां तु शास्त्रे गणना कृता नास्ति॥ निर्ज्ञेयं॥ इत्थं श्रीभरतोद्धारादुद्धाराः पंचदशमी वर्णिताः

शृणु देवेंद्र सगरोद्धारमग्रतः॥२॥ ॥इति श्रीशत्रुंजयमाहात्म्योल्लेखे पंडितश्रीहंसरत्नकविविरचिते द्राविडवालिखिल्लचरितदंड

वीर्यादिकृतोद्धारपंचकवर्णनो नाम सप्तमोधिकारः॥७॥ ॥ ॥बाह्यांतररिपुव्रातैर्न जितो यो निदुर्ज्जयैः कुतीर्थिदर्पदलनः

सोजितो जयदोस्तु मे॥१॥ अथ शृणु सौधर्माधिनाथ॥ शेषोद्धाराणां स्वरूपं॥ तथाहि॥ जंबूद्वीपे भरतक्षेत्रे॥ अयोध्यापुर्यां॥ श्रीऋष

भस्वामिवंशे॥ असंख्येषु नृपेषु मुक्तिसर्वार्थसिद्धिं च गतेषु क्रमात्॥ जितशत्रुंनामा नृपतिर्बभूव॥ तस्य लघुभ्राता सुमित्राभिधो यु

वराजपदे भूत्॥ जितशत्रुनृपस्य पट्टराज्ञी॥ विजयानाम्नी सुमित्रस्य यशोमतीनाम्नी प्रिया भूत्॥ अन्यदा॥ विजया रात्रिचंद्रशालायां

सुप्ता सती मध्यरात्रौ गजसिंहवृषभादीन् चतुर्दश स्वप्नान्॥ अपश्यत् तदनुभावात्॥ वैशाखसितत्रयोदश्यां रोहिणीनक्षत्रे विजयना

म्नो हितीयात्॥ अनुत्तरविमानात्॥ सुरश्च्युत्वा॥ तस्या गर्भे अवतीर्ण इतश्च सुमित्रस्य युवराजस्य प्रियाय शोमति॥ अपि तानेव चतुर्दश

स्वप्नान् अपश्यत्॥ ताभ्यां द्वाभ्यां अपि स्वस्वभर्त्तुरग्रे स्वप्नदर्शनस्वरूपे कथिते सति॥ प्रभाते स्वप्नलक्षणपावकान् आकार्य तौ स्वप्नफलं

पप्रच्छतुः॥ ते च स्वप्नफलं विचार्य विजयायां तीर्थकरोत्पत्तिं यशोमत्यां च चक्रिणस्तत्त्विं कथयामासुः॥ ततः क्रमाद्वर्द्धमानयोस्तयो

र्गर्भयोः पूर्णकाले माघशुक्लाष्टम्यां रोहिणीनक्षत्रे॥ मध्यरात्रौ विजयादेवी जगदुद्योतकारिणं सुवर्णवर्णं गजलांछनं पुत्रं प्रासूत॥ ततः

षट्पंचाशद्दिक्कुमार्यः चतुःषष्टिरिंद्राश्च॥ एवं सर्वे पि चतुर्निकायोक्ता वाश्चलितामना स्तत्रागत्य॥ श्रीऋषभस्वामिन इव जन्मोत्सवं च कुः

ततो राज्ञा पुत्रजन्मोत्सवं विधाय॥ नामकरणावसरे च॥ पूर्वस्वामिनि गर्भस्थिते॥ ते तु अशक्या अपि भूपाला राज्ञा जिताः स्वयं तु सबलैरपि

शत्रुभिर्न जितः॥ तथा गर्भानुभावाद्देवसारिफलक्रीडायां नृपस्य राज्ञी अजेया भूदिति॥ पूर्वसंकेतं सस्मृत्य गुणनिष्पन्नं॥ अजितकुमा

र इति नाम चक्रे॥ इतश्च यशोमत्यपि संपूर्णश्रुतं संदोहदा तस्मिन्नेव दिवसे पुत्रं प्रासूत॥ तस्य सगर इति नाम अभूत्॥ अथ श्री अजित

स्वामी सगरश्च धात्रीभिर्लाल्यमानौ नंदनवनभूमौ बालकल्पतरू इव मातापित्रोर्मनोरथैः सह वृद्धिं प्रापतुः॥ क्रमेण यौवनं प्राप्तौ द्वि

तीयौ जिनचक्रिणौ सार्द्धचतुःशतधनुःप्रमाणौ चांगोलोकोत्तररूपलावण्यभूषितौ॥ सर्वांगसुलक्षणौ॥ सर्वसुरासुरमानवानां मनो

हरौ अभूतां॥ ततः पितृभिर्बह्वीनां भूपकन्यानां पाणिग्रहणकारितौ॥ पूर्वोपार्जितभोगफलकर्मोदयात्॥ सर्वोत्तमान् कामभोगान्

भुंजानौ तस्थतुः॥ इत्थं श्री अजितस्वामी॥ अष्टादशपूर्वलक्षान्॥ यावत् कुमारत्वे विलसति स्म॥ ततो जितशत्रुनृपः प्रभुं राज्ये॥ सगरं

च यौवराज्ये संस्थाप्य॥ स्वयं च सुमित्रेण बंधुना सह॥ अन्यैरपि बहुभिर्नृपैः परिवृतो धर्मघोषसूरिपार्श्वे दीक्षां जग्राह॥ अथ भगवान्

1H7/1962

श्रीअजितस्वामीतृष्णारहितोपिभोगफलोदयात्राज्यंपालयतिस्म॥तदाप्रभौराज्यंकुर्वतिसति॥नदुर्भिक्षंनचईतयोनचचौररोगमा
रिप्रमुखंभयंचभूव॥सुषमाकालवत्सर्वेलोकाःसुखिनोभूवन्॥एवंचप्रभुःत्रिपंचाशल्लक्षपूर्वाणियावद्राज्यंचकार॥ततोन्यदावसं
तसमयेस्वामीलोकानुरोधादंतःपुरपरिजनादिपरिवृतः॥उद्यानशोभावलोकनार्थंययौ॥तत्रसहकारमंजरीसमास्वादनोन्मदकोकिल
कुहूकारमनोहरे॥विविधकुसुममकरंदपानमत्तमधुकरश्रेणिझंकारव्याप्तदिग्मुखे॥विकसदनेककुसुमाकरसौरभ्यसुरभीकृतस
कलपरिसरेएवंविधोद्यानेकुसुमावचयमाल्यग्रथनांदोलनक्रीडाजलकेलिरासक्रीडादिनानाकेलिपरासुअंतःपुरपुरंध्रीषु॥अ
मरीगणपरिवृतःपुरंदरइववनारागणेषुनारापतिरिवप्रभुःसर्वांगधृतपुष्पाभरणस्त्रासांनृत्यगीतादिपश्यन्विलसतिस्म॥अथ
तत्समयेप्रभोर्मनसिइतिसंकल्पःसमभूत्॥अहोएतत्विलाससौंदर्यंमयात्रैवानुभूयते॥किंवापूर्वमपिकुत्राप्यनुभूतपूर्वंएवंईहापो
हात्॥अवधिज्ञानेनपूर्वदेवभवेषुअनुभूतानिमहासुखानिअपश्यत्॥ततोतिविरक्तमनाइत्यचिंतयत्॥अहोकइमेशुचिविनश्व
रमनुष्यदेहोद्भवाःकामभोगाःक्वचतत्॥अनुत्तरविमानजंसर्वोत्तमंसौख्यंअहोयमात्मातेनापितृप्तोयेनचांडालपाटकवासतुल्ये
अमेवैषयिकेसुखेरज्यतिधिगस्तु॥विषयान्किंपाकफलवत्॥विपाकविरसान्॥ततःसांप्रतंविषयासक्तिंविहायसंयमग्रहणंभे

वास्माकंश्रेयःइतिचिंतयतएव॥लोकांतिकसुराआजग्मुः॥तेचजयजयशब्दपूर्वकंस्वामिन्धर्मतीर्थंप्रवर्तयस्वेतिमधुरयावाण्याप्रभोर्दी
क्षावसरंबोधयामासुः॥भगवानपितत्कालंगृहमागत्य॥सांवत्सरिकंदानंदातुंप्रारेभे॥अथप्रभुःसगरंभाविचक्रिणंज्ञात्वास्वराज्ये
स्थापयामास॥ततःसांवत्सरिकदानांतेभगवान्॥सकलसुरासुरमानवैःकृतदीक्षोत्सवोमाघशुक्लनवमीदिनेरोहिणीनक्षत्रे॥सहस्रा
म्रवनेकृतषष्ठतपाराज्ञांसहस्रेणसमंव्रतंजग्राह॥तदेवमनःपर्यवज्ञानंसमुत्पन्नं॥ततोद्वितीयेह्नि॥अयोध्यायांब्रह्मदत्तगृहे॥परमा
न्नेनप्रभुःपारणंचकार॥देवैःपंचदिव्यानिप्रकटितानि॥सार्द्धद्वादशकोटिस्वर्णवृष्टिःकृता॥ततोयत्रभूमौभगवतःपादौप्रतिबिंबितौ
तत्रअन्यःकोपिपादाक्रमणेन॥आशातनांमाकरोत्वितिविचिंत्य॥तेनब्रह्मदत्तेनतत्रस्थलेधर्मचक्राभिधानोमहान्प्रासादःका
रितः॥अथप्रभुर्वायुरिवाप्रतिबद्धःपृथिव्यांविहरन्॥द्वादशवर्षातिक्रमे॥पुनरयोध्यांप्राप्य॥तत्रअयोध्यायाबहिःसहस्राम्रवनो
द्याने॥सप्तच्छदतलेगोदोहासनेन॥शुक्लध्यानंध्यायतः॥पौषशुक्लद्वादश्यांरोहिणीनक्षत्रेअपराह्णसमयेकेवलज्ञानंसमुत्पन्नं॥देवैंद्रा
दयस्तत्रागत्यकेवलोत्सवंसमवसरणंचचक्रुः॥इतश्चउद्यानपालःसगरनृपायभगवतःकेवलोत्पत्तिंकथयामास॥अथतस्मिन्नेवस
मयेआयुधशालापालकश्चक्ररत्नोत्पत्तिंकथयामास॥ततउभयथापिसंजातहर्षःसगरनृपोद्वयोरपिप्रभुरंपारितोषिकंदा

भरतेशावल्लोकद्वयहितकारिणीं॥भगवद्भक्तिंविचार्य॥सर्वर्द्ध्याचतुरंगसेनापरिवृतःप्रभोर्वंदनार्थंजगाम॥तत्रचसमवसरणेभगवं
तंत्रिःप्रदक्षिणीकृत्य॥वंदित्वादेशनाश्रवणार्थंसमुपाविशत्॥ततःधर्मएवसदासेव्यःस्वर्गमुक्तिनिबंधनं विनाधर्मंभवेदुःखंदौर्भा
ग्यंचभवेभवे॥१॥असाराद्गृहात्सारंधर्मंगृह्णातिसारधीः॥दुःप्रापोधर्मएवायमन्यत्सर्वंहिलभ्यते॥२॥इत्यादिकांभगवद्देशनांश्रुत्वा
पुनर्वंदित्वागृहमागत्य॥चक्रोत्पत्तिनिमित्तं॥अष्टाह्निकामहोत्सवंचकार॥ततोदिग्विजयकरणार्थंचक्री।चक्रपृष्टानुगोचलन्॥क्रमे
णभरतेवत्॥मागधवरदामप्रभासंवैताढ्यगंगासिंधुनिकुयदीनिसाधयित्वाक्रमेणपंचत्रिंशत्सहस्रवर्षाणिदिग्जयंविधाय॥
पुनरयोध्यांसमाजगाम पुनस्तत्रद्वात्रिंशत्सहस्रैर्भूपैःपंचविंशतिसहस्रयक्षैःअन्यैश्चबहुभिःसामंतादिभिःचक्रिमहोत्सवश्चक्रेइ
त्थंचषट्खंडंअखंडंभरतक्षेत्रमेकातपत्रंपालयन्चक्री॥शरत्कालार्कइवातिप्रतापभासुरोधिकंशुशुभे॥इतश्चश्रीअजितस्वामी
केवलालोकभास्करःपृथिवींपावयन्॥अन्यदाश्रीयुगादीशपादपवित्रितं॥श्रीशत्रुंजयंतीर्थमिमंमत्वातंप्रतिविजहार अथतंप
र्वतंआरुहतःस्वामिनःपुरोमयूरएकोबहुभिर्लघुमयूरैःपरिवृतोनृत्यंकुर्वन्स्वामिनासहैवमुख्यशृंगंप्राप्य॥ततःस्वामीतंम
यूरंलघुकर्माणंस्वल्पायुषंचविज्ञाय॥प्रतिबोधंदत्वाअनशनंकारयामास॥ततःसः मयूरोराजादन्यास्तलेषुध्यानपरस्त्रीणिदि

नान्यनशनंप्रपाल्यसमाधिमरणेनकालंकृत्वा॥चतुर्थदेवलोकेभूत्॥स्वामीतुमुख्यशृंगादवतीर्यदक्षिणपश्चिमस्यांदिशिसुभद्राभि
धेकूटे॥सिद्धिशिलोपरिसमवासरत्॥ततःसमयूरदेवस्तत्कालोत्पन्नएव॥अवधिनाभगवतस्तीर्थस्यचउपकारंस्मृत्वा॥वेगात्तत्रा
गत्यस्वतेजसासमग्रमपिचपर्वतंसमुद्योतयन्॥भक्तिपूर्वकंप्रभुंवंदित्वाप्रभुणापि॥आगच्छतांमयूरदेवेत्याभाषितःसभायांउपावि
शत्॥अथसौधर्मेंद्रोभगवंतं॥अपृच्छत्॥स्वामिन्कोसौदेवोयोभवद्भिर्मयूरदेवस्त्युच्यते॥ततःस्वामीप्राह॥अयंमयूरोलघुकर्मत
यास्मद्वचसाप्रबुद्धः॥सांप्रतंमैवराजादनीतरोस्तलेदिनत्रयमनशनंप्रपाल्यतीर्थानुभावेनोत्कृष्टदेवमभव॥अस्माकंउपकारं
स्मरन्वेगादिहाजगाम॥अग्रेप्यसौएकावतारीनरभवंप्राप्य॥गृहीतसंयमोऽत्रैवतीर्थेमोक्षंयास्यतीति॥भगवद्वचनंश्रुत्वाप्रमुदितम
नाःसमयूरदेवस्तत्रैवराजादनीतरोस्तलेभगवत्पादुकासमीपेस्वस्यमयूररूपांमूर्त्तिंसंस्थाप्य॥तीर्थप्रजांचाकरोत्॥अथस्वामीसर्व
प्राणिनांहितबुद्ध्यादेशनायांश्रीशत्रुंजयस्यमहिमानंवर्णयामास॥तथाहि॥सम्मतासर्वसत्वेषु॥तत्त्वासंपस्यप्रजनं॥शत्रुंजयस्य
सेवाच॥नाल्पपुण्यैरवाप्यते॥१॥शैलःशत्रुंजयाख्योयं॥दर्शनादपिपापहृत्॥भवाब्धिमज्जज्जंतूनां॥साधारोद्वीपसन्निभः॥२॥
आराधितोजिनोयेन॥धर्मोपिचजिनोदित॥येनायंसेवितःशैलस्तस्यनोदुर्गतेर्भयं॥३॥तीर्थेस्मिन्यानिपुण्यानि॥विधीयंतेल

भूत्यपि॥ अरूपाणि चत्वारि स्युः॥ अक्रवर्त्तिनिधानवत्॥४॥ शत्रुंजये त्रये सिद्धाः सेत्स्यंत्यपि चये जनाः॥ आनन्त्यपि न तत्संख्यां वक्तुं शक्तो
जिनोपि हि॥५॥ अस्य सर्वेषु शृंगेषु॥ वर्त्तते महिमातुयः॥ स जिनेनापि नो वक्तुं॥ पार्यते वर्षकोटिभिः॥६॥ तीर्थेस्मिन् शीलसन्नाहा॥
ध्यानदीपं च बिभ्रतः॥ तपःखड्गेन निघ्नंति॥ भव्या रागादिकान् रिपून्॥७॥ अत्र शृंगेषु भद्राख्ये॥ रसरत्ननिधिश्रिते॥ हृत्लगाः स्युः श्रि
यः सर्वाः स्थितानां सुकृतात्मनां॥८॥ इत्यादिकां भगवतो देशनां श्रुत्वा॥ आत्मानं धन्यंमन्यमानाः सुरनराः सर्वेपि स्वस्वस्थानं ययुः॥ इतश्च स्वा
मी वर्षासमयं समागतं विज्ञाय॥ तत्रैव शृंगे सपरिच्छदश्चतुर्मासीं तस्थौ॥ तत्र स्वामिनो निवासार्थं देवाः प्रोत्तुंगं मंडपं चक्रुः॥ साधवस्तु॥
तपोध्यानपरायणाः॥ केचित्कंदरासु केचित्सर्वविलस्याग्रे केचिज्जीर्णप्रपादेंकुलादिषु॥ यथालब्धस्थानेषु तस्थुः॥ तत्र भगवतोति
शयात्॥ हिंस्रा अपि वन्यजीवाः केचित्सम्यक्त्वं॥ केपि भद्रकभावं॥ केचिच्च अहिंसाव्रतं प्रपद्यंते स्म॥ अथैवं स्वामी तत्र चातुर्मासीं समु
ष्य॥ पुनर्मुख्यशृंगं समारोह॥ इतश्च श्रीसुव्रताचार्यस्तंदुलधावनोदकपात्रं करे धृत्वा॥ पर्वतं समारुरोह न्ग्लानत्वात्॥ प्रथमशृंगे वि
श्रामं चक्रे॥ ततः कस्यचित्तरोरुत्कलितत्वात् पात्रं मुक्त्वा यावत्स्थितस्तावत्तृषातुरेण काकेन॥ तज्जलपात्रं निर्लोठितं॥ ततो मुनिस्तृषाशुष्य
त्कंठतालुपुटः किंचित्कोपं कृत्वा॥ इति प्राह॥ रे रे विहगाधम॥ त्वया मत्कंजीवजीवनसमं प्रासुकजलं विनाशितं॥ ततोद्यप्रभृति॥ अ

त्र सर्वदेवमये पर्वते॥ भवतां विहंगाधमानां आगमनं मास्तु॥ एतच्च जलं मम तपसः प्रभावात्॥ सदैवारुयं भवतु॥ इति तस्य मुनेर्वाक्यश्रवणा
देव तस्मात्पर्वतात्॥ भयाकुला इव सर्वेकाका दूरतो ययुः॥ अद्यापि यावदत्र पर्वते मुनेर्महात्म्यात् काकानां आगमनं नास्ति॥ नित्र न्यस्तं दृश्यते
॥ यदि कदाचित्पृथिवीमध्ये दुर्भिक्षविड्वरादि महानर्थभाविनं सूचयितुं॥ गिरेरुपरि काकः समायाति नदी तद्दोषशांत्यर्थं बहुश्रुतगीतार्थ
वाक्यानुसारेण॥ श्रीयुगादीशस्याग्रे राज्ञा दन्यैश्च॥ शांतिकं कर्त्तव्यं॥ तेन सर्वमपि रिष्टं विलयं याति॥ यच्च तज्जलं मुनीनाक्षयीकृतं त
त्॥ अद्यापि मुख्यशृंगात्किंचिदधो भागे नैर्ऋत्यां दिशि अक्षयप्रवाहं विद्यते॥ लोके उलषाकोल इति कथ्यते॥ एतच्च महर्षिवाक्यात्स
त्यं॥ ततो महातीर्थं अद्यापि कालेनस्य जलस्याभिषेकात्॥ भूतप्रेतवेतालशाकिनीव्यंतराद्युपद्रवा नश्यंति॥ अथ श्री अजितस्वामी
तत्रैव मुख्यशृंगे कांश्चिन्मुनीन्॥ समासन्ननिर्वाणान् विज्ञाय॥ इत्यालापयत्॥ भो महानुभावाः॥ भवद्भिः अत्रैव स्थातव्यं॥ अस्य तीर्थस्या
नुभावादेव शीघ्रं सकलकर्मक्षयं कृत्वा॥ मोक्षं यास्यथ॥ इत्यादिश्य॥ भगवान् अन्यत्र विजहार॥ ते मुनयश्च तत्रैव कृतानशनाः केवलं प्रा
प्य मुक्तिं ययुः॥ इतश्चायोध्यायां सगरचक्री राज्यं करोति॥ तस्य जह्नुप्रमुखाः षष्टिसहस्राणि पुत्रा महाबलोद्धताः शस्त्रशास्त्रविद्यापा
रगताश्च बभूवुः॥ ते चान्यदा॥ भरतादिभिः स्वपूर्वजैः कृतानि तीर्थानि वंदितुं सोत्साहाः पितुरनुज्ञां गृहीत्वा चतुरंगबलान्विताः प्रतस्थि॥

153/1962

चक्ररत्नवर्जितानि॥द्वादशचक्रिरत्नानिबहूनयक्षान्राजश्चसार्थेजगृह्नुः॥अथतेनित्यंयोजनप्रमाणैःकतिचित्प्रयाणैश्चलंतःक्रमादष्टा
पदंपर्वतंप्रापुः॥ततोऽष्टभिःसोपानैःकृत्वाऽष्टयोजनोच्चंतंपर्वतंसमारुह्यश्रीभरतेशनिर्मितंमुख्यप्रासादंदक्षिणद्वारेणप्रविश्य॥तत्रच
तुरोजिनान्पश्चिमायांअष्टौउत्तरस्यांदश॥ततःपूर्वस्यांद्वौजिनौ॥इत्येवंचतुर्विंशतिजिनान्॥तेसर्वेपिकुमाराभक्त्यापूजयामासुः
ततःप्रासादशोभाविलोकनेनसंजातपरमविस्मयास्तेकुमाराःपरस्परंइतिमंत्रयामासुः॥अहोअत्रपर्वतेप्रासादोयंचतुर्द्वारःचतुर्दिग्
लक्ष्मीणांसंगमार्थंमंडपइवअस्माकंपूर्वजैर्निर्मितः॥अपरेपिमणिस्वर्गमया॥अत्रपर्वतेर्हत्प्रासादाविमानशोभांविडंबयंतोविभाति
किंचदेवैरपिजेतुंअशक्याद्वारपालालोहपुरुषाश्चन्यस्याद्दृश्यंते॥सोपानानिचयोजनप्रमाणानिमनुष्याणांदुरारोहाणिकृतानिसं
ति॥ततोनूनंश्रीभरतेशेनभाविकालजनान्नास्तिकान्लोभपरान्विज्ञाय॥तीर्थरक्षाकृतादृश्यते॥ततोवयमपिस्वपूर्वजस्थापितानां
सम्यग्रक्षांकुर्मःइतिविमृश्यपर्वतस्यसर्वतोनेकयोजनागाधांअतिविस्तृतांखातिकांकर्तुंप्रारेभिरे॥अथतेकुमारामहाबलाःस
र्वेपिदंडरत्नेनपृथ्वीखनंतिस्म॥अतिखातात्चदंडाघातनिर्घातैर्नागलोकेरजोवृद्धिर्बभूव॥ततोतिक्षुब्धेनागलोके॥नागलोके
ज्वलनप्रभोतिक्रुद्धःपुनरवधिनाचक्रिपुत्रान्॥तीर्थरक्षायातान्ज्ञात्वशांतकोपःसन्वेगात्तत्रागत्यइतिप्राह॥भोभोवत्साःयूयंश्रीयु

गादीशवंशोद्भवाःश्रीभरतान्वयेचक्रिपुत्रत्वेनजाताःसश्रीयुगादीस्वामीअस्माकंपूज्यःश्रीभरतादयोपितद्वंशजाअस्माकंपरममा
न्याःअन्यच्चएतत्तीर्थरक्षार्थकार्यंतदपिअस्माकंबहुसंमतं॥ततोत्रकार्येविघ्नकरणंसर्वथास्माकंअयुक्तंपरंसांप्रतंतुयुष्माकंप्रा
रब्धकार्यस्यनिष्पत्तिर्जाता॥दंडाघातैश्चनागलोकःपीड्यते॥ततोनिवर्तध्वंएतस्मात्कर्मणोद्यमादित्यादिमधुरवचनैःस्तान्वारयित्वा
नागपतिःस्वस्थानंजगाम॥अथतस्मिन्गतेपुनस्तेजह्नुप्रमुखाःकुमाराःपुनःसंभूयइतिचिंतयामासुः॥यतःअसौखातिकानिर्जला
सती॥कियताकालेनसुखोल्लंघाभविष्यति॥अतोजलेनपूर्यतेइतिकृत्वादंडरत्नेनगंगांवालयित्वातांपूरयामासुः॥यतःअसौखातिका
निर्जलासती॥कियताकालेनसुखोल्लंघाभविष्यति॥अतोजलेनपूर्यतेइतिकृत्वादंडरत्नेनगंगांवालयित्वातांपूरयामासुःपातालं
प्राप्तेनतज्जलेन॥नागभवनेषुप्लाव्यमानेषुअतिक्रुद्धोज्वलनप्रभःसहसातत्रागत्य॥विषज्वालाभिःषष्टिसहस्राण्यपितान्कुमारा
न्समकालंदग्धा॥पुनःस्वस्थानंजगाम॥अथकुमाराणांदाहात्सैन्येमहान्कोलाहलोभवत्॥वज्राहताइवस्तंभिताइवसैनिकाःस
र्वेपिशोकेननिश्चेष्टाबभूवुःसैन्यंसर्वमपिनिःस्वामिकंभयातुरंकिंकर्तव्यतामूढाजीवरहितंकलेवरमिवशून्यंबभूव॥अथतेचि
रकालात्चेतनेव्योमशून्यंप्रमार्ज्यइत्यचिंतयन्॥अहोदेवस्यविपरीतचेष्टितं॥यदुतप्राणिनां॥अन्यथाचिंतितोमनोरथोन्ययैव

1571198-

निपतति॥ अहो अस्माकं जीवतां पश्यतांमेव एते कुमाराः सर्वेपि समकालं भस्मतां प्राप्ताः तद्वयं॥ चक्रिणोग्रे मुखं कथं दर्शयिष्यामः॥ यष्टि
सहस्रकुमाराणां नाशोपि अस्मत्संगात् समायातान् वीक्ष्य चक्री अस्मान् नाम्नापि डंबनाभिर्विडंबयिष्यति॥ सेवकानां हि स्वामिरक्षे
वपरमो धर्मः अस्माभिस्स धर्मो न रक्षितः॥ ततो लोकद्वयविरुद्धेन॥ किमस्माकं जीवितव्येन सांप्रतं मरणमेव शरणमिति मंत्रयित्वा द्वाद
शयोजनप्रमितकुंडेचातुर्गादस्य सर्वतः काष्ठैर्वेष्टनं कृत्वा॥ ते सर्वेपि ज्वलनार्थं तत्परा बभुवुः॥ यावद्वह्निं मुंचंति॥ तावत् इंद्रो वधिनामहं
तं॥ अनर्थं भवंतं विज्ञाय॥ ब्राह्मणरूपेण तत्रागत्य मा म्रियध्वं॥ २॥ इति निवारयन्॥ पुनस्तान् प्राह॥ भो भो यूयं चक्रिणो भयात् वह्निं
प्रवेष्टुकामाः स्थः तद्यूयं मा कुरुध्वं॥ अत्रार्थे भवतां स्वामिभक्तिलोपरूपो पराधो न कश्चिदस्ति किंतु अवश्यं भाविनि भावे॥ न कस्या
पि बलं स्फुरति॥ न च भवतां मरणेन चक्रिणः पुत्रवियोगदुःखं नश्यति॥ ततो मद्वचसा यूयं सर्वसैन्यान्विताः॥ अयोध्यां प्रति प्रचल
त॥ अहमेव युष्माकं अग्रतो गत्वा चक्रिणः शोककोपादिनिवारणं करिष्यामि इति तान् आश्वास्य शक्रस्थिरो वभूव तेपि मेनिकात्म
द्वचनविश्वासेन कथंचित् धैर्यमालंब्य॥ निरानंदा निरुत्साहाः भग्नपादा इव अयोध्यां प्रति प्रयाणं चक्रुः॥ अथ शक्रः कृपापरत या तेषां
षां हितबुद्ध्या विप्रवेषं कृत्वा॥ पंचवर्षशतायुष्कमेकं मृतबालकं उत्संगे कृत्वा चक्रिणो राजद्वारस्य मुखे स्थितो दैवं विधातारं चक्रि

णं च नानाविधोपालंभैर्विगर्हन् उच्चैः स्वरेण रुरोद हे पृथ्वीश॥ त्वय्यपि स्वामिनि गतेत्वमपि कथं तस्मृष्टोन्योगतानास्ति धिग् अस्तु भो लोकपा
लायुष्मान् यतो यूयं अपि कालानुभावात् निःकरुणाजाताः धिगस्तु दैवं येन॥ एवंविधे जरातुरे मय्येव मद्दुःखं निपातितं॥ इत्यादिव
हुधा क्रंदं कुर्वन् चक्रिणो मुखाग्रे तं मृतं बालं विमुच्य प्राह॥ भो चक्रिन्॥ युगादीशवंशविभूषण त्वत्पूर्वजैः पूर्वं दुःखिनां दुःखानि नि
वारितानि॥ अद्य तु त्वयि॥ अखंडभरताधीशे॥ प्रतपति॥ अहं दुःखी जातस्ततो मम दुःखं निवारयेति पुनः॥ २॥ प्रलपन् त्वक्रिणा दुःख
स्वरूपं पृष्टः पुनरुवाच स्वामिन् अद्य रजनीमुखे अयं मम बालः सुप्तः सन् सर्पेण दष्टो मृतावस्थां प्राप्तः नायं सर्पस्य दोषः किंतु तवैव दोषः
येन तव राज्ये तवमनस्विता अधर्मो वर्त्तते॥ न्यायधर्मैकनिष्ठस्य नृपतेः प्रजासु अकालिकापद्रवो नैव भवति॥ ततएनं बालं येन तेनोपा
येसस्त्जीकुरु॥ अन्यथा तु मम कुलक्षयेजातेसति त्वमेव हत्यापातकी भविष्यसीत्युक्त्वा पुनः॥ २॥ रुरोद ततो राज्ञा मांत्रिकान् गारुडशा
स्त्रज्ञान् आकार्य॥ अनेके विषप्रतिकाराः कारिताः परं तेनु मृतोयं इति विज्ञाय परस्परं विचार्य चक्रिणं प्रति प्राहुः॥ स्वामिन् मंत्रभेषजा
दीनां असाध्योयं विषविकारः॥ तत एक एवास्य प्रतीकारोस्ति॥ तथाहि॥ यस्य गृहे पूर्वं कदापि कोपि मृतो न भवति॥ तद्गृह भस्मना अस्योत्थ
ज्जीभवति नान्यथा॥ इति श्रुत्वा चक्रिणा तद्भस्मग्रहणार्थं स्वसेवकान् गरमध्ये प्रेषिताः॥ शक्रोपि वैक्रियरूपधरो गृहे गृहे तद्भस्मगवे

47061

पयति॥परंयत्र२गृहे तेयांनितत्रतत्रमातृपितृपितामहादयोमृताएवश्रूयंते॥नकिंचिदपिगृहंअखंडंलभ्यते॥यत्केोपिमृतोनस्याद्
॥ततस्तैःसमग्रंपुरंभ्रांत्वा॥कुत्रापितथाविधंभस्मअप्राप्यपुनश्चक्रिपार्श्वेआगत्यभस्मतोप्राप्तिंकथयामासुः॥ततश्चक्रिणोक्तं॥अस्माकं
गृहंअखंडंदर्शते॥ततोस्मद्गृहादेवानीयतांभस्मइति॥ततःसशाकविप्रःचक्रिगृहाभ्यंतरेगत्वा॥चक्रिमातुर्यशोमत्याःपार्श्वेभस्मअयाच
तः॥तयाप्युक्तं॥अहोस्मद्गृहेतुचक्रिणःपिताएवप्रथमंमृतोस्ति॥अन्येषांस्वजनानांतुकावार्त्ताइतिश्रुत्वा॥सविप्रस्ततोपिचलित्वाचक्रि
णे यथोक्तं॥अकथयत्॥ततोमांत्रिकोवैद्यश्चप्राहः स्वामिन्यद्येतत् भस्मनलब्धं॥तदानास्तिकश्चिदन्यउपायोस्यजीवनेमरिष्यत्येवा
सोबालकःइतिश्रुत्वासमायाविप्रोमुक्तकंठंपुनश्चरुरोदतस्यदुःखेनचक्रवर्त्यपिअतिखेदरोजातःइतश्चतत्सैन्यंराज्यद्वारसमीपं
आगतं॥अथतत्समयेचक्रीतंविप्रंदुःखिनंवीक्ष्यमधुरवचनैःप्रबोधयतिस्म॥भोविप्रशोकंमाकुरुएतादृशीएवसंसारस्यगतिर्वर्त्तते
संसारेकिमपिस्थिरंनवर्त्तते॥यतःजातस्यहिध्रुवंमृत्युर्ध्रुवंजन्ममृतस्यच॥तस्मादपरिहार्येर्थेकःशोकोत्रविवेकिना॥धर्मितिन[illegible]
केनापिकोपिमरणभयाद्रक्षितोरक्षिष्यतेवा॥ततोधैर्यमालंब्यशोकंत्यज॥अत्रार्थेआशाकचक्रिरंकादीनांएकैवगतिःइत्यादि[illegible]
त्वाश्रुत्वा॥शाकःस्वरूपंप्रकटीकृत्य॥इतिप्राह॥चक्रिन्एवंविधएवायंसंसारःएरंमोहमग्नाःप्राणिनोस्यस्वरूपंपश्यंतोपिनपश्यंतिप्रति

प्राणिचकर्मविचित्रनानेकविधास्ति॥कर्मभिरेवमातृपितृसुतादिसंबंधःयोज्यते पुनःकर्मणैवसवियुज्यते॥संसारिकस्यापि॥भावस्यनियत
त्वंनास्ति॥यथातवैवपूर्वंपुण्यकर्मणाजन्हुप्रमुखाःषष्टिसहस्राणिपुत्राआसन्सांप्रतंचतेनकर्मणैवतेसमकालंरूणमात्रेणारुयंती
ताः॥तत्रविषादकरणेनापितत्दुःखंअर्पयामिइतिवदतेवशाकेतेसैनिकाःआक्रंदंकुर्वंतःसभांतरमागत्यकुमाराणांयथावृत्तंती
र्थरक्षामरणादिकंसर्वकथयामासुः॥तद्वृत्तांतश्रवणमात्रान्मूर्छितश्चक्रीभूपीठेलुठितजातःसमग्रराजलोकःशोकव्याप्तः॥ततःश
क्रेणशीतोपचारैःसचेतनीकृतोपिचक्रीअतिशोकग्रंथिरुद्धकंठःपुनःपुनःमुमूर्छ॥अथतस्यशोकमोरूणार्थंशाकःकंठेविलग्यग
द्गदस्वरेणस्वयंरुदन्॥तमपिअरोदयत्॥ततश्चिरंरोदनेनकथंचिन्निर्गतशोकंतंविज्ञाय॥कृष्णेणरोदनान्निवर्त्यपुनःशाकप्राह॥च
क्रिन्त्वादृशाअपिपुरुषसिंहा॥यद्येवंशोकेनविलुप्यंतेतर्हिजगति॥अन्यकोधीरतांधारयिष्यति॥देवव्रातएतेतवपुत्राःमृताः
अधुनातुनविद्यतेभुवनत्रयेतेषांकश्चिज्जीवनोपायःतर्हिविफलंतत्रशोककरणं॥त्वंमयपूर्वंमांप्रतिबोधंअबोचः॥इदानींतुपाम
रइवमूढत्वंकिंकरोषि॥यावत्शाकस्त्वं॥एवंप्रतिबोधवाक्यैःप्रतिबोधयति॥तावत्द्वौपुरुषौसमकालंआगत्यचक्रिणंप्रणेमतुः॥
तयोःप्रथमश्रीअजितस्वामिनःसमागमंकथयामास॥द्वितीयस्तुस्वामिन्तवपुत्रैःसमाकृष्टाजान्हवी॥अष्टापदेखातिकांपूरयित्वा

ग्रे प्रसर्पंती॥समीपस्थान् देशान् प्लावयंती वर्त्तते॥सा यदि समुद्रे प्रवेशं प्राप्नोति॥तदा समग्रं अपि भारतं॥प्रलयकालीनसमुद्र इव प्लाव
यति॥ततो विलंबं नैव जानपदरक्षार्थं॥तस्याः समुद्रप्रवेशार्थं किंचित्समर्थपुरुषं आज्ञापयतु देवः इत्येवं जिनागमनेन दर्शितं॥पुनर्हि
शाप्लावनश्रवणेन विसंस्थुलं चक्रिणं॥पुनः शक्रः प्राह च क्रिन् शोकं विहाय परमं अशोककारणं श्रीजिनं वंदस्व॥अन्यच्च जह्नुकुमा
र पुत्रं भगीरथं महौजसं गंगावालनार्थं नियोजयेति शक्रवचः प्रमाणीकृत्य कथंचित्त्राश्रूणि प्रमृज्य॥भगीरथं समाहूय तन्हृष्टे
हस्तं दत्वा॥वत्स मां प्रतं दवदग्धवने इव अस्माकं वंशे त्वमेव अवशिष्टांकुरोसि ततो वंशस्थितिः सकला त्वामेव समाश्रिता तद्गच्छ
लोकरक्षायै दंडेन कृत्वा ताह्नवीं पुनर्मुख्यप्रवाहे समानयेत्यादि समाज्ञापयत्॥सोपि सहस्रसैन्यं समादाय॥अविच्छिन्नप्रयाणैर्गंगा
वालनार्थं चचाल॥चक्री तु सांतःपुरः सपरिजनो भगवंतं वंदितुं ययौ॥अथ शक्रेण समं चक्री भगवंतं नत्वा जय स्वामिन्ननंतार्त्तिज
नशोकापनोदक॥आंतराव्याधिहरणप्रवीणाय नमोस्तु ते॥१॥इत्यादिश्लोकैः स्तुत्वा देशनां शृणोतिस्म॥तथाहि चक्रिन् असारः संसा
रः सौख्यं राज्यं च न स्थिरं पुत्रमित्रकलत्राणि बंधनानि दृढानि हि॥२॥रोगशोकगृहं देहं विषया विषसन्निभाः॥भोगी भोगसमा भोगा
जीवितं जलबिंदुवत्॥३॥रूपं यद् दृश्यते रम्यं॥तद्रूपं तेति दारुणं॥तत्वतश्चिंत्यमानं हि मृगतृष्णाजलं जगत्॥४॥बध्यंते केवलं

पापैः कुटुंबद्रविणार्थके॥संसारकारागारस्था॥विद्वांसोपि प्रमादतः॥५॥विरलास्ते भवंत्यत्र कृष्णचित्रकसंनिभाः॥भवाब्धौ विष
मावर्त्ते न वाह्यंते हि ये नराः॥६॥इत्यादिकां भगवद्देशनासुधां पीत्वा॥विरलीभूतशोकविषोद्गारश्चक्री प्रभुं इति पप्रछ॥स्वामिन् कर्मवशा
सर्वप्राणिनां॥ममैतैर्व्यवहारस्तर्हि मम पुत्रैः षष्टिसहस्रैरपि किं कर्म कृतं येन एषां तेसमकालमेव मरणं जातं॥इति भगवानाह॥शृणु च
क्रिन् एतैः पूर्वभवे कुत्रापि पल्लीनगरे चौराः भिल्ला अभूवन्॥महाक्रूराः पापकारणाः॥ते च अन्यदा॥भद्दिलपुरात् शत्रुंजयं प्रति गच्छं
तं महांतं संघं दृष्ट्वा॥लोभांधा लुंटनाय सज्जीबभूवुः॥अथ तेषां मध्ये एकः कुंभकारः प्रकृतिभद्रकस्तेषां तन्निश्चयं ज्ञात्वा प्राह॥भो भो
धिगस्माकं चिंतितं॥एतत्॥यत एते यात्रिका जना गृहादिममत्वं त्यक्त्वा धर्मकरणार्थं निर्गताः॥संति तानेव लुंटतां अस्माकं का गतिर्भविष्य
तीति॥मया तु सर्वथा नैतदनर्थकारणं दुष्कर्माचरितव्यमिति॥तद्वचनात्संजातकोपैस्तैः सर्वैर्मिलित्वा॥स कुंभकारो सद्वासभावोयमि
ति कृत्वा पुरान्निःकासितः॥संघश्च लुंटितः॥ततो ज्ञाततद्वार्तेन॥भद्दिलपुरस्वामिना बहुसैन्येन समं तत्पल्लीपुरं वेष्टितं भिल्लास्ते सर्वे त
द्भयात् प्राकारमध्ये प्रविश्य॥निगोदजीवा इव एकत्र संभूय स्थिताः॥अत्रांतरे तेषां कुकर्मवशात् तत्र वह्निरुत्थितः॥तेनाग्निना समंतात् दह्य
मानास्ते षष्टिसहस्राण्यपि भिल्लाः कुंभीपाकदुःखमिव अनुभवं तश्चिंतयामासुः॥अहो संघलुंटनोद्भवं महापापं अस्माकं इहैव फलितं

ततोधिगस्मात्पापकारिणः॥भवांतरेप्यस्माकंकागतिर्भविष्यतिधन्यःकुंभकारोयेनाकार्यपरिहारेण॥भवद्वयेपिस्वात्मासुखीकृतः इत्या
दिपश्चात्तापपरास्तेसमकालंमृत्वानरकंययुःसंघपराभवजनितंदि॥अतिदुरंतविपाकंजायते॥यदाहमूलग्रंथेयःसंघोर्प्यर्हतोप्यर्च्य
स्तीर्थंतीर्थस्ययःस्मृतः तस्यापिप्रत्यनीकंयेकुर्वतेभारकाहिते॥१॥आराध्यःसर्वथासंघोनविराध्यःकदापिसःसंघाराधनतोमुक्तिर्न
रकस्तद्विराधनात्॥२॥वर्त्तमानान्तीर्थमार्गेयात्रिकान्पीडयंतिये॥सगोत्रास्तेविनश्यंति कुगतिंयांतिवध्रुवं॥३॥अथतेनरकान्निर्गत्य
समुद्रेमत्स्याजाताः तत्रधीवरैःसमकालंविनाशिताः॥ततोमृत्वाकर्णशृगालोजाताः तत्रापिहस्तिपदेनमर्दितामृताः इत्येवंबहून्भ
वान्भ्रांत्वाकापिवनेभिल्लाअभूवन्॥तेचक्रूरकर्मकारकाःपापर्द्धिकरणासक्ताः॥अन्यदातत्रवने॥तपोतिशयवंतंमूर्त्तंशांतरसमि
वकंचित्मुनिंअद्राक्षुः॥तद्दर्शनादेव॥तेकथंचिदुत्पन्नविनयाः तंमुनिंनमंतिस्म॥मुनिरपिकृपालुत्वात्॥तेभ्योधर्ममुपादिशत्तत्
श्रवणात्॥तेभद्रकभाविनोजाताः॥मुनिरपितेषांविशेषोपकारार्थं॥तत्रचातुर्मासींस्थितःतत्संगात्॥तैःप्रथमेमासेसप्तापिव्यसनानि
त्युक्तानिद्वितीयेऽनंतकायभक्षणंत्यक्तंतृतीयेरात्रिभोजनं॥चतुर्थेमासेनशनंप्रपन्नाः ततोविद्युत्पातात्॥तेसमकालंमृत्वाचकित्र
तवपुत्राजाताःपूर्वभवेसंघलुंटनपातकंकृत्वापि॥अंतकालेपश्चात्तापःकृतस्तेनतत्कर्मलघूकृतंसाधुयोगश्चमिलितः॥अतश्चा

नफलाश्चत्वत्कुलेजन्मप्राप्तंतेनैवकर्मणाकिंचिदवशिष्टेन॥अत्रापिसमकालंमृत्युमापन्नाः॥येनचकुंभकारेणसंघलुंटनंनांगीकृतं
तेनतुतस्मिन्नेवभवेमहर्द्धिकंराज्यंप्राप्तं॥ततश्चशुभपरिणामवशादुत्तरान्भवान्प्राप्य॥तवजह्नुकुमारस्यपुत्रोयंभगीरथोजातः॥
एवंज्ञात्वाशुभार्थिभिः प्राणिभिःसंघविराधनामनसापिनकार्या॥यदाहमनसापिनसंघस्यावज्ञाकार्याविवेकिनासाहिबोधिद्रुमस्याग्नि
रनंतभवदुःखदा॥१॥येतीर्थयात्रिनोलोकान्॥वस्त्रान्नांबुप्रदानतः पूजयंतिगृहेष्वेषां॥तीर्थयात्राफलंभवेत्॥२॥श्रीसंघःप्रथमंती
र्थंसोपितीर्थपथेव्रजन्॥पूज्यतेहिविशेषेण॥श्रेयस्कामेनभाविना॥३॥ततःस्वकर्मवशान्मृतानां॥एतेषांनशोकःकार्यः यतःशो
केनसर्वेपिपुरुषार्थाविनश्यंति॥राज्यपुत्रकलत्रादिकंसर्वंअनित्यं॥तत्रप्रतिबंधंत्यक्त्वाआत्मनोहितंसमाचरयेनइहलोकेपरलो
केपिचकल्याणपरंपराप्रवर्द्धते इत्यादिप्रभुमुखात्श्रुत्वाचक्रीशोकंविहायवैराग्यंदधौ॥अत्रांतरेशक्रःप्राहचक्रिन्त्वयाश्रीभर
तेशवत्चक्रिपदसाम्राज्यंसमनुभूतं॥सांप्रतंसंघपतित्वंअवशिष्यते॥तदिदानींतत्कृत्वंविधायसाम्राज्यलक्ष्म्याःफलंगृहाण॥
इतिशक्रेणप्रेरितश्चक्री॥तीर्थयात्रासमुत्सुकःस्वामिनापिकृतवासादिभिःप्रतिष्ठितोगृहस्थो॥ततःशक्रेणसौवर्णीदेवता
लयोरत्नमयार्हद्बिंबमंडितश्चक्रिणेर्पितः॥ततश्चक्रीसुदिवसेसुमुहूर्त्तेकृतस्नानप्रज्ञादिमंगलः शक्रार्पितदेवालयेगणधरा

व॥मुनिवरांश्च पुरस्कृत्यमहाधरैः श्रावकश्राविकादिसंघेनचमंडलीकसामंतादिभिश्चसमनुगम्यमानः॥अनेकमागधबंदीजनादिभिः
स्तूयमानःसधवसुभगांगनाभिःक्रियमाणमंगलोपचारश्च तुरंगयासेनयापरिवृतश्री भरतेशश्चक्रवर्तिश्रीसिद्धाचलयात्रार्थंचचा
ल॥ततोमार्गेप्रतिग्रामंप्रतिपुरंजिनपूजानीर्थोद्धारसाधुभक्तिसाधर्मिकवात्सल्यादिकंसुकृतंकुर्वन्॥क्रमेणानंदपुरंप्राप॥तत्रसंघ
गुरुपूजांसाधर्मिकवात्सल्यादिकंविधाय॥तत्रीर्थविवारंप्रदक्षिणीकृत्यनदीकुंडद्रहादिभ्यस्तीर्थजलानिगृहीत्वासर्वसंघेनसमंगिरि
समारुरोहस्म॥अत्रांतरेशक्रोपिसपरिछदस्तत्राजगाम॥इतश्चभगीरथोपिअष्टापदंप्राप्य॥स्वपितृपितृव्यानांभस्मवीक्ष्य॥अतिदुः
खितःक्षणंमूर्छांलब्ध्वापुनःसचेतनीभूतोनागंआराधयामास॥सोपितद्भक्त्यातुष्टस्तत्राऽगत्यइतिप्राहवत्सएतेमयावारिताअपि॥ना
गलोकोपद्रवंचक्रुः॥ततःक्रोधपरवशेनमयाज्वालिताःततःपरंतुपश्चात्तापजातेपिनकिंचिद्भवति॥किंकुर्मःसांप्रतंएतेषांइदृशये
वकर्मगतिरिति॥ततःइदानींएतेषांमृतकार्यंविधेहि॥एतांगंगांचमुख्यप्रवाहेसमानयइत्यादिशिक्षांदत्वा॥नागःस्वस्थानंजगाम॥भ
गीरथोपिततपूर्वजानांदाहभस्मगंगायांन्यक्षिपत्॥ततःप्रभृतिअद्ययावत्लोकेपिसव्यवहारःप्रवर्त्तते॥अथभगीरथःतेषांमृत
कर्मकृत्वा॥दंडरत्नेनगंगांमुख्यप्रवाहेसमानयत्॥ततश्चक्रिणंशत्रुंजयगतंविज्ञाय॥अविछिन्नप्रयाणैःएषोपिशत्रुंजयंप्राप्य॥तत्रा

गादन्यास्तलेशत्रुचक्रिणोःपादान्नत्वा॥ताभ्यांसस्नेहंसमालिंगितःसर्ववृत्तांतकथनेनहर्षचकार॥ततस्तेश्रीयुगादीशप्रासादेमरुदेवायाः
शृंगेबाहुबलीतालध्वजेकादंबेहस्तिसेनाभिधे॥इत्यादिसर्वशृंगेषुपूजास्नानादिकंचक्रुः॥ततःश्चक्रीप्रोछ्नसच्चित्तोमुख्यशृंगे॥श्रीभरते
श॥इंद्रोत्सवमहाध्वजदानछत्रचामरयात्रादिमोक्षणप्रभृतिकं॥श्रीगुरोर्वचसासर्वकृत्यंसमापयामास॥ततोमत्पूर्वजैःकृताएतेप्रासादाः
स्वर्णमणिमयाःकालदोषेणनिर्विवेकलोभांधजनैःस्वर्णरत्नलोभेनविनाशयिष्यंति॥ततएतेषांअहंरक्षांकरोमि॥इतिरक्षोपायंध्यायन्॥इतिचिं
तयामास॥यदिमत्पुत्रैः॥अष्टापदरक्षार्थंगंगासमानीता॥अहंचयदितेषांपितामहःसमुद्रंसमानयामि॥इतिध्यात्वैवसमुद्रानयनार्थंयक्षान्
समादिशतिस्म॥ततस्तैर्यक्षैर्दक्षिणद्वारात्समाकृष्टस्सागरःकल्लोलैःपृथिवीछादयन्गर्जितध्वानैर्जगन्बधिरीकुर्वन्॥टंकणबर्बरयौण
भोटसंहेलादिदेशान्प्लावयन्॥वेगाछत्रुंजयसमीपंसमाजगाम॥अत्रांतरेशक्रोवधिनासमुद्रागमनंज्ञात्वासहसैवचक्रिन्मैवंकुरु
इत्याकुलवचनैःकृत्वाचक्रिणंनिवार्यप्राह॥तथाहि॥रविंविनायथाव्योमविनापुत्रंयथाकुलं॥विनाजीवंयथादेहोविनादीपंयथा
गृहं॥१॥विनाविद्यांयथामर्त्योविनानेत्रंयथामुखं॥विनाछायांयथावृक्षो॥यथाधर्मोदयांविना॥२॥विनाधर्मंयथाजीवो॥विनावारि
यथाजगत्॥तथाविनातीर्थमिदंनिःफलंसकलंजगत्॥३॥निरुद्धेष्टापदेशैले॥सव्यसोजननारकः॥तस्मिन्रुद्धेनपश्यामि॥४

नारमपरं भुवि॥४॥नमदानार्थकृद्देवो नधर्मोनसदागमः॥तदासौ सर्वलोकानां शीलःकामितदायकः॥५॥इतिशक्रवचसा चक्रीयक्षाश्चि
वारयतिस्म॥समुद्रस्तु यावतीं भूमिं आगतस्तां यावत् तथैव स्थितः॥अथ चक्री शक्रं प्रति अन्यं तीर्थरक्षोपायं पृष्ठतिस्म॥शक्रेणोक्तं॥म
णिमयप्रतिमाः याः संतिताः सर्वाः पश्चिमायां दिशि सुवर्णगुहामध्ये स्थापय यत्र मनुष्येभ्यः पराभवो न भवति॥देवाश्च नित्यं तत्परिचर्यां
कुर्वंते॥अन्यच्च प्रासादान् सर्वान् रूप्यमयान्॥पाषाणमयां श्च कृत्वा सुवर्णमयीः प्रतिमाः स्थापयेति शक्रवचसा चक्री प्रासादान् रूप्य
पाषाणमयान्॥तत्र च सुवर्णमयीः प्रतिमाः कारयित्वा मूलप्रतिमाः सुवर्णगुहायां मुमोच॥तत्र क्षार्थं यक्षान् समादिशत्॥ततः सुभद्राख्ये
शृंगे अजितनाथ प्रासादं कारयित्वा गुरुभिः सकलसंघेन च समं प्रतिष्ठामहोत्सवश्चक्रे॥एवं शत्रुंजये उद्धारं विधाय ततश्चंद्रप्रभासे चंद्र
प्रभं नत्वा रैवताद्रौ श्री दगिरौ सिद्धगिरौ॥अंबिकाशृंगे उमाशंभो इत्यादिषु तीर्थयात्रां पूजादानादि पुण्यं विधाय॥ततो निवृत्तश्चक्री॥
अर्बुदगिरौ सम्मेतशिखरे वैभारादौ च यात्रा पूजादिभिः॥स्वमनोरथान् सफलीकृत्य क्रमेणायोध्यां प्राप्य॥अथान्यदा भगवान् श्री अ
जितस्वामी स पादन्यासेन पृथ्वीं पावयन्॥तत्रागात् देवैः समवसरणं कृतं उद्यानपालेन चक्रवर्त्तिनो वर्द्धापनिका दत्ता चक्री तस्मै
चक्रुतरं पारितोषिकं दानं दत्वा॥सर्वर्द्ध्या विंदातुमागतः॥भगवता देशना प्रारब्धा देशनायां च चारित्रमहिमा वर्णितः यथा चारित्रादे

कदिवस पालितादपि मानवः॥अवश्यं कर्म संघातं छित्वा यातिपरं पदं॥१॥इत्यादि श्रुत्वा संजात संवेग वैराग्यातिशयश्चक्री॥न – रथं रा
ज्ये संस्थाप्य स्वयं शतांसहस्रेण समं तं संयमं जग्राह॥अथ भगवतः सिंहसेनाद्याः पंचनवतिर्गणधरा अभूवन्॥एकलक्षसाधवः त्रीणि
लक्षाणि त्रिंशत्सहस्राणि साध्व्यः॥अष्टनवतीसहस्राधिकं लक्षद्वयं श्रावकाः पंचलक्षाः पंचचत्वारिंशत्सहस्राधिकाः श्राविकाश्च॥अष्टव
न॥इत्येवं चतुर्विधस्य तस्य संघस्य रक्षातत्परो॥महायक्षनामा यक्षः अजितादेवी चाभवतां॥अथ भगवान् अष्टादशपूर्वलक्षाः कुमारत्वे त्रि
पंचाशत्पूर्वलक्षाः राज्ये॥एकं पूर्वलक्षं न्यूनं द्वादशवर्षाणि छद्मस्थे॥द्वादशवर्षोनं पूर्वलक्षं केवलित्वे इत्येवं द्वासप्ततिपूर्वलक्षाः सर्वायुः॥
पालयित्वा सम्मेतशैले सहस्रमुनिभिः समं अनशनेन मुक्तिपदवीं प्राप्य॥इंद्रादिदेवैश्च भगवतो निर्वाणमहोत्सवः श्री ऋषभस्वामिवत्कृ
तः॥अथ सगरचक्रि राजर्षिरपि द्वासप्ततिपूर्वलक्षाण्यायुः प्रपाल्य विशुद्धतपः संयमाभ्यां कर्मक्षयं कृत्वा॥केवलं लब्ध्वा सम्मेतशैलोप
रि मुक्तिं ययौ॥इत्थं श्री अजितप्रभोर्वचनतः शक्रोपदेशादपि॥श्रीमान् चक्रिशिरोमणिस्तु सगरः शत्रुंजये पर्वते॥उद्धारं भरतेशवत्
यदकरोत् श्री संघभक्त्या पुनः क्षिप्त्वा तिनसया तिकर्मपटलं प्राप्य त्वदं शासनं॥१॥इति सगरकृतः सप्तमोद्धारः॥७॥अथ चतुर्थो जिनः श्री अ
भिनंदनस्वामी॥विहरन् अन्यदा श्री शत्रुंजयोपरि राजादनीतले समवसृतः तत्र सुरासुरनरनिरंतरायां भगवता शत्रुंजयस्य महिमा वर्णि

157/1962

न॥यथा॥अयंशत्रुंजयःशीलश्रांतरारिनिषूदनःसर्वपापहरोमुक्तिलीलास्थानंविराजते॥१॥जिनेषुमुक्तिप्राप्तेषुगतेज्ञानेचकेवले॥सर्वकल्या
णकृत्तीर्थमिदमेवभविष्यति॥२॥अत्रागत्यजिनंभक्त्या॥पूजयंतितुयेजनाः॥अल्पकालेनतेपुण्यं॥प्राप्नुवंत्यजरामरं॥३॥प्रासादप्रतिमा
पात्रदीनदानादिकुर्वते॥अत्रयेतेभवंत्याशु॥भवद्वयसुखाकराः॥४॥इत्येवंदेशनांसमाकर्ण्य॥समुद्भूतभक्तिप्रकर्षाव्यंतरेंद्राः॥श्रीशत्रुं
जयेउद्धारंचक्रुः॥इतिव्यंतरेंद्रकृतअष्टमोद्धारः॥८॥ अथाऽष्टमतीर्थंकरस्य चारुचंद्रप्रभस्यच॥चंद्रप्रभस्यचरितं संक्षेपादिहकथ्यते
१॥तथाहि॥जंबूद्वीपभरतक्षेत्रेचंद्राननानगर्यां॥महासेनोराजा॥तस्यशीलादिसकलगुणगणालंकृता लक्ष्मणानाम्नीपट्टराज्ञी॥अन्य
दासासुखसुप्ताप्रभाते॥चतुर्दशमहास्वप्नान्॥अपश्यत्॥अथतत्रैवदिनेचैत्रकृष्णपंचम्यांअनुराधानक्षत्रेमध्यरात्रे॥वैजयंतविमाना
त्च्युत्वाभगवान्॥तस्याःकुक्षौअवतीर्णः॥क्रमेणगर्भेवर्द्धमानःपूर्णेकालेपौषकृष्णद्वादश्यां॥अनुराधास्थितेचंद्रे॥प्राप्तजन्मा॥चतुर्नि
कायजैर्देवैःकृतजन्मोत्सवोमातापितृभ्यांचंद्रप्रभइतिकृताभिधानोभगवान्॥चंद्रोज्ज्वलकांतिश्चंद्रलांछनःक्रमेणयौवनंप्राप्तः॥सार्द्धध
नुःशतोचंद्रइवलोकानिशायिरूपसौभाग्यगांभीर्यादिगुणैस्त्रिलोकीजननेत्रचकोराणां॥आनंदकारीबभूव॥ततःपित्राराज्येस्थापितःसा
पूर्वलक्षाणियावद्राज्येस्थित्वा॥ततःपौषकृष्णत्रयोदश्यामनुराधानक्षत्रेदिवसस्यपश्चिमेभागेसहस्रनृपैःसहव्रतंजग्राह॥

व्रतानंतरंत्रिभिर्मासैःफाल्गुनकृष्णसप्तम्यांअनुराधानक्षत्रे॥केवलज्ञानंप्राप्य॥ततश्चतुःषष्टिभिरिंद्रैःकेवलोत्सवःकृतस्ततःस्वामीसुरा
सुरकोटिपरिवृतोविहरन्॥अन्यदाश्रीशत्रुंजयंप्राप्तः॥तत्रसर्वतीर्थकरसमाश्रितं॥तन्महातीर्थंज्ञात्वा॥राजादनींप्रदक्षिणीकृत्यसम
वासरत्॥तत्रदेशनायांविस्तरेणतीर्थमहात्म्यंकथयित्वापुनस्तमेवगिरिंप्रदक्षिणीकृत्यचंद्रोद्यानंप्राप्य॥तत्रचसगरानीतसमुद्रस
मीपे॥आर्यानदीतटेचंद्रोद्यानस्यपश्चिमभागे॥प्रभुःसमवासरत्देवैःसमवसरणंकृतं॥आगताद्वादशपर्षदः॥अथतत्रैवप्रशि
प्रभासनगर्यां॥स्वामीचंद्रशेखरनृपश्चंद्रप्रभाराज्ञीचंद्रयशसा॥पुत्रेणचसमंवंदितुंआगतः॥ततोभगवान्सुधानुसारिण्यावा
ण्यादेशनांददौ॥तथाहि॥असारेखलुसंसारेसारंशत्रुंजयोगिरिः॥तीर्थंचापिद्वियंप्राप्य॥भवेयुःस्वर्गगामिनः॥१॥मेयतात्पुंडरीकाद्रि
वैना
स्तपोध्यानादिभिःनरकोदिकृतंपापंक्षीयतेक्षणमात्रतः॥२॥ध्यानेष्विवशुक्लध्यानंब्रह्मचर्यंव्रतेष्विव॥धर्मेष्विवजीवदया॥देवेष्विवजि
नेश्वरः॥३॥तीर्थेष्विदंतथातीर्थं॥मुक्त्वमंप्रणिगद्यते॥दर्शनात्स्पर्शनाद्ध्यानात्॥सर्वपातकघातनं॥४॥इत्यादिदेशनांश्रुत्वाचंद्रशेखरोराजाचंद्र
यशसंराज्येस्थापयित्वा राज्ञासहदीक्षांजग्राह॥अथधरणेंद्रस्तत्रसमुद्रतटेभगवतःकायोत्सर्गस्थानेचंद्रकांतमणिमयबिंबशोभितं॥प्रासा
दंचकार॥अथभगवान्ततोरैवतादिषुशृंगेषुविहृत्य॥अन्यदासम्मेतशिखरंप्राप्य॥तत्रनिर्वाणसमयंसमासन्नंविज्ञाय॥सह

निभिः सुमंक्रतानशनः सार्द्धसप्तलक्षपूर्वायुः पूरयित्वा भाद्रपदकृष्णसप्तम्यां श्रवणनक्षत्रे स्वामीपदं प्राप्य॥ ततः शक्रादयो देवाः प्रभोर्निर्वा
णमहिमानं कृत्वा॥ नंदीश्वरे ष्टाह्निकां विधाय स्वस्वस्थानं ययुः॥ ततश्चंद्रशेखरमुनिर्विहरन्नन्यदा प्रभुपादपवित्रतां तां शशिप्रभां पुरीं प्राप्य
तस्थुस्तात्पुत्रश्चंद्रयशानृपो वंदितुं आगतः॥ मुनिना देशनादत्ता॥ तन्मध्ये तीर्थमहात्म्यं वर्णितं॥ यतोत्र स्थाने श्रीचंद्रप्रभस्वामी समवसृतः
तत एतदुत्तमं तीर्थं कालांतरे चंद्रप्रभासमितिनाम्ना लोके प्रसिद्धिं यास्यति॥ तत्र च सागरतटे भगवतः कायोत्सर्गस्थाने धरणेंद्रप्रासादः कृ
तआसीत्॥ तत्स्थानं तु लवणाधिनाथेन स्वयं भक्तिकरणार्थं जलमध्ये त्वादितं वर्त्तते॥ तेनासौ समुद्रोपि पावनः॥ किंच पुरापि बाहुबलि
पुत्रेण सोमयशासा राज्ञा॥ अत्र भाविनश्चंद्रप्रभस्वामिनो भावितीर्थं विज्ञाय चंद्रप्रभानाम्नी पुरीं वासयित्वा प्रासादः कृतो भवत्॥ ततः
प्रभृत्येव॥ इदं महातीर्थं विश्वपावनं चाभूत्॥ अत्र च योजनपरिमितायां भगवत्समवसरणभूमौ तीर्थानुभावादेव मृतकेषु॥ न दुर्गं
धो न च कीटकोत्पत्तिर्भविष्यति॥ किंच॥ अत्र ये स्युः कसावद्या॥ जिनध्यानपरायणाः तपस्यंति तपस्तेषां॥ न दूरे मुक्तिकामिनी॥१॥ इत्या
दि धर्मोपदेशं दत्वा स मुनिः अन्यत्र विहृतवान्॥ अथ चंद्रयशानृपोपि सोमयशाः कृतमूलप्रासादस्य समीपे॥ स्वयं चंद्रप्रभप्रासादं
कारयामास॥ तत्र प्रासादे स्वपितुश्चंद्रशेखरस्यापि मणीमयीं मूर्त्तिं अकारयत्॥ तस्या मूर्त्तेर्ललाटे चंद्रप्रभस्वामिनो लांछनं चंद्रं अस्था

पयत्॥ भगवतः स्नानजलेन च तस्या अपि स्नानं अकरोत्॥ कालांतरे साम्प्रतिलोके सोमनाथ इति प्रसिद्धिं प्राप्ता मिथ्यात्विभिर्जनैः स्वरूपं अ
जानानैर्भगवतः प्रतिमा जले क्षिप्ता परं सोमनाथस्यैव महिमा प्रकटीकृतः॥ अथान्यदा चंद्रयशानृपः समस्तसंघेन समं सर्वद्धा श्रीशत्रुं
जये यात्रार्थं गतः॥ तत्र गुरुवाक्यात् महाफलं विज्ञाय उद्धारं कारयामास॥ इत्येवं रैवते अर्बुदाचले वाऽष्टपदादिषु॥ सर्वशृंगेषु यात्राउ
द्धारं च कृत्वा स्वसंपदं सफलीचकार॥ अन्यदा सद्गुरुसमीपे दीक्षां गृहीत्वा पूर्वलक्षं यावत् प्रपाल्य केवलज्ञानं समासाद्य मुक्तिं जगाम
इत्थं चंद्रप्रभोस्तीर्थे॥ चंद्रशेखरवाक्यतः॥ चक्रे चंद्रयशा भूपो नवमोद्धारमातनोत्॥ इति श्रीचंद्रयशःकृतो नवमोद्धारः॥९॥ शांतिः
शांतिकरः संघे सदास्तु सुरसेवितः॥ मुक्तेंदुमलिनं यस्य॥ पादपद्मं भृंगो भजत्॥१॥ अथाकर्णय रैवेंद्र दशमोद्धारस्वरूपं॥ श्रीशांतिना
थस्य सक्षिप्तचरित्रं॥ तथाहि॥ अस्यत्र भरतक्षेत्रे गजपुरं नगरं॥ तत्र विश्वसेनो राजा॥ तस्य पट्टराज्ञी अचिरानाम्नी॥ सा सुखं सुप्ता सती
निशाशेषे गजवृषभादि चतुर्दश महास्वप्नान् वारद्वयं अपश्यत्॥ अथ तस्यामेव रात्रौ॥ भाद्रपदवदिसप्तम्यां भरणिनक्षत्रे भगवान्॥ सर्वा
र्थसिद्धिविमानात् च्युत्वा॥ तस्याः कुक्षौ अवतीर्णः ततो द्विवारस्वप्नदर्शनात् तीर्थंकरचक्रिपुत्रप्राप्तिकृतनिश्चया माता पृथ्वीरत्नगर्भाइव
गर्भरत्नं धारयंती सुखं सुखेन तस्थौ॥ अथ समये ज्येष्टकृष्णत्रयोदश्यां भरणीनक्षत्रे॥ देवी पुत्ररत्नमजीजनत्॥ ततः सुरेंद्रकृतजन्मोत्सवानं

तरं॥पित्रामहोत्सवपूर्वकंगुणनिष्पन्नंशांतिकुमारइतिनामचक्रे॥अथभगवान्॥सज्जनस्नेहइवप्रत्यहंप्रवर्द्धमानः स्वर्णवर्णदेहोमृगलांछ

नःसर्वेषांगुणानां एकआश्रयःक्रमेणप्राप्तयौवनः चत्वारिंशद्धनुःप्रमाणोच्चकायः जननेत्रमधुकरश्रेणीनांकमलाकरइवाह्लादकोबभूव

अथपित्रादत्तराज्यभारःप्रभूराज्यंकुर्वन्॥क्रमेणचक्ररत्नोत्पन्नोसाधितषट्खंडभरतःसाम्राज्यंचिरंपालयतिस्म॥ अथभगवान्भोगक

र्मक्षयेज्येष्ठकृष्णचतुर्दश्यांभरणीनक्षत्रे॥इंद्रादिभिःकृतोत्सवश्चारित्रंजग्राह॥ततःछद्मस्थावस्थायामेवविहरन्॥अन्यदागजपुरोपांतेपौष

शुक्लनवमीदिनेशुक्लध्यानमाश्रितःकेवलंप्राप्य॥ततःसुरासुरगणैःपरिवृतोभगवान्प्रतिबोधयन्॥अन्यदाश्रीशत्रुंजयस्यसमीपेसिंहोद्या

नेसमवसृतः इतश्चपूर्वंप्रतिष्ठानपुरेकश्चिन्मिथ्यात्वीद्विजोयज्ञकर्मासक्तोतिदुष्टबुद्धिर्बभूव॥अन्यदातस्ययज्ञवाटकेकश्चित्साधुःसमा

गतः तंद्विजंहिंसांकुर्वन्तंदृष्ट्वाप्राह॥अहोधिग्नेविवेकिनोमिथ्यादृष्टयोयत्नोधर्मबुद्ध्यामहापापमाचरंतःस्वात्मानंदुरंतेभवसागरेक्षि

ति॥ उक्तंचपशून्हत्वासुरांपीत्वाकृत्वारुधिरकर्द्दमं यद्येवंगम्यतेस्वर्गे॥नरकेकेनगम्यते॥१॥इत्यादिमुनिवाक्यैःक्रुद्धःसविप्रोयावत्

सु तत्याध्यसाधुंमारयितुंधावितः तावत्स्वकीयपापारिवयस्तंभेआस्फल्यशिरःस्फोटेनमृत्युंप्राप्य॥अथासौदुर्ध्यानान्मृत्वासिंहो

तो ऽभवत्॥तत्रप्रतिदिनंहिंसांकुर्वन्॥अन्यदातत्रैवसमवसृतंध्यानाश्रितंप्रभुंदृष्ट्वाअतिक्रोधात्फालंदत्वाधावितःततोभ

गवतःसकाशात्पंचहस्तप्रमितभूमिंयावदागत्यततःपाषाणभित्तौआस्फलितइवसप्तधनुर्यावद्दूरेपश्चात्पपात॥ततोसौफालभ्रष्टतया

अतिक्रुद्धःपुनरपिफालंदत्तवान्॥पुनस्तथैवआस्फल्यदूरेपतितः॥एवंपुनःपुनःसप्तवारान्॥यावत्पश्चात्पतितःततस्तेनचिंतितं॥अहो

अग्रेकिमपिभित्तिपाषाणादिकंनदृश्यते॥तर्हिकिमहं॥अग्रेगंतुंनशक्नोमि॥तर्हिनूनं॥अस्यैवमहापुरुषस्यकश्चित्॥अचिंत्योमहिमा

दृश्यते॥इत्यादिचिंतयतस्तस्यजातिस्मरणमुत्पन्नंदृष्टःपूर्वभवः॥ततःकिंचिच्छांतिप्राप्तः॥ततस्तदुपकारकारकबुद्ध्याप्रभुःप्राह॥अहोद्वि

जपूर्वभवमिथ्यात्वस्यकोपस्यचफलंदृष्टं॥अधुनापिकोपंत्यज॥उपशमंविवेकंचभजपूर्वंहितोपदेशदायकेमुनौत्वंकोपंअकार्षीः इदा

नींतुअस्माकंसंगइमंतीर्थराजंचप्राप्यापियदिनबुध्यसितदाअनंतसंसारंभ्रमिष्यसि॥ततोहिंसांपरित्यज्यजीवदयासमाश्रयेत्यादिभिः

प्रभुवचनैःप्रबुद्धःससिंहोभगवतःपृष्ठेलग्नएवययौ॥अथभगवान्स्वर्णगिरिंआरूढःतत्रापिपृष्ठागतंतंसिंहंप्रभुःप्राह॥अहोभद्र

त्वयादयासमाहितमनसा॥अत्रैवस्थातव्यं॥एतत्तीर्थानुभावात्॥एवत्वंदेवत्वंलब्ध्वातृतीयभवेमोक्षंयास्यसीति॥श्रुत्वाससिंहस्तत्रैव

अस्थात्॥आयुःप्रपूर्यसमाधिनामृत्वादेवत्वंप्राप्य॥अथभगवान्मरुदेव्याःशृंगेचतुर्मासीस्थितः॥ततोवर्षाकालेगतेन्यत्रविहरतिस्म

ततःससिंहदेवःस्वर्गादागत्य॥तत्रमरुदेव्याख्यशृंगेशांतिजिनप्रासादंस्वप्रतिमायुतं॥अन्यांश्चबहून्प्रासादान्चकार॥त

नितत्शृंगतेनसिंहसुरेणअन्यैरपितदनुयायिभिःसुरैःसमधिष्ठितंसर्वाभीप्सितफलप्रदंचाभवत्पूर्वाभिमुखस्यअस्यप्रासादस्यईशान
कोणे॥पंचशतधनुर्दुरे॥यदस्तिष्टति॥सचभक्त्याराधितश्चिंतामणिरत्नंददाति॥नत्रैवकल्पद्रुमंसमाश्रिताअष्टकोटयोदेवावसंति॥ते
चश्रीशांतिजिनाराधकाणांसर्ववांछितानिपूरयंति॥परंपुण्यवतामेवतेप्रकटीभवंति॥नान्येषामिति॥अथैवंभगवान्सर्वेषुशृंगेषुवि
हृत्य॥पृथ्वीपवित्रीकुर्वन्॥क्रमेणगतपुरंप्राप्य॥तत्रप्रभोःपुत्रश्चक्रधरोराजावंदनार्थमागतःप्रभुरपिदेशनांददातिस्म॥यथाशीलंशत्रुं
जयःशीलःसमताजिनसेवनं॥संघःसंघाधिपत्वंच॥प्राणिनांमोक्षदानिषट्॥इत्यादिकांप्रभोर्देशनांश्रुत्वा॥विशेषोद्यत्सुवासनश्चक्रधर
नृपःसमुत्थाय॥स्वामिन्मेसंघपतिपदप्रभोभवद्भिर्विशापयामास॥ततःस्वामीदेवतानीतान्॥वासाक्षतान्समदोत्सवंतस्यमूर्द्धिअक्षि
पत्॥ततोनृपस्तांभगवदाशिषंलात्वा॥गृहेगत्वासंघान्निमंत्रयामास॥अथासौसुदिवसेसुमुहूर्तेकृतप्रस्थानमंगलःशक्रार्पितंदेवतालयंपु
रःकृत्यगणधरमुनिवरचतुर्विधसंघसंयुतः॥चतुरंगसैन्यबलेनवसुधांअचलामपिचालयन्॥श्रीतीर्थराजयात्रार्थंचलतिस्म॥इत्थंअ
विछिन्नप्रयाणानिकुर्वन्॥क्रमेणसुराष्ट्रादेशंप्राप्य॥अन्यदादेवतालयाग्रेउपविष्टस्यतस्यकश्चिद्विद्याधरोद्भुततेजोद्योतितदिग्मंडलः॥
समागतः॥अथचक्रधरेणकृताभ्युत्थानादिसत्कारःसोपिचक्रधरंप्रणम्यतदादिष्टेआसनेउपविश्यप्राह॥राजेंद्रअस्यास्माकंसुदि

वसंसुप्रभातं॥येनतीर्थकरसुतस्त्रिखंडभरतस्वामीइक्ष्वाकुवंशकुलावतंसस्त्वंवीक्षितोसि॥अहंतुखेटदंगस्वामिनोमणिप्रियविद्याधरस्यपुत्रः
कलाप्रियनामाशत्रुभिर्वेष्टितोगोत्रदेवीवचनात्॥त्वत्रएवशत्रुक्षयंविज्ञाय॥शीघ्रंइहागतोस्मि॥इतिश्रुत्वाचक्रधरोपि॥परोपकारमेवजी
वितस्यसारंजानन्॥तत्कालमेवतत्कृतविमानेउपविश्य॥खेटदंगपुरंययौ॥ततस्तस्यचक्रधरस्यदर्शनमात्रादेव॥भीतास्तेशत्रुनृपादुर्गरो
धंपरित्यज्य॥सूर्योदयात्॥अंधकाराइवदूरंययुः॥ततःशत्रुपराजयात्प्रमुदितःकलाप्रियःचक्रधरनृपाय॥बहुमानपूर्वकंगुणमालाना
म्नीस्वभगिनींददातिस्म॥अन्याअपिबह्वोविद्याधरपुत्र्यस्तद्रूपसौभाग्यरंजितास्तंपरिणिन्युः॥अथपुनर्नृपतिस्तीर्थयात्रोत्सुकः॥श्वसुरा
दीन्॥अनुज्ञाप्यभार्याभिःसहकलाप्रियकृतंविमानमारुह्य॥संघंप्रतिचचाल॥अथाग्रेकिमपिअतिरमणीयंवनंवीक्ष्यतद्विलोकनरसिकोनृ
पोविमानंस्तंभयित्वासपरिकरोयावद्वनशोभांविलोकयति॥तावदतिस्वच्छशीतजलापूर्णविकस्वरकमलामोदवासितदिग्मंडलं॥एकंसरोद
दृष्टा॥तस्यपालिमारूढवान्स्म॥ततःसमंतात्तस्यतडागस्यपरिसरे॥उद्यानशोभांविलोकयन्॥वृक्षगहनांतरे॥एकमर्हच्चैत्यंअपश्यत्॥ततो
हृष्टोनृपःसपरिकरोपिचैत्यमध्येप्रविश्यमणिमयींश्रीयुगादीशप्रतिमांनत्वा॥विविधोपचारैःपूजयामास॥एवंपूजांकृत्वा॥दृष्टिविनोदा
जायावच्चैत्याद्बहिरायाति॥तावदेकांगवाक्षेस्थितां॥अपूर्वरूपांवानरीददर्श॥ततःकौतुकात्नृपतिर्यावत्तांपाणिनास्पृशति॥तावत्सादि

ष्यरूपास्तीवभूव॥अथनदृष्ट्वाविस्मितोनृपोयावत्तस्याःस्वरूपंपृछति॥तावत्तस्याएवपरिचारकौविद्याधरौ॥तत्रागत्यनृपंनत्वाइतिऊचतुः॥रा
जन्अत्रार्थेविस्मयंमाकार्षीः॥अत्रउपविश्यएतस्यासर्ववृत्तांतंशृणु॥इतितद्वचसाउपविष्टेनृपेतयोर्मध्यात्एकःप्राह॥शृणुराजन्वयंवि
द्याधरावैताढ्यपर्वतेउत्तरश्रेणिनिवासिनः॥एषाकन्याशृंगारसुंदरीनाम्नीममपुत्रीवर्त्तते॥अन्यदाएषायौवनंप्राप्तावसंतसमयेक्रीडार्थं
वनेगता॥तत्रस्वेछयाफलपुष्पाणिगृह्णंती॥बाल्यभावाच्चापलंकुर्वती॥तस्यवनस्यअधिष्ठात्र्याचक्रेश्वरीदेव्यावानरीभवइतिसप्ता॥ततो
तिभीतयाअनयाप्रणिपातवचःपूर्वकंपुनःप्रसादितादेवी॥शापानुग्रहंकथयतिस्म॥तथाहि॥यदाश्रीशांतिजिनपुत्रश्चक्रधरनृपोहस्तेनस्प
र्शिष्यति॥तदात्वंमूलरूपं॥प्राप्स्यसिसएवपुनस्तवभर्त्ताभविष्यति॥तिकथयित्वादेवीअदर्शनांबभूव॥इयमपिवानरीभूत्वाकियंतंकालंअ
त्रवनेस्थिता॥अद्यत्वयाशापदुःखान्मोचितासांप्रतं॥एनांपाणिग्रहणेनकृतार्थाकुरुइतितद्वचसाहृष्टोनृपस्तत्रैवश्रीयुगादीशंसाक्षीकृ
त्यतांपरिणीतवान्॥करमोचनावसरेचताभ्यांविद्याधराभ्यांकन्याप्रियेणचक्रिणोविद्याधरविद्याःप्रदत्ताः॥एवंतांपरिणीयपुरतोगछन्
तत्रवनेतदीतटेतापसाश्रमान्अपश्यत्॥ततस्तत्रतापसैःकृतादरोनृपःक्षणंविश्रम्यकेयूयंकीदृशोभवतांआचारःकंदेवंध्यायमाना
स्तपस्यथ॥इत्यादितेषांस्वरूपंपृछतिस्म॥तेप्राहुःराजन्वयंतुभगवतोयुगादीशस्यसूनोःकछस्यवंशेतापसाःस्मःकंदमूलादिकंभक्ष

यित्वावनेतिष्ठामः॥जटाधराःवल्कलवसनाभूमिशायिनोब्रह्मव्रतधारकामोक्षार्थंतपस्यामःइतिश्रुत्वाचक्रधरस्तेषांप्रतिबोधाय प्राहभोम
हासत्वा मोक्षार्थमुद्यतानांश्रीयुगादीशस्याराधकानांभवतांकिमेवंमिथ्यात्वजनितोभ्रमः यतोभगवताकंदमूलानिअभक्ष्यत्वेनप्रतिपादि
तानि॥येषांवनस्पतिकायानांतत्ताःगुप्ताभवंति॥येचछिन्नाःशाखादयःकुमारीगुग्गुलप्रमुखाणांपुनःप्ररोहंति॥यच्चभाजितंसत्समम
भावंभज्यते॥येचकोमलफलपुष्पपल्लवादयस्तेसर्वेपिअनंतकायाउच्यंतेतेषुचतीक्ष्णसूचीमुखाग्रमात्रेस्थाने॥अनंताजीवाउत्पद्यंते
विलीयंतेच॥तस्मात्कारणात् अनंतकायाविवेकिनांअभक्ष्याःश्रीजिनशासनेद्वाविंशतिअभक्ष्याणि॥ तथाहि॥उउंबर॥१॥वट॥२॥प्लक्ष॥३॥
काकोदुंबरिका॥४॥पिप्पल॥५॥फलानिमधु॥६॥मद्य॥७॥मांस॥८॥म्रक्षण॥९॥तरुणाश्चनस्नोविकृतयःहिमं॥१०॥विषंसर्वप्रकारं॥११॥कार
काः॥१२॥सर्वमृत्तिका॥१३॥कोमलफलं॥१४॥रजनीभोजनं॥१५॥अनंतकायाः॥१६॥संधानकं॥१७॥वृंताकं॥१८॥अज्ञातफलानि॥१९॥कुथि
तान्नादि॥२०॥बहुबीजं॥२१॥अपक्वगोरसमिश्रितंतद्विदलं॥२२॥इत्येवानिद्वाविंशतिअभक्ष्याणि॥एषांभक्षणात् ॥एकेंद्रियभवेषुअनंतका
लंभ्रमणंस्यात्॥अन्यदपिइहलोकेअनंतनानारोगदारिद्र्यादिकंदुःखंस्यात्॥इतितेमिथ्यात्वंपरित्यज्यसम्यक्हेयोपादेयभावा
न्विज्ञाय॥स्वात्मार्थंसाधयतइत्यादिचक्रधरवचनैःप्रकटितविवेकास्तेतापसाःप्रोचुःराजन्त्वमेवास्माकंमार्गदायकोभवेति॥ततोनृपः

प्राह॥यदिशुद्धधर्मार्थिनस्तदायूयंमयासार्द्धंश्रीविमलाचलेआगछत॥तत्रयुष्माकंसद्गुरुयोगात्॥शुद्धधर्मप्राप्तिर्भविष्यतीत्युक्त्वा॥तान्वि
मानेआरोप्यसंघावासस्थानंप्राप्य॥तत्रसवर्द्धकंमहर्द्धापरिष्टृतंतसमायांतंविलोक्यअतिविस्मिताःसामंतमहाधरादयःसर्वेपिसंमुखंआ
याताःमहताआडंबरेण॥प्रवेशोत्सवंचक्रुः॥अथनृपतिःशत्रुंजयस्यतलहट्टिकायांआगत्य॥तीर्थपूजांसंघपूजांचविधाय॥तीर्थराजं
समारुरोह॥तापसाअपितृपदर्शितरीत्यारुरोह॥अथचक्रधरः॥श्रीभरतेशवत्॥पूजास्नानंदोत्सवध्वजदानादिकंसर्वकृत्यंचकार॥अत्रांत
रेसिंहसुरःप्रत्यक्षीभूयसर्ववृत्तांतंकथयित्वापुनःप्राह॥अत्रश्रीमरुदेव्याख्येशृंगेतवपितुः॥श्रीशांतिजिनस्यप्रासादोस्ति॥तत्रगत्वापूजां
कुरुइतितद्वचमाकर्ण्यसत्वरंगत्य॥सर्वोपचारैःकृत्वाभक्तिंचकार॥तेतापसाअपिभगवंतंनत्वा॥आत्मानंकृतार्थंमन्यमानाःमुख्यशृंगेसर्व
त्रयात्रांकृत्वा॥केवलिमुखात्शुद्धधर्मंअंगीकृत्यपुनःकेवलिवचसातस्यनिर्वाणस्थानंज्ञात्वा॥मुख्यशृंगादधोभागेयोजनांतरेस्वर्गगिरौस्थि
ताःतस्थुः॥एवंतेसर्वेपिशुद्धमार्गेणतपःकृत्वास्वल्पेनैवकालेनकर्मक्षयंकृत्वामोक्षंययुः॥यत्रशृंगेतेतापसाःसिद्धाःतस्यशृंगस्यततः
प्रभृतितापसगिरिरितिनामख्यातिंप्राप्य॥अथचक्रधरोनृपःशक्रप्रेरणात्प्रत्युत्पन्नभक्तिप्रकर्षः॥पुनःप्रासादोद्धारंकारयामास॥इत्थं
शत्रुंजयस्यसर्वेषुशृंगेषुउद्धारंकृत्वा॥ततश्चंद्रप्रभासेरैवताचलेयात्रांवि[illegible]॥तत्रापिपूर्ववत्जीर्णोद्धारंकृत्वा॥ततःसम्मेतशैला

दिषुतीर्थेषुयात्रापूजादिभिःस्वात्मानंनिर्मलीकृत्य॥क्रमेणहस्तिनागपुरंप्राप्य॥अथश्रीशांतिजिनःस्वस्यनिर्वाणकालंविज्ञायसम्मेतशिखरो
परिमुनीनांनवभिःशतैःसमंअनशनंविधाय॥वर्षलक्षंस्वायुःपूरयित्वा॥वैशाखकृष्णत्रयोदश्यांअपराह्णेमुक्तिंप्राप्य॥ततःशक्रादयोदेवा
भगवतोनिर्वाणमहिमानंप्रासादंचकृत्वा॥नंदीश्वरेकृताष्टाह्निकाःस्वस्वस्थानंययुः॥ततश्चक्रधरनृपोपिनिर्वाणंकृत्वावैराग्यपूरितचित्तःसंय
मंजग्राह॥दशवर्षसहस्राणियावन्निरतीचारंचारित्रंप्रपाल्य॥केवलज्ञानंप्राप्य॥सम्मेतशिखरोपरिमुक्तिसुखंप्राप्य॥इत्थंश्रीशांतिजिनेशात्पु
त्रश्चक्रधरोद्धुतं॥उद्धारंदशमंचक्रेपरंशांतिमवापच॥१॥इतिदशमोद्धारः॥१०॥ ॥इतिश्रीशत्रुंजयमहात्म्योल्लेखेपंडितश्रीहंसरत्न
विरचिते श्रीऋषभजिनस्वामिसगरचक्रिचंद्रप्रभशांतिनाथचक्रधरादिमहापुरुषचरितेतीर्थोद्धारवर्णनोनामाष्टमःसर्गः॥८॥ ॥
येनव्योमेवसूर्येण॥हरिवंशोव्यराजत॥जयताज्जगतांनाथः॥सश्रीमान्मुनिसुव्रतः॥१॥अथाकर्णयदेवेंद्र॥इक्ष्वाकुवंशोद्भवानांरामादिम
हापुरुषाणांतत्प्रसंगतोरावणादीनांचतथामुनिसुव्रतस्वाम्यादीनांहरिवंशोद्भवानांचचरितंश्रीतीर्थराजमहिमाव्यापकंकथयिष्यामः॥
तथाहि॥श्रीआदित्ययशसोवंशे॥अयोध्यायांपुरि॥असंख्येषुभूपेषुगतेषु॥श्रीमुनिसुव्रतस्वामिनस्तीर्थेवर्तमाने॥विजयोनामराजाभू
त्॥तस्यहेमचूलाराज्ञी॥तस्याःकुक्षिजातौ॥वज्रबाहुपुरंदराभिधौ॥द्वौपुत्रौअभूतां॥तयोर्मध्येवज्रबाहुस्तु॥तत्कालपरिणीतएवश्वा

लकक्रतहास्यात्॥तयानवपरिणीतयास्त्रिया॥शालकेनचसार्द्धंसंयमंजग्राह॥विजयनृपोपिपुरंदरंराज्येस्थापयित्वा॥दीक्षांलात्वामोक्षंययौ
पुरंदरस्यपट्टेकीर्त्तिधरोभूत्॥तस्यसहदेवीराज्ञी॥सोपिजातमात्रंसुकोशलंपुत्रंराज्येन्यस्यव्रतंजग्राह॥अन्यदासुकोशलोपिज्ञातवैराग्यः
पितुःपार्श्वेव्रतंजग्राह॥सहदेवीतुतद्वियोगार्त्तामृत्वावनेव्याघ्रीजाता॥अन्यदातयानवप्रसूतयाक्षुधार्त्तयापतिपुत्रौमुनीदृष्टौ॥कोधात्सुको
शलमुनिर्व्यापाद्यभक्षितः॥शुक्लध्यानादंतकृत्केवलीभूत्वामुक्तिंप्राप्य॥क्रमात्कीर्त्तिधरोपिकेवलंप्राप्यमुक्तिंगतः॥अथसुकोशलस्यपुत्रो
हिरण्यगर्भः॥तत्पुत्रोनघुषः॥तस्यराज्ञीसिंहिकामहासती॥अन्यदानघुषनृपेउत्तरापथभूपालान्॥जेतुंगतेसतिपुरंअन्येविजायरहि
णापथभूपाविवेष्टयामासुः॥ततःसिंहिकादेवीपुंवेषेणतैर्युद्धंकृत्वानगरंरक्षतिस्म॥एतद्वृत्तांतेननघुषस्यमनसि॥तस्यांअसतीत्वशंका
भूत्॥अन्यदादाघज्वरपीडितेनघुषे॥तयाशीलपरीक्षादर्शनार्थजलछटाछोटनेन॥राज्ञोदाघज्वरःस्वकीयकलंकश्चनिवारितः॥नघुष
पुत्रःसोदासः॥सनृपोराक्षसइवमनुष्यमांसभक्षणासक्तः॥प्रधानादिभिःराज्यान्निर्वासितः॥तत्पुत्रःसिंहरथश्चराज्येस्थापितः॥सोदा
सोपिसाधुयोगाद्धर्मंप्राप्य॥दयापरोन्यदा॥महापुरे॥अपुत्रेराज्ञिमृते॥तद्राज्याधिपोभवत्॥अथसोदासःसिंहरथंजित्वा॥ततोजातवैरा
ग्योराज्यद्वयेपिसिंहरथंसंस्थाप्य॥स्वयंव्रतमग्रहीत्॥सिंहरथस्यपुत्रोब्रह्मरथः॥ततःक्रमेणचतुर्मुखहेमरथशतरथउदयपृथुवारि

रथइंदुरथआदित्यरथमांधातृवीरसेनप्रतिमन्युपद्मबंधुरविमन्युवसंततिलककुबेरदत्तकुंथुशरभद्विरदसिंहदशनहिरण्यकशिपु
पुंजस्थलककुत्स्थाश्चवभूवुः॥एषांकेषुचिन्मोक्षंप्राप्तेषुकेषुचिच्चस्वर्गंप्राप्तेषु॥ककुत्स्थस्यपुत्रोरघुर्बभूव॥तस्यपुत्रोनरण्योनामनृप
तिर्महाप्रतापो॥अयोध्यायांअभूत्॥सतुलोके॥अजो॥जयपालश्चेत्यपरनाम्नाप्रसिद्धोदिग्विजयंकुर्वन्॥अन्यदापूर्वभवदुष्कर्मोदय
वशात्सप्तोत्तरशतव्याधिभिःपीडितोपि॥शत्रूणांअसह्यप्रतापःसन्दुर्जयान्भूपतीन्साधयामास॥इत्येवंपृथ्वीसाधयन्नसौक्रमा
त्सुराष्ट्रदेशंप्राप्य॥तत्रशत्रुंजयेश्रीयुगादीशंनत्वाद्वीपपत्तनंप्राप्य॥अत्रांतरे॥प्रवहणव्यापारीरत्नसाराख्यःप्रवहणानिक्रियाणकै
रापूर्य॥परद्वीपान्समुद्रंप्राविशत्॥ततःसुवायुनाप्रेरितंप्रवहणंवायुवेगेनचलत्॥बहुतरंसागरंसमुल्लंघ्य॥तटनिकटंप्राप्तं॥तत्र
दृश्यमानेषुनीरोपवननगनगरादिषु॥जीविताशांप्रतिसंजातप्रत्ययेषुजनेषु॥सहसाअग्निकोणवायुर्वातिस्म॥ततउल्लसितामेघघ
टागर्जितविद्युत्कारकाशादिभिर्जातंदुर्दर्शगगनंमहावातोद्धतैर्महद्भिःकल्लोलैर्विश्वंप्लावयिष्यन्निवजलधिःसमुच्छलितः॥ततःप्रव
हणंक्षणादाकाशे॥क्षणात्पातालेगच्छत्विमुक्तजीविताशैर्लोकैः॥इदानींशीर्णंइदानींब्रुडितंइतिमन्यतेस्म॥इत्थंउत्पातशतानिवी
क्ष्यातिदुःखितोरत्नसारोमनसिअचिंतयत्॥अहोमहत्कष्टंआपतितं॥प्रवहणंतुतावत्समुद्रमध्येकंदुकवत्उत्पततिपततिक्षणमात्रा

देवभंगमापन्ने। जनाश्रपि दुष्कर्मदोषात्समुद्रे क्षिप्यंति नान्यत्र किमपि शरणं॥ ततो यावज्जनसमूहसंकुलं एतत्प्रवहणं न भज्यते ताव
त्॥ अहमेव समुद्रे झंपां दत्वा प्राणान्त्यजामि इति विचिंत्य यावत्झंपां ददाति तावदाकाशे वाणी बभूव॥ भो भद्र साहसं मा कुरु मयैव लं
ईदृशीं अवस्थां प्रापितोसि॥ ततो मा भैषीः अत्रैव समुद्रजले कल्पवृक्षफलकवेष्टिता॥ भाविनः॥ श्रीपार्श्वनाथस्य प्रतिमा अस्ति इयं प्रति
मा पूर्वं धरणेंद्रेण वर्षलक्षं यावत् पूजिता॥ ततः कुबेरेण॥ षट् वर्षशतानि॥ ततो वरुणेन सप्तवर्षलक्षाणि पूजिता सांप्रतं तु अजयपा
ल नृपस्य भाग्येन इहागतास्ति॥ ततस्त्वं एनां जलान्निःकास्य अजयपालाय देयाः सोपि पृथ्वीं साधयन् रोगपीडितः सांप्रतं द्वीपपत्तने समा
यातोस्ति॥ परं अस्या दर्शनमात्रेण तस्य रोगा विलयं यास्यंति॥ अन्येषामपि जनानां महोपकाराय भविष्यतीति श्रुत्वा॥ संजातजीवित
प्रत्याशो रत्नसारः समुद्रात् कल्पतरुसंपुटात् तां निरकाशयत्॥ तस्या आगमनमात्रादेव समुद्रः सुस्थो जातः सर्वेप्युत्पाताः शांताः वा
युरपि अनुकूलो जातः॥ ततः सुवायुवशात् क्षणमात्रेण द्वीपपत्तनं प्राप्य॥ ततो वेगेन अजयपालनृपाय वर्द्धापनिका प्रेषिता॥ नृपोपि
श्रीपार्श्वप्रभोरागमनश्रवणेनातिहर्षितोऽतिप्रौढमहोत्सवेन सर्वर्द्ध्या परिवृतस्तत्राऽगत्य प्रवहणमध्यात्॥ तत्संपुटं गृहीत्वा॥ महोत्सव
पूर्वकं पुरप्रवेशं कारयामास॥ अथ नृपस्तं संपुटं पूजयित्वा॥ उद्घाटयामास॥ ततो धरणेंद्रफणामणिमंडितमस्तकं छत्रत्रयविनितं

उभयोः पार्श्वयोः श्चामरधराभ्यां शोभितं पाद पादपीठस्थैर्नवभिर्ग्रहैः समुपास्यमानं॥ श्रीवत्सांकितहृदयं भक्तजनदुःखनिर्दलनैकदक्षं
सर्वाभरणभूषितं॥ एवंविधं श्रीपार्श्वप्रभुं वीक्ष्य हर्षोल्लसितगात्रो भूपतिः पंचांगप्रणिपातेन नमतिस्म॥ ततो भगवतो दर्शनमात्रादेव
नृपस्य रोगा दूरं ययुः॥ अथ पुनर्नवीभूतदेहो नृपः प्रभुं विविधोपचारैः पूजयित्वा धन्यंमन्यो रत्नसारं भोजनाच्छादनादिभिर्बहुधा स
त्कृत्य व्यसृजत्॥ तस्यामेव रात्रौ राज्ञः स्वप्नमध्ये आगत्य ते व्याधयः सर्वे पि इति प्राहुः॥ राजन् त्वया पूर्वभवे मुनिर्विराधितः॥ तेन कर्मणा अद्य
यावत्त्वं॥ अस्माभिः पीडितः सांप्रतं तु पार्श्वप्रभोर्दर्शनात् क्षणमपि स्थातुं॥ अशक्ता वयं तवांगाद्दूरं गताः॥ तथापि षण्मासान् यावत्तव तत्क
र्मशेषं विद्यते॥ तस्मात्॥ अत्र शाखापुरे॥ अन्नानामा पशुपालकोस्ति॥ तस्य गृहे एका अजा वर्त्तते॥ सा च मुखहृदयपुच्छेषु श्वेता वर्त्तते॥ तस्याः
शरीरे वयं स्थितास्म॥ ततस्त्वं तां छागीं समानीय॥ षण्मासान् यावत् चारय सांगस्य चंदनादिकं उद्वर्त्तनं जलादिमिश्रितं॥ तया तस्या देयं॥ ते
न वयं तुष्टा भविष्यामः॥ ततः षण्मासांते सुवर्णवर्णकायो भूत्वा॥ श्रीपार्श्वप्रासादात् चिरकालराज्यं पालयिष्यसीत्युक्त्वा॥ ते अलक्ष्यतां प्रा
पुः राजापि जागरितः सविस्मयस्तां॥ अजां तथैव पर्यचारयत्॥ अथ नृपतिर्विगतोपद्रवो महोत्सवामारिदानादि हर्षं प्रवर्त्तयित्वा॥ तदैव नि
183/1962
जनाख्या॥ अजयपुरं नगरं वासयतिस्म॥ तन्मध्ये प्रभोः प्रांशुगं प्रासादं कारयित्वा॥ पूजार्थं दशग्रामयुतं तत्पुरं भूपतिर्ददौ॥ स्वयं च त्रिकालं पू

जयन्॥ तत्रनस्थोइतश्चसुराष्ट्रेरूपालवंशे॥वज्रपाणिर्नृपोगिरिदुर्गेसुरान्॥ आगत्यश्रस्मैश्रमिलत्॥ अजयपालोपितंसुराष्ट्राधीशंतीर्थेइस
रक्षाकरंस्वगोत्रिणंचविज्ञाय॥बहुसत्कारपूर्वकंदेशग्रामादिदानेनमानयामास॥अथाजयपालनृपोवज्रपाणिनृपाग्रहात्गिरिनारगिरि
श्रीनेमेःपूजयास्वात्मानंपवित्रयित्वावज्रपाणिनानानाढौकनादिभिरत्यर्थगौरवितःपुनःअजयपुरंप्राप्य॥अन्यदातत्रपुरेश्रीपार्श्ववंदि
तुंकश्चिन्ज्ञानीमुनिःसमाययौ॥नृपस्तंप्रणम्यतन्महात्म्यंपृच्छतिस्ममुनिःप्राह॥राजन्अस्याःप्रतिमायाःमाहात्म्यभावंदृष्टापिकिंपृच्छसि
अस्यप्रभोर्दर्शनमात्रेणापिप्राणिनांकुष्टभगंदरज्वरादयोमहारोगानश्यंति॥शाकिनीभूतवेतालादयोपि॥अस्यदर्शनात्स्मरणाद्दूरेनश्यं
ति॥ अग्रेदुःषमाकालेपिअस्यमहिमाविशेषेणविस्तरिष्यति॥विषविकारभूतोन्मादसन्निपातादयोदोषा॥अस्यसेवनात्विलयंयास्यंति
दुष्टदेवतकृताउपद्रवाःशमिष्यंति॥एतत्सेवकानांकलत्रपुत्रलक्ष्मीराज्यसंपदोवर्द्धिष्यंते॥किंचाधिककथनेनसर्वाभीष्टार्थदायकंएतद्बिं
बंएतोन्यदपि॥भगवद्बिंबंयदावर्षशतमक्रांतं॥तदातत्तीर्थसप्रभावंकथ्य॥एतत्तुदेवैर्देवेंद्रैर्बहूनिवर्षलक्षाणियावत्पूजितं॥तदस्य
किंवाच्यं॥एतस्यदर्शनादेवसर्वपापानिनश्यंति॥अत्रतीर्थदानादिसुकृतमपिकृतं॥अक्षयफलंभविष्यतीत्यादिकंमहिमानंप्रकाश्य॥स
ज्ञावदिनपूजितोमुनिर्गगनमार्गेणअन्यतीर्थे[illegible]त्रार्थययौ॥[illegible]गर्श्वप्रभोःपूजाभिःस्वजन्मसफलयन्॥षण्मासान्या

वत्तत्रतस्थौ॥ततोवज्रपाणिनासहःश्रीशत्रुंजयेपूजास्नानशकोत्सवध्वजदानादिनामहत्सुकृतसंचयंकृत्वा क्रमेणायोध्यांप्राप्य
धर्मकर्मतत्परश्चिरंराज्यंबभुजे॥प्रांतेप्रतंसमाराध्यस्वर्गंययौ॥तस्याजयपालस्यज्येष्टपुत्रोनंतरथःसतुवैराग्यवान्दीक्षांजग्रा
ह॥लघुपुत्रस्तुपृथ्वीकुक्षिजातो॥दशरथोराज्यंपालयति॥तस्यचतस्रोभार्याःकौशल्या॥१॥कैकयी॥२॥सुमित्रा॥३॥सुप्रभा॥४॥चे
ति॥अन्यदाकौशल्या॥गज॥१॥सिंह॥२॥सूर्य॥३॥चंद्र॥४॥लक्षणस्वप्नचतुष्टयसूचितं॥भाविनंबलदेवंपुत्रंप्रासूत॥तस्यरामपद्म
इतिनामकृतं॥अन्यदासुमित्रापि॥गज॥१॥सिंह॥२॥चंद्र॥३॥समुद्र॥४॥लक्ष्मी॥५॥वह्नि॥६॥सूर्य॥७॥लक्षणैःस्वप्नैःसूचितवासुदे
वपदंलक्ष्मणाभिधंपुत्रंप्रासूत॥तथाकैकयीभरतंसुप्रभाशत्रुघ्नंपुत्रंप्रासूत॥एवंतैश्चतुर्भिःपुत्रैःकृत्वा॥दानादिचतुर्भिरंगैः
साक्षाद्धर्मइवदशरथोधिकंशुशुभे॥तेषांचरामलक्ष्मणौ॥भरतशत्रुघ्नौचन्योन्यंस्नेहलौअभूतां॥इतश्चमिथिलानगर्यांहरिवंशो
द्भवकेतुनृपविपुलाकुक्षिजातोजनकराजाराज्यंकरोति॥तस्यविदेहाराज्ञी॥सान्यदासुस्वप्नदर्शनपूर्वकंपुत्रीपुत्रलक्षणंयु
गलंप्रासूत॥पूर्वभववैरात्पिंगलाख्योदेवःसौधर्मादागत्य॥तंयुगलजातं॥पुत्रंजातमात्रंहरतिस्म॥पुनःसंजातकरुणोसौतंबा
लंकुंडलादिभिःभूषयित्वा॥वैताढ्योपरिवनेमुक्त[illegible]॥अ[illegible]रथनूपुरपुराधीशश्चंद्रगतिर्विद्याधरःकुतश्चित्कारणात्र

185 | 195

षाभ्यागतः सन्॥ तंबालं प्राप्य॥ अतिहर्षिनो॥ शुभकृत्यास्वपत्न्याः पुष्पवत्याः अर्पितः॥ अद्यैव पुत्रो जात इति लोकमध्ये घोषणा कृता॥ ततो भ्रो
त्सव पूर्वकं तेजस्विनं दृष्ट्वा भामंडल इति नाम कृतं॥ तत्र ताभ्यां लाल्यमानः क्रमाद्यौवनं प्राप्य॥ इतश्च जनकराजा बकुगवेषणेनापि तं पुत्रं अप्रा
प्य॥ कथंचिन्मनो वालयित्वा॥ पुत्र्याः शीता इति नाम चक्रे सापि पितृभ्यां लाल्यमाना लोकाद्भुतरूपसौभाग्यसुंदरं यौवनं प्राप्य॥ तां वरयो
ग्यां दृष्ट्वा जनकनृपः स्वयंवरणादरं चक्रे॥ अत्रांतरे मातुरंगाद्याः स्लेछभूपा जनकराज्ञो देशे उपद्रवं चक्रुः॥ तान् दुर्जयान् विज्ञाय जनक
नृपो मित्रीवशात्॥ दशरथं प्रति दूतं मुमोच॥ दशरथोपि तं वृत्तांतं ज्ञात्वा तत्र गंतुसज्जो भवत्॥ अथ रणप्रयाणोत्सुकं पितरं निवार्य
रामस्तत्र गत्वा बलोत्कटतया तान् सर्वान् दिशोदिशि नाशयित्वा॥ जनकं निरुपद्रवं चकार॥ ततो जनकस्तुष्टः सन् रामं स्वपुरमानीय
समानयित्वा स्वसुतां शीतां तस्मै दातुं वांछति स्म [illegible] नारदस्तत्रागाम॥ तं पिंगलकेशं लंबकूर्चछत्रिकाधरं बीभत्सं दृष्ट्वा॥ भीता शी
ता अनश्यत्॥ ततो दासीभिः शिखायां गृहीत्वा [illegible] चानिः काशितो नारदर्षिः कोपं वहन् शीतायारूपं चित्रपटे लिखित्वा वैताढ्ये
चंद्रगति पुत्राय॥ भामंडलाय अदर्शयत्॥ सोपि शी [illegible] तीं अजानन्॥ तं पटं दृष्ट्वा कामातुरः स्लोकजल्लेमीनइवार्त्तं चित्तस्थो॥
अ चंद्रगतिः पुत्रस्य दुःखकारणं विज्ञाय॥ चपलगा [illegible] कि मिथिलायां प्रेषयित्वा॥ जनकनृपं अपाहारयन्॥ अथ चंद्रगतिर्जनक

नृपं प्रति बहुमानं दत्वा प्रीतिवाक्यैः शीतां अयाचत। ततो जनकस्तु मया॥ इयं कन्या रामाय दत्तास्तीति उत्तरं ददौ॥ ततश्चंद्रगतिः प्राह॥ अ
हो मयानुस्नेहवृद्ध्यर्थं॥ त्वां अत्रानीय याचना कृता॥ अन्यथा तु कन्यायाः एव हरणे मम को विलंबोस्ति॥ भवतु एव परं मम एते वज्रावर्त्तार्ण
वावर्त्ताख्ये धनुषी गृह्यतां मत्पुत्रो वा रामो वा उभयोर्मध्ये य एते रोपयिष्यति॥ इति तद्वचोंगीकृत्य॥ जनकः स्वगृहमागत्य स्वयंवरणमंडपं
रचयित्वा॥ धनुरारोपणपणं प्रकटीकृत्य देशे २ दूतान् मुमोच॥ ततो महदाडंबरेण कृत्वा॥ अनेके खेचरा भूचरा राजानः समागताः
भामंडलयुतश्चंद्रगतिः रामादि पुत्रचतुष्टय परिवृतो दशरथोपि च समागतः॥ ततो जनकेन यथायोग्यं समानितास्ते भूपाल प्रदिवसे॥ मंड
पमागत्य॥ स्वस्वनामांकितासनेषु निषेदुः ततो मदोत्कटा बलोद्धता अपि राजकुमारा धनुरारोपणे असमर्थाः संतो यदा लज्जया अधोमु
खाः स्थितास्तदा रामो मे चादुत्तीर्य लीलामात्रेण धनुरारोप्य॥ मथ्यमान सागर ध्वनिमन्निभं टंकारं चकार॥ ततो देवैः पुष्पवृष्टिः कृता शीतया
रामकंठे वरमाला क्षिप्ता महान् हर्षकोलाहलः प्रसृतः लक्ष्मणोपि द्वितीयं ध [illegible] अ [illegible] यत् तस्मै विद्याधरपतयोष्टादश निजकन्यका द
दुः॥ अथ सुमुहूर्त्ते रामः शीतां परिणिन्ये॥ भरतोपि कनकनृप पुत्रीभ [illegible] णिन्ये॥ इत्येवं विवाहोत्सवं समाप्य चतुर्भिः पुत्रैः सह दशर
थो योध्यां समुपागमत्॥ अपरेपि जनकेन संमानित [illegible] एवं दशरथस्तैश्चतुर्भिः पुत्रैः समं वृद्धे प्रजापालनं

वासयन अन्यदाजिनस्नानाभिषेकजलंकंचकिनांतरेणसार्द्धं सुमित्रायैदेव्यैप्रेषयामास॥ अन्यासामपिराज्ञीनांदासीहस्तेनप्रेषया
मास॥ तासांनिम्हणामपितरुणवयोभिर्दासीभिःशीघ्रंगत्वार्पितं॥ ताभिश्चतद्दत्तं सुमित्रायास्तुजराभिभूतत्वात्चलितुमशक्तःकंचु
कीयावच्छीघ्रनप्राप्तः॥ तावत्सुमित्रामनसिइत्यचिंतयत्॥ अहंभर्त्रास्नानजलंप्रेषणेनप्रथमंनसंभाविता॥ तर्हिकिंजीवितव्येनेतिकृत्वा
गलेपाशंरुंभुंतत्परा भूत्॥ ततोज्ञानतदृत्तांतोनृपःशीघ्रंतत्रागत्ययावत्पाशंछिनत्तितावत्सकंचुक्यपिस्नानजलमादायतत्राऽगतः
राज्ञाकथंचिरात्॥ आगतोसिइतिपृष्टःसन्सप्राह॥ स्वामिन्जराजर्जरितोहंगंतुमशक्तइति॥ तच्छ्रुत्वापरमार्थंविज्ञायराज्ञीकोपंतत्या
ज॥ ततोगलद्दंतंलुलितमुखंपलितव्याप्तदेहंकंपमानंकुब्जीभूतं॥ तंकंचुकिनंवीक्ष्यनृपोचिंतयत्॥ अहोऽस्थिरंएतत्कलेवरंविसंस्थुल
तृणकुटीरकतुल्यं॥ अनेकरोगैरमाश्रितं॥ क्षणभंगुरं॥ ततोस्मिन्विषयेविवेकिनांमोहः॥ यावदेतच्छरीरंजर्जरंनभवति॥ तावद्यमतंए
वात्महितावरणंवरं॥ इतिविचिंत्यसंयमाकांक्षीकियद्दिवसानंतरं॥ अन्यदासाधून्वंदितुंवनेगात्॥ यावत्साधून्वंदित्वाउपविष्टः॥ ता
वद्भामंडलोपिगगनमार्गात्॥ अवतीर्यसाधून्नत्वातत्रउपविष्टः॥ ततःसाधुभिर्द्धर्मदेशनादत्ता॥ तन्मध्येशत्रुंजयस्यापिमहात्म्यं
वर्णितं॥ ततोमुनिमुखात्शीतांभगिनींज्ञात्वा॥ भामंडलःस्वापराधंअक्षामयत्॥ सापितस्मैआशिषंददौ॥ अथभामंडलोपरो

क्षेनदशरथःस्वजन्मसफलीकरणाय सर्वर्द्धापरिकरितःश्रीशत्रुंजययात्रार्थंप्रतस्थे॥ ततःस्थानेस्थानेदेवगुरुसाधर्मिकभक्तिंकुर्वन्
दीनानाथादिभ्योदानंददानो॥ जीर्णचैत्यानुद्धरन्॥ क्रमेणशत्रुंजयंप्राप्य॥ तत्रसर्वशृंगेषुपूजांस्नानादिकंविधायस्वमनोरथान्पूरया
मास॥ तत्रसर्वशृंगेषुप्रोत्तुंगप्रासादान्प्रतिष्ठाश्चकारयित्वा क्रमेणचंद्रप्रभासंप्राप्तः॥ तत्रसीतास्वयंप्रासादंप्रतिष्ठांचकारयित्वा॥
स्वनाम्नातीर्थंस्थापयामास॥ ततोनृपोरैवतगिरौपूजांउद्धारंचकृत्वा॥ क्रमात्वरदाख्यंगिरिंप्राप्तः॥ तत्रपूर्वंवरदेनकारितंनेमिचै
त्यंकालवशाजर्जरीभूतंवीक्ष्य॥ केकयीनवंप्रासादंकारयित्वा॥ तत्रश्रीनेमिनंसंस्थाप्यस्वनाम्नातीर्थंप्रकटीचकार॥ एवंढंकपर्वतेपुर्यां
कौशल्यांऋषभप्रासादंकारयामास॥ वलभीपुरेसुप्रभाशांतिजिनप्रासादं॥ कांपील्यपुरेरामोवामनपुरेलक्ष्मणश्चयुगादीशप्रासादं
एवमन्येपिभामंडलादयःसामंतामंडलीकाश्चयथास्थानंस्वकीयान्॥ प्रासादान्कारयामास॥ इत्थंसर्वतीर्थेषुयात्रांकृत्वापुनर्नृ
पःस्वपुरंप्राप्य॥ अथदशरथनृपोदीक्षाग्रहणोत्सुकोराज्यप्रदानायपुत्रान्आकारयामास॥ अत्रावसरेकपटपटीकैकयीराज्ञीपूर्वदि
त्तौवरौसमयेयाचिष्येइतिन्यासीकृतौनृपंप्रतियाचे॥ स्वामिन्एकेनवरेणममपुत्रस्यभरतस्यराज्यंदेहि॥ द्वितीयेनचचतुर्दशवर्षा
णियावत्॥ रामलक्ष्मणयोर्वनवासंदेहि॥ इतिवज्रपातसदृशंवचनस्यश्रवणमात्रेणदेवमूर्छितोराजाभूमौपपात॥ अनेको

पुनश्चेतनांप्राप्यापिकाष्टपाषाणादिघटितइव अत्यंतविन्नस्तस्थौ ततो रामलक्ष्मणौतंवृत्तांतंज्ञात्वा पितुःप्रतिज्ञापूरणार्थंसीतयास
हितौपितृपादयोर्निपत्यतस्मिन्नेवक्षणेवनवासायप्रस्थतुः तद्दृष्ट्वापौरजनानेत्रजलेन भुवंसिंचंतोहाहारवंचक्रुः ततोयथानिर्जी
वंशरीरंयथानासिकांविनामुखं यथाचंद्रार्करहितंगगनंयथानिर्जलंसरोवरं तथैवताभ्यांविनाअयोध्यापुरंनिःश्रीकंबभूव अथद
शरथःकथंचित्शोकंनिवार्य भरतंराज्येसंस्थाप्य स्वयंसत्यभूतिमुनेःपार्श्वेदीक्षांजग्राह रामस्तुवनांतरेगंभीरांतटनीउत्तीर्यव
टवृक्षस्यतलेउपविष्टःसन्लक्ष्मणंप्रतिप्राह भ्रातःअयंदेशःकेनचित्भयात् अधुनैवउद्वसितोनुमीयते यतःक्षेत्रखलादी
निअन्नपूर्णानि वृक्षादयोप्येतेसरसाःदृश्यंते इतिवार्त्ताकुर्वतोस्तयोःकश्चित्पुरुषस्तत्रायये अथरामस्तंदेशोद्वसन
हेतुंअपृच्छ सप्राह ---------------------- अयंदेशोसिंहकर्णोनृपःसचमानतुंगःश्रीजिनंगुरुंचविनानकुत्रापिशि
रोनामयत् ---------------------- कुद्धेनसिंहरथनृपेणाभिषेणितस्तद्भयाद्देशंत्यक्त्वा ------
---------------------- दूरंययौ इतिश्रुत्वारामस्तंअर्हंतंसाधर्मिकंविज्ञाय ------
---------------------- लक्ष्मणंप्रेषयित्वासिंहरथंनिर्जित्य पुनःसिंहकर्णंराज्ये

स्थापयामास॥ ततोग्रेगतानांतेषां॥ अन्यदाद्वौविद्याधरमुनीपारणार्थंसमागतौ॥श्रीतयानौशुद्धाहारदानेनप्रतिलोभितौदेवता।भिःसु
गंधजलपुष्पादिवृष्टिःकृतातस्यांगंधेनाकृष्टो॥जटायुर्नामापक्षीतत्रागतःसोथमुनिमुखात्॥धर्मोपदेशंश्रुत्वासमुत्पन्नजातिस्मरणःश्री
ताशाःपार्श्वेएवतस्थौ तौसाधूधर्मोपदेशंदत्वा पुनश्चान्ययात्रार्थं अन्यत्रजग्मतुः॥इतश्चसमुद्रमध्येरक्षोद्वीपेलंकायांपुरिपूर्वंश्रीअजितना
थविरेदेसति॥रक्षोवंशेघनवाहनइतिनाम्नानृपोभवत्॥तस्यतुराक्षसेंद्रोराक्षसींविद्यांददौ॥ततःप्रभृतितस्यवंशस्यराक्षसवंशइतिनामब
भूव॥तस्यपुत्रोमहारक्षाःपरमजैनःतत्पुत्रोदेवरक्षाःसोपिस्वधर्ममाराध्यमोक्षंययौ॥एवंतत्रवंशेबहुषुनरेंद्रेषुगतेषु॥श्रीश्रेयांसतीर्थे
अन्यदाकीर्त्तिधवलोनामराक्षसेश्वरोबभूव सर्वचैताढ्यपर्वतात्स्वमित्रंश्रीकंठनामानंविद्याधरंसमानीयवानरद्वीपेवासयतिस्म॥
तत्रद्वीपेवानरपतनोन्नितेकिष्किंधानाम्नी॥तेषांराजधानीबभूवतन्निवासिनस्तेवानरद्वीपचिह्नेनोपलक्षिताःक्रमेण॥वानररूपकारि
णीविद्यासाधयामासुः॥ततःश्रीकंठादस्त्रकंठादिषुबहुषुनृपेष्वतीतेषु॥श्रीमुनिसुव्रतस्वामितीर्थेघनोदधिनृपोभवत्॥तदालंकायां
रक्षोवंशेतडित्केशइतिनाम्नानृपोभूत्॥तयोरपिपूर्ववत्परस्परंनिबिडस्नेहोभूत्॥अथकिष्किंधायांघनोदधेःपुत्रःकिष्किंधिरित्यभूत्
लंकायांचतडित्केशपुत्रःसुकेशोभूत् ॥अत्रांतरेविद्याधरपतिनाअशनिवेगेनमहाबलवतानिर्जितौतौलंकाकिष्किंधनाथौद्वावपिपाता

लंकांजग्मतुः॥ अथतत्रवसतःसुकेशस्यइंद्राण्यां॥भार्यायांत्रयोपुत्राः॥माली॥१॥सुमाली॥२॥माल्यवान्॥३॥ बहुनिनामभिर्बभूवुः॥
किष्किंधेस्तु श्रीमालायां पत्न्यांआदित्यरजा॥१॥ऋक्षरजा॥२॥ इतिद्वौपुत्रौअभूतां॥क्रमात्तेयौवनेमहाबलामदोत्कटाश्चबभूवुः
अन्यदाकिष्किंधिभूपोमेरुपर्वतेयात्रांकृत्वाबलिनोमधुपर्वतेकिष्किंधापुरींवासयित्वा॥तस्मीइतश्चसुकेशस्यपुत्रादर्पोद्धतालंकाया
मागत्यवैरवशात् अशनिवेगस्यसेवकंनिर्घातंनिपातयामासुः॥तत्रचमालीराजाबभूवकिष्किंधायांचादित्यरजाराजाबभूव॥
तयोश्चपरस्परमहान्स्नेहोबभूव॥अथअशनिवेगस्यपुत्रःसहस्रारःतस्यचित्रसुंदर्यां इंद्रनामासुतोभवत्॥सचबलवत्तरतयाइं
द्रवच्चतुर्दिक्षुस्वकीयान्लोकपालान्॥अस्थापयत्॥राक्षसान्वानरांश्चनिर्जित्यपुनःपाताललंकायां॥अगमयत्॥अथतत्रनिहतःसु
मालिनः रत्नश्रवाइतिपुत्रोभूत्सचविद्याःसाधयित्वाबलिष्टोभूत्॥तस्यकैकसीतिभार्याभूत्॥साचान्यदानवसंख्येषुहाररत्नेषुप्रतिबिं
बितमुखत्वात् यथार्थनामानंदशमुखंरावणइत्यपरनामकंपुत्रंप्रासूत॥ततोन्यान्यपिकुंभकर्ण्ण॥१॥शूर्पनखा॥२॥बिभीषणाख्या
नित्रीण्यपत्यानिक्रमेणमाप्रसूत॥क्रमेणयौवनंप्राप्तास्तेदशमुखादयस्त्रयोपिबंधवाःमातुर्मुखात्शत्रुंकृतंपराभवंश्रुत्वा॥विद्या
साधनार्थंभीमारण्यंययुः॥ततोदशमुखोदशसहस्रविद्याःकुंभकर्णःपंचसहस्राणि बिभीषणश्चत्वारिसहस्राणिविद्याःसाधयामास॥

अथमेघविद्याधरसुतांहेमवतीकुक्षिजातांमंदोदरींदशमुखःपरिणीतवान् तदनंतरंअन्याअपिगुणानुरक्ताः षट्सहस्राणिविद्याध
रकन्याःपरिणयामासकुंभकर्णोपिमहोदरनृपसुतांतडिन्मालां॥ तथावीरविद्याधरपुत्रींपंकजश्रियंचबिभीषणःपरिणयतिस्म॥अ
थरावणस्यमहोदर्यांइंद्रजिन्मेघवाहनामानौद्वौपुत्रौअभूतां॥ ततोदशमुखइंद्रविद्याधरसेवकं॥वैश्रवणंजित्वा सपुरींलंकांपुष्पकेनवि
मानेनसमाश्रयत्॥ पुनःशक्रसेवकंयमंजित्वा॥ नरकांश्चमंक्षुस्वमित्रायआदित्यरजसेकिष्किंधांप्रत्यार्पयत् अन्यदपिऋक्षपुरमिति
नाम्नापुरंवासयित्वा॥ऋक्षरजसेअर्पयत्॥ आदित्यरजसोवालिसुग्रीवनानामानौद्वौपुत्रौश्रीप्रभानाम्नीपुत्रीच॥ अभूवन् ऋक्षरजसो
पिहरिकांताकुक्षिजातौनलनीलनामानौद्वौपुत्रौअभूतां॥अथादित्यरजावालिनंराज्येस्थापयित्वासुग्रीवंचयुवराजंकृत्वा स्वयंव्र
तंजग्राह॥ इतश्चखरविद्याधरोदूषणभ्रातृसहितःशूर्पनखांहृत्वा आदित्यरजसःसुतंचंद्रोदरनृपंजित्वापाताललंकांअग्रहीत्॥
ततःक्रुद्धोपिदशमुखःपुनर्मंदोदरीवचसाशांतकोपःसन्तंभगिनीपतिंकृत्वा॥पाताललंकाराज्येस्थापयत् अथचंद्रोदरेमृतेसति
तस्यभार्यानुराधावनेस्थिता॥विराधाख्यंपुत्रंप्रासूत॥अन्यदारावणोवालिनवानरेश्वरंबलिनंश्रुत्वा असहनस्वभावतयादूतेनतंआका
रयतिस्म॥सोपिविनार्हंतंपरंननमामीत्युक्त्वा दूतंअचालयत्॥ ततोदूतवचसाक्रुद्धोदशमुखःससैन्यस्तत्रागात्॥ अथवाली

विविधास्त्रैश्चिरंयुध्वाचंद्रहासखड्गसहितंरावणंकक्षायांप्रक्षिप्यचतुरःसमुद्रान्भ्रमतिस्म॥ततोरावणंमुक्त्वाधिगेतत्॥अनर्थकारणं
राज्यमिति॥संजातवैराग्यःसुग्रीवंराज्येस्थापयित्वा॥स्वयंदीक्षांजग्राह॥सुग्रीवोथ॥श्रीप्रभांस्वभगिनींरावणायददौ॥चंद्ररश्मिनामानंवालि
पुत्रंचयुवराजंचकार॥अथैकदारत्नवतींपरिणेतुंवैताढ्यंगच्छतोरावणस्य॥अष्टापदपर्वतोपरिविमानंस्खलितं यावद्विमानस्खलन
कारणंविलोकयति॥तावत्तत्रकायोत्सर्गस्थितंवालिमुनिंअपश्यत्॥ततःपूर्ववैरेणरावणोचिंतयत्॥अहोयंकपटसाधुर्भूत्वाद्यापिमयि
विषयेरोषंनत्यजति॥ततःपर्वतेनसहितंएनंलवणसमुद्रेक्षिपामि॥इति [illegible] दार्यगिरेरधःप्रविश्य॥त्रटत्रटशब्देनत्रुट्यमानगि
रिं॥भयोद्भ्रांतसकलप्राणिसमूहं भटद्भटितिपतत्टंकशैलं॥अष्टापदपर्वतंसउत्पाटयामास॥अथसहसामहोत्पातंवीक्ष्यरावण
कृतोपद्रवंविज्ञायवालिमुनिर्निःसंगोपितीर्थभंगभयात्॥तस्यशिक्षार्थंस्ववामांगुष्ठंपर्वतमूर्ध्निददौततोरावणःसंकुचद्गात्रोरुधिरं
वमन्॥करुणस्वरंरुरोद॥ततोवालीकृपापरोमुक्तप्रयत्नस्तस्थौरावणोपिततोनिःसृत्यवालिनंक्षमयित्वाश्रीभरतेशकृतप्रासादे
पूजार्थंजगाम॥तत्रसांतःपुरोजिनान्पूजयित्वास्वसानंत्रीःसमाकृष्यभुजवीणांवादयन्॥जिनाग्रेसंगीतंचकार॥तदवसरेधरणें
द्रस्तत्रायातस्तस्यभक्तिंदृष्ट्वाप्रसन्नोवरंवृणीष्वेतीरावणंप्राह॥ततोभगवद्भक्तिमेवप्रार्थये नान्यत्किंचिदपीतिरावणेनोक्ते॥पुनर्वि

शेषातुष्टोधरणेंद्रस्तस्मै॥अमोघविजयांमहाशक्तिंदत्वास्वस्थानंययौ॥रावणस्तुवैताढ्येनित्यालोकपुरे॥रत्नावलींपरिणीयलंकांप्रत्या
जगाम॥वालिमुनिस्तुकर्मक्षयात्केवलंप्राप्यमुक्तिंप्राप्य॥इतश्चज्वलनशिखविद्याधरपुत्रीतारानाम्नीसाहसगतिनाप्रार्थ्यमानामपिवलि
ष्टत्वात्सुग्रीवःपरिणीतवान्॥तयासहभोगान्भुंजानस्य॥तत्कुक्षिजातौअंगदजयानंदाख्यौद्वौपुत्रौअभूतां॥अथसाहसगतिस्तुतारा
दुःखेनदुःखितोहिमवद्गिरौविद्यासाधनार्थंययौ॥अथरावणोऽन्यदाखरादिभिर्विद्याधरैःसुग्रीवेणचपरिवृतोवैताढ्ये इंद्रंविद्या
धरपतिंजेतुंप्रतस्थे॥तत्रमार्गेरेवातटेरत्नपीठेभगवत्प्रतिमांस्थापयित्वा॥संपूज्ययावद्भावनांभावयन्नस्ति॥तावत्सहसायाते
नरेवाजलपूरेणप्रतिमायाश्चंदनपुष्पमाल्यादिकंविशीर्णतांप्राप्य॥ततःक्रुद्धेदशमुखेकश्चिद्विद्याधरःप्राह॥स्वामिन्मा
हि[illegible]—[illegible]पुर्याःस्वामीसहस्रांशुःरेवाप्रवाहंसंरुध्यजलक्रीडांकरोति॥तेनसहसामुक्तोयंजलप्रवाहस्तवपू---
जा-----भंगकारकोबभूव॥इतिश्रुत्वातिक्रुद्धोरावणस्वराक्षसान्तज्जयार्थंप्रेषयामास॥तेराक्षसाःसहस्रां
शुभाप्रह[illegible]—[illegible]:प[illegible]---लाय्यपुनःरावणंप्रत्यागत्यतत्पराक्रमंप्रोचुः॥ततोरावणःस्वयंगत्वासहस्रांशुंजि
त्वाबद्ध्वाचस्वेन्येसमानयत्॥अत्रांतरेशतबाहुनामामुनिर्गगनमार्गाद्रावणसभायांआयातः॥रावणेनवंदि

नः ततोवार्त्तांतरेमुनिनाअसौसहस्रांशु अस्माकंपुत्रइत्युक्ते॥रावणेनतत्कालंमुक्तोपिसहस्रांशुर्वैराग्यात्॥तातमुनेःपार्श्वेदी
क्षांजग्राह॥ततोनारदवचनात् प्राणिवधमयंमरुत्तनृपतेर्यज्ञं॥जिनासेकरसिकोरावणोनिवारयामास॥अथरावणादेशात्
कुंभकर्णादयोराक्षसादुर्लंघ्यनगरे॥इंद्रदिक्पालंनलकूबरंजेतुंययुः॥ततोनलकूबरःस्वपुरेआसालीविद्याबलेनयोजनशतप्रमाणं
वह्निमयंकोट्टंचकार॥तंकोट्टंवीक्षितुंअप्यशक्ताःकुंभकर्णादयः॥[illegible]लितारावणायतद्वृत्तांतंप्रोचुः॥अत्रांतरेनलकूबरप
त्नीनुपरंभाख्यारावणरूपमोहिता॥स्वयमागत्य॥रावणाय॥आ[illegible]॥[illegible]यांददौरावणस्तयाविद्ययातंवह्निप्राकारंसंहृत्यदुर्ल
ंघ्यंपुरजग्राह॥तत्रसुदर्शनाख्यंचक्रप्राप्य॥अथतत्रपुरेतमेवनलकूबरंस्वसेवकनसंस्थाप्यपरस्त्रीतिज्ञातातस्यस्त्रियंउपरंभां
पश्चाद्दर्पयित्वा॥ततोवैताढ्येरथनूपुरपुरंवेष्टयामास॥ततःशक्रोपिऐरावणंगजमारुह्यससैन्यःसंमुखमागतः॥ततोरावणे
नोक्तंकिमनेननिःकारणंसुभटकोटीनांसंहारेण॥तत्रआवयोरेवयुद्धंभवतु॥इतितेनाप्यंगीकृते॥तौद्वावपिगजारूढौविद्या
स्त्राणिवर्षंतौ॥देवसैन्यानामपिभीतिकारिणौअभूतां॥ततोरावणस्थलंविमृश्य॥गजस्कंधादुत्प्लुत्य॥शक्रगजस्कंधोपरि
गत्वाशक्रंबध्वापुनःस्वगजस्कंधंआजगाम॥ततोराक्षससैन्येमहान् जयजयारवोजातः॥विद्याधरसैन्यंतुविलायतां

प्राप्य॥अथलंकेश्वरोजितकासीःसन्लंकायामागत्य॥शक्रंकारागृहेनिक्षिप्य॥अथशक्रस्यपितासहस्रारोलोकपालैःसार्द्धलं
कामागत्यरावणंप्रतिविनम्यपुत्रभिक्षांअयाचत॥रावणःप्राह॥यदिअसौतवपुत्रोनित्यंममपुरेतृणादीनांमार्जनं लकुगंधो
दकंपुष्पप्रकरंचकरोति॥तदाहंमुंचामि॥सहस्रारस्तत्सर्वंअंगीकृत्यपुत्रंमोचयामास॥शक्रोरथनूपुरमागत्य॥वैराग्याद्व्रतंगृही
त्वामुक्तिंययौ॥अन्यदारावणोन्यस्त्रीसंगात्स्वमरणंमुनिमुखेनश्रुत्वा॥अनिच्छंतीपरस्त्रीनभोक्ष्ये॥इतिनियमंजग्राह॥इतश्चादि
त्यनगरेप्रह्लादनामानृपस्तस्यकेतुमतीराज्ञी॥तयोःपुत्रःपवनंजयाख्योविद्याधरोस्ति॥सचमाहेंद्रनृपपुत्रीहृत्सुंदरीकुक्षिजा
तां॥अंजनासुंदरीपरिणीतवान्॥साचसतीधुरंधरानिर्दोषाअपिकेनाप्यदृष्टकारणेनभर्त्रापमानितासती॥दुःखेनकालंनिर्गम
यति॥अन्यदावरुणोरावणस्याज्ञांनमन्यते॥तस्योपरिकटककरणार्थंरावणेनप्रह्लादनृपाकारणार्थंदूतःप्रेषितः॥ततःपितुराज्ञां
गृहीत्वा॥तत्रगमनोद्यतःपवनंजयोमातरंनंतुगतः॥तत्रमातुराश्रमे॥अंजनांदृष्ट्वा॥पादप्रणतांमगपितां॥अवगणय्यस्वयंसै
न्यसहितोगगनमार्गेणगत्वा॥कुत्रचित्सरोवरतीरेउत्तीर्णः॥तत्ररात्रौचक्रवाकवियोगातुरांचक्रवाकींविलपंतींभ्रमंकरुणस्वरं
रटंतींवीक्ष्य॥मत्प्रियायाअपिईदृशंदुःखंभविष्यतीतिचिंतयित्वा॥तदैवप्रहसितनाम्नामित्रेणगगनगत्याअंजनायाआश्र

वासंजगाम॥ तत्रतांशोकविह्वलांमधुरवाक्यैः समाश्वास्यतां रात्रिंतयासहभोगान्भुक्त्वानिशाशेषेस्कंधावारंगंतुसमुत्सुकोऽभू
त्॥ तदांजनाप्राह॥ स्वामिन्ममऋतुसमयोस्ति॥ ततोयदिअहंगर्भवतीभवेयं तदालोकाममभिथ्याकलंकंदास्यंति॥ ततोभिज्ञा
नार्थंस्वहस्तमुद्रिकांदापयतामिति॥ पवनंजयोपिस्वहस्तमुद्रिकांदत्वा समाश्वास्यतत्केनापि॥ अलक्षितागमनः॥ पुनःस्कंधावारंजगा
म॥ इतश्चांजनागर्भंदधानादिनेषुगछत्सुगर्भलक्षणंव्यंजयंतींकेतुमत्याश्वश्र्वाइतिप्रोचे अरेदुराचारे भर्त्तरिविदेशंप्राप्तेसति
॥ त्वयाकिमिदंकुलद्वयकलंककारिसमाचरितं॥ ततोऽजनारुदंती॥ अ[illegible]नमुद्रिकांदर्शयित्वा॥ भर्त्तुर्गुप्तागमनवृत्तांतंसर्वंकथ
यामास॥ तथापिक्रोधवशात्॥ अप्रतीयमानानांअंजनारथे आरोप्य॥ तलारक्षनरैः सहमाहेंद्रपुरोपांतवनेमोचयत्॥ दुःकर्मो
दयबलात् पितापिसदोषांतांविज्ञाय॥ वसंततिलकासखीयुक्तांस्वगृहान्निःकाशयतिस्म॥ अथसासतीकुत्रापिग्रामादिषुप्रवे
शं॥ अ[illegible]नमानास्वकर्मदोषंचिंतयंती॥ वनंजगाम॥ तत्रैकंचारणमुनिंवीक्ष्यहृष्टाप्रणमतिस्म॥ अथवसंततिलकयास्वस्वामिन्यादुः
खकारणंपृष्टोमुनिः प्राह॥ लांतकदेवलोकाच्युतोदेवोस्याः॥ पुत्रोविद्याधराग्रणीर्भविष्यति॥ ततोदुःखमाह॥ अस्यत्रपूर्वंकन
करथना[illegible]स्यलक्ष्मीवतीकनकवत्याख्यौराज्ञौअभूतां॥ तत्रप्रथमाश्राविका॥ कनकवतीमिथ्यात्विनी॥ अन्यदासपत्नीद्वे

षात्लक्ष्मीवत्यानित्यपूजनीयांजिनप्रतिमांकनकवतीप्रतिमांपश्चाद्दत्वा पश्चात्तापंचकृत्वा॥ जिनधर्माराधनपरावभूव॥ अथकोदरी
ततश्च्युत्वा॥ धर्माराधनफलेनदेवलोकेदेवीभूत्वा ततश्च्युतासतीइयंअंजनासुंदरीजाता॥ प्रतिमाहरणपापात्दुःखिनीजाता॥ इ
दानीं एतत्कर्मस्तोकमात्रंवर्त्तते॥ ततोजिनधर्मः समाराध्यतां॥ तस्मात्सर्वंसुखंभविष्यति॥ मुनेर्वचसाशांतदुःखासा॥ तत्रैववनेगंधर्व
नाथस्य॥ मणिचूलस्यशासनात्॥ गुहायांनिवसंतिपुत्रंप्रासूत॥ अन्यदातांअशरणत्वात्करुणस्वरेणरुदंतींवीक्ष्य प्रतिसूर्याख्यः खेच
रो एषाममभागिनेयीत्युपलक्ष्य॥ समाश्वास्यविमानेस्थापयित्वाचचाल॥ अथवेगगत्याविमानेगछति॥ अंजनायाउत्संगात् समुत्प
त्यसबालः पर्वतोपरिपतत्॥ देहभारेणपर्वतंचूरयामास॥ ततःप्रतिसूर्यः सहसाविमानादवनीमवलोकयन्॥ अक्षतांगंतंबा
लं॥ तत्रतेनचूर्णितंशैलंदृष्ट्वा संजातचमत्कारः॥ बालंसमादायविमानेन हनुरुहाख्यंस्वपुरंप्राप्य॥ अथजातमात्रएवायंबालोह
नुरुहपुरेआगत॥ इतिहनुमान्॥ अनेनपतताशैलश्चूर्णितइतिचश्रीशैलइत्येवंतस्यबालस्यनामद्वयंमातुलःस्थापयामास
अथपवनंजयोवरुणेनसहसंधिंविधायरावणेनबहुधासंमानितोनिजंपुरमागतः॥ तत्रस्वभार्यायावृत्तांतंश्रुत्वाविषण्णचित्तः॥
प्रह्लादोपि पुनःसंजातपश्चात्तापोविद्याधरैः परिवृतस्तस्यागवेषणार्थंपृथ्वीतलेबभ्राम॥ अन्यदापवनंजय[illegible]पितांअप्राप्य

वियोगदुःखंसोढुं असमर्थामरणार्थी काष्टमध्येप्रविश्य यावद्वह्निप्रज्वालयतिनावत्तत्रागतेनप्रह्लादेनविलोकितः वत्सकिमेत
त्वामरजनोचितंकरोषीतितेनवारितस्तावत् प्रह्लादेनपूर्वंप्रेषिताविद्याधरा अंजनांसमानीयतत्रागताः ततःसर्वेपिसानंदाः
प्रतिसूर्याग्रहात् महोत्सवेनसहहनूरुहपुरंप्रापुः तत्रप्रतिसूर्येणविविधभक्तिगौरविताःकियंतिदिनानिस्थित्वा सर्वेस्वस्व
स्थानंगतापवनंजयस्तु भार्यापुत्राभ्यांसह तत्रैवतस्थौ अथहनुमान् तत्रमातुलगृहेवर्द्धमानः क्रमेणसकलकलापारगामी
यौवनंप्राप्य अन्यदावरुणस्यसंग्रामेहनूमतोत्यद्भुतंबलंदृष्ट्वाहर्षितोरावणोबहुप्रसादचक्रे ततोवरुणस्यसुतांसत्यवतीस्व
रविद्याधरःपुत्रीच अन्याअपिबह्वीःकन्याःहनुमान्परिणयामास अथरावणःसूर्यप्रमुखान्विद्याधरान्जित्वा शक्रवत्स्वगृहे
कर्मकरान्चकार इतश्चरामस्यदंडकारण्येस्थितस्य अन्यदालक्ष्मणोवनेभ्रमन्कापिवंशजाले वलंबितंखड्गंअपश्यत् तद्गृही
त्वाकौतुकेनवंशजालंकमलनालमिवाछिदत् ततोवंशजालमध्यात् सहसापुरोतिपतितंएकंमस्तकंवीक्ष्य सौमित्रिःशोकंच
कारहामयानिःकारणंकोपिहतइति अथलक्ष्मणस्तंखड्गमादाय रामपार्श्वेआगत्ययथास्थितंअकथयत् रामोप्याह वत्सत्व
यानैतत्श्रुतंकृतं एषचंद्रहासखड्गःएतद्विद्यासाधकःपुमान्त्वयाहतः तस्यउत्तरसाधकोपिकश्चिद्भविष्यति इति इतःस्व

र्पनखास्वपुत्रंशंबूकंसिद्धविद्यंजानती पूर्णाकृतिनिमित्तंपूजोपचारंगृहीत्वा तत्रायातासती सुतंछिन्नमस्तकंदृष्ट्वाशोकान्नीबहुविल
प्य पुनस्तस्यघातकंविलोकयंती पदपंक्त्यनुसारेणरामसमीपंआगता ततोरामरूपेणमोहिता सापुत्रवैरंविस्मृत्यकामप्रार्थनां
चकार ततोहंतुसभार्योस्मिममकनिष्ठंलक्ष्मणंप्रार्थयेति रामेणोक्तेलक्ष्मणंप्रार्थयामास तेनापिपूर्वंप्रार्थितत्वात् त्वंममज्येष्ठभ्रातुःपत्नीति
निरस्कृतासती उभयभ्रष्टासापापिष्टाशिरःकुट्टयंती स्वभर्तुःखरस्याग्रेपुत्रवधवृत्तांतंकथयामास ततःक्रोधोद्धुरस्तेखरादयश्चतुर्दश
सहस्रविद्याधरैःसहरामंप्रतियोद्धुंआययुः रामोपिलक्ष्मणंज्ञातापार्श्वेत्वयास्थातव्यं अहंशत्रून्प्रतियोद्धुंयामीतिवदंतंलक्ष्मणेनोचे
आर्यत्वयाअत्रैवस्थातव्यं अहमेवतयासयाशत्रून्निवारयिष्यामीति तथैवप्रतिपद्यपुनःरामःप्राह वत्सगच्छपरंकदापिशत्रुभ्यःसंक
टंस्यात् तदासिंहनादंकुर्यास्ततोहमपिआगमिष्यामीति तद्वचोंगीकृत्य लक्ष्मणःस्वभुजास्फोटैर्द्धनुष्टंकारैःप्रतिभटान्त्रासयन्
तैःसहयोद्धुमारेभे अथसासूर्पनखागजैःसिंहमिवतारागणैःसूर्यमिव तैर्विद्याधरैर्लक्ष्मणंदुर्जयंविज्ञाय तेषांबलवर्द्धनार्थंवेगा
त्स्वभ्रातुःरावणस्यपार्श्वेगत्वाप्राह भ्रातर्दंडकारण्येकेचिद्द्वौरूप्यौरामलक्ष्मणौसमायातौस्तः ताभ्यांतवभागिनेयोविद्यांसाधय
न्हतः तद्वैरग्रहणायतवभावुकः सपरिकरोपिगतोस्ति युद्धंकुर्वन्नस्ति परंतौरामलक्ष्मणौतुदेवानामपिदुर्जयौस्तः ततोनजा

नेकिंभविष्यति॥अन्यच्चरामस्यभार्यासीतानाम्नीसातुत्रैलोक्येपिअद्वितीयरूपसौभाग्यावर्त्ततेयस्याःपुरतस्तवापिअंतःपुरमेतत्सर्वंदासी
यति॥ततःसातवैवांतःपुरेयुज्यते॥यतोभरतक्षेत्रेयद्वस्तुसारंतत्तवैवभवति॥तस्यभोक्तात्वमेवासीतिश्रुत्वा॥सानुरागोदशमुखस्तत्कालमेव॥पु
ष्पकविमानमारुह्यदंडकारण्यंगतः॥तत्रचदूरात्रश्रीतांत्रैलोक्याद्भुतरूपांवीक्ष्य॥तांहर्तुकामोपिरामतेजसाप्रतिहतप्रतापोरावणःतद
पहाराशक्तःसन्॥अहोमयाइयंकथंअपहर्त्तव्येतिविमृश्य॥अवलोकिनींविद्यांस्मरतिस्म॥ततःप्रत्यक्षीभूयतयाविद्ययाउक्तं॥वाक्रूभ्यां
समुद्रस्तीर्यते॥वह्निरपिपीयतेसर्पमुखेहस्तःक्षिप्यते॥एतत्सर्वंसुकरं॥श्रीरामचंद्रेरक्षकेसतिसीताहरणंदुष्करतरं॥किंतुएकउपायोस्ति
अयंरामोलक्ष्मणस्यसिंहनादंश्रुत्वा॥तत्कालंतत्समीपंयास्यति॥तदातवहरणावसरः॥इतिअहमेवतत्रगत्वाकृत्रिमसिंहनादंकरोमि
इत्युक्त्वानयालक्ष्मणस्येवसिंहनादःकृतः॥तच्छ्रवणाद्धालक्ष्मणस्यकष्टंपतितमितिश्रीतयाप्रेरितोरामःसद्यस्तमनुधावतिस्म॥अत्रांत
रेलब्धावसरोवराणोगगनादवतीर्यबलात्सीतांअपहृत्यहानाथहाभ्रातःहाकांतेत्यादिविलपंतीमेवविमानेप्रक्षिप्यचचाल॥ततःश्री
तायाआक्रंदंश्रुत्वाजटायुसंजातकोपःपक्षप्रहारैश्चचुनखाघातैरावणंविह्वलयामास॥रावणःक्रुद्धःखड्गेनतंछिन्नकृत्वाऽग्रेच
चाल॥ततोहाभामंडलभ्रातर्मांदुष्टाद्रक्षरक्षेत्यादिकंश्रीताविलापंश्रुत्वाभामंडलसखारत्नजटीविद्याधरःसीतांसमुपल

क्ष्यतत्पृष्ठेधावन्॥रावणेनसर्वविद्याभिश्छित्त्वाअपहृत्यभूमौपातितः॥इत्थंरावणोनिर्विघ्नतयासीतांहृत्वाकलत्रभावंअनिच्छंतींतां॥स्व
कीयेदेवरमणोद्यानेमुमोच॥इतश्चलक्ष्मणोरामंदृष्ट्वासंभ्रांतःप्राह॥आर्यसीतामेकाकिनींमुक्त्वाकिमत्रागतोसि॥तिरामःप्राह॥तवसिं
हनादश्रवणादागतोस्मीति॥ततोलक्ष्मणोपिसखेदंउचे॥मयातुसिंहनादःकृतोनास्ति॥निश्चितंकेनापिछलंकृतं॥ततःश्रीघ्रंयाहि॥वि
लोकयश्रीतां॥अहंशत्रून्हत्वासांप्रतंआगमिष्यामि॥तिरामोपितद्वचसासाशंकःसन्श्रीघ्रंआश्रमेगत्वा॥यावद्विलोकयति॥तावछीतां
नददर्श॥ततोवज्राहतइवमूर्छितःक्षणाच्चेतनांलब्ध्वाभृशंरुदन्॥इतस्ततोवनंबभ्राम॥ततोम्रियमाणंतंजटायुषंवीक्ष्यनमस्कारचतुः
शरणादिकंददौसोपिसमाधिनामृत्वादेवोभवत्॥ततोलक्ष्मणोपिखरंत्रिशिरसंदूषणंचबहुभिर्भटैःसमंनिहत्यसहायीभूतेनविराधेन
सहितस्तत्रागतोरामंम्लानमुखंदृष्ट्वाप्राहहेआर्यअहंशत्रून्जित्वाआगतःपरंसीताकथंनदृश्यते॥इतिततोरामोनेत्राभ्यांअश्रूणिमुंच
न्लक्ष्मणंसमालिंग्यगद्गदस्वरेणश्रीताहरणंप्राह॥लक्ष्मणःसखेदंहाआर्यतेनमायासिंहनादेनहूनंवंचितास्म॥सांप्रतंधैर्यंधेहि॥अ
हंतावनंतरंदोअन्वेषयामिस्वाःशुद्धिंप्राप्यपश्चादागताः॥अथरामलक्ष्मणौपातालत्रंकायांखरपुत्रंसुदंविजित्यविराधं॥राज्येस्थाप
यामासतुः॥इतश्चसाहसगतिर्विद्यांसाधयित्वा॥किष्किंधामागतः॥तत्रसुग्रीवेक्वापिक्रीडितुंगतेप्रतारिण्याविद्ययासुग्रीवरूपंकृत्वा

रांरंतु॥मिकुर्यावत्रविशति॥तावत्सुग्रीवोपिसमागतःसनुसमागछन्नेवद्वारपालैःसवलितःअस्माकंराजानुज्ञैवमध्येगतोस्तीति॥ततोवा
लिपुत्रेणचंद्ररश्मिना॥तयोःसम्यग्निर्णयंदुःकरंविज्ञाय॥द्वयोरपिछ्यंतःपुरप्रवेशोनिषेधितः॥इतश्चउभयोरपिपक्षयोःसम्यग्नि
र्णयं॥अजानंतोर्द्धमर्द्धसैनिका अमिलन्॥एवंचतुर्दशाक्षौहिणीमितंसैन्यंअन्योन्यंयुयुधे॥इतश्चदुर्गमध्यस्थेनमायासुग्रीवेणतत्सैन्य
नचमाक्षात्सुग्रीवस्तत्सैन्यंचपराभूतं ततःक्षीणास्त्रःसुग्रीवोचिंतयत्अहोमम भ्रातावालीभाग्यवान्॥योखंडप्रताप एवदीक्षांलात्वा
मुक्तियैौ॥तत्पुत्रश्चंद्ररश्मिरपिधन्योयोंऽतःपुरस्यरक्षांकृतवान्॥अहंतुअनन्यगतिकः किंकुर्वेममित्रंखरोपिरामेणहतः॥वि
राधस्यचपाताललंकाराज्यंदत्तं॥ततोहमपि॥तमेवबलिनंसमाश्रयामीतिविचिंत्य॥द्रुतसुखेनविराधंप्राप्य चसुग्रीवःशरणार्थी
रामंशरणमनिस्म॥ततोरामोपिलक्ष्मणसहितःकिंष्किंधामागत्य॥तंमायासुग्रीवंयुद्धाय आकारयत्॥ततोद्वयोरपितुल्यरूपयोस्तयोः
सत्यासत्यविभागार्थंश्रीरामोवज्रावर्तस्यधनुषटंकारंचकार॥तेनदुस्सहनादेनमायासुग्रीवस्यप्रतारिणीविद्यानष्टा॥ततोरामस्तं
मायिनंयथावस्थंदृष्ट्वाएकेनबाणेनन्यपातयत्॥ततःसत्यसुग्रीवस्यसर्वपरिछदमेलयित्वा॥महोत्सवेनतंस्वराज्येस्थापयामास॥
अथावसरंविज्ञायविराधःसपरिछदःश्रीरामांतिकंसमागमत्॥भामंडलोपिसपरिकरस्तत्रागतः॥ततोजांबवत्हनूमत्नीलनि

पदचंदनगवाक्षरभरंभादीन्सुग्रीवोमेलयामास॥अथसुग्रीवोरामादेसमाप्य॥सीताशुद्धिज्ञापनार्थंहनुमंतंकपीश्वरंलंकायांप्रेषया
मास॥अथरावणोपिबलात्कारेणपरस्त्रीनभोक्तव्याइतिनियमस्यगृहीतत्वात्॥स्वपत्न्यादिभिर्विविधोपायैःसीतांनित्यंसबोधयामा
स॥परंसीतातुतद्वचनंतृणायापिनामन्यत॥ततोविभीषणादिभिःप्रतिबोधितोपिरावणोदुष्टभवितव्यताप्रेरितत्वात्॥सीतांनमु
मोच इतश्चपवनपुत्रोगगनेगछन्॥महेंद्रपर्वतेस्वमातामहस्यमहेंद्रस्यपुरंदृष्ट्वाइतिविचिंतयत्॥अहोअनेनतातेनसतापिनिरप
राधाममभातानिर्वासिता॥तर्हिइदानींकिमपितत्फलंदर्शयामीतिविचिंत्यसिंहनादंअकरोत्॥महेंद्रोपितत्पुत्रास्सपुत्रोयुद्धार्थं
अभ्यायतन्हनूमान्॥तेनसहचिरंयुद्धंकृत्वा तंचमोहयित्वाविजित्य॥ततःस्वरूपंकथयित्वा मातामहंनत्वापुनःस्वामिकार्यंकार
णार्थंचचाल॥ततोलंकापरिसरेआशालीविद्यांहत्वा वज्रमुखंआरक्षकंचनिपात्य॥तत्पुत्रीलंकासुंदरीगांधर्वविवाहेनपरिणीयतां
रात्रिंतयासहविलस्य॥प्रभातेविभीषणस्यगृहेगतः॥ततोविभीषणस्तद्वचसारावणंबोधयितुंगतः॥इतोहनुमानपिदेवरमणोद्याने
सीतासमीपंगतः॥तत्रराक्षसीभिःपरिवृतांक्षुधाक्षीणांमलिनवस्त्रधरांनिःश्वासानमुंचंतींसीतांदृष्ट्वा॥इतिअचिंतयत्॥अहोमहा
सतीयं॥यस्याःकृतेरामोमहदुःखंकरोति॥तत्सत्यंअस्यादर्शनात्॥अद्यादमपिपविभूतःइतिविचिंत्यगुप्तःस्थित्वाश्रीरामस्यअभि

203/1962

ज्ञानमुद्रां॥तस्याउत्संगेक्षिपतिस्म॥सापिमुद्रांदृष्ट्वाउपलक्ष्यकिंचित्पुलकितांगीहर्षिताइवाभवत्॥ततस्त्रिजटाराक्षसीतांप्रसन्नांवी
क्ष्यगत्वारावणाय॥अकथयत्स्वामिन्नद्यनूनंशीतयारामवियोगजःशोकस्त्यक्तोदृश्यते॥तन्मन्येएषात्वयिसानुरागाभविष्यतीतिउक्ता
स्यादुत्सुकोदशमुखो॥दूतकर्मकरणार्थंमंदोदरीं॥तासमीपेप्राहिणोत्॥ततोमधुरोक्तिपूर्वकंलोभयंतियाहिपापिष्टेपतिंदेत्य
विधायिनिइत्यादिवाक्यैःसीतयाधिक्कृतामंदोदरीविछायवदनायथागतंययौ॥अथहनुमान्शिंशिपावृक्षात्समुत्तीर्यशीतायाःपा
दौप्रणम्यप्राह्मातस्तवभर्ताराम़ोलक्ष्मणयुतःकुशलीवर्त्तते॥अहंतुपवनांजनयोःपुत्रोहनुमान्श्रीरामसेवकोस्मि॥तस्यैवादेशा
त्तवशुद्धिग्रहणार्थंआगतोस्मिइतिश्रुत्वाप्रमुदिता॥तस्मैआशिषंदत्वाभर्तुःकुलशोदंतप्रश्नपूर्वकंहनुमतोमुखात्सर्ववृत्तांतंश्रुत्वा
न्॥ततोहनुमदाग्रहात्॥एकविंशत्यहोरात्रांतेशीतापारणंचकार॥ततःसीतायाश्चूडामणिंअभिज्ञानंगृहीत्वाचलितःसन्किंचि
त्पराक्रमदर्शनार्थं॥देवरमणोद्यानस्यवृक्षान्भंजन्वनपालांश्चमारयन्॥ज्ञातवृत्तांतेनइंद्रजिन्नाम्नारावणपुत्रेणविरंधुधा॥ना
गपाशैर्बध्वा॥रावणस्यसभायामानीतः॥ततरावणेनसामर्ष्यंआक्रोशितः॥तत्क्रोधात्रटितिनागपाशान्त्रोटयित्वा॥पादघातैरा
वणस्यमुकुटंचूरयित्वापुरींभक्त्वा॥गगनमार्गेणउत्प्लुत्य॥रामायप्रणम्यशीताभिज्ञानंचूडारत्नंसमार्पयत्॥रामोपितंचूडामणि

समाश्लिष्यमारुतात्सीतायामिलनसुखंमेनेहनूमंतंचगाढप्रेमालिंगनादिभिःसंभावयामास॥अथश्रीरामादेशात्प्रयाणिःआनंदा
दनपूर्वकंसुग्रीवादयोविद्याधरपतयोविमानसमूहैराकाशंछादयंतोरामलक्ष्मणौपुरस्कृत्यलंकांप्रतिप्रतस्थिरे॥ततःसमुद्रतटेरावण
सुभरोबलोत्कटोसितुसमुद्रनामानौयुध्यमानौश्रीरामोबबंध॥ततोग्रेसुवेलपर्वतेसुवेलनामानंपार्थिवंततोहंसाख्येतटेहंसरथंनृपतिंच
जित्वा॥लंकायाःपरिसरंप्राप्य॥अथरामलक्ष्मणोपिवहुसैन्यंलीत्वालंकायांचचाल॥क्रमेणसमुद्रतटेप्राप्त॥तदारामलक्ष्मणौमनसिचिंतितं
अहोसमुद्रस्यकेनोपायेनलंघयामि॥इतिरात्रौविचारयामास॥ततोप्रातःसमयेसमीपस्थोएकवनेदृष्ट्वारामलक्ष्मणयोतत्रवनमध्येक्रीडार्थंग
तः॥ततःउत्तंगतोरणसहितंद्विपंचाशज्जिनालयसहितमेकप्रासादंददर्श॥तन्मध्येप्रवेशकृतः॥मूलनायकत्रिविंशतमतीर्थंकरदेवा
धिदेवश्रीपार्श्वबिंबंदृष्ट्वारूदिहर्षवशात्॥जिनस्यप्रणामंकृत्वा॥तद्यथा॥बुद्धस्त्वमेवविबुधार्चितबुद्धिबोधात्॥त्वंशंकरोसिभुवनत्रयशंक
रत्वात्॥धातासिधीरशिवमार्गविधेर्विधाना॥व्यक्तंत्वमेवभगवान्पुरुषोत्तमोसि॥१॥तुभ्यंनमस्त्रिभुवनार्त्तिहरायनाथ॥तुभ्यंनमःक्षितित
लामलभूषणाय॥तुभ्यंनमस्त्रिजगतःपरमेश्वराय॥तुभ्यंनमोजिनभवोदधिशोषणाय॥२॥इत्यादिनवरकाव्यैर्नित्यंस्तुवंति॥पूजांकरो
ति॥एवनित्यपूजाभिग्रहंकृतंतथापूजानंतरेश्रीरामलक्ष्मणौकर---मस्तकेअंजलिंकृत्वा॥उदस्थेवं॥हेनाथममनोवांछितंकुरु॥

नित्यमेव प्रज्ञानंतरं विघ्नयंते ॥ ततोनवदिनाधिकसप्तमासेधिष्ठायकपार्श्वयक्षप्रगटीभूयकथयति ॥ अहंत्रायवंनपुरुषोत्तमतवभक्ति
तुष्टोस्मिहं तवमनोवंछितंसफलीभविष्यति ॥ एवंकथयित्वादर्शीभूत ॥ ततोरामलक्ष्मणौकार्यसिद्धिर्लीलामरूलरूपेप्राप्य ॥ ततोस
मुद्रतटेगत्वादर्शयति ॥ जलनिश्चलपृथ्वीवत् दृष्ट्वा हृष्टदेगश्रीपार्श्वप्रभुनामउच्चारेणसेतुबंधयित्वासमग्रसैन्यायांसमुद्रोलंघ्य
लंकायाः परिसरं प्राप्य ॥ अथससैन्येरामेउपागतेलंकायांमहानूक्षोभोभूत् ॥ तदाविभीषणः कनिष्ठोपिगुणैर्ज्येष्ठोरावणंप्रणम्यप्रा
ह ॥ हेदेव त्वयाप्रथममेव अविचारितंकृतं यतः सर्वजनपूज्यस्यरामचंद्रस्य भार्या ॥ शीतामहासती हृता ॥ तथापिसांप्रतंइहागताय तस्मै
श्रीघ्रंएनांपश्चात् अर्पय ॥ यदिवनार्पयिष्यसि ॥ तर्हि इंद्रादिभिर्देवैरपिअनुल्लंघ्याएषाविराधितासती समस्तराक्षसकुलकंदछेद
नेकुठारिका भविष्यति ॥ किंचयस्य दूतमात्रेणापिहनुमताकिंकिबलंदर्शितं ॥ तदातत्स्वामिनोरामस्यकिंवक्तव्यं ॥ येनक्षणमात्रा
त् समुद्रसेतु ॥ तवमहाभटोबद्धो ॥ तद्दर्शनादपिकथंनप्रबुध्यसीत्यादिस्ववैरिरामप्रशंसयाक्रुद्धोदशाननोरेरेबांधवाधमत्वम
पितस्यदुष्टस्यपक्षपाती असि ततोनिर्गच्छमत्पुरतस्तार्श्वएवयाहीत्युक्त्वा ॥ निकासितोविभीषण ॥ रामसमीपमागत्यराममेवशर
णीचक्रे ॥ ततोबि[illegible]षणेन [illegible] त्रिंशदक्षौहिणीमितान् ॥ राक्षसभटान् ॥ समान्य विभीषणायचलंकाराज्यप्रदानंप्रतिश्रु

त्य ॥ अथराघवः सेनाभरैः पृथ्वीकंपयन्नागत्यलंकांवेशयामास ॥ अथरावणस्यकोटिशः सैनिकास्तदेवसन्नह्य ॥ स्वपौर्यमदोद्धुराभुजास्फ
स्फोटंकुर्वंतोभ्यापतन् ॥ ततोरामरावणसैन्ययोः ॥ परस्परं शिलामयैलोहमयैवृक्षमयैश्चशस्त्रैर्महान् संग्रामः प्रवृत्तः ॥ तत्रचशरपाषा
णसंघट्टोद्भवोवह्निर्वृक्षान् दहन् रणनार्थिमृतानांदाहसंस्कारायाभवत् ॥ एवंमहारणेजायमाने अन्योन्यजयवांछयाजयलक्ष्मीः सं
देहदोलाश्रिताबभूव ॥ ततोराक्षससैन्यंबलोत्कटंविज्ञाय ॥ श्रीरामेण असंज्ञयाप्रेरिताः ॥ पवनपुत्रादयोभटारणायप्रावर्तंत अथ
तैर्महाबलैराक्षसबलेपराभूतेसतिरावणभटौहस्तप्रहस्ताख्यौबाणधाराः स्रवंतौप्रत्युद्यातौ ॥ ततोरामसैन्यादपिनलनीलौसंमुख
मागत्ययुद्धंचक्रतुः ॥ ततस्तेषांरथनिर्घोषान् असहंतीपृथ्वीरथचीत्करमिषात् फूत्कारंकुर्वतीति ॥ अलक्ष्यत अथैवंचिरंयुध्वानलो
हस्तं ॥ नीलश्च प्रहस्तंनिपातयामास ॥ ततस्तयोरुपरिदेवैः पुष्पवृष्टिः कृता ॥ अथहस्तप्रहस्तमरणाकुपिताराक्षसामारीचि ॥ १ ॥
सिंहजघन ॥ २ ॥ स्वयंभू ॥ ३ ॥ सारण ॥ ४ ॥ शुक ॥ ५ ॥ चंद्रार्कौ ॥ ६ ॥ द्दाम ॥ ७ ॥ बीभत्स ॥ ८ ॥ काम ॥ ९ ॥ मकर ॥ १० ॥ ज्वर ॥ ११ ॥ गंभीर ॥ १२ ॥ सिंहरथ
दयो ॥ १३ ॥ नेकेरणक्षेत्रमाययुः ॥ तांश्चरामसैनिका ॥ मदं ॥ १ ॥ नाकुर ॥ २ ॥ सना ॥ ३ ॥ पत्रथिता ॥ ४ ॥ कौशलंदन ॥ ५ ॥ दुरित ॥ ७ ॥ तानय ॥ ८ ॥ पु
ष्पा ॥ ९ ॥ स्वविघ्नं ॥ १० ॥ प्रीतिंकरादयोचिरंयोधयित्वा ॥ व्यापादयामास ॥ ततः सूर्योप्यस्तंययौ ॥ सैन्[illegible] पिस्वस्वस्थानंप्रापुः ॥ अथ

प्रभाते रावणसैन्यात्॥ अनेके राक्षसवीरा रणांगणमाययुः॥ तथैव राघवसैन्यादपि प्लवंगमाः॥ ततस्ते महावीरा वीररसपूरिताः शरवृ
ष्टिभिर्गगनं छादयंतः॥ सिंहनादैर्दिग्मुखानि प्रतिशब्दयंतः॥ पादाघातैश्च पृथ्वीं कंपयंतोन्योन्यास्त्रसंघर्षसमुद्भूताग्निस्फुलिंगदारु
णं महारणं प्रचक्रिरे॥ ततो रावणप्रेरणात्प्रवृद्धोत्साहा राक्षसा वानरभटान्बभंजुः॥ अथ तान्भग्नान्वीक्ष्य क्रुद्धः सुग्रीवः स्वयं रणो
द्यतोभवत्॥ तं रणोद्यतं निषिध्य हनूमान्॥ स्वयं महापराक्रमामंथानदंडको गोरसमिव राक्षससैन्यमभ्यगाहत॥ अथो राक्षससै
न्यात्॥ माली मेघ इव गर्जन्क्रोधात् हनुमंतं योद्धुं अधावत तयोः प्रलयकालीनसूर्ययोरिव दुरालोकयोः परस्परं प्रहरतोः अन्यो
न्यस्यास्त्राणि छिंदतोश्चिरेण हनुमान् मालिनं निरस्त्रं चकार॥ तावद्वज्रोदरराक्षसोंतराले हनुमंतं योद्धुं उपतस्थौ॥ हनूमानपि बाण
श्रेणीस्तं प्रति निक्षिपन्॥ क्षणात् जलधरो जलधाराभिः पर्वतमिव तं छादयामास॥ ततश्चिरं युद्ध्यमानयोः तयोः अहो तुल्यपराक्रमौ
वीरौ इति॥ एकोपि नापसरति स्म... ... असहमानो॥ वायुपुत्रो वज्रोदरं क्रोधान्निपातयामास॥ ततो वज्रोदरवधात्क्रु
द्धो रावणात्मजो जंबुमाली॥ हनुमंतं युद्धाय प्रत्याकारयत्॥ हनुमानपि... लित्वा निरंतराः शरवृष्टिभिस्तस्य सारथिं रथतुरंगांश्च निह
त्य॥ मुद्गरप्रहारेण तं शिर... ...न् मूर्छां प्राप्ते महोदर वृषोन्येवद्वीरा राक्षसवीरा हनुमंतं योद्धुं दधाविरे॥ ततो हनु

मान् तान् कांश्चिद्दंतैः कांश्चित्करांतरे कांश्चिच्च पादांतराले विक्षेप कांश्चिच्च शरैर्यममंदिरं प्रापयत्॥ एवं रक्षःसैन्यविमर्दनं वीक्ष्य असह
मानः कुंभकर्णो निकुंभः शूलपाणिर्हनुमंतं प्रत्यधावत॥ ततो वानरसैनिकान्मथमानं तं कुंभकर्णं आयांतं वीक्ष्य वानरेश्वरः सुग्रीवः
कुमुदांगदमहेंद्रादियुतः संमुखमाययौ॥ अन्येपि भामंडलादयो वीराः शस्त्रश्रेणीभिस्तं रुरुधुः ततः कुंभकर्णः स्वापशस्त्रविद्यया ते
षु वानरभटेषु निद्रां मुमोच तेन कृत्वा निद्रालुभिषु वानरभटेषु सुग्रीवः प्रबोधिन्या विद्यया पुनस्तान्॥ जागरयित्वा पुनर्युद्ध्यमानो ग
दया कुंभकर्णस्य रथं रथतुरगांश्चाचूरयत्॥ ततः संजातरोषः कुंभकर्णोपि समुत्पत्य मुद्गरघातैर्जीर्णभांडमिव सुग्रीवस्य रथं चूरया
मास॥ ततः सुग्रीवोपि शिलास्त्रं मुमोच॥ तच्च कुंभकर्णो मुद्गरघातैर्जीर्णभांडमिव सुग्रीवमुक्तेन विद्युदस्त्रेण पीडितः कुंभकर्णो मूर्छां प्रा
प्य॥ ततो भ्रातरं मूर्छितं वीक्ष्य॥ क्रोधाद्रणोद्यतं रावणं निषिध्य॥ इंद्रजित् संग्रामांगणमाययौ॥ अथ तं वानरसेनां गाहमानं वीक्ष्य सुग्री
वो रुधत्॥ एवं तत्कनिष्ठं मेघवाहनं भामंडलो युध्यत॥ एवं ते चत्वारोपि महावीराः पादाघातैः सुरासुराणां मनसि पृथ्वीं नगभयं जनया
मासुः॥ ततस्तौ इंद्रजिन्मेघदेवौ तौ सुग्रीवं भामंडलं च नागपाशैर्बबंधतुः॥ इतश्च कुंभकर्णोपि चेतनां प्राप्य क्रोधात्॥ हनुमंतं गदया प्रहृत्य
कक्षाकोटरे क्षिपत्॥ अत्रांतरे अंगदः कुंभकर्णं युद्धार्थं प्रत्याकारयत्॥ तत्क्रोधात् तु... ...हनुमाश्चिर्गतः॥ अथ बिभीष

णा॥श्रीरामेनत्वासुग्रीवभामंडलमोचनार्थं॥वेगात् अधावत॥ततोनेनतानतुल्येनयुद्धकरणं अयुक्तमितिविमृश्यैव॥इंद्रनिर्मितवाहनैरणां
गणात् अपसृतौ॥अथरामः पूर्वप्रतिपन्नंगरुडदेवं अस्मरत्॥सोप्यवधिनाज्ञात्वा॥तत्रागत्यरामायसिंहनिनदांविद्यांरथं हलं मुशलं
चलक्ष्मणायचविद्युद्वदनांगदांगारुडींविद्यां अपराण्यपि अस्त्राणिदत्वासमाश्वास्यचस्वस्थानंययौ॥अथलक्ष्मणस्यविद्याकृतंगरुडं
वाहनंदृष्ट्वासुग्रीवभामंडलयोः पाशपन्नगाद्दूरंययुः॥ततोराममैन्येतयजयारवोरावणसैन्येक्षानिश्वदभूव॥अत्रांतरेसूर्योप्यस्तंगतः
पुनःप्रभातेराक्षसबलंभग्नंवीक्ष्यक्रुद्धोरावणः शक्रजित्कुंभकर्णादिपरिवृतः॥स्वयंयुद्धायउपतस्थौ॥ततोयुद्धकरणोद्यतंरामंप्रतिवि
द्य॥विभीषणोरावणसंमुखंगत्वाइतिप्राह॥हेभ्रातः॥अद्यापिममवचनंमन्यस्वजानकींमुंच॥रामोयंतवकुलकृतांतः समुपस्थितएव ततो
मुंच॥सर्वस्वविनाशकंएनंकदाग्रहमिति॥ततोरावणः अरेवनेचरकिंकरकिंमांएवंभाषयसि॥इदानींएनंवनेचरंत्वांचहन्मिइति॥तत
स्तौद्वावपिवीरवौ बीरौ॥शस्त्रैर्द्वंद्वान् वर्षतौ॥त्रैलोक्येपिक्षोभंजनयामासतुः॥अथरामः कुंभकर्णलक्ष्मणइंद्रजितंनीलः सिंह
जघनंदुर्मर्षघटोदरं॥स्वयंभूर्दुर्मतिंनलकपिः शंभुअंगदोमयंस्कंदश्चंद्रणरवंविराधोविघ्नचइत्येवंतेवाराद्वंद्वयुद्धेनयुयुधिरे॥इत्ये
वंवानरराक्षसभटानामर [illegible] इंद्रजित्लक्ष्मणंप्रतितामसंशस्त्रंमुमोच॥लक्ष्मणस्तपनास्त्रेणतन्निवार्य॥नागपाशेन

बंधं अधास्वसैन्यंसमानयत्॥रामोपिकुंभकर्णंएवमन्येपिकपिवीरा॥अन्यान् राक्षसान् बध्वास्वसैन्येसमानिन्युः॥अथतद्दृष्ट्वारावणो
तिक्रुद्धोविभीषणवधायशूलंक्षिपतिस्म॥तत्रलक्ष्मणः शरेणंकृत्वाअंतरालेएवचिच्छेद॥ततः क्रोधाध्मातोदशाननोधरणेंद्राःर्पि
तां अमोघांशक्तिंधगद्धिगितिज्वालांमुंचतीं॥हस्तेगृहीत्वाआकाशेभ्रमयत्॥अत्रांतरेरामस्यभावंविज्ञाय॥लक्ष्मणोवेगाद्विभीष
णाग्रतः स्थित्वारावणंआक्षिपत्॥अथरावणस्तंगरुडारूढंवीक्ष्य॥कोपारुणलोचनः कल्पांतवज्रधारोपमांशक्तिंमुमोच॥साच
शक्तिःपैर्यार्यमाणापि॥अमोघपातानानिसर्वाण्यवगणय्य॥लक्ष्मणस्यउरसिपतीता॥तद्धाताल्लक्ष्मणोपिमूर्छांप्राप्य॥स्वसैनि
कानांमनोरथैः सहभूमौपपात॥ततः श्रीरामोदेवताःर्पितसिंहरथस्थितोरावणेनयुद्धतिस्म॥क्षणात् रावणस्यपंचरथान् ब
भंज॥ततस्तस्यबलं असहमानोरावणः॥पश्चाद्वलित्वास्वसैन्यंजगाम॥अथरात्रौलक्ष्मणविगतचेतनंवीक्ष्यरामोतिशोकान्मूर्छि
तःपुनश्चेतनांप्राप्य॥इत्याह॥हेभ्रातर्नयुज्यतेतवैतत् यत् शत्रुसैन्यं अनिर्जित्य॥सीतां अप्रालयत्वा प्रियंप्रतिज्ञातंलंकाराज्यंविभी
षणाय अदत्वामांचशत्रुवेष्टितं अबांधवंएकाकिनंमुक्त्वा॥एतदवस्थांप्राप्नोसि॥अथवानायंतवदोषः किंतुममैवायंदोषोय
त्त्वेदशीअवस्थांवीक्ष्य॥अद्यापिजीवामीतिहेसुग्रीवहेपवनात्मजहेचंद्ररश्मे॥हे [illegible] नभवतयूयंनस्फुरतिकां

प्युश्चायोमिश्रन्यविनस्यनिवेद्यतामिदानीं यत्कर्त्तव्यमित्यादि दुःखार्त्तविलापान् श्रुत्वा विभीषण: प्राह॥ स्वामिन् कातरत्वं त्यज किमनेन
नपामरजनोचितेनशोककरणेनधैर्यंधार्यंकिंच॥ शक्त्याहतः पुमान्॥ एकरात्रिंयावज्जीवति॥ ततः सूर्योदयात्पूर्वंउद्यमःकर्त्तव्यो
स्य॥ इतितद्वचसारामः सुग्रीवादयश्च धृतधैर्याः संतोविद्याबलेन स्वसैन्यस्य परितश्चतुर्द्वारान्॥ सप्तप्रकारान् चक्रुः॥ ततः सुग्रीवांग
दचंद्ररश्मिभामंडलप्रभृतयः स्वामिभक्त्यातंप्रकारं वेष्टयित्वास्थिताः॥ अथ भामंडलमित्रं॥ भानुविद्याधरोरामंभक्त्याइतिप्राह
स्वामिन्नयोध्यतोद्वादशयोजनदूरे द्रोणाख्यंपत्तनमस्ति॥ तत्रैकेकस्याभ्राता॥ भरतमातुलोद्रोणनामानृपोस्ति॥ तस्यविशल्यानाम्नी
पुत्रीवर्त्ततेतस्याः करस्पर्शमात्रेणैवदेहाच्छल्यंनिर्याति॥ यदिदिनोदयात् प्रथममिवसा॥ आयातितदालक्ष्मणः सज्जोभवतीतिश्रुत्वा
सोत्साहः श्रीरामोंगदंभामंडलंहनूमंतंच॥ भरतंप्रतिप्राहिणोत्॥ तेपिविमानेनवेगादयोध्यांगत्वा॥ भरतंप्रबोध्य सर्ववृत्तांतंकथ
यामासुः॥ भरतोपितत्क्षणाद्विमानमारुह्यतैः समंतत्रगत्वाद्रोणनृपंविशल्यांकन्यांअयाचत॥ द्रोणनृपोपितत्प्रार्थनया आत्मानंधन्यं
मन्यमानः कन्यासहस्रयुतांविशल्यांददौ॥ अथतेअंगदादयः कृतकृत्याः संतो भरतंपुनरयोध्यायामुक्त्वाकन्याः समादायवेगाद्वि
मानिकंपयुः॥ अथविशल्यायाः [illegible] शंकाभीतारामादयोहनुमतायथावृत्तस्वरूपकथनेनप्रमोदं प्रापिताः॥ अथवि

शल्यायाः करस्पर्शमात्रादेवलक्ष्मणदेहान्निर्गत्यउत्पतंती शक्तिः पवनात्मजेन चटकाइवकरेधृतासती॥ इत्युवाच॥ अहोधीरमुंचमां॥ ना
स्त्यत्रमेपराधः अहंतुभ्रातापारवश्यात् इहागतापरंविशल्यायाः पूर्वभवतपोबलं असहमानागच्छामि॥ अहंचप्रज्ञप्तिविद्यायाभगिनी
अस्मीत्यादिवदंती॥ हनुमतामुक्तासती पलायित्वादूरंययौ॥ अथप्रजप्ताः स्नानजलेनसिक्तोलक्ष्मणोरूढव्रणपदः सुप्तोत्थितइवस
ज्जीभूयोत्थितः॥ ततः श्रीरामोपिमहर्षलक्ष्मणमालिंग्य॥ रात्रिंव्यतिकरंसर्वंनिवेद्यच॥ कन्यासहस्रमहितांविशल्यां॥ लक्ष्मणेनउद्वाहय
त्॥ तस्याः स्नानजलेनअन्येपिविद्याधरजटारूढव्रणपदानि शल्यदेहाश्चबभुवुः॥ ततः श्रीरामसैन्येमहान् उत्सवः प्रावर्त्तत॥ अथ
रावणोपिलक्ष्मणंजीवितंश्रुत्वाहृतोत्साहः पुनरपिबहुरूपयाविद्याया आत्मनोविजयंनिश्चित्यपुरांतरे॥ श्रीशांतिनाथचैत्येमहापू
जांविधाय॥ अष्टाह्निकांयावत्तांविद्यांसाधयामास॥ अष्टदिनानिचयावत्॥ मंदोदरीवचसा पुरलोकोधर्मपरोभूत॥ अथरावणोविद्या
सिद्धिंप्राप्य॥ प्रभातेस्वुत्कटसैन्यइतोरणांगणंसमाजगाम॥ ततस्तयोः सैन्ययोः सुभटकोटि[illegible]संग्रामोजायत॥ अथल
क्ष्मणोन्याय्रराक्षसान्मुक्तानिरंतरबाणवृष्टिभिर्दशाननंताडयामास॥ अथा------कुद्धीभूतोरावणस्तयाविद्ययास्वस्य
बहूनिरूपाणिचकार॥ ततः सएकोप्यनेकरूपोगगनेपृथि-------------------------व्यांपार्श्वतः पृष्टतोग्रतोपिच

ददर्श ॥ ततो लक्ष्मणएकोप्यनेकवीर्यस्मात् रावणान् बाणट्टस्याजघान ॥ तैः शरैर्भृशं व्याकुलीभूतो रावणः स्वस्यजीवनसर्वस्वमिव चक्रं
अस्मरत् ॥ अथतत्कालमुपस्थितं ज्वालामाला[illegible] तच्चक्रं भ्रमयित्वा क्रोधाल्लक्ष्मणं प्रतिमुमोच ॥ ततः पश्यतां सुरासुराणामपि भयं
करं तच्चक्रं विगाल्लक्ष्मणसमीपमागत्य ॥ प्रदक्षिणात्रयं कृत्वा ॥ लक्ष्मणस्य हस्ते जगाम ॥ ततो लक्ष्मणोपि तद्देवचक्रं भ्रमयित्वा रावणं
प्रति मुमोच ॥ तेन चक्रेण दृढिताडितो रावणो ज्येष्ठकृष्णैकादशी दिने ॥ चतुर्थप्रहरे मृत्वा चतुर्थनरकं गतः तं देवजयजयशब्दोद्घोष
णपूर्वकं सुरसमूहा ॥ लक्ष्मणोपरि सुगंधपुष्पवृष्टिं च कुः ॥ वासुदेवपदख्यातिं च प्रकटयामासुः ॥ ततो विभीषणः स्वज्ञातित्वात्
भयत्रस्तान् ॥ राक्षसान् समाश्वासयन् ॥ ततः श्रीरामेण मुक्ताः कुंभकर्णेंद्रजिन्मेघवाहनाद्या राक्षसा रावणमृतकार्यं कृत्वा ॥ मंदोद
र्यादि सहिता ॥ अप्रमेयबलस्य मुनेः पार्श्वे दीक्षां जगृहुः अथ श्रीरामो निःकलंकां शीतां प्राप्य ॥ प्रीतचित्तो विभीषणोक्तमार्गेण म
होत्सवपूर्वकं लंकां पुरीं [illegible] ततः पूर्वप्रदत्तं लंकाराज्यं विभीषणाय दत्वा ॥ षट्वर्षाणि यावत्तत्र स्थित्वा ततो मातृवर्गमिलनोत्कं
ठितो विमानमारुह्य शीतालक्ष्मणादियुतो योध्यां प्रति चचाल ॥ ततो पूर्वं समुद्रतीरे यत्र श्रीपार्श्वपरमेश्वर जिनालयोस्ति ॥ तत्रैव
समागता विविध[illegible] कृत्वा [illegible] कमहोत्सवं विदधाति स्तुवंति ॥ तद्यथा ॥ फणिफणफारफूरं तरयणकरंजिय

॥२६१॥

नहयल ॥ फलिणीकंदलदलनमालनीलुप्पलसामल ॥ कमठासुरउवसग्गवग्गसंसग्गअगंजिय ॥ जयपच्चरकजिणेसपासथंभणयपु
रठिय ॥१॥ तत्र श्रीथंभणपार्श्वनाथमितिनाम्नातीर्थं जातः ॥ अथ विंध्यभूमौ इंद्रजिन्मेघवाहनौ सिद्धिं गतौ ॥ तत्र मेघरथाख्यं तीर्थं ब
भूव ॥ नर्मदायां कुंभकर्णः सिद्धिं प्राप्य ॥ तत्र पृथुरक्षितमितिनाम्नातीर्थं बभूव ॥ इत्थं च मार्गे नानातीर्थाश्चर्याणि विलोकयन् श्रीरामः स
परिकरः क्रमादनेकोत्सवभूषितां ॥ अयोध्यां प्राप ॥ ततः संमुखमागतं प्रणमंतं भरतं शत्रुघ्नं च श्रीरामो लक्ष्मणश्च समालिंगतुः ततः पौ
रस्त्रीभिर्वर्द्धाप्यमानौ महाडंबरेण पुरं प्रविश्य ॥ मातृवर्गस्य पादान् प्रणेमतुः ॥ भरतोपि रामस्य न्यासमिव स्वयं रक्षितं राज्यं पुनः श्रीरामाय प्र
त्यार्पयत् ॥ अन्यदा देशभूषणमुनेर्मुखात्पूर्वभवान् श्रुत्वा विरक्तो भरतो व्रतं जग्राह ॥ क्रमेण निर्दोषं व्रतमाराधयन् ॥ अन्यदा श्रीशत्रुंज
याद्रिमहिमानं श्रुत्वा ॥ सहस्रमुनिभिः सह तत्र गत्वा श्रीयुगादिजिनं नत्वा ध्यानांतरं समाश्रित ॥ कर्मक्षयं कृत्वा केवलं प्राप्य ॥ तैर्मुनिभिः स
ह मुक्तिं प्राप्य ॥ अथ तत्र रामलक्ष्मणाभ्यां यात्रोद्धारध्वजदानादिकं पुण्यं अकार्यत ॥ ततः सीतास्वस्य लोकापवादकलंकं वह्निदिव्यनिदर्श
नेन निवार्य दीक्षां गृहीत्वा ॥ दुस्सहं तपस्तप्त्वा ॥ अच्युतेंद्रपदं प्राप्य ॥ हनुमानपि चिरं राज्यं भुक्त्वा ॥ ततः पुत्रं राज्ये संस्थाप्य ॥ दीक्षां गृहीत्वा
मुक्तिं प्राप्य ॥ अथान्यदा भ्रातृस्नेहपरीक्षार्थमागतयोः सुरयोर्मुखाद्रामस्य मरणो[illegible] नांतो लक्ष्मणस्तत्क्षणमेव मृत्यु

माप्य॥ततोवैराग्यात्॥श्रीरामपुत्रौलवकुशौअपिव्रतंगृहीत्वा॥क्रमात्मुक्तिंप्रापतुः तच्छोकात्दुःखितंरामंविज्ञायजटायुर्देवस्तत्रागत्यप्रतिबोधयामास॥ततोलक्ष्मणस्यमृतककर्मकृत्वातत्पुत्रंअनंगदेवंराज्येस्थापयित्वाश्रीरामःस्वयंशत्रुंप्रविश्य॥षणसुग्रीवादिभिःषोडशसहस्रनृपैःसार्द्धंदीक्षामादाय॥अप्रतिबद्धतयाविहरन्क्रमात्कोटिशिलायांकेवलंलेभे॥ततःकेवलप्रकाशेनभव्यजीवानांअज्ञानतमोहरन्॥शत्रुंजयादितीर्थेषुविहृत्यपंचदशसहस्रवर्षाण्यायुःप्रपूर्यःक्रमात्॥अव्ययानंतपदंप्राप्यशत्रुंजयाद्राविति तत्रकालेयपुः॥शिवंश्रीभरतादिभूपाःअतोधिकंतीर्थमिदंसुसेव्यमस्मात्द्रुतंमुक्तिनिबंधनंयत्॥१॥ ॥ ॥इतिश्रीशत्रुंजयमहात्म्योल्लेखे श्रीपंडितश्रीहंसरत्नविरचिते॥दानवदृनिमत्तापुरुषचरितवर्णनानामनवमोधिकारः॥९॥ ॥ ॥कल्याणकत्रयाश्री बैः॥प्राक्पुण्योपि यत्र[illegible]॥गिरिनारगिरिर्यत्रसनेमिःश्रेयसेस्तुनः॥१॥अथश्रीसौधर्मेंद्रःश्रीवीरंनत्वाइतिव्यजिज्ञपत्॥स्वामिन् श्रीशत्रुंजयमुख्यंशृंगमाख्यातं॥भगवताअयंमहिमाप्रकाशितःतस्यश्रवणात्अस्मदादयःसभासदःसर्वेपिपावनाजाताः॥परंअस्यपर्वतस्यचान्यशेषेनरश्रतशृंगाणिसंति॥तेषुचएकविंशतिर्मुख्यशृंगाणि॥तेषांमपियस्यशृंगस्यमहिमाधिकःतंश्रोतुंइच्छामियेनश्रुतमात्रेणश्रोतृ[illegible]पापानिविलीयंते॥ततःप्रसादंकृत्वातत्प्रकाशयंतुभगवंतःइतिशक्रेणप्रार्थितोभगवान्श्रीवी

रःसर्वप्राणिनांउपकारायवक्तुंप्रारेभे॥शृणुशक्रश्रीसिद्धाद्रेःपंचमंशृंगंश्रीरैवताचलंसेवात्पंचमज्ञानदायकःयोसौश्रीशत्रुंजयइवानंतसौख्यप्रदोगणितमहात्म्यश्च॥तथाहि॥यत्रदानानिदत्तानिअक्षयपुण्यफलानि॥लोकद्वयहितानिचभवंति॥यथासूर्योतपेनवनीतपिंडोगलति॥तथैवएतस्मिन्तीर्थदृष्टेचिरकालसंचितोपि॥पापपिंडोगलति॥अत्रचानेकेसिद्धविद्याधरगंधर्वादयोध्यानैकाग्रमनसोभूत्वाश्रीनेमीश्वरमाराधयंतियत्रचतीर्थानुभावादेवनित्यंवैराअपिजंतवोन्योन्यंमैत्रीभावंप्रकटयंति॥यत्रर्तवोपिसर्वेसर्वकालंस्वस्वभावान्प्रकटयंतः॥श्रीनेमिंसेवंतेयस्यचतत्सुदिक्षुचत्वारोमहाशैलाश्चतस्रोमहानद्यश्चचतुर्दिगायातान्जनान्समाश्वासयितुंस्थिताइवशोभंते॥यत्रचगजेंद्रपदादीनिकुंडानिअमरैरमरत्वाय्अमृतभृतानिविकृतानिराजंते॥यत्रचस्थानेस्थानेसुवर्णसिद्धिकारिण्योरसकूपिकाःसंतितात्तुच्छपुण्यैर्नवीक्ष्यंते॥किंबहुना॥अयंपर्वतःस्मृतएवसुखंददाति॥दृष्टःकष्टंहरतिस्पर्शनाच्चसर्ववांछितानिददाति॥श्रीनेमिनात्रिलोकनाथेनसनापि॥अन्यस्थानपरित्यागात्॥अयमेवगिरिराश्रितःतस्यमहिमानंवक्तुंकःसमर्थःस्यात्॥बृहस्पतिरपिसमुद्रवालुकाकणप्रमिताभिर्जिह्वाभिःकृत्वायदियावज्जीवंएतत्तीर्थमहिमानंवक्तितथापिपारंनप्राप्नोतिकेवलज्ञानी॥अपिकेवलज्ञानेनज्ञात्वापि॥अस्यमहिमानंवदन्पूर्वकोट्यायुःपूरयतितथापिपारंनाप्नोतिअस्यैवमहात्म्यख्यापकंकथानकमेकंशृणुत॥तथाहि॥पूर्वमहि

217/1962

इनामाचतुर्थदेवलोकपतिः चैत्रपूर्णिमायांशत्रुंजयेयात्रांविधायवैशाखपूर्णिमायांरैवताचलेश्रीनेमिदर्शनार्थंसमागतः॥ तत्रतीर्थंदे
भगवंतंस्नपयित्वासर्वोपचारैःपूजयित्वाचयावत्प्रासादाद्बहिर्निर्गतः तावत्एकःपुरःसमागत्यइत्याह॥स्वामिन्नत्रपर्वतेशानशिलायांक
श्चिन्मुनिःबहुभिःसुरसमूहैर्मुनिभिर्लोकैश्चसेवितोध्यानमग्नस्तीव्रंतपःकुर्वन्नस्तितच्छ्रुत्वामाहेंद्रस्तद्वंदनोत्सुकस्तत्रागत्य॥ अनेकसुर
नरसेवितंतंमुनिंनत्वाउपविष्टः तर्हिअपरेदेवाःसातिशयज्ञानिनंमाहेंद्रंविज्ञायनत्वाअपृच्छन्॥ स्वामिन्कोसौमहर्षिः अस्यएवंविधतीव्रतप
सःकिंफलंभविष्यतीति॥ ततःइंद्रोवधिनाविज्ञाय॥तान्प्रत्याहश्रृणुतसुराः अस्यमहर्षेश्चरितं॥ तथाहि॥ जंबूद्वीपेभरतक्षेत्रेश्रावस्त्यां
नगर्यांवज्रसेननृपःपरमश्रावकोन्यायेनराज्यंपालयति॥ तस्यसुभद्राराज्ञीतत्कुक्षौजातोभीमसेनाभिधःपुत्रोभूत्॥ सचदुष्टप्रकृतिःद्यूता
दिषुसप्तसुव्यसनेष्वासक्तः॥ अन्यायस्यएकगृहंनिरपराधंलोकान्संतापयति॥ मातापितृन्गुरून्देवांश्चअवगणयति॥ अन्यदापि
तातस्ययुवराजपदंदत्तं॥ ततोसौदुग्धपानाद्भुजंगइवविशेषात्परस्त्रीपरद्रव्यादिहरणेनप्रजानांदुःखदोबभूव॥ अन्यदापुरजनाः
सर्वेमिलित्वाराजानंविज्ञपयामासुःस्वामिन्राजपुत्रस्यापराधोयद्यपिनोकथनीयस्तथापिवयंअतिदुःखंसोढुंअशक्ताःस्वामिपादांतंप्र
पन्नाःस्मः॥ आकंठयावत्कु[illegible]तिर्भृताःस्मः॥ ततोयत्घटतेतत्क्रियतांमहाराजःइतिश्रुत्वाप्रजापालोपितान्सर्वान्प्रसाददा

नादिभिःसंमान्यसमाश्वास्यचव्यसृजत्॥ ततःकुमारंसमाहूयनृपतिरेकांतेशिक्षांददौ॥ वत्सअन्यायंत्यजन्यायंभजप्रजाःपालयप्रजाभिः
कृत्वाराजाइत्युच्यते॥ प्रजांविनाराजशब्दस्तुहोलिकाराजस्येवविफलःस्यात्॥ न्यायधर्मतत्परस्यैवराज्ञःसंपदोभवंति॥ उक्तंच॥ नपरस्त्रीप
रद्रव्यापहारःक्रियतेनृपैः पित्रोर्गुरोर्जिनेभक्तिः॥ प्रधानोक्तंचमन्यते॥१॥ कर्तव्यःसर्वथान्यायस्त्याज्योन्यायोतिदूरतः॥ स्ववाक्यपालनंधैर्यंस
प्तव्यसनवर्जनं॥२॥ अयमेवपरोधर्मःप्रायःपृथ्वीभुजामहो॥ समाश्रितःश्रियंकीर्तिं यशःस्वर्गंचयच्छति॥३॥ इत्यादिशिक्षावचनैःशिक्षितो
प्यसौ॥ अधिकाअधिकंअन्यायंभेजे॥ ततस्तंशिक्षायाअसाध्यंज्ञात्वा॥ नृपोनिगडेक्षिपत्॥ तत्रस्थोपिअन्यदाकुमित्रप्रेरणात्मातापितरौनि
हंतिस्म॥ ततोराज्येनिविष्टःसन्मद्यादिव्यसनीप्रजालोकान्॥ अत्यर्थंपीडयति॥ ततःप्रधानसामंतादिभिर्विचार्य॥ अयोग्योयमितिकपटेन
बध्वाअटव्यांमुक्तः॥ तस्यलघुभ्राताअन्यायनिपुणःसर्वजनसंमतोजयसेनाभिधोराज्येस्थापितः॥ अथभीमसेनोदेशांतराणिभ्रमन्॥ यत्रतत्र
चौरिकांचकार मार्गेस्तोकमात्रधनलोभादपिलोकान्मारयतिस्म॥ इत्थंअन्यायेनकिंचिद्द्रव्यंप्राप्य॥ मद्यादिव्यसनंसेवते॥ पदेपदेघातबंध
नादिप्रहारान्सहते॥ अन्यदाभ्रमन्॥ मगधदेशेपृथ्वीपुरंगतः तत्रमालाकारगृहेकर्मकरवृत्त्यास्थितः॥ अन्यदापुष्पफलादिकंचोरयित्वा
विक्रीणत्॥ मालिकेनकुट्टयित्वानिःकासितोभ्रमन्॥ अन्यदाकस्यचित्श्रेष्ठिनोहट्टेस्थितः॥ तत्रापिस्तोकंस्तोकंकुरुणंअत्यजत्॥ अन्यदाश्रे

ष्टिनाक्रियाणकं चौरयत्न दृष्टेतिः कासितश्चः॥ततः ईश्वरदत्तेन प्रवहणव्यापारिणा समं नाव॥मारुह्य प्रस्थितः अथ सांनौः समुद्रे प्रचलंती
एकमासांते कापि प्रवालांकुरशिखरेषु स्खलिता नाविकैरनेके उपायाः कृताः तथापि न चलंति कियद्भिर्दिनैः अन्नं जलं च क्षीणं॥ततश्चिंतापर ई
श्वरदत्तो मरणाभिलाषी पंचपरमेष्ठिनमस्कारं स्मृत्वा॥यावत्समुद्रे झंपां ददाति॥तावत् सहसा एकः शुकस्तत्रागत्य प्राह॥श्रेष्ठिन्मा प्रिय
स्व॥अहं तव जीवनोपायं कथयामि॥मां पक्षिमात्रं मा जानीहि॥किंतु संमुखदृश्यमानस्यास्य पर्वतस्याधिष्ठायक देवोस्मि॥तवानुकंपया
आगतोस्मि॥ततो युष्माकं मध्यात्कश्चिदेको मरणमंगीकृत्य समुद्रजलतीर्थोत्र पर्वते गत्वा भारंड पक्षिण उड्डापयति॥तदा तेषां प
क्षवातेन प्रवहणं चलतीत्युक्त्वा गते शुके भीमसेनः शतदीनारामूल्यं गृहीत्वा मरणमपि अंगीकृत्य॥तत्र पर्वते गत्वा भारंडानुड्डापया
मास॥तेषां पक्षवातेन प्रवहणं चलितं॥भीमसेनस्तु तत्रैव स्थितो जीवनोपायं विचिंतयन्॥तमेव शुकं दृष्ट्वा उपायं प्रपृच्छ॥शुकः प्राह त्वं धैर्यं
धृत्वा जले झंपां देहि॥तत्र मत्स्यास्त्वां गलित्वा नटाभिमुखं यास्यंति॥तत्र गत्वा यदा ते फूत्कारं कुर्वंति॥तदा त्वं तेषां गले इमां औषधीं प्र
क्षिपेः॥तत्प्रभावात्तेषां गले महद्विवरं भविष्यति॥तेन रंध्रेण निर्गत्य त्वं समुद्रतटे यथेप्सितं स्थानं यायाः॥इति तद्वचसा भीमसेनोपि तमे
वोपायं कृत्वा जीवितव्य बलात् [illegible] तटं प्राप्य॥तत्र कापि स जल [illegible] नेन जलं पीत्वा फलादि भक्षयित्वा॥कांचित् दिशं प्रति चलितः॥ततो

ऽ एकं त्रिदंडिनं दृष्ट्वा प्रणामं चकार॥सोप्याशिषं दत्वा एवं पप्रच्छ भो वत्स कोसि त्वं किमर्थं च वनांतरे भ्रमसीति॥ततो भीमसेनस्तं तपस्विनं
महापुरुषं विज्ञाय दुःखार्त्तो दुःखं तदग्रे कथयामास॥स्वामिन् मंदभाग्योस्मि संसारे येकेपि दुःखिताः संति॥तेषां सर्वेषां अहं प्रथमोस्मि
किं बहुनोक्तेन॥यत्र यामि यदर्थं तु तत्र तन्नैव सिद्ध्यति॥समुद्रेपि न पानीयं गते मयि तु पातुरे॥१॥न फलानि तरो लक्षे॥न पानीयं नदीशते
न रत्नं रोहणाद्रौ च॥मंदभाग्ये गते मयि॥२॥न मे भ्राता न मे माता॥न कांता न पिता मम॥तथापि दिनशः क्रोमि॥कर्तुं स्वोदरपूरणं॥३॥इत्या
दिदीनवाक्यानि तस्य श्रुत्वा॥स त्रिदंडी कपटपंडितो॥नेत्रयोर्जलं प्रकटयित्वा॥तद्दुःखाद्दुःखित इव भूत्वा प्राह॥अहो वत्स मा दुःखं कृथाः
भाग्यवशान्मां शरणं प्रपन्नोसि॥इदानीं ते दारिद्र्यं गतं वयं तु परोपकारार्थमेव पृथ्वीतले विचरामः॥ततो मया सह॥अत्रैव सेहलद्वीपस
मागच्छ॥यथा रत्नखनौ गत्वा रत्नप्रदानेन तव दुःखं नाशयामीति श्रुत्वा॥भीमसेनोपि तेन सह चलितः दीनारशतशंबलेन मार्गे भोजना
दि संपादयंतौ॥तौ कियद्भिर्दिनै रत्नखनिं प्राप्तौ॥असतापसः कृष्णचतुर्दश्यां भीमसेनं खनिमध्ये समुत्तार्य रत्नानि कर्षयामास॥ततो र
त्नानि गृहीत्वा स दुष्टतापसो रज्जु भीमसेनं खनिमध्ये क्षिपन्॥एवं तं भीमसेनं खनिदेवतायै बलिं दत्वा॥रत्नानि गृहीत्वा त्रिदंडी शीघ्रं अन्य
त्र ययौ॥भीमसेनस्तु खनिमध्ये इतस्ततो भ्रमन्॥कंचित्पुरुषं अतिकृशं दुःखिनं अपश्यत्॥सोपि भीमं विलोक्य संजातकृपः पप्रच्छ हे

251/1962

नद्र कुतोत्र मृत्युमुखं आगतोसि॥त्वमपितु ग्रहमिवतेनदुष्टतापसेन॥ रत्नलोभं दर्शयित्वा क्षिप्तोसि॥ततो भीमसेन॥एवमेवंवेतिप्रोक्ते पुनः सनिर्गमनोपायमाह॥कल्ये प्रभाते अत्राधिष्टायकं रत्नचंद्राख्यं देवं पूजयितुं॥देवांगना आगमिष्यंति॥तेषां गीतश्रवणेत्यंते॥सपरिक रे देवे सति त्वं तासां किंकरैः सार्द्धं बहिर्निसरः॥बहिर्निःसृतेनु अस्य किमपिबलं नास्ति॥निश्रुत्वा हर्षितो भीमस्तत्रैव तेन सार्द्धं वार्ताभिस्तद्दिनं निर्गमयामास॥इतः प्रभाते देवांगनाः समायाताः तामिस्तालमृदंगादि ध्वनि मनोहरे संगीतेप्रारब्धे सति तत्र व्याक्षिप्तचित्ते सपरिकरं तं सुरं वि ज्ञाय किंकरसुरैः सह भीमो बहिर्निर्गतः॥ततो मंदमंदमार्गे गच्छन् कियद्भिर्दिनैः सिंहलराजधानी भूतं क्षितिमंडनपुरं प्राप्य॥तत्र कस्यचि त् श्रेष्ठिनो भंडशालायां कर्मकरत्वेन स्थितः॥तत्रापि पूर्वपापवशात् चोरिकां अमुचन्॥अन्यदा तलारक्षैर्बध्वा शूलिकां आरोपयितुं नीयमा नोसौ देवयोगात् तत्रायातेन ईश्वरदत्तेन प्रवहणव्यापारिणा दृष्टः॥उपलक्षितश्च प्रवहणचालनोपकारं स्मृत्वा तेन राजानं विज्ञप्य मोचितः॥ ततः स्वप्रवहणं आरोहयित्वा॥क्रमेण पृथ्वीपुराख्यं स्वपुरं आनीतः॥अथ भीमस्तत्रान्यदा कचिद्देशांतरिणं विलोक्य वार्तांतरे॥सदुःखं कथयामास॥ततः सप्राह दुःखं मा कुरु॥मया सार्द्धं आगच्छ॥आवां रोहणाचले रत्नगवेषणार्थं गतः यावः इति चलितौ॥अन्यदा कापिताप साश्रमे जलिस्था नेथा नेत्र हड्ढन ... द्राक्षा ... स्थितौ॥अद्यांतरे जागलं शाष्यं पप्रच्छ वत्स सांप्रतं कुत आयातः॥इयंतिदिनानि कुत्र

स्थित इति जांगलः प्राह॥स्वामिन् सुराष्ट्रायां॥श्रीशत्रुंजयगिरिनारयोर्यात्रां कृत्वा इदागतोस्मि॥तितयोस्तीर्थयोर्महिमानं वक्तुं कः समर्थो भ वति॥केवलं केवलज्ञानी एव जानाति॥विशेषात् रैवगिरेर्महिमा मया श्रुतो दृष्टश्च॥अस्य तीर्थस्य सेवनात्॥नृणां सुषपंपदः चक्रिशक्रा दिश्रियोपि हस्तंगा भवंति॥तदनु स्वल्पकालेनैव मुक्तिर्भवति॥यथा अशोकचंद्रनृपस्य॥तथाहि॥चंपापुर्यां अशोकचंद्राख्यः क्षत्रियो दरि द्री वसति॥अन्यदा दारिद्र्यपीडितो गृहान्निर्गत्य भ्रमन्॥अन्यदा जैनसाधून् दृष्ट्वा वंदित्वा॥दारिद्र्यनाशोपायं पप्रच्छ॥मुनयः प्राहुः वत्स पूर्वोपार्जितकर्मवशाज्जीवाः सुखंदुःखं वा लभंते॥तेषां कर्मणां अभुक्तानां नास्ति मोक्षः तदापि पूर्वकृतदुष्कर्मविपाकादेव दारिद्र्यं वर्त्तते॥ततो मिथ्याविकल्पात्मक चिंतनेन किं भवति॥ततस्त्वं मिथ्याभ्रमं त्यक्त्वा रैवताद्रिं सेवस्व येन दुष्कर्म स्वल्पकालेनैव क्षीयते॥इति तेषां वचः श्रुत्वा॥अशोकचंद्रो रैवताद्रौ गत्वा स्थिरचित्तः सन्॥तपश्चकार कियद्भिर्दिवसैः तत्तपसा तुष्टा अंबिका तस्मै स्पर्शपाषाणं ददौ॥तस्य स्पर्शमात्रेण लोहं सुवर्णी भवति॥तत्प्रभावात् समवाप्तबहुधनो सौ बहुसेनाबलेन राज्यं प्राप्य॥ततो राज्यसुखभोगान्॥भुंजानो सौ अन्यदा इ त्यचिंतयत्॥अहो मया श्रीतीर्थानुभावात् अंबिकाप्रसादाच्च॥राज्यादि लब्धं इदानीं सुखमप्रोन[illegible]राश्मि॥तर्हि धिग्मां॥इति चिंतयित्वा स कलसामग्रीं कृत्वा महर्द्धी संघस्वजनादि परिवृत्तः॥पदे पदे जीर्णोद्धारादि सुकृतानि कुर्वन् ... ... कृत्वा॥ततः श्रीरैवताद्रिशा

223/1963

गत्वा॥गजेंद्रपदादीनांजलैःश्रीनेमिजिनंस्नपयित्वा॥कुसुमादिभिःसंपूज्य॥इत्यचिंतयत्॥अहोमयाएतत्त्रीर्थानुभावात्॥त्रीणिवर्षशतानिरा
यत्॥समृद्धंराज्यंभुक्तंसांप्रतंतुश्रीनेमीश्वरचरणसेवैवकर्तुंयोग्या॥इतिविचिंत्यस्वपुत्रायराज्यंदत्वा॥स्वदेशंप्रतिव्यसर्जत्॥स्वयंचदीक्षांगृही
त्वाकर्मक्षयंकृत्वामुक्तिंप्राप्य॥एतत्सर्वमयासाक्षाद्दृष्टं॥तस्मान्महातीर्थमेतदितिकिंचलभंतेसेवनाद्यस्यप्राणिनःपापिनोपिहि॥इहैवसर्व
संपत्तिंपरलोकेपरंपदं॥१॥श्रमतांपक्षिणांस्वेपिछायायेषांस्पृशत्यमुं॥लभंतेकुगतिंनैतेकिंपुनःसहवासिनः॥२॥इतिजांगलोक्तंश्रीरैवत
महिमानंश्रुत्वा॥तापसाःसर्वेपिपरमंहर्षमापुः॥भीमसेनोवैदेशिकश्चापितत्श्रवणात्ज्ञानमहात्म्यावपिपूर्वकृतनिश्चयौरोहणाचलंप्र
तिप्रतस्थतुः॥अथकियद्दिनांतेरोहणाद्रिंप्राप्य॥तदधिष्ठायकंसंपूज्यरत्नखनौगत्वा॥भूमिंचखनतुः॥ततोभीमसेनोबहुमूल्यंरत्नद्वयंप्रा
प्य॥एकंराज्ञकुलेदत्वा॥एकंचस्वयमादाय॥प्रवहणमारुह्यचलितः॥अन्यदापूर्णचंद्रंवीक्ष्यचंद्ररत्नयोःपरीक्षार्थंसाम्यंविलोकयन्॥अभाग्य
योगेनहस्ताद्रत्नंसमुद्रेपातयामास॥ततोहाहारवंकुर्वन्॥मूर्छांप्राप्यपुनःसचेतनीभूतो॥भीमसेनोभृशंविलपतिस्म॥तद्विलापश्रवणा
त्खिन्नाःप्रवहणजनाःसमाश्वासयंति॥तथापिहामेरत्नंगतमितिबहुबहुविलपति॥ततोवैदेशिकमित्रेणसमाश्वासितःभ्रातःशोकं
त्यज॥धैर्यंदेहि॥यदिजीवन्नसितर्हिअहंतेबहूनिरत्नानि॥तवमेलयिष्यामि॥तथाअथापिदरिद्राणांदारिद्र्यहरोरैवतगिरिर्गत्वा

पुंते॥तत्रतववांछितंफलिष्यति॥अथवामदीयं॥इदंरत्नंगृहाण इत्यादिवचोभिःसमाश्वासितः॥किंचिद्धैर्यंधृत्वाक्रमेणसागरमुल्लंघ्य॥
तौद्वावपिरैवतगिरिंप्रतिचलितौ॥दैवात्मार्गेतस्करैर्मुषितौ॥ततोनिःसंबलौवस्त्ररहितौनिराहारौभुवीइवसर्वदुःखानिसहमानौअ
न्यदामार्गेकेचिन्मुनिंदृष्ट्वाकिंचित्हर्षितौमुनिंनत्वास्वदुःखंकथयामासतुः॥स्वामिन्दरिद्राणांअभाग्यानांमुख्यौआवांसर्वजननिंदितौ
निर्भाग्यत्वात्॥सर्वत्रानादरौदुःखितौस्वःतदाख्यातुभगवान्दुःखक्षयोपायं॥अन्यथातुपर्वतझंपयाकृत्वामरणमेवआवयोःशरणं॥
इत्यादिश्रुत्वासंज्ञानरूपोमुनिःप्राह॥भोभद्रौयुवाभ्यांपूर्वजन्मनिधर्मोनकृतः॥ततएवदुःखितौस्थः॥उक्तंच॥कुलेजन्मचनैरुज्यंसौभा
ग्यंसौख्यमद्भुतं॥लक्ष्मीरायुर्यशोविद्या॥कृपारामालुरंगमा॥१॥मातंगाजनलक्षेषु॥परिवर्यानपार्यना॥चक्रिशक्रेश्वरत्वंच॥धर्मादेवहिदे
हिनां॥२॥ततोमाकुरुतांबालमरणंअनर्थपरंपराकारणंहे भीमसेनत्वयापूर्वंअष्टादशघटीर्यावत्मुनिःपीडितोभूत्॥तेनकर्मणा
दुःखितोसि॥अतःपरंतुरैवतगिरिंसेवनात्तत्कर्मक्षयंयास्यति॥समग्रसंपदांभाजनंभूत्वाजिनप्रासादमंडितांमेदिनींविधायमुक्तिं
यास्यसि॥ततोविषादंविमुच्यरैवतंप्रतियानं इतिमुनिवाक्यात्सोत्साहौतौरैवताचलमायातौ॥तत्रभीमसेनोभगवतःप्रासादेसंघलोकसहि
तंसंघपतिंभूतंस्वबांधवंजयसेननृपं॥आरात्रिकांकुर्वाणंअपश्यत्॥तेनापिअमात्यादिराजलोकैश्चदृष्ट्वाउपलक्षितो॥भीमसेनोआरात्रि

कविधिंसमाप्यनिर्भरस्नेहेनसमालिंगितः॥ततोजयसेनःप्राह॥आर्यइयंतंकालंकुत्रस्थितोसि॥अस्माभिस्तुप्रतिदिशंचरप्रेषणेनगवेषितो
पिनप्राप्तोसि॥सांप्रतंत्वास्वयमथारक्षितंस्वराज्यंअंगीकुरु॥इत्यादिकंआग्रहंकृत्वा॥प्रधानादिभिःपुनःराज्यभारंग्राहितः॥ततोभीमसे
नोजयसेनेनलघुबंधुनाप्रधानादिभिश्चसमंभगवतःपूजास्नानादिकंविधायस्वदेशंप्रतिचचाल॥ततोमहोत्सवपुरस्सरंपुरंप्रविश्यजयसेना
यघुवराजपदंवंदेशिकमित्रायचकोशाधिकारंदत्वात्यक्तव्यसनादिकुलक्षणोन्यायगुणरंजिताःप्रजाःपिताइवपालयामास॥तस्मिन्राज्यं
पालयतिसति॥तत्रमंडलेनचौरभीतयःनचानावृष्ट्यादिईतयोनचस्वचक्रपरचक्रपीडाःनचदुर्भिक्षडमरकधुपद्रवाश्चासन्॥अन्यदाश्र
त्वानंमातृपितृघातपातकिनंआलोच्यखेदंप्राप्तःतत्पापशांत्यर्थंग्रामेग्रामेस्थानेस्थानेजिनप्रासादान्कारयामास॥इत्थंदेवगुरुसाधर्मिक
भक्तिकारी॥दीनानाथादिषुदयालुःपरोपकारीकनिरतोधर्मार्थकामावाधयाराज्यंपालयामास॥अन्यदाउद्यानेजिनपूजनपरं॥एकंविद्या
धरंवीक्ष्य॥नोमद्रत्वंकुतआयातइतिपप्रच्छसोपितृपंप्रणम्यप्रोचेराजन्॥अहंश्रीशत्रुंजयोज्जयंतयोः यात्रांविधाय॥इहागतः॥इतित
द्वाक्यादेवताद्रिःउपकारंस्मरन्चिंतयामास॥अहोधिग्मांयत्प्रभावादहंसुखीजातः।तमेवनस्मरामीतिविचिंत्यलघुबांधवायराज्यंदत्वास्वयं
स्वल्पपरिवारेणरैवतंप्रतिचचाल॥ततोसौशत्रुंजयेऽष्टाह्निकांकृत्वारैवतादिंकमात्प्राप्य॥वंदनादिभिःश्रीनेमिजिनंसंपूज्य॥विविधोत्सवैर्भ

क्तिःकृत्वादानशीलतपोभावभेदं॥चतुर्विधंधर्मसमाराधयन्॥अन्यदाज्ञानचंद्रमुनिदेशनाश्रवणाद्विरक्तचित्तोदीक्षांगृहीत्वा॥अयंभीमसे
नोमहामुनिरत्रैवज्ञानशिलायांदुस्तपंतपस्तपति॥पूर्वमहापापकारकोप्ययमुनिःतीर्थानुभावादेव॥इतोऽष्टमेदिनेकेवलंप्राप्स्यति॥ततःआ
युःपूरयित्वामुक्तिंयास्यति॥इदंएतत्तीर्थस्यमहात्म्यंपूर्वंअस्माभिःअर्बुदपर्वतेज्ञानचंद्रमुनेर्मुखात्श्रुतंअभूत्॥ततोत्रपर्वतेमहापापका
रिणोपिमहाकुष्ठादिरोगिणोपिनिर्दोषीभूत्वासर्वदुःखभाजोभवंतिइतिमाहेंद्रमुखान्महात्म्यंश्रुत्वासर्वेसुराविशेष‾श्चापूजादिभक्तिंविधा
य॥निजंनिजंस्थानंययुः॥ततोदेवोधर्मेंद्रएवंअत्रपर्वतेअनेकेमुनयःकर्मक्षयंकृत्वा॥मुक्तिंगतायास्यंतिच॥पुनःअस्यांअवसर्पिण्यांभविष्य
तोनेमिजिनस्यतीर्थस्थापनेन॥श्रीभरतचक्रवर्तिनाप्रकटीकृतंसचनेमिजिनोहरिवंशेसमुत्पन्नः॥ततःसंक्षेपात्पूर्वंतद्वंशोत्पत्तिंदर्शयामः तथा
हि॥अत्रैवभरतेकोशांबीपुरी॥साकाश्स्वर्गपुरीव॥अनेकसुमनोजनैःशोभितावर्तते॥तत्रविख्यातयशाःपटलोविबुधवृंदसेवितःसुरेंदइवसु
मुखनामानरेंद्रोभूत्॥अन्यदावसंतसमयेउद्यानकेलिकरणार्थंनिर्गतोसौमार्गेकांचित्स्त्रियंसुरूपांअपश्यत्॥ततस्तांपूर्णचंद्रमुखींरंभ
जनचपललोचनांपीनोन्नतस्तनभारनमितांगीं॥मंदंमंथरगामिनींनिभ्रांतविलोकनैःकटाक्षान्बाणानिवक्षिपंतींवीक्ष्यकंदर्पबाणैःकर्द
इवभूपतिःमहसाप्रर्द्धानमाधूयइतिविकल्पान्चिंतयामास॥किमेषारंभाउर्वशीजयंतीवास्वर्गलोकेसर्वसुरांगनाजित्वामर्त्यलोकजया

227/1962

र्थंआगताकिंवाकस्यापिमहापुण्यवतोभाग्येनैवप्रकटीभूता॥इत्यादिविकल्पपरोनृपोयावच्चित्रलिखितइवस्थितः तावत्सचिवोनृपभावंवि
ज्ञाय॥समयोचितंप्राह॥स्वामिन्सैन्यंसर्वमप्यग्रेगतं॥किमत्रस्वामिनाविलंब्यते॥रंतुकामापमंतलक्ष्मीःसोत्कंठावर्त्तते॥इत्याकार्णमंत्रिणःश्लोके
किंश्रुत्वानृपस्तत्रैवमनोमुक्त्वाकथंचित्पदानिददन्॥वलितग्रीवंविलोकयन्नग्रेययौ॥परंवनवापीसरःसरोरुहादिक्रीडासुतथाद्भुत
पुरःपुरंध्रीणांविविधविलासहासोल्लासरासकेलिषुवाक्वापिरतिंनप्राप्य॥अयतःपृष्ठतःपार्श्वतःसर्वतोपितांयथादृष्टं॥तामेवचिंतय
न्॥विश्वमपितन्मयंमेने॥अथैवंविधनृपंवीक्ष्य॥सुमतिमंत्रीतस्यभावंअजानन्निवइतिप्राह॥स्वामिन्नवानांसर्वेपिभूपतयोमाल्यमिव
मूर्ध्निधारयंति॥सूर्योदयेतारकाइवशत्रवःक्वापिनोपलभ्यंते॥राज्यलक्ष्मीःसर्वांगतयामूर्त्तिमतीवत्वद्गेहेवसति॥ततःकेनहेतुनात्वम
पिचिंतामग्नइवदृश्यसेकथंचैवंसर्वस्वहारितइवनिःश्वासान्मुंचसि॥इत्यादिपृष्टोनृपःप्राह॥मंत्रिन्त्वंसर्वभावनिपुणोसि॥तत्कथंनजा
नासि॥अद्ययालोकातिशायिसौंदर्यासुंदरीदृष्टा॥तयाहृतचित्तोहंशून्यतांप्राप्तोस्मिइति॥ततोमंत्रीप्राह॥किंचिद्विहस्यस्वामिन्मया
तुतदैवज्ञातंपरंतवमर्यादांसहसाकथंमुचामीतिपृच्छाकृता॥एषातुवीरकुविंदस्यभार्यावनमालाभिधास्ति॥ततश्चिंतातांमाकुरुअह
मेवएनांसंपादयिष्यामि॥इत्याश्वासितोराजाकथंचित्सुस्थीभूयगृहमागतः॥ततःसचिवोपितस्याःप्राप्तेःउपायंविचिंतयन्॥तत्रकार्ये

निपुणांआत्रेयिकानाम्नीं॥तापसींवनमालायाःपार्श्वेप्रेषयामास॥सातापसीवनमालायागृहेगता॥वनमालयाकृतवंदनादिबहुमा
नाउपविष्टयावार्त्तांतरेवनमालाइतिपप्रच्छ॥वत्सेकथमेवंग्रीष्मतप्ताकमलिनीवसूर्यमंडलाक्रांताचंद्रकलाइवदग्धाकदलीवत्स्लात
वदनादृश्यसेवनमालापितस्याविश्वासंकृत्वानिःश्वासंमुक्त्वायथास्थितंप्राह॥भगवतिकिंकुर्वेमंदभाग्याहं॥यतोदुर्लभवस्तुनिमनोर
थैर्विडंबितास्मि॥अद्यमयासाक्षात्कामदेवइवसुमुखनामानरदेवोदृष्टः॥ततःप्रभृतितन्मोहनईदृशीदुरवस्थांप्राप्तास्मि॥क्वासौनृपतिः
सर्वदैवनमयशरीरःसर्वोत्तमकुलः॥क्वाहंकारुकुलोद्भवादुर्घटोयंवकीहंसयोरिवसंयोगःदुर्दैवेनइत्थंचिंतायाममविरहपीडिता
यामरणमेवशरणंइतितस्यावचःश्रुत्वाआत्रेयिकाकार्यसिद्धिंसुलभांविज्ञायहर्षितातांप्रतिप्राह॥वत्सेखेदंमाकुरु॥अहंदैवतोपासना
बलात्भूपतिंतववल्लभंनिदासमिवकरिष्ये॥ततस्तववांछितंसकलंसफलंभविष्यतीति॥तांआश्वास्यसचिवायसर्वंतंव्यतिकरंनिवेद
यामास॥सचिवोपिहर्षितोगुप्तवृत्त्या॥तयातापसावनमालातस्यांरात्रौराज्ञोंतःपुरेआनायत्॥अतिप्रमुदितोराजापितांपट्टराज्ञींस्थाप
यित्वा॥क्षणमात्रमपितयाअवियुक्तोआरामोद्याननदीतीरक्रीडाशैलादिषुविहरन्॥विविधान्भोगान्बुभुजे॥अथवनमालायाःपति
वीरःकुविंदोवनमालावियोगेनबहुधाविलपन्॥भूतग्रस्तइवग्रथिलोजातः॥ततोमलमलिनगात्रोजरद्वस्त्रपरिधरःकरेकर्परंधृत्वा

त्रिचतुष्कचत्वरादिषु॥ हावनमालि हावनमाले इति विलपन् भ्रमति पुरावालकाश्च॥ नानाचेष्टाभिस्तं धूलिकर्करादीन् क्षिपंति॥ अन्यदा
गृहांगणस्थेन राज्ञा वनमालया च॥ सहैव ताभ्यां गतस्तथाविधो सौ दृष्टः तं तथाविधं धूलिधूसरांगं विकलं विलपंतं वीक्ष्य॥ राजा राज्ञी च इ
ति चिंतयतः अहो आवाभ्यां निर्दयतयायं डालकर्म कृतं॥ यतः कामांधतया अनाचाराचरणेन॥ अयं वराको विश्वस्तोपि वंचितः ततो
स्माकं नरके पि स्थानं न भविष्यति॥ ये तु जिनधर्मासक्ताः शुद्धशीलपालकास्तेषां जन्म जीवितं च कृतार्थं इत्यादि स्वनिंदां गुणवत्प्रशंसां
च कुर्वतो नृपवनमालयोरुपरि सहसा विद्युत्पतिता॥ तदा तौ मृतौ तौ दंपती शुभध्यानबलात्॥ अन्योन्यस्नेहानुबंधवशाच्च॥ हरि
वर्षक्षेत्रे युगलतया उत्पन्नौ हरिर्हरिणी चेति॥ पितृनामकृतं पूर्ववत्तत्रापि कृतं॥ अवियुक्तौ तौ दंपती दशविधकल्पवृक्षैः पूरितस
कलसमीहितौ सुखं विलसंतौ नस्थतुः इतश्च वीरः कुविंदो नृपवनमालामरणानंतरं किंचित्सुस्थीभूतो ज्ञानतपः कृत्वा मृत्वा सौधर्मक
ल्पे किल्बिषिको देवो भूत्॥ स च अवधिना पूर्वभवं दृष्ट्वा नृपवनमालयोर्युगलावतारं ज्ञात्वा पूर्ववैरं स्मरन्॥ रोषारुणनेत्रो धमधमायमानः
मनो हरिवर्षमागतः तत्रागत्य च इति चिंतयामास॥ अहो इमौ क्षेत्रस्वभावादेव मया मारितौ॥ अपि न म्रियेते मृतौ च स्वर्गमेव यास्यत
स्ततो न्यत्र कुत्रापि एतौ मुंचामि यत्र अकालेपि म्रियेते॥ मृतौ च नरकं प्राप्नुतः इति निश्चित्य स सुराधमः कल्पद्रुमैः सह तौ लात्वा॥ अत्र भ

रते चंपापुरीपरिसरे मुचत्॥ अथ तत्र पुरे पूर्वं श्रीवृषभस्वामिपुत्रस्य बाहुबले सुतः श्रीसोमयशा नृपो भूत्॥ तस्य नाम्ना लोके सोमवंशो
विख्यातः॥ सोमयशसः पुत्रः श्रेयांसः येन श्रीयुगादीशस्य इक्षुरसप्रदानेन अस्यां अवसर्पिण्यां प्रथमं दानधर्मो दर्शितः ततः सार्वभूमः सुभू
मः सुघोषो घोषवर्द्धनो महानंदी सुनंदी सर्वभद्रः शुभकरः इत्यादि क्रमेण असंख्येषु नृपेषु मुक्तिं स्वर्गं चागतेषु तदा काले तत्र वंशे चंद्रकी
र्त्तिनृपो पुत्रो मृतः॥ ततो राजलोकः सर्वोपि मिलित्वा यावद्राज्यचिंतां कुर्वन्नस्ति॥ तावत्स देवो गगने स्थित्वा इति प्राह॥ भो लोकः शोकं मा कुरुध्वं
स्थिरा भवत भवतां भाग्यबलादेव अयं राजा सपत्नीको मया दत्तः॥ एतयोर्मद्यमांसमिश्रितकल्पद्रुमफलाहारो दातव्यः॥ यथैतं व्यसनादिसे
वनं न निवार्य॥ इति लोकान् शिक्षां दत्वा॥ तयोः पंचधनुःशतमितं शरीरं संकोचयित्वा धनुःशतोच्चं विधाय आयुरपि अपवर्त्य स देवः कृत
कृत्यो यथागतं ययौ॥ ततः सामंतसचिवादिभिः महोत्सवपूर्वकं राज्येभिषिक्तो हरिनृपः देवताज्ञया च मद्यमांसभक्षणं कारितः श्रीशीतल
स्वामितीर्थे अयं हरिराजा जातः॥ ततः प्रभृति लोके हरिवंशः प्रकटीबभूव॥ क्रमेण नानेकशाखाप्रशाखादिभिर्विस्तारं प्राप्य॥ ततः सह
रिराजा समुद्रमेखलां पृथ्वीं असाधयत्॥ अनेकराजकन्याश्च परिणीतवान् हरेश्च हरिण्याः पट्टदेव्याः कुक्षिजातः पृथ्वीपतिरितिनामा पु
त्रो भूत्॥ इत्थं चिरं यावद्राज्यं पालयित्वा हरिनृपो हरिण्या समं पापं अर्जयित्वा मृतौ सन्ति॥ तयोः पुत्रः पृथ्वीपतिः पृथ्वीं पालयामास॥ सोपि

चिरंगत्यंप्रपाल्यस्वपुत्रंमहागिरिंराज्येस्थापयित्वा॥दीक्षांप्रपाल्यस्वर्गंजगाम॥अथमहागिरेःपुत्रोहिमगिरिस्तनोवसुगिरिः॥ततोमित्रगिरि
स्तनःसुयशाःएतेसर्वेपिमहाबलाखिंडनोक्कारोजिनधर्मकरनाःसंबाधिपाअभूवन्इत्यंक्रमेणहरिवंशेअसंख्येषुनृपेषुमुक्तिस्वर्गगाप्ते
षु॥तत्रैववंशेविंशतितमोजिनःश्रीमुनिसुव्रतस्वामीयथाभूत॥तनुश्चयतांदिवंदनथाहि॥अस्तीहश्रीमगधदेशेमुक्तास्तिकवन्मेदिनीतलमं
डनंश्रीराजगृहाभिधंपुरं॥यत्रमंदिराणांगृहेषुसुवर्णोत्करामेरुशृंगतुंगाराजंतेयत्रार्हच्चैत्यानिच॥शास्वतार्हच्चैत्यशोभांव्यंजयंति॥तत्र
पुरेश्रीहरिवंशैकमंडनं॥श्रीसुमित्रराजाराज्यंकरोति॥तस्यसात्कृत्यश्चांदिवीच॥पद्मादेवीतिनाम्नीपट्टराज्ञीशीलाद्यनेकगुणरंजितभु
वनत्रयाबभूव॥अन्यदाप्राणतनाम्नोदशमदेवलोकाच्युत्वाश्रावणशुदिपूर्णिमायांप्रभुस्तस्याःकुक्षौअवतीर्णः॥ततोमात्राचतुर्दश
स्वप्नाद्दृष्टाःस्वप्नपाठकमुखात्तीर्थकरजन्मलक्षणफलश्रवणमुदितासुखंसुखेनगर्भपालनांकुर्वाणासाक्रमेणज्येष्ठकृष्णाष्टम्यांश्र
वणनक्षत्रेपुत्रंप्रासूत॥ततोदेवेंद्रादिमहोत्सवानंतरंसुमित्रनृपोपिपुत्रजन्मोत्सवंविधायमुनिसुव्रतइतियथार्थनामंचकार॥अथसप्रभुःस
जलमेघश्यामलांगःकूर्मलांछनोसंख्यशुभलक्षणोपेतःक्रमेणप्रवर्द्धमानोयौवनंप्राप्तःसन्विंशतिधनुःप्रोन्नततनुःशुशुभे॥ततःपृ
पुराधीशस्यप्रभाकरनृपतेःपुत्रीप्रभावतींपरिणीतवान्तयासहभोगकर्मफलंपितृदत्तराज्यसुखंचअनुभवतस्तस्यप्रभोःसुव्रत

मासुतोभवत्॥ततोभगवान्तस्मैराज्यंदत्वाशक्रादिभिःकृतदीक्षोत्सवः॥फाल्गुनशुक्लदशम्यांश्रवणनक्षत्रेराज्ञांसहस्रेणसमंदीक्षांज
ग्राह॥फाल्गुनेकृष्णाद्वादश्यांचश्रवणनक्षत्रेप्रभोःकेवलमुत्पन्नंइंद्रादिभिःकेवलोत्सवःकृतः॥अथभगवान्केवलालोकेनजगतोज्ञान
तमोहरन्स्वपादप्रचारैःपृथ्वीतलंपवित्रयतिस्म॥अन्यदाप्रतिष्ठानपुरेसमवस्रृतःइतश्चभृगुकच्छपुरे॥अश्वमेधयज्ञमध्येस्वस्यपू
र्वभवमित्रं॥अश्वंहन्यमानंविज्ञाय॥तत्कृपयारात्रावेवभगवान्विजहार॥मध्यरात्रिक्षणमात्रंसिद्धपुरेप्रभुर्विश्रामंकृतवान्॥तत्रस्था
नेप्रभातेवज्रभृन्नृपःप्रासादंकारयामास॥अथप्रभुर्नि[illegible]चषष्टियोजनान्युल्लंघ्य॥प्रभातसमयेभृगुकच्छपुरंप्राप्य॥तत्रचकोरंटका
भिधवनेसमवसृतःदेवैःसमवसरणंकृतंतत्पुराधिपोजितशत्रुराजातंतुरंगमंसमाश्रितःससैन्योजिनंवंदितुमागतः॥भगवतादेश
नाप्रारब्धा॥भगवद्दर्शनादिवसंजातपरमोत्कर्षःसतुरंगोएकाग्रचित्तोदेशनांशृणोतिस्म॥तद्यथाअस्मिन्क्रूरेभवारण्ये॥कुकर्मश्वापदा
कुले॥अशरण्योहिसंसारीबाध्यतेनरकारिभिः॥१॥चरन्चतुर्गतिद्वारेचतुर्भिःसकषायकैःरुद्धःकिल्बिषभिल्लैन॥सलुंट्येवबिडंब्यतेन
तत्राकारणमित्रेणजगत्पूज्येनजंतवः॥रक्ष्यंतेसर्वथाधर्मेणैवनान्येनकेनचित्॥३॥अनाथानांतुयोनाथोधर्मःसर्वाभयप्रदः॥सेव्यःससर्व
दाभव्यैःस्वर्गमोक्षैककारणं॥४॥इत्यादिदेशनांश्रुत्वा॥जिनवाक्यद्रपःप्रबुद्धतिष्ठतिस्म॥भगवन्तंचदेशनाश्रवणात्अत्रसभायांकेकेजना

धर्मप्राप्तः ततः प्रभुः प्राह॥ एनं अश्वं विनानान्यः कोपि इति प्रभुणाउक्ते पुनर्नृपः प्राह॥ स्वामिन् कोसौ तुरंगोयस्य पशुत्वेपि धर्मप्राप्तिर्जाताइति
प्रभुः प्राह॥ शृणु राजन् पूर्वजन्मनि अहं चंपानगर्यां पुरश्रेष्टोव्यवहारी अभूवं॥ अयंच ममभित्रं मतिसागरनामा मंत्री अभूत्॥ सचमायामि
थ्यात्वी वणिग् बभूव॥ अथ तत्रैव पुरे कालेमृत्वा बहु भवान् भ्रान्त्वा पद्मिनीखंडपत्तने॥ सागरदत्ताख्यो मिथ्यात्वी वणिग् बभूव॥ अथ तत
त्रैव पुरे जिनधर्माइ जिनाख्यः श्रावकोभूत्॥ सागरदत्तस्य तेन सह मैत्री जाता॥ अन्यदा तौ द्वावपि जैनसाधुमुखात्॥ जिनबिंबनिर्मापण
फलं इति शृणोतिस्म॥ तथाहि॥ मृन्मयं हेमजं रत्नमयं वा बिंबमार्हतं॥ यः कारयेत् कुकर्माणि॥ समघ्नाति भवांतरे॥१॥ इति फलं श्रुत्वा साग
रदत्तो भद्रकतया सुवर्णमयं जिनबिंबं कारयित्वा॥ जिनप्रासादे साधुभिः प्रतिष्टापयामास॥ तस्य पुरस्य बहिः पूर्वं तेन शिवायतनं का
रितं अभूत्॥ अन्यदा उत्तरायनदिवसे॥ तत्र गतः सन् घृतकुंभेच टिताघृतेलिकाः समुत्तारयंत पादाभ्यां चूर्णयंतं च पूजकं दृष्ट्वा जैनसं
गति वशात्सागरदत्तो निकंपितमनास्ता घृतेलिकाः स्ववस्त्रेण प्रमार्जयतिस्म॥ तद् दृष्ट्वा पूजको विशेषेण पादप्रहारात्ताश्चूर्णयन् किं रे श
थैवपाखंडिभिः श्वेतपटैर्वंचितोसि यतः शिवपूजायामपि ईदृशान् दोषान् पश्यसि॥ इत्यादिभिः उत्कंठवाक्यैः सागरदत्तं उपहसति
स्म॥ समीपस्थितं तद्गुरुरपि तथैव उपहसतिस्म॥ तदा सागरदत्त इति चिंतयामास॥ अहो धिगस्तु एतान् निर्दयान् निर्दयमार्गप्ररूपका

एवं क्रूरपरिणामाः क्रूरकर्माणोपि गुरुबुद्ध्या पूज्यंते॥ एते स्वयं विनष्टाः परानपि नाशयंति॥ इत्यादि मिथ्यात्वस्वरूपं विचिंत्यापि पुनः कुलप्र
वृत्तिवशान्मिथ्यात्वक्रिया एव कुर्वन् किंचिद्दानादि पुण्यं कृत्वा॥ बालमरणेन मृत्वा॥ अयं नव तुरंगमो जातः अस्यैव प्रतिबोधाय वयं आग
ताः स्मः॥ अनेन पूर्वभवे उपसंनयापि यत्॥ जिनबिंबं कारितं॥ तेन पुण्येन अस्माकं संयोगः प्राप्तः प्रतिबुद्धश्च इति श्रुत्वा स तुरंगो जातिस्म
रणात् पूर्वभवान् दृष्ट्वा विशेषात् वैराग्यं प्राप्तो॥ भगवतो मुखे अनशनं चकार॥ ततो सौ सप्तदिनानि यावत् सम्यक्त्वं परिगृह्य अनशनं पा
लयित्वा समाधिना मृत्वा॥ सहस्राराख्ये॥ अष्टमदेवलोके देवो जातः॥ तत्र पूर्वभवं स्मृत्वा॥ अत्रागत्य सुवर्णप्राकारमध्यस्थितां॥ श्रीमुनि
सुव्रतप्रतिमां चकार॥ भृगुकच्छपुरे॥ अश्वदेहाकारं च अस्थापयत्॥ श्रीमुनिसुव्रतस्वामि भक्तानां च मनोरथान् पूरयामास॥ अद्यापि भृगु
कच्छे अश्वावबोधाख्यं तत्तीर्थं लोके प्रसिद्धं दृश्यते॥ यथा स तुरंगोपि॥ एकगुणं धर्मं कृत्वा बहुतरं फलं प्राप्य॥ तद्वत् पुरुषोत्तमो येत्स्वल्पेना
पि सुकृतेन महाफलं लभते॥ किंच श्रीसुव्रतस्वामिस्नात्रजलेन पवित्रिता नर्मदापि सर्वनदीषु श्रेष्टा॥ भवद्भयदुःखहरी भवति॥ ततः
श्रीसुव्रतस्वामी विहरन्॥ अन्यदा श्रीशत्रुंजये समवसृतः॥ तत्र देशनायां सर्वसुरासुरेभ्यः श्रीशत्रुंजयस्य महात्म्यं प्रकाशयित्वा॥ सर्वाण्यपि
स्वपादन्यासैस्तीर्थरूपाणि विधाय पुनर्भृगुकच्छं ययौ॥ ततः शौरिपुरे चंपायां प्रतिष्ठानपुरे सिद्धपुरे हस्तिनागपुरे एवं अन्येष्वपि स्थानेषु वि

हत्य॥ क्रमात्संमेतशिखरं गिरिं प्राप्य॥ तत्रसहस्रमुनिभिः समं अनशनं कृत्वा मासांते ज्येष्टमासस्य कृष्णनवम्यां श्रवणनक्षत्रे मुक्तिपदं प्राप्य
श्रीमुनिसुव्रतस्वामी सार्द्धकृत्वा सप्तसहस्रवर्षाणि कुमारत्वे॥ सार्द्धसप्तसहस्राणि राज्ये॥ पंचदशवर्षसहस्राणि व्रते एवं त्रिंशद्वर्षसहस्रा
णि सर्वायुः प्रपाल्य मुक्तिसुखं भेजे॥ सुव्रतार्हद्भगुकच्छतीर्थयोरुभयोरपि चरितं भव्यसत्वानां भूयात्कल्मषशांतये॥१॥ ॥इतिश्रीमुनिसु
व्रतस्वामिचरित्रं॥ ॥अथायतः श्रीमुनिसुव्रतस्वामिपुत्रः सुव्रतो भूत्॥ एवं च हरिवंशेनेके भूपा बभूवुः इतश्चात्र भरते यमुनातया
स्तटे सकलसंपदां निवासभूता॥ मथुरा पुरी अस्ति॥ तत्र हरिवंशोद्भवो वसुराजा बभूव॥ तत्पुत्रो बृहद्ध्वजः॥ एवं बहुषु भूपेषु गतेषु यदुना
मा नृपः आसीत्॥ यन्नाम्ना यादववंशो भूत्॥ तस्य यदोः पुत्रः सूरनामा भूत्॥ सूरस्य शौरिसुवीराभिधौ द्वौ पुत्रौ अभूतां॥ सूरनृपोन्यदा शौ
रिं राज्ये सुवीरं च युवराजपदे स्थापयित्वा स्वयं दीक्षां जग्राह॥ अथ शौरिः पितृदत्तं मथुराराज्यं सुवीराय दत्वा स्वयं तु कुशावर्त्तदेशे गत्वा॥
तत्र स्वनाम्ना शौर्यपुरं वासयित्वा तत्र राज्यं चकार॥ शौरेरंधकवृष्ण्याद्याः पुत्रा बभूवुः॥ अन्यदा सुवीरोपि भोजवृष्णये मथुराराज्यं दत्वा
स्वयं सिंधुदेशे सौवीरं पुरं वासयित्वा॥ तत्र राज्यं चकार॥ अन्यदा शौरिनृपोंधकवृष्णिं राज्ये स्थापयित्वा स्वयं प्रतिष्टमुनिपार्श्वे दीक्षां गृही
त्वा मुक्तिं ययौ॥ अथ भोजवृष्णेर्मथुराराज्यं पालयतः उदयबलोत्कट उग्रसेननामा पुत्रो भवत्॥ अंधकवृष्णेश्च सुभद्रायां पट्टदेव्यां दश

धामशावलयंतो बभूवुः॥ ते च॥ समुद्रविजय॥१॥ अक्षोभ्यः॥२॥ स्तिमित॥३॥ सागरो॥४॥ हिमवान्॥५॥ अचलः॥६॥ धरणः॥७॥ पूरणः॥८॥ अभि
चंद्रो॥९॥ वसुदेव॥१०॥ श्चैते दशापि दशार्हा इति लोके प्रसिद्धिं प्रापुः॥ एते दशापि तुल्यपराक्रमाः॥ शस्त्रशास्त्रकलाकुशलाः॥ सर्वगुणगणाश्च
मातापितृभक्ताश्च बभुवुः॥ तेषां कुंतीमद्री नाम्न्यौ द्वे लघुभगिन्यौ अभूतां॥ इतश्च पूर्वं श्रीऋषभस्वामिनः कुरुनामा पुत्रो भूत्॥ यस्य नाम्ना
लोकैः कुरुक्षेत्रमित्युच्यते॥ कुरोः पुत्रो हस्तिनामा॥ यस्माद्धस्तिनापुरं प्रसिद्धं॥ ततो हस्तिभूपतिसंताने विश्ववीर्यनृपः सनत्कुमारच
क्री ततोपि श्रीशांतिः कुंथुः अरश्चैते त्रयोपि जिनाश्चक्रवर्त्तिनश्च बभुवुः॥ ततोपि इंद्रकेतुः कीर्त्तिकेतुश्च भवीर्यसुवीर्य अनंतवीर्य कृतवी
र्यनृपाः॥ ततः सुभूमश्चक्रवर्त्ती॥ ततोपि असंख्य भूपेषु गतेषु॥ अन्यदा हस्तिनापुरे तत्र वंशे शांतनुनामा नृपतिर्महाप्रतापी बभूव॥ स नृपो
न्यदा नीलवस्त्राणि परिधाय॥ धृतमयूरपिच्छशेखरो धनुर्द्धरः पापर्द्धिरसिकान् चित्रककुर्कुरादीन् व्याधांश्च गृहीत्वा॥ पूर्वं वागुरिकादि
भिः पाशजालादिक्षेपणेन रुद्धे कानने॥ आखेटकार्थं ययौ॥ ततस्तत्र व्याधानां हक्कारैः श्वादीनां बुक्कारैश्च त्रस्यत्सु मृगयूथेषु क्षोभव्याकुले
षु॥ सर्ववन्यसत्वकुलेषु॥ अतिशय पापर्द्धिरसासक्तत्वात्॥ अश्वं वाहयन् मृगपृष्टगतो नृपोतिदूरं भूमिंगतः तावत्तत्र गंगातटे एकं म
होन्नतं रत्नप्रासादं अपश्यत्॥ तं दृष्ट्वा विस्मितो नृपो चिंतयत्॥ किं किल अस्य प्रासादस्य महोज्वलैः किरणसमूहैरेव इयं जाह्नवी प्रभूता

किंवाशशांककिरणसारैरेषविनिर्मितःइत्यादिविस्मयंवदन्॥नृपोथचैत्यमध्येप्रविश्यनेत्रयोःसुधाकुल्यातुल्यांश्रीयुगादिजिनप्रतिमांप्र
णम्यमत्तवारणेनिविष्टःसन् एकांसाक्षात्सुरसुंदरीमिव[illegible]पश्यतिस्म॥तस्यालोकोत्तरांरूपलावण्यसंपदंदृष्ट्वा॥नृपश्चिंतयामास॥अ
होत्रैलोक्यसारसर्वस्वरूपाइयंसुंदरीकाभविष्यतीतिविकल्पयन्॥मधुरवचनेनतांभाषयामास॥अयेमृगाक्षित्वंकासि एवंविधरूपसौ
भाग्यवसतिरपिकथंवनेतिष्टसिपरिणीतासि॥किंवाकन्यकासीतियावन्नृपःपृछतितावत्कश्चिद्विद्याधरस्तस्याःअग्रतःस्थित्वानृपंप्रा
ह॥शृणुराजेंद्रइयंजन्हुविद्याधरपतेःपुत्रीगंगानाम्नीसकलगुणगणविभूषितांगी॥अन्यदायौवनंप्राप्ताअधिकंशुशुभे॥एकदाअस्यां
पितुःसभायांउपविष्टायांकश्चिच्चारणमुनिसमाययौ॥नृपस्तंमुनिंवंदित्वाबहुभक्तिपूर्वकंइतिपृछतिस्मस्वामिन्॥अस्याःकुमार्यातुल्यरूप
सौभाग्यगुणःकोवरोभविष्यतीतिमुनिःप्राह॥राजन्हस्तिनापुरस्वामीशांतनुर्नृपोस्यावरोभविष्यतिसचमृगयानिर्गतोगंगातटेमिलिष्यती
तिकथयित्वामुनिरन्यत्रविजहार॥ततोजन्हुराजाअत्रगंगातटेमणिमयोयंप्रासादःकारितः॥इयंकुमार्यपिपितुरादेशात्॥अत्रस्थितानित्यं
श्रीयुगादीशंआराधयतिस्म॥ततोस्या[illegible]बलेनअद्यत्वंअत्रागतइतिततःइमांपाणिग्रहणेनसफलप्रयासांकुरु॥अत्रांतरेगंगाल
वनतमुखीकिंचिद्धसित्वाइतिप्राह मम[illegible]यावत् ममवाक्यं॥अन्यथानकरिष्यती॥तावत्तस्यगृहेस्थास्यामि॥यदातुममवाक्यंउ

त्थापयिष्यति॥तदाअहंपितुर्गृहेयास्यामीति॥तस्यावचनंअंगीकृत्य॥शांतनुनृपस्तदैवंश्रीजिनंसाक्षीकृत्यशांतनुनृपस्तदैव॥श्रीजिनंसाक्षीकृ
त्वतांपरिणीतवान्॥अथतदेवतंवृत्तांतंविज्ञायजन्हुविद्याधरोपितत्रागत्यपु[illegible]विवाहोत्सवंचक्रे॥अथजन्हुप्रमुखेषुस्वस्वस्थानंगतेषुतौ
दंपतीयावत्तत्रैवस्थितौस्तः॥तावत्स्वतेजसागगनमंगलंप्रभासयंतौद्वौविद्याधरमुनीगगनमार्गादुत्तीर्य॥तत्रागतौ॥तौश्रीयुगादीशंनत्वा
स्तुत्वाचयावद्गर्भगृहाद्बहिर्निर्गतौतावन्नृपोवंदित्वा॥भगवंतौयुवांकुतःसमागतौइतिपृछतिस्म॥अथतयोरेकोवृद्धमुनिःप्राहराजन्
आवांविद्याधरमुनीतीर्थयात्रापरौसम्मेतशिखरवैभारार्बुदरुचकाष्टापदादिषुयात्रांकृत्वा॥ततःश्रीशत्रुंजयेरैवताचलेचगतवंतौ॥त
त्ररैवताद्रेःकांचनाभिधेचतुर्थशृंगे॥श्रीनेमिनंवंदितुंयावद्गतौतावत्एकंदेवंसूर्यमंडलसमानेनस्वशरीरतेजसादशापिदिशःप्रकाश
यंतं॥श्रीनेमिनःपूजांकुर्वंतंअपश्यत्॥तत्रचसदेवोन्येनकेनचिद्देवेन॥तथाविधशरीरकांतेःकारणंपृष्टःसन्प्राह॥तथाहिपूर्वंश्रीरै
वताद्रिसमीपेसुग्रामपुरे॥अहंकुविंदोत्यंतपरंनिर्दयःक्रूरकर्मकारीहत्यादिमहापापकारकःअन्यदामहापापोद्भुतेनलुतारोगेणअत्यं
तं---तंपीडितःकस्यचिन्मुनेर्मुखात्रैवताद्रिमहात्म्यंश्रुत्वा॥अत्रागतः॥अत्रश्रीनेमिनःपूजांकुर्वन्उदयंतीनदीजलेनस्नानंचकुर्वतो
ममशरीररोगाःकर्मरोगाश्चययुः॥ततःसमाधिनामृत्वाईदृशंसुरसाम्राज्यंअत्यद्भुतंरूपंप्राप॥ततस्तंउपकारंस्मृत्वापुनरहंएतत्र

र्थस्यदर्शनार्थआगतः प्रासादंचकृतवान्॥ पुनरग्रेऽपि॥ एतत्तीर्थस्यैवसेवनात्॥ आगामिभवेमुक्तिंयास्यामि॥ किंचअत्रतीर्थे पिसिद्धि[illegible]
यकइतिनाम्नाऋषिःशापकोभूत्वाश्रीनेमीश्वरसेवकानांवांछितंपूरयिष्यामीतिसवृत्तांतंतीर्थमहात्म्यंचप्रकाश्यसदेवःस्वस्थानं[illegible] अ
वांऽपिक्रमात्तीर्थयात्रांकुर्वंतौसांप्रतंइहागतौ पुनरपिअन्यतीर्थानिवंदितुंयास्याव॥ इत्युक्त्वातौमुनीगगनमार्गेउत्पतितौ॥ अथशांत
नुनृपोपितीर्थमहात्म्यंश्रुत्वाकदातत्तीर्थयात्रयाअहमपिस्वजन्मसफलंकरिष्ये॥ इत्यादिमनोरथान्चिंतयन्तस्थौइतश्चअश्वपदानु
सारात्सर्वसैन्यंसमागतंसैनिकाःसर्वेपिसुवभूकंराजानंवीक्ष्यप्रमोदोत्सवंचक्रुः॥ ततोनृपतिर्दिव्यासमंगजारूढःशचीसहितःशक्रइ
वसर्वद्धापरिवृतोनिजंपुरंसमाजगाम॥ ततस्तस्यगंगयासहमर्त्यलोकदुर्लभान्॥ भोगान्भुंजानस्य॥ कियत्यपिकालेगतेसतिसुस्वप्न
सूचितोगांगेयइतिनाम्नापुत्रोभूत्॥ सचतेजसासूर्यसमश्चंदइवजगदानंदकारी॥ नित्यंसर्वमंगलाश्रयःसर्वकलासुबुधःसर्वगुणव
तांगुरुःसर्वथाविजितशुकोन्माद॥ अशुभकर्मणिचमंदइत्येवंसर्वग्रहमयोसौक्रमाद्वृद्धिंप्राप्य॥ अथशांतनुनृपोमृगयासक्तोगंगयाअ
नेकनयवाक्यैःप्रतिबोधितोपियदामृगयाव्यसनंनत्यजतिस्म॥ तदागंगास्ववाक्यप्रतिघातकोपात्गांगेयपुत्रेणयुतापितृगृहंजगाम
तयोर्वियोगाद्राजामूर्छांप्राप्य॥ पुनर्ल[illegible]नःस्त्रीपुत्रवियोगविकलात्मा॥ अनेकविलापान्चक्रे॥ ततःप्रधानादयोनीतिवचनैरुं

[illegible]ध्योमासुःस्वामिन्अत्रार्थेगंगायादोषोनकोप्यस्ति॥ किंतुतवैवदोषःयतस्त्वंयापूर्वंअंगीकृत्यापि॥ इदानींतस्यावचनंलोपितं॥ इत्यादि
श्रुत्वा स्वापराधमेवविमृश्यनृपोत्र॥ शल्यसहितोपिकिंचित्॥ बहिःशोकंत्यजतिस्म॥ इत्थंसनृपोतःशोकांगारतप्तांगःसागरोपमानि
चतुर्विंशतिवर्षाणिकथंचिन्निर्गमयतिस्म॥ इतश्चगंगापुत्रमादायपितृगृहेगता॥ तत्रजह्नुनृपेणबहुसंमानितासतीसुखेनतस्थौक्र
माद्गांगेयोपिगुरुसमीपेशस्त्रशास्त्राणांपारंगामीबभूव॥ अथसकलस्त्रीजनचित्तापहारकंयौवनंप्राप्तोसौअन्यदाश्रीचारणश्र
मणमुनिदेशनयाप्रबुद्धःश्रावकधर्मप्रतिपद्यवैराग्यात्विशेषधर्मकार्यकरणलोलुपःसन्स्वमातुर्विवाहस्थानेगंगातटकानने
श्रीयुगादीशभक्तिंकुर्वन्तस्थौ॥ इतश्चान्यदाशांतनुराजामृगयायांपर्यटन्॥ तथाविधपरिकरोपकरणादियुतस्तत्रवनेसमागतः॥ तत्र
चव्याधैःकुर्कुरैःअश्वखुरतालैःसंक्षुभितपशुपक्षिसमूहंतद्वनंदृष्ट्वाकोपंवनेआकस्मिकउत्पातइतिविमृश्यवेगात्कवचधनुस्तु
णीरधारीगांगेयस्तत्रागतोराजानंवीक्ष्यविनयवाक्यैरितिप्राह॥ अहोराजेंद्रत्वंलोकपालइत्युच्यसे॥ ततस्त्वयासर्वजीवारक्षणीया॥ अ
पराधकारिणांचशिक्षादातव्या॥ इत्येषराजधर्मः एवंसत्यपिनिरपराधान्॥ अशरणान्जीवान्मारयतस्तवकिंलोकपालत्वंकिंचय
यातवजनपदेषुत्वंरक्षाकर्तासि॥ तथात्रापिकानने श्रीयुगादीशसेवकोहंरक्षकत्वेनास्थितोस्मि॥ ततोनयुज्यते अत्रएतत्अन्यायक

रणेयतः क्षात्रधर्मस्तुसर्वेषामपितुल्यएवेत्यादिकथयंतमपितंअवगणय्यनृपः पुनरपिमृगयायांप्रवर्त्ततेस्म॥ततोगांगेयोपिकोपाद्धुंक
कारंविधायसिंहनादंचकार॥ततःशरान्क्षिपन्क्षणमात्रेणएकोप्यसौमृगपतिर्मृगानिव॥स्वर्यस्त्मांसीवसर्वान्व्याधान्सेनाग्राश्च
ततःक्रुद्धोनृपोपिगांगेयंप्रत्याक्रोशवाक्यैःरेयुद्धेसज्जोभवेतिप्रत्याकारयत्॥अथतौद्वावपिस्वभुजबलोद्धतौ॥अन्योन्यास्त्ररूपणेनयुद्धमा
नौदेवानामपिभयंकरौजातौ॥इतश्चगंगासेवकमुखात्तयोर्युद्धंविज्ञायवेगात्तत्रागत्यसहसानृपस्याग्रतःस्थित्वाइतिप्राह॥स्वामिन्
व्यसनपरवशास्मान्किमेवंस्वपुत्रेणैवयुद्ध्यसेइतिश्रुत्वानृपःसरोमांचंगंगाभिमुखंवीक्ष्यप्राह॥प्रियेकुतोनर्कितंअत्रतवागमनंइति
ततोगंगासर्वंस्ववृत्तांतंकथयित्वावत्सअयंतवपिताइतिपुत्रंप्रतिबोधयामास॥ततोनृपतिस्तुरंगमान्उत्तीर्यपादयोःपतंतंपुत्रंनि
भररस्नेहेनसमाश्लिष्य॥आत्मानंकृतकृत्यंमेने॥ततःपुत्रंउत्संगेस्थापयित्वा॥राजाचिरकालविरहजंदुःखंवमन्निव॥अश्रूणिमुंचन्
स्वापराधक्षामणपूर्वकंगंगाप्रतिप्रियेयद्यपिमयात्वद्वचनलोपात्अपराधकृतःतथापिकृतपश्चात्तापेमयिमांप्रसन्नेहावलोक
नेनप्रसादंकुरुराज्यंचअंगीकुरुनिवारयममांगाद्विरहाग्निदाह॥इतिश्रुत्वागंगाप्राह॥स्वामिन्यदिमकलानर्थकारिणीहिंसामपिमन
वचनात्त्वंनामाक्षीः॥नर्हिइदानींकःओपुद्रः अयंतवपुत्रःसकलशास्त्रकलाकुशलःपरमविनीतश्च॥एनंगृहीत्वासंत्यकखेदःस

राज्यंपालय॥अहंतुपुत्रंउपलक्षयितुंआगतास्मि॥पुनस्तवादेशंप्राप्यपितृगृहंयास्यामीत्युक्त्वाराज्ञापुत्रेणचबिःविधवत्रनैवार्यमाणा
पिसापितृग्रहंययौ॥अथराजापुत्रप्राप्तिहर्षेणप्रियावियोगशोकेनचसमकालंसंश्लिष्टःसन्पुत्रंगजेधिरोप्यमहोत्सवपूर्वकंपुरंप्रवि
वेश॥अथतेनसर्वगुणशालिनापुत्रेणराजाप्रवृद्धप्रतापतया परेषांअनाक्रमणीयोबभूव॥अन्यदाराजाश्वारूढःक्रीडांकुर्वन्यमुना
तटेगतः॥तत्रतटिनीशोभांपश्यनस्तस्ययमुनाजलेनौकयाखेलंती॥काचिल्लोकोत्तररूपसौंदर्यशालिनी॥एकाकन्यादृष्टिमार्गमागता
॥तस्यारूपंदृष्ट्वाकामबाणैर्विद्धोनृपतिःकावाभविष्यतीतिविचिंत्यनौकावाहकान्धीवरान्तस्याःस्वरूपंपृष्ठतिस्म॥अथतेषुए
कोवृद्धःशृण्वीवांप्रणम्यप्राह॥स्वामिन्एषाममपुत्री॥साक्षात्सरस्वतीवसकलशास्त्रकलाकोविदासाक्षाल्लक्ष्मीरिवसर्वलक्षणसुं
दरांगीकल्पवल्लीवगेहेस्थितासर्वदारिद्र्यदौर्भाग्यादिहरी॥एवंसुर्वगुणपूर्णापियोग्यवरस्यअप्राप्त्याअद्यापिकुमारिकावर्त्तते इति
श्रुत्वानृपःस्वमंदिरमागत्य॥तस्याःकन्यायाःप्रार्थनार्यंतस्यनाविकस्यगृहेप्रधानपुरुषान्प्रेषयामास॥तेचतत्रगत्वा॥तेननाविके
नदत्तबहुमानाःनृपार्थेनाकन्यायाचयामासुः॥सर्वप्रजाधिनाथःसर्वदेवमयनृःशांतनुनृपःसाक्षात्स्वयंतवपुत्रींयाचते॥ततस्त्वं
अद्भुतभाग्यनिधिःयतःपुत्रीप्रदानसंबंधेनअस्मदादीनांअपिपूज्यो भविष्यसीत्यादिश्रुत्वानाविकःप्राह॥भोभोमंत्रिणःसत्य

मुक्तं भवद्भिः परं अत्र कार्ये अहं न प्रार्थनीयः॥ यतोस्माकं कुलं सर्वाधमं राजा तु सर्वोत्तमः सर्वजनपूज्य इति अयुक्तोयं संबंधः पुनर्मंत्रिणः
प्राहुः॥ अहो भद्र नीचकुलोद्भवायां इद्दशी रूपलावण्यादिसंपन्न भवति॥ सर्वथैव एषा कन्या उत्तमकुलजातास्ति॥ न हि रोहणाद्रिं विना
मणिरुत्पद्यते॥ ततः केनापि कारणेन इयं तव गृहं प्राप्तास्ति नीचकुलोद्भवायां तु सर्वदेवमयोयं नृपतिर्न रज्यत्येव॥ अतः कारणात्
तवैतद्युक्तायुक्तविचारणं न युज्यते केवलं राजाज्ञामेव प्रमाणीकृत्य कन्यां देहि॥ इति श्रुत्वा पुनर्नाविकः प्राह॥ नृपाज्ञा तु मान्या एव नात्र सं
देहः परं कन्याप्रदाने तु विचारः सर्वजनविदित एव॥ यतो मत्पुत्री नीचकुलोद्भवत्वात् अन्यासां राजकुलोद्भवानां राज्ञीनां मध्ये मान्यं
न लभते॥ अन्यच्च अस्य गांगेयः पुत्रो महापराक्रमी राज्याधिकारी वर्त्तते॥ तस्मिन् सति मत्पुत्र्याः संतानानि कोवक्रमन्यते॥ ततोहं
मत्पुत्रीं नृपाय न दास्यामीति तद्वचः श्रुत्वा ते मंत्रिणः सर्वं वृत्तांतं नृपाय निवेदयामासुः॥ तच्छ्रुत्वा नृपस्त्वहिरहासहोत्यंतदुःखातुरो बभू
व॥ अथ लोकमुखाद्गांगेयस्तं वृत्तांतं ज्ञात्वा पितुर्दुःखं विज्ञाय स्वयं नाविकगृहे गत्वा तां कन्यां पितुःकृते प्रार्थयामास॥ किंच इयं गंगा इव
मम माता॥ अहं अस्याः पुत्रः सदा सेवापरो भविष्यामि॥ अहं तु पूर्वमपि विरक्तचित्तोस्मि॥ ततो तस्याः पुत्रो मम भ्राता स एव राज्यं करो
तु॥ यदि त्वं एवं मन्यसे॥ यद्गांगेयस्य पुत्रा अपि बलात् तस्य राज्यं हरिष्यंति॥ तर्हि अद्यप्रभृति मम ब्रह्मचर्यमेव भवतु॥ तत्रार्थे सूर्यादयो दे

वाः साक्षिणो भवंतु॥ इति ब्रह्मव्रतप्रतिज्ञां कुर्वन् एव गांगेयस्योपरि देवैः पुष्पवृष्टिः कृता॥ अहो गांगेय धन्यतमोसि त्वं येन ईदृशं भीष्मं
व्रतं अंगीकृतं॥ इति उद्घोषयामासुः॥ ततः प्रभृति लोके गांगेयस्य भीष्म इति नाम विख्यातं॥ ततो नाविको हर्षितः प्राह॥ शृणु कुमार अ
स्याः कुलं स्वरूपं च॥ तथाहि रत्नपुरे रत्नशेखरो नृपतिः॥ तस्य रत्नवती भार्या सा च अन्यदा स्वप्नमध्ये चंद्रलेखां पश्यति स्म॥ क्रमात्तेन स्व
प्नेन सूचितशुभोदयां इमां पुत्रीं प्रासूत॥ तां च जातमात्रामेव कश्चिद्विद्याधरोपहृत्य॥ अत्र यमुनातीरे मुमोच॥ तदवसरे च॥ रत्नशे
खर पुत्रीयं नाम्ना सत्यवती तथा सर्वलक्षणसंपूर्णा॥ भाविनी शांतनुप्रिया॥१॥ इत्याकाशवाणी मया श्रुता॥ ततः इमां बालिकां गृ
हीत्वा स्वगृहमागतोहं॥ अद्य यावच्च पुत्रीत्वेन पालिता शास्त्रं शांतनुप्रिया भविष्यतीत्यपि देववाणी सफला जाता॥ इति श्रुत्वा हर्षि
तो गांगेयः पितुरग्रे सर्ववृत्तांतं निवेद्य विवाहोत्सवं प्रारेभे॥ राजा तु तस्य लघोरपि सत्वाधिक्यं स्वस्य च हीनसत्वतां विचिंतयन् रू
णं लज्जावान् बभूव॥ ततः शांतनुर्विद्याधरकृतोत्सवः सुदिवसे सत्यवतीं परिणयामास॥ ततः प्रेममग्नो नृपतिर्यथेच्छं तया सह का
मभोगान् भुंजानः स्वर्गाधिकं सुखं मेने॥ ततस्तस्य सत्यवत्याः कुक्षिजातौ चित्रांगदविचित्रवीर्यनामानौ द्वौ पुत्रौ अभूतां॥ अथ रा
जा मृगयाव्यसनं त्यक्त्वा शत्रुंजयादितीर्थेषु यात्रां रथादिसुकृतं च विधाय आयुःक्षये स्वर्गं जगाम॥ ततो भीष्मश्चित्रांगदं राज्ये स्था

पयामास॥स्वयंतराज्यचिंतकोभूत्॥अन्यदाभीष्मवाक्यंअवगण्यमदोद्धतश्चित्रांगदोनीलांगदगंधर्वेणसमंयोद्धुंगतः॥तत्रचकपटंकृत्वा
नीलांगदेनचित्रांगदोहतः॥तंवृत्तांतंश्रुत्वाक्रुद्धोभीष्मःस्वयमागत्यनीलांगदमारयामास॥ततोलघुभ्रातरंविचित्रवीर्यंराज्येस्थाप
मास॥स्वयंचराज्यचिंतकःसन्॥विचित्रवीर्यंशस्त्रशास्त्रादिकलासुकोविदंचकार॥इतश्चकाशिनृपतेः॥अंबा॥१॥अंबाला॥२॥अंबिका
३॥चेतितिस्त्रःकन्याअभूवन्॥अन्यदाराज्ञातासांस्वयंवरोत्सवःप्रारब्धःसर्वदेशेषुदूताःप्रेषिताःकेनापिकारणेनहस्तिनापुरेदूतान
प्रेषितः॥तत्क्रोधात्भीष्मःस्वयंतत्रगत्वासकलराज्ञांपश्यतामेवमंडपमध्यात्तिस्रोपिकन्याबलात्रथेनिवेश्य॥इतिप्राह॥भोभोराजा
न्याःशृणुतसर्वेएषभीष्मोहंकन्याःसमादायगच्छामिभवतांयोबलोत्कटःसशीघ्रंआयातुइत्युक्त्वानिर्गतः॥ततःक्रुद्धास्तेराजानोन
नाशस्त्राणिवर्षंतःशूकराःसिंहमिवगांगेयंरुरुधुः॥एकोपिगांगेयस्तान्सर्वान्महावातःतृणानिवदिशोदिशिविकीर्यवेगात्ह
स्तिनापुरमागत्यमहोत्सवंविधायतिस्रोपिकन्याविचित्रवीर्येणउद्वाहयत्॥ततोविचित्रवीर्यस्तारुण्यमदपरवशःसर्वांगभोग
सामग्रीअनुरूपप्रियासंयोगंचसमवाप्य॥एकांतेनकामासक्तःसन्ताभिःसहभोगान्बुभुजे॥इत्थंभोगसुखंविलसतस्तस्य
क्रमेणत्रयःपुत्राअभूवन्॥तथाहि॥अंबिकायांधृतराष्ट्रनामासचपूर्ववशात्जन्मांधः॥अंबालायांपांडुनामा॥अंबिकायां

चविदुरइतिएवंत्रयोप्येतेविनीताःसकलगुणोपेताअभूवन्॥अन्यदाअत्यंतकामासक्तःसमुत्पन्नेनक्षयरोगेणविचित्रवीर्योमरणंप्राप्य॥तदा
धृतराष्ट्रंअंधत्वात्राज्येअयोग्यंविज्ञायभीष्मःपांडुंराज्येस्थापयामास॥सपांडुनृपःप्रजानांउपद्रववारणेनशुक्रदंतयाचविशेषान्रा
ज्यसमृद्धिंवर्द्धयामास॥किंच॥सर्वनृपाणांपूज्योपित्रिकालंश्रीजिनंपूजयामास॥सर्वजनताप्रणतपादोपिनित्यंसाधून्॥प्रणमतिस्म॥इ
त्थंअखंडिताज्ञंराज्यंपालयन्॥अन्यदावसंतसमयेवनशोभावलोकनार्थंययौ॥तत्रचचंपकाशोकसहकारनारंगपूगबकुलमालती
मल्लिकादिवृक्षेषु॥पुष्पितफलितेषुकोकिलालापमुखरेषुदिगंतेषुसहकारपरागपानमत्तेषुमधुकरकुलेषुमधुरंगुंजत्सु॥नानाकामके
लिलालसेषु॥नागरिकनिकरेषु॥एवंविधरसमयेतस्मिन्समयेपांडुनृपतिःसाक्षात्स्वयंवसंतइववनांतराणिसंचरन्॥एकत्रसहका
रतरोस्तलेकेनचित्पुरुषेणअनिमेषंदृश्याफलकखंडंविलोकयंतं॥अपश्यत्॥नृपोपिसहसातस्याग्रतोगत्वाकिमिदमितितस्यहस्तात्फल
कंगृहीत्वायावद्विलोकयतितावत्॥तस्मिन्फलकेकस्याश्चित्स्त्रियोलोकाद्भुतकारिरूपंदृष्ट्वा॥तमेवनरंपृच्छतिस्म॥अहोभद्रत्रिभुवन
जनस्पृहणीयकल्पलतायाइवकस्याःस्त्रियोवादिव्यावाइदंचित्रफलकंइतिसोप्याह॥राजन्इयंशौरिपुराधिपतेरंधकवृष्णिनृपस्य
पुत्रीदशानांदशार्हाणांअनुजाकुंतीनाम्नीकन्यातस्याःप्रतिकृतिःसाचकचतुःषष्टिकलापात्रंनिरवधिरूपलावण्यादिगुणस्थानि

वर्त्तते॥ परं तस्याः सद्दर्शनं अलभमानस्त्वितानिश्यंचिंता उरस्थितिष्टति अहं तु एकवारं तां दृष्ट्वा किंचिन्मात्रं तद्रूपांशं विनोदाय फलके
लिखं समग्रं तस्या रूपं लिखितुं तु अलापितशक्कोमि इति श्रुत्वा पांडुनृपस्तस्मै प्रीतिदानं दत्वा॥ तत्फलकं च गृहीत्वा सस्नेहं पुनः पुनरवलोक
यन्॥ गृहं समागतः परं तस्यामेवासक्तहृदयो सो जने वने वा क्वापि रतिं न प्राप्य॥ समनसैव कुंत्याः प्राप्त्युपायं चिंतयन्॥ लज्जादि तु तया
कस्याप्यग्रे वक्तुं अशक्को दिनानि वर्षप्रायाणि गमयति॥ अन्यदा तद्विरहपीडितो वनालोकनमिषेण वनं गतः तत्रापि अंतः शल्यपीड्य
मानहृदयो रतिं अप्राप्नुवन् चंपकश्रेणीषु भ्रमन् केचित्पुरुषं पृथिव्यां लोहकीलकैः कीलितं मूर्छितं च वीक्ष्य संजातकरुणो नृपः खड्ग
खंविस्मार्य॥ तत्समीपं गत्वा यावद्विलोकयति॥ तावत्पुरतः खड्गं विलोकयतिस्म॥ तत्र खड्गे हेउं षधीवलयं दृष्ट्वा तन्मध्यात् एकं वलयं तस्य
नरस्यांगे यदा वाहितं तावल्लोहकीलकाः सर्वेपि गताः द्वितीयवलयस्पर्शात्तस्य शरीरस्य व्रणान्यपि रूढानि सज्जः सचेतनश्च
जातः॥ ततः कोसि त्वं इति नृपेण पृष्टे स आह॥ राजन् अनिलगतिनामा विद्याधरोस्मि अशनिवेगविद्याधरेण मम भार्यापहृता॥ अहं
तस्य पृष्टतो धावमानस्तेनैव वैरिणा ईदृशीं अवस्थां प्रापितः त्वया निःकारणोपकारिणा जीवितदानं दत्तं॥ अहं तु किं प्रत्युपकारं
त्वा अनृणी भवामि तथापि एते महौषध्यो गृहाण॥ इमां मुद्रिकां च गृहाण॥ अस्या मुद्रिकायाः प्रभावेण त्वं रूपमात्रेण वांछितं स्थ

नं गमिष्यसि॥ स्मरणमात्रेण च॥ अहमपि तव सान्निध्यं करिष्यामि॥ इत्युक्त्वा नृपेण संमानितो विद्याधरोन्यत्र ययौ॥ राजापि तं विद्याधरं कुं
तीं च स्मरन् स्वगृहं ययौ॥ अथ स फलकधारकः पुरुषो हस्तिनापुरं गत्वा॥ अंधकवृष्णिनृपाग्रे पांडुनृपस्य रूपसौभाग्यादिकं वर्णित
वान्॥ कुंत्यपि तत्श्रवणेन मोहं प्राप्ता॥ अत्र भवे मम पांडुरेव पतिरस्तु॥ इति प्रतिज्ञां चक्रे॥ परं लज्जया कृत्वा तया विधं स्वाभिप्रायं॥ कस्या
प्यग्रे कथितुं अशक्का सती मरुस्थलेकमलिनीव स्मराग्निना मनसैव दह्यतिस्म॥ अन्यदा विरहाग्निदुस्सहं प्रियसंगमं च दुर्लभं ज्ञात्वा॥ मर
णमेव शरणमिति निश्चित्य॥ उद्याने गत्वा गलपाशदाने तत्परा इति प्राह॥ भो भो कुलदेव्यो मातरो युष्मभ्यो जलिं कृत्वा इति प्रार्थये॥ य
त अत्र भवे प्रियप्राप्तिं दुर्लभां ता त्वाष्टतायां मम परभवेपि पांडुरेव पतिरस्तु॥ तदर्थं मृतायां मे वृत्तांतं तस्मै यूयं ज्ञापयेथाः इति कृत्वा ग
लनाले पाशं क्षिप्त्वा॥ याक्रमणं करोति॥ तावन् मुद्रिकाप्रभावेण पांडुनृपोपि तत्रागतः॥ अथ राजा चित्रपटदर्शनानुसारेण तां कुंती
इति उपलक्ष्य॥ गलपाशं वेगाच्छित्वा सस्नेहं तस्याः कंठे स्वबाहुपाशं रचयतिस्म॥ सापि पूर्वश्रुतानुसारेण स्वपतिं पांडुनृपं समुपलक्ष्य॥
स्त भवे पद्युरोमांचादिकान् सात्विकान् भावान् प्रकटयंती लज्जाधोमुखी तस्थौ॥ अथ सखीजनसमानीतां विवाहसामग्रीं मिलयित्वा॥ तदा
तत्रैव गांधर्वविवाहेन पांडुनृपः कुंतीं परिणीतवान्॥ तत्रैव तयोः सुरतसंयोगे सति॥ ऋतुस्नाता सा गर्भं दधौ॥ पांडुनृपोपि पूर्णमनो

र्योमुद्रिकायोगात्॥निर्जनस्थानंजगाम॥कुंत्यपिगर्भंबिभ्रतीस्वगृहंययौ॥ततःसाधात्रीभिःसखीभिश्चगोप्यमानगर्भादयाक्रमात्पूर्णेगर्भ
कालेपुत्रंप्रासूत॥तंचबालकंलज्जापारवश्यात्रत्नमिवकांस्यपेटीमध्येक्षिप्त्वागंगायांप्रवाहयामास॥सापेटीप्रवाहेवहंतीहस्तिनापुरे
गत्वा॥तत्रसूतनाम्नासारथिनादृष्टासापेटीनिःकासिताउद्घाटिताचततोऽत्ररहितंसूर्यमिवतेजस्विनंबालंवीक्ष्यहृष्टोगृहेसमानी
स्वभार्यायैराधायैअर्पयामास॥तस्यकर्णइतिनामकृतं॥क्रमेणवर्द्धमानःसबालोगुणाधिकतयान्नृपादीनांवल्लभोभूत्॥अथान्यदा
अंधकवृष्णिनृपोपिकथंचित्कुंत्याःपांडुविषयेस्नेहंविज्ञाय॥पांडुराजेनउद्वाहितिस्म॥ततोभद्रकनृपस्यस्वयंवरोत्सवेमद्रीनामाकन्या
मपिपांडुःपरिणीतवान्॥इतश्चसुबलनाम्नोगंधारदेशाधिपतेर्गंधारीप्रमुखाअष्टौपुत्र्योभूवन्॥तासांअष्टानामपिगोत्रदेवीवच
नात्॥धृतराष्ट्रंवरंविज्ञाय॥सुबलराजपुत्रःशकुनिस्ताअष्टापिभगिनीःसमादाय॥हस्तिनापुरेसमागत्य॥धृतराष्ट्रेणउद्वाहयामा
स॥ततोविदुरोपिदेवकनृपपुत्रींकुमुदिनींपरिणीतवान्॥अथअंधकवृष्णिनृपःसमुद्रविजयंराज्येस्थापयित्वास्वयंप्रतिष्टमुनि
पार्श्वेदीक्षांगृहीत्वा॥क्रमान्मुक्तिंययौ॥अथसमुद्रविजयनृपस्तत्प्रराज्यांगंसमृद्धंचतुरंगबलोपेतं॥शौर्यपुरराज्यंअखंडप्रताप
पापालयन्नपिदेवगुरुभक्तिसाधर्मिकवात्सल्यदीनोद्धरणशासनप्रभावनादिकार्येषुनित्योद्युक्ततयाअप्रमत्तोभूत्॥तस्यर[illegible]

शिवादेवीतिपट्टराज्ञीसकलगुणगणालंकृताबभूव॥इतश्चमथुरायांभोजवृष्णिनृपोपिउग्रसेनंस्वराज्येनिवेश्यस्वयंदीक्षांग्राह॥उग्रसेनस्यधा
रणीराज्ञीआसीत्॥इतश्चउग्रसेननृपेणकश्चिन्मासोपवासीतापसःस्वगृहेपारणार्थंनिमंत्रितः॥पारणादिनेचराजकार्यव्यग्रतयाराज्ञान
स्मारितः॥तापसस्तुपारणं॥अकृत्वैवपुनर्मासोपवासान्चकार॥राजापुनःपारणार्थंनिमंत्रितस्तथैवविस्मृतश्च॥एवंवारत्रयंपारणंत्र
यकरणात्॥क्रुद्धःसतापसःउग्रसेनवधेनिदानंकृत्वा॥तस्यैवगृहेधारण्याःकुक्षौपुत्रत्वेनउत्पन्नः॥गर्भस्थितएवतस्मिन्धारण्याःपतिमां
संभक्षणदोहदोभवत्॥तदनुसारेणपतिवैरिणंतंबालंविज्ञायधारणीजातमात्रमेवतंबालंकांस्यपेटीमध्येक्षिप्त्वा॥यमुनाप्रवाहेवाहया
मास॥साचप्रवहंतीशौरिपुरेगत्वा॥तत्रकेनचिद्वणिजालब्धा॥तत्रतेजस्विनंबालंदृष्ट्वामुदितोसौकांस्यपेटीमध्याल्लब्धत्वात्॥कंसइति
नामदत्वातंबालंपालयामास॥क्रमेणप्रवर्द्धमानःसबालस्तेजस्वितयाक्रीडायांअन्यबालान्॥ताडयामास॥ततोदुर्विनीतोयंइतिविज्ञाय
सोपितंकंसंसमुद्रविजयनृपायार्पयत्॥ततोवसुदेवसमीपेस्थितोसौक्रमेणयौवनंप्राप्तः॥सचवसुदेवस्यअत्यंतंवल्लभोभूत्॥इतश्चराज
गृहपुरेबृहद्रथपुत्रोजरासंधस्त्रिखंडभोक्ताप्रतिवासुदेवोभूत्॥अन्यदाजरासंधस्यादेशात्जरासंधप्रतिपक्षंसिंहरथनृपंजेतुंवसुदेवः
कंसेनद्वितीयोयौ॥ततःकंससाहाय्यात्॥संग्रामेसिंहरथंविजित्यबध्वारथेक्षिप्त्वावसुदेवोजरासंधायार्पयत्॥तुष्टोजरासंधोधस्वपुत्रींजी[illegible]

251/1962

वयशाइतिनाम्नी॥वसुदेवायदातुंवांछतिस्म॥ततोवसुदेवोनैमित्तिकवचनेनकुलद्वयक्षयकरीयंइतिज्ञात्वाजरासंधंप्रतिप्राह॥स्वामिन् सिं
हरथस्तु॥कंसेनबध्वात्वत्समीपमानीतः॥ततःकंसस्यप्रमादःकथंयुज्यतेइतितद्वचसाजरासंधःकंसायस्वपुत्रींदत्तवान्॥ततःकंसःपूर्वजन्मरो
षात्॥पित्रावैरंवहन्॥जरासंधादेशात् मथुरायाराज्यंप्राप्य उग्रसेनं॥कारागृहेक्षिप्तवान्॥ततोतिमुक्तकःकंसस्यलघुभ्रातापितृदुःखदृष्टावै
राग्यात् दीक्षांजग्राह॥ततःकंसोमथुरायांराज्यंकरोति॥दशार्हाश्चजरासंधादेशंप्राप्यस्वपुरींप्रापुः॥अन्यदावसुदेवःकिंचित्स्वमतःकल्पित
रोषंविचिंत्य॥देशांतरंप्रतिययौ॥तत्रासौपूर्वजन्मकृतनिदानबलात् स्त्रीवल्लभतया॥शतशःकन्याःपरिणीतवान्॥ततोरोहिण्याःस्वयंवरेव
सुदेवस्यभुजबलंवीक्ष्यचमत्कृतैःसमुद्रविजयादिभिःउपलक्ष्य॥समालिंगितः॥ततःप्रमुदितैःसकलयादवैःसहितोवसुदेवोरोहिणीं
परिणीय॥शौरिपुरमागत्यभोगान् बुभुजे॥अन्यदारोहिणीचतुर्महास्वप्नसूचितं॥बलभद्राभिधंबलदेवंप्रासूत॥तस्यचरामइत्यपि
नामबभूव॥अन्यदावसुदेवःकंसस्याग्रहात्देवकनृपपुत्रींदेवकींपरिणीतवान्॥तस्याविवाहोत्सवेकंसपत्नीजीवयशाःमदपानविह्वला
सती॥गोचर्यागतंस्वदेवरंअतिमुक्तकमुनिंदृष्ट्वामदमत्ततया॥आगच्छआगच्छदेवरक्रीडांकुर्मइत्युक्त्वामुनेःकंठेविलग्ना॥ततोमुनिस्त्व
यानेनकुद्धस्तांप्राह॥रेरेमूढेकिंउन्मत्ततांकरोषि॥अस्यादेवक्याःसप्तमोगर्भस्तवपतिंपितरंचहनिष्यति॥तिश्रवणमात्रादेवभयभीतासा

मुनिंमुमोच॥तंचवृत्तांतंएकांतेकंसायकथयामास॥कंसोपिसाधुवाक्यंनान्यथास्यादितिविचिंत्य॥तत्प्रतीकारार्थं॥वसुदेवंबहुसंमानदानादिभिः
प्रसाद्यसप्तादेवक्याः॥सप्तगर्भान्याचयामास॥वसुदेवोपिदाक्षिण्यात्तत्॥अंगीचक्रे॥अथमृतबालात्प्रसवत्यासुलसयासमाराधितोहरि
नैगमेषीसुरोदेवक्याजातमात्रान्॥पुत्रान्गृहीत्वा॥सुलसायैअर्पयामास॥तस्यामृतबालकांश्चदेवक्याःपार्श्वेमुचत्॥कंसस्तुतान्बालान्पाषा
णोपरिआछोटयत्॥इत्थंतेदेवक्याःषडपिपुत्राअनीकयशाः॥१॥अनंतसेनः॥२॥अजितसेनः॥३॥निहतारिः॥४॥देवयशाः॥५॥शत्रुसे
न॥६॥इतिनामानःसुलसागृहेअवर्द्धंत॥अन्यदादेवकीऋतुस्नातासिंह॥१॥सूर्य॥२॥वह्नि॥३॥गज॥४॥ध्वज॥५॥विमान॥६॥पद्मसरो॥७
लक्षणान्महास्वप्नान् पश्यतिस्म॥स्वप्नानुभावात्सावासुदेवंगर्भेधारयंती॥पूर्णकालेश्रावणकृष्णाष्टम्यांमध्यरात्रेश्यामवर्णं॥तेजोमं
डलेनदिशःप्रकाशयंतंपुत्रंप्रासूततदधिष्ठातृदेवानांप्रभावात्॥कंसमुक्ताश्चारक्षकभटाःसर्वेपिनिद्रांप्रापुः॥ततोदेवकीवचनात्व
सुदेवस्तंबालंगृहीत्वागोकुलेनंदगोपतिगृहेगत्वा॥तद्भार्यायैयशोदायैअर्पयत्॥यशोदायाजातमात्रांसुतांआनीयदेवक्याःपार्श्वेमुंचत्॥अथतेकं
समुक्ताआरक्षकाःजागरिताःसंतस्तांपुत्रींनीत्वाकंसायार्पयन्॥ततःकंसश्चिंतितवान्॥यन्मुनिनासप्तमगर्भान्ममरणंप्रोक्तं॥तद्वृथैव
संजातं॥इयंतुबालिकाअस्याःसकाशात् नमेमहाभुजस्यकिमपिभयंइतिकृत्वातस्यानासिकांछित्वाअसौतस्यानासिकां॥अथदेवीभि

र्लाल्यमानः सबालः कृष्णांगत्वात्॥ कृष्ण इति कृतनामा॥ गोकुले वृद्धिं प्राप्य॥ तत्र लीलां कुर्वन् शकुनि पूतने अपवधीत् शकटं यमलार्जुनौ च॥ अभ
ञ्जीत्॥ तद्भुत्वा देवकी पुत्रस्नेहात् नित्यं नवनवानि पर्वाणि कल्पयित्वा गोकुले ययौ॥ ततो वसुदेवः कृष्ण रक्षार्थं बलभद्रं समादिशन्निस्म॥ तत
स्तौ द्वावपि दर्शांधनुरुच्चदेहौ यमलजातौ॥ कल्पतरू इव नित्यं गोकुले क्रीडां चक्रतुः॥ इतश्च शौरिपुरे समुद्रविजयनृपभार्या शिवा॥ अन्य
दा निशाशेषे॥ चतुर्दशमहास्वप्नान् ददर्श॥ तदैव कार्त्तिककृष्णद्वादश्यां चित्रानक्षत्रे॥ अपराजितविमानात् च्युत्वा॥ स्वामी शिवाकुक्षाववत
तीर्णः॥ ततः श्रावणशुक्लपंचम्यां मध्यरात्रे चित्रानक्षत्रे शिवा कृष्णवर्णं शंखलांछनं पुत्रं प्रासूत॥ ततः षट्पंचाशद्दिक्कुमार्यः चतुःषष्टिरिंद्रा
श्च जिनजन्मोत्सवं चक्रुः॥ ततः समुद्रविजयोपि पुत्रजन्मोत्सवं विधाय॥ अरिष्टरत्नमयचक्रस्वप्नानुसारेण अरिष्टनेमिरिति नाम चक्रे॥ अथस
र्वा अप्सरोगणैर्लाल्यमानः बालरूपधरैर्देवैश्च सह क्रीडन् बालोपि अबालपराक्रमः कांश्चित्सर्पतरूपेण॥ कांश्चिद्गजरूपेण च समाग
तान् सुरान् लीलामात्रेण॥ आकाशे उल्लालयामास॥ यस्य च जन्मोत्सवे एव समुद्रविजयनृपः स्वजनपरिवृतो वनक्रीडार्थं गतः तावत्सौधर्म
इंद्रः पातुरुत्संगस्थं प्रभुं विलोक्य प्रमदोच्छ्वसितगात्रः प्रणम्य इति प्राह॥ भो भो सुराः धन्यः समुद्रविजयो राजा यस्य गृहे त्रिलोकनाथो भगवान् पु
त्रत्वेनावतीर्णः॥ अहो अस्मिन् बाल्येपि तादृशो धैर्यातिशयो वर्त्तते॥ यद्देवदानवैरपि चलितुं अशक्यः किंच॥ एकतस्त्रिलोक्या अपि बलं प्रिय[illegible]॥

एकतश्च अस्य भगवतो बलं प्रियते॥ तत्र मेरुतुल्यस्य भगवतो बलस्याग्रे त्रैलोक्या अपि बलं तिलमात्रं भवति इति शक्रकृतां प्रशंसां श्रुत्वा केचि
त्विन्मिथ्यादृष्टयः सुराः अश्रद्धानाः शक्रं प्रत्याहुः स्वामिन् पूज्यैः समं वा प्रमाद एव अयुक्तः॥ ततः सर्वमेतदसत्यं॥ अन्यथा तु वयं समुद्रान्॥ अ
न्यथा तु वयं समुद्रान्॥ अपि शोषयामास॥ इति कृत्वा ते मर्त्यलोके समाययुः॥ तत्र हस्तात् हस्ते संचार्यमाणं स्वजनैश्चिरं नीवध्रौढौ भवेत्यादिवा
क्यैरभिनंद्यमानं॥ लोकोत्तररूपसौभाग्यादिगुणैस्त्रिलोकीं जयंतं॥ एवंविधं श्रीनेमिनं दृष्ट्वा विस्मिताः सुरा इति चिंतयामासुः॥ अहो अयं मूर्त्तिमा
न्॥ किं शृंगाररसः किं वा पिंडीकृतः त्रिभुवनस्यापि भाग्यनिचयः इत्यादि विमृशंतो॥ बलपरीक्षार्थिनस्ते बलं प्राप्य पालने विश्रांतं प्रभुं वीक्ष्य
॥ तस्कराइव अपजह्नुः॥ अथ ते प्रभुं गृहीत्वा गगने उत्पतिताः भूतलात् पादलक्षयोजनेषु॥ अतिक्रांतेषु भगवान् अवधिज्ञानेन देवचे
ष्टितं ज्ञात्वा लेशमात्रं बलं अदर्शयत्॥ ततस्ते आकाशात् पतिताः संतो शतयोजनी यावद्भूमिमध्ये ययुः॥ अथ तत्स्वरूपं दृष्ट्वा॥ शक्रः स्वयं
तत्रागत्य सुराणां अनुकंपया प्रभुं इति विज्ञपयामास॥ हे जगन्नाथ॥ हे जगन्नाथ कररक्ष रक्ष एतान्॥ अज्ञानात् कृतापराधान् मा कदर्थय
दित्वमेव कृष्यसि तदा एतेषां त्रैलोक्येपि रक्षकः कोपि नास्ति॥ इत्यादि बहुविज्ञप्तिं कृत्वा देवान्मोचयित्वा भगवंतं पालने मुक्त्वा क्षमयित्वा च स्वक
स्वर्गं ययौ॥ समुद्रविजयादयोपि प्रभोर्बलदर्शनात् प्रमुदिताः॥ अर्हच्चैत्यादिषु विशेषोत्सवान् कृत्वा स्वगृहमाययुः॥ ततः प्रभृति शक्राज्ञया सु

रकोटिभिः सेव्यमानः प्रभुर्दिने वृद्धिं प्राप्य॥ अथ हस्तिनापुरे धृतराष्ट्रपत्नी गांधारी गर्भं बभार दुष्टगर्भानुभावात् तस्या अतिक्रूरकर्मणि युद्धा
दौ दोहदो भवत्॥ गजं आरुह्य शत्रून् मारयामि॥ लोकान् कारागृहे क्षिपामि॥ इत्यादि चिंतयंती सा गर्वेण गुरुवर्गं न नमति॥ नगनगणपति
वृद्धादीन् सर्वस्वजनैः कलहायते॥ इतश्च पांडुनृपपत्नी कुंती स्वप्ने मेरुं॥१॥ क्षीरसमुद्रं॥२॥ लक्ष्मीं॥३॥ सूर्यं॥४॥ चंद्रं॥५॥ अपश्यत्॥ तत्प्र
भावात् शुभं गर्भं धारयंती॥ सा धर्मकरणमनोरथान् चक्रे॥ ततः सुलग्ने सुदिवसे पंचसु ग्रहेषु उच्चाश्रितेषु कुंती पुत्रं प्रासूत॥ ततश्चाकाशे पु
ष्पवृष्टिः देवैः कृता॥ अयं बालो निर्मलदयादानसत्यगुणादीनां एक आश्रयो धर्मपुत्र इत्याख्यया भवतु इति आकाशवाणी च अभूत्॥ ततः पां
डुराजा महोत्सवं कृत्वा युधिष्ठिर इति नामस्थापितं॥ पुनः कुंती अन्यदा रात्रौ स्वगृहांगणे पवनेन रोपितं तत्काल फलितं च कल्पवृक्षं स्वप्ने अपश्य
त्॥ तस्य प्रानुभावात्मा उत्तमं गर्भं दधौ॥ अथ गांधारी गर्भस्यातिवृद्ध्या दुःखिता मनसि औषधादिभिर्गर्भपातं वांछती कुंतीप्रसवोत्सुकीं वीक्ष्य
अतिदुःखेदात् उदरं कुट्टयंती॥ अनिष्पन्नमेव गर्भं अपातयत्॥ एवं सा त्रिंशद्भिर्मासैः वज्रवत् दृढांगं पुत्रं प्रासूत॥ ततः षण्मासान् याव
त् पेटायां रक्षयित्वा पूर्णदेहं प्रकटं चकार॥ अस्मिन् बाले गर्भस्थिते मातुर्दुष्टयुद्धाभिलाषोभूत्॥ इति तस्य दुर्योधन इति नामकृतं॥ य
स्मिन् दिने गांधार्या दुर्योधनः प्रसूतः तस्मिन्नेव दिने प्रहरत्रयात्परं कुंत्यपि पुत्रं प्रासूत॥ अयं वायुपुत्रो भीमो वज्रकायो निधर्मचारी

ष्ट भक्तश्चेति आकाशवाणी अभूत्॥ अन्यदा पांडुनृपः सभार्यः कुत्रापि पर्वते क्रीडार्थं ययौ॥ तत्र कुंत्याः हस्तात् भीमः स्खलितो भूमौ पतितः॥ तत्र भीम
स्य वज्रमयदेहेन शैलपाषाणाः परं द्वेन गोधूमा इव चूरिताः॥ ततो क्षतांगं तं गृहीत्वा॥ असौ वज्रकाय इति वदंतो देवाः कुंत्यै प्रत्यर्पयामासुः॥
अथ कुंती तृतीयगर्भावसरे गजारूढां शक्रं स्वप्ने पश्यत्॥ गर्भानुभावाच्च दैत्यान् दारयामि धनुर्विद्यां साधयामीत्यादयो दोहदा बभूवुः॥ पूर्णे
थ समये पुत्रं प्रासूत॥ तज्जन्मनि पुष्पवृष्टिर्देवदुंदुभिनादश्चाभूत्॥ अप्सरसो ननृतुः॥ अयं इंद्र पुत्रोर्जुनो जगदुभरवीर्य इत्याकाशवाणी जा
ता॥ ततः पांडुनृपोपि पुत्रोत्सवं चक्रे॥ एवं माद्र्या अपि नकुलसहदेवनामानौ पुत्रौ अभूतां॥ इत्थं पांडुनृपस्ते पंचभिः पुत्रैः कृत्वा अधिकं शुशु
भे धृतराष्ट्रस्य च क्रमेण शतं पुत्रा महौजसः शस्त्रशास्त्रविशारदा बभूवुः॥ तैः कृत्वा शत्रुभिः कतराभिः परिवृतश्चंद्रप्रभप्रासादं नवं अकारद
ष धृतराष्ट्रो प्यधिकां शोभां प्राप्य॥ अन्यदा कुंती नासिक्यनगरे यात्रार्थं ययौ॥ तत्र श्रीचंद्रप्रभप्रासादं नवं अकारयत्॥ तत्र स्नानादि अष्टाह्न्या
त्रिकमंगलप्रदीपादिकरणं साधुदानादि सुकृतैः स्वजन्म सफलं कृत्वा॥ पुनः स्वपुरं आययौ॥ ततः प्रभृति तत्तीर्थं च भूत्॥ उक्तं च॥ नासिक्ये न
ष्टमं तीर्थंकरं ये प्रणमंति ते॥ आगामिकं भवे लब्ध्वा॥ बोधि मुक्तिं प्रजंति ते॥२॥ इतिश्च नः कंसो नैमित्तिकवचनात् कृष्णं स्वमारकं श्रुत्वा॥ केशि
हयखरमेषवृषभारिष्टानां घातनाच्च शंकितः स्वधानकं उपलक्षितुं॥ शार्ङ्गधनुषः पूजोत्सवं प्रारब्धवान्॥ तस्याः प्रतः सत्यभामा नागिनी

२८७।।९६२

निवेश्य॥इतिउद्घोषयामास॥यएतद्धनुः आरोपयति॥तस्मैएतांदेवकन्योपमांममभगिनींददामीतिश्रुत्वा॥समागतेषु॥अनेकराजन्यकुमारे
षुयदाकेनापितद्धनुर्नारोप्यत॥तदावसुदेवस्यपुत्रोनाधृष्णिर्वीरमानीरथमारुह्यप्रस्थितःसचगोकुलेरात्रौस्थित्वाकृष्णंमार्गदर्शकंगृही
त्वाप्रातर्मथुरांप्रतिययौ॥अग्रेगच्छतस्तस्यकस्मिंश्चिन्महावृक्षेरथःस्खलितः॥कृष्णेनमूलादुन्मूल्यसवृक्षोदूरंक्षिप्तः॥अनाधृष्णिस्तद्बलं
वीक्ष्यचमत्कृतःकृष्णंसमालिंग्यरथेध्यारोहयत्॥अथअनाधृष्णिःसभांप्राप्यधनुर्गृह्णन्स्खलितःसन्सर्वजनानांहास्यास्पदंजातः॥त
तःकृष्णस्तदुपहासकुपितो॥हेलामात्रेणैवतद्धनुःआरोपयामास॥सत्यभामाचमत्कृतासतीकृष्णंकटाक्षकुसुमैरपूजयत्॥ततोनाधृष्णिर्म
याधनुरारोपितमितिवदन्॥वसुदेवेनकंसभयात्स्वगृहंप्रतिप्रेषितः॥अथकंसःशत्रुनिर्णयार्थं॥ततोमल्लयुद्धंविलोकनार्थंसर्वनृपान्
ततःकंसेनमुक्तंपद्मोत्तरंगजंआकारयामास॥अथकृष्णोपिबलभद्रान्वितोविचरन्॥यमुनाह्रदेकालियनागंजितवान्॥ततःकंसेन
मुक्तंपद्मोत्तरंगजंकृष्णोवधीत्॥चंपकंचबलदेवोवधीत्॥अथरामस्तत्रागतान्समुद्रविजयादिकान्स्वपितॄन्कंसंचकृष्णंप्रतिनाममात्रं
उपलक्षयामास॥कंसोपिलोकवार्त्तानुमानेनकृष्णंस्वघातकंकिंचिदुपलक्ष्य॥अंतर्ज्वलन्कोपान्निर्मंडपेउपविष्टः॥ततःकंसादिष्टौबलस्फु
रयंतौ॥चाणूरमुष्टिकाख्यौमल्लौवीक्ष्य॥रामकृष्णौमंचादुत्तीर्यताभ्यांनियुद्धंचक्रतुः॥क्षणात्कंसस्यपश्यतएवकृष्णश्चाणूरंरामोमुष्टिकं

चनिपातयामासतुः॥तयोर्घातात्क्रुद्धःकंसोरेरेगोपालगोंनर्भीत्यावेपमानःसन्इतिप्राह॥रेरेगोपाधमौ॥एतौदुर्विनीतौकृष्णसर्पाविवके
नपोषितौ॥हन्यतांहन्यतांमेतौपृथ्वीअनयोःपक्षपातंकरोतिसोपिहन्यतामित्यादितद्वोभिः क्रुद्धःकृष्णोप्याह॥रेरेमरणार्थिन्साक्षात्
चाणूरेपिहते॥अद्यापिममपौरुषंकिंनजानासि॥यदेवंप्रलपसि॥किंचनावन्मयाहन्यमानंस्वात्मानंरक्षततःपश्चाच्चंदादिषुयथेप्सितंकु
र्याः॥इत्युक्त्वाकेशरीवस्थानादुत्प्लुत्यकृष्णःकंसस्यमंचोपरिनिपत्यकंसंकेशेषुगृहीत्वापृथिव्यांआस्फालयत्॥ततःकंसस्यसेवकाःशस्त्रा
णिउद्यम्यकृष्णंहंतुउत्थिताः॥ततोबलभद्रोमंचस्तंभानुत्पाट्यतान्ताडयामास॥तत्प्रहारभीतास्तेमधुमक्षिकाइवदिशोदिशिपलायिताः
कृष्णोपिपादघातेनकंसंव्यापाद्यमंडपाद्बहिःअक्षिपत्॥ततःकंससैनिकान्संग्रामार्थंसज्जितान्प्रेक्ष्य॥समुद्रविजयादयोपिरणसज्जाब
भूवुः॥ततःसमुद्रविजयोत्तोन्मुखंमतिसर्पादयेधकारइवस्थातुंअसमर्थास्तेसर्वेपिपलायिताः॥अथसमुद्रविजयादयोरामकृष्णौसदश
नाराय॥उग्रसेनायचमथुराराज्यंदत्त्वाविगात्शौर्यपुरंययुः॥अथकंसभार्याजीवयशाःकंसमरणात्अतिविह्वलायादवकुलक्षयकरणपणं
निश्चित्य॥राजगृहपुरेपितुगृहंप्राप्तातनत्कांविकीर्णकेशांरुदतीं॥शिरोहृदयादिकुट्टयंतींचवीक्ष्य॥जरासंधस्तत्कारणंपप्रच्छसापिगद्ग
दस्वरेणअतिमुक्तऋषिवाक्यादारभ्यकंसवधपर्यंतंसर्ववृत्तांतंकथयामास॥जरासंधोपितस्मैमार्गांकंकुरुपादश्रीवींनेवस्थाजाता॥अ

259/1962

हंसर्वासामपियादवस्त्रीणांतादृशीमिव॥अवस्थांकरिष्यामीत्यादिवाक्यैःतां॥अथास्यसोमकनामानंपार्थिवंसमुद्रविजयंप्रतिप्रेषयामास॥स
चतत्रगत्वा॥समुद्रविजयादिभिःसत्कृतोजरासंधस्यसंदेशंकथयामास॥तथाहि॥एतौरामकृष्णौभवतांकुलांगारौउत्थितौ॥एताभ्यांकंसमा
रणान्महापराधःकृतः॥ततोयदिभवतांराज्येनकार्यं॥तदाएतौममपार्श्वेप्रेषितव्याविति‌जरासंधवाचिकंश्रुत्वा॥मनसिव्यथितःसमुद्रवि
जयःप्राह॥अहोसोमकजरासंधस्तुजामातृवधपीडितो॥यथातथाप्रलपत्येवपरंरामकृष्णौमार्गयन्त्वंकथंनलज्जसि॥यथाशरीरेचक्षु
षी॥तथैवसकलस्यहरिवंशस्यसारभूतौएतौकथंअर्पणीयौभवतः॥अस्माकंसर्वेषांजीवितंयदियातितदायातुपरंतथापिएतत्व
कथितं॥नभविष्यति॥ततोयाहि॥स्वस्वामिनंगत्वासमाख्याहि॥सुप्रसिद्धोत्यापनेनत्वमपिकस्माज्जामातुःपृष्टगोभवसीति॥ततःसोमकस्त
च्छ्रुत्वाचमत्कृतःसन्रामकृष्णाभ्यांकोपदृष्ट्या‌लोकितोपिगुरुमर्यादारक्षणार्थंजीवन्मुक्तःशीघ्रंसमुत्थायराजगृहेगत्वा॥तत्सर्वंजरासंध
यअकथयत्॥अथोग्रसेनभूपःसत्यभामांस्वपुत्रींकृष्णायार्पयामास॥ततोद्वितीयदिवसेसमुद्रविजयोराजासर्वबंधून्मेलयित्वाक्रो
ष्टुकिनामानंनैमित्तिकंपृष्ठतिस्म॥अस्माभिस्त्रिखंडाधिपतिनाजरासंधेनसहप्रतिपक्षताकृतास्तिबलिभिर्विरोधोहिदुरुद्धरः॥अतोत्र
कार्यस्माकंयद्वाच्यंतत्त्वंब्रूहिनैमित्तिकःप्राह॥सांप्रतंयूयंपश्चिमायांदिशिसागरतटंसमुद्दिश्यव्रजत॥तत्रगच्छतामेवभवतांशत्रुक्ष

यस्यप्रारंभोभविष्यति॥यत्रचसत्यभामापुत्रयुग्मंप्रसूते॥तत्रैवपुरंस्थापयित्वास्थातव्यं॥इतितद्वचःप्रमाणयित्वाअष्टादशकुलकोटिसहि
तोयादवपतिर्विंध्याचलमध्येभूत्वाचचाल॥अथजरासंधनृपःसोमकोक्तंश्रुत्वाक्रुद्धःसन्कालनाम्नास्वपुत्रेणउक्तः॥स्वामिन्एतेयादवाःकियन्मा
त्रं॥तन्मामाज्ञापय॥अहमेवएतान्आकाशात्पातालाज्जलाद्वह्नेर्वासमाकृष्यमारयामि॥अन्यथावदं॥अग्निसंमेवनदर्शयामि॥प्रतिज्ञांकृत्वा
पंचशतनृपैःसमंचतुरंगसैन्यसमेतसेनाभरणेनभुवंकंपयन्॥कालकुमारोयवननाम्नालघुबांधवेनयुतोयदूनांपृष्ठेचचाल॥अथतंसमीपाग
तंविज्ञाय॥रामकृष्णारक्षकादेवाविचार्य॥पर्वतंविकुर्वयामासुःएकद्वारेतत्रपर्वतेबहुचितारचिताःअग्रतश्चरुदनंकुर्वतीएकास्त्रीविकुर्वि
ता॥तांस्त्रीरुदंतीकालोऽपृच्छत्॥रेरेकथंरोदषीति॥ततःसाप्राह॥अहोकुमारजरासंधभयाद्यादवाःप्रणष्टास्तेषांपृष्टेकालकुमारआ
पतितः॥तस्यभयात्सर्वेपियादवाःचितासुप्रविश्यभस्मीभूताः॥अस्यांचचितायांरामकृष्णौज्वलितौ॥तेषांस्वजनानांवियोगदुःखार्ताअहमपि
अग्नौप्रविशामीत्युक्त्वा॥तेषांसाक्षात्अग्नौप्रविष्टा॥तोदेवमायामोहितःकालोपिस्वप्रतिज्ञांस्मरन्॥सर्वमाद्रिकंचितायोद्भंपात्रवान्॥यव
नादयस्तु॥ततोबलयित्वाजरासंधायथादवानांकालकुमारस्यचदहनवृत्तांतंनिवेदयामासुः॥अथयादवाःक्रोष्टुकिसत्यभाविणावकृथा
संप्रत्य॥अग्रेचलिताःक्रमात्सुराष्ट्रादेशेगिरिनारगिरेर्वायव्यदिशिक्रोष्टुकिवचनात्सेनानिवेशंचक्रुः॥ततःकृष्णपत्नीसत्यभामाभानु

नामरनामानो पुत्रीभासन्॥ अथदशार्हाः श्रीशत्रुंजयेरैवतेचयात्रांकृत्वा आत्मानंपवित्रयामासुः॥ततः कोष्टुकिकथितेसुदिवसेकृष्णाः ष्टम्यां
कृत्वाकृतस्नान पूज्यादिविधिःसमुद्रदेवममाराधयत्॥ततस्तृतीयनिशायांलवणाब्धेः स्वामीसुस्थितदेवः कृतांजलिस्तत्राऽगत्य माधवं॥इति
प्राह॥हेनवमवासुदेवकिमर्थंस्मृतोहं॥यत्कर्त्तव्यंतत्समादिश अहमेषतवाज्ञाकरोस्मी॥इत्युक्त्वासदेवः कृष्णाय पांचजन्यंशंखंरामायचसु
घोषंशंखंरत्नमाल्यांशुकानिचददौ॥ततः कृष्णस्तंप्रत्याह॥वरमेतत्त्यतत्वंइह्यागतः योपूर्वेषांवासुदेवानांराजधानीत्वयाजलेनाछादि
तास्ति॥तांममवासाय प्रकटीकुरु इतिश्रुत्वासदेवः शक्रायव्यजिज्ञपत्॥ततः शक्रादेशात् धनदस्तत्राऽगत्यपुरींव्यधात्॥सापुरीद्वादशयोजन
दीर्घा॥नवयोजनविस्तृतासुवर्णरत्नमयप्राकाराशुशुभे॥तस्यांवृताश्चतुरस्राव्यायतागिरिकूटाकाराःस्वस्तिकाः सर्वतोभद्रामंदराअवतंस
कावर्द्धमानाश्चेतिनामानोलक्षशः प्रसादाएकभूमाद्विभूमास्त्रिभूमाश्चनिर्मिताः तत्रत्रिकचतुष्कचत्वरेषुविचित्रमणिमाणिक्यमयानि
सहस्रशोर्हच्चैत्यानिशुशुभिरे अन्यदपिसरोदीर्घिकावापीदेवनायतनोद्यानादिकंसर्वअहोरात्रेणधनदोकरोत्॥एवंवासुदेवयोग्यांद्वा
रकाराजधानींकृत्वा॥ततोधनदःकृष्णायपीतवस्त्रयुगलंनक्षत्रमालांमुकुटंकौस्तुभंमहारत्नंशार्ङ्गधनुः अक्षय्यशरौतूणीरौ॥नंदका
खड्गंकौमोदकींगदांगरुडध्वजंरथंचददौ॥बलभद्रायापिवनमालांमुशलंनीलवस्त्रयुगलंध्वजंरथंअक्षय्यशरौतूणीरौधनुःहलं

ददौ॥श्रीनेमिस्वामिनेश्रीवानरणं॥बाहुरक्षकेत्रिलोक्यविजयाभिधंहारं॥चंद्रसूर्याभिधेकुंडलेगंगातरंगोज्वलंवस्त्रद्वयंसर्वतेजोमयंरत्नंचद
दौ॥समुद्रविजयायचंद्रहासखड्गंवस्त्रयुगलंदिव्यंरथंचददौ॥महानेमिनेगरुडध्वजंरथंसहस्रमुखांशक्तिंकेसुंभवस्त्रयुगलंचददौ॥रथनेम
येच॥अरुण्यशरंतूणीरंदिव्यंधनुःहारंचधनदोददौ॥अन्येभ्योपिवधुभ्योयथायोग्यंवस्त्रादीनिशक्राज्ञयाधनदोर्पयामास॥ततोधनदाद्यैःस
र्वदेवैर्यादवैरपरैश्चापिमिलित्वाकृष्णस्यबलभद्रसहितस्यराज्याभिषेकश्चक्रे॥ततःसकृष्णोरामोपिचदशार्हान्॥अनुवर्त्तयन्॥समुद्रवि
जयाज्ञयाविधिवद्राज्यंचकार॥इतश्चविश्वानिशायिभिःस्वचरितैःत्रिभुवनजनान्॥आनंदयन् भगवान्॥श्रीनेमिस्वामीक्रमात् वृद्धिं
प्राप्य॥दशधनुरुच्चतनुर्यौवनेपिनिर्विकारमनाःबभूव॥अन्यदा॥स्वर्गेसुधर्मेंद्रःसभायांश्रीनेमिनोद्भुतंसत्वंवर्णयामास॥यथा॥सत्वेशौ
र्येकुलेशीलेदानरूपगुणेष्वपि॥संबैलोक्येपिनोकश्चित्॥यःश्रीनेमिजिनोपमः॥१॥इत्यादिश्रुत्वा॥केचिन्मिथ्यादृष्टयोदेवाइंद्रवचनंअश्रद्द
धानाः॥तद्वचनंमिथ्याकर्त्तुंउद्यताः मर्त्यलोकमागत्यरैवताद्रिनिकटद्वारिकायां॥सुरपुराभिधंपुरंवासयित्वामर्त्यरूपाभूत्वातस्थुः॥तेचत
त्रस्थिताद्वारकायाः उद्यानवृक्षान् भंजतिभारवाहकान् तृणकाष्टादिहारकान् पीडयंतिजलवाहकान्बद्ध्वाउपद्रवंति॥प्राकारंपातय
त्स्याशांप्रवर्त्तयंति॥इत्येवंतेःपीडिताःपुरजनाःउच्चैःकोलाहलंचक्रुः॥तत्श्रुत्वावसुदेवस्यज्येष्टपुत्रोनाधृष्णिःसमुद्रविजयादी

न्॥ अत्र पृष्ठेन्व रथमारुह्य सर्वायुधसहितस्सज्जयार्थं धावतिस्म॥ तत्र रैवतकलद्दहिकायां तत्पुरं महर्द्धिकं दृष्ट्वा॥ तेषां ज्ञापनार्थं शंखनादं कृत्वा
ततः प्रत्यंचा अवादयत्॥ तं नादं श्रुत्वा॥ ते पि मायामत्र्या॥ वेगात्तत्रागत्य मायया कृष्णे नानाश्वणिं जित्वा गृहीत्वा स्वपुरं नयंतिस्म॥ अथ तं वृ
त्तांतं श्रुत्वा समुद्रविजयः क्रोधाद्दुरोरणभंभां वादयित्वा सुभटान् मेलयामास॥ ततः परिहितसर्वांगसन्नाहाः सज्जितसर्वायुधाः चलो
त्कर्षेण गर्जन्तो मूर्त्तो रौद्रवीररसा इव आगत्य समुद्रविजयं प्रणमंतिस्म॥ इत्थं श्रीसमुद्रविजयेरणरसोद्यतः नगरक्षोभमिषात्समुद्रोपि
उद्वेलइवासीत्॥ ततो रामकृष्णो तं वृत्तांतं ज्ञात्वा॥ समुद्रविजयं रणोद्यतं निषिध्य वैरिगजदर्पदलने सारूत्व सिंहाविव स्ववपि बंधूपांच
जन्यादिनादैः सैन्यं मेलयित्वा॥ रथारूढौ तत्र गत्वा॥ शंखनादेन तान् मायासुरान् संग्रामार्थं आकारयतां॥ ततस्तेपि वेगात् आपत्य मा
यां दर्शयित्वा॥ सरथावपि रामकृष्णो जित्वा स्वपुरं नयंतिस्म॥ इतश्च रामकृष्णापहरणात्॥ द्वारकायां महान्कोलाहलः समुच्चलितः॥ अ
हो एतौ रामकृष्णो देवानां दानवानामपि अजय्यौ तावपि॥ यदि विजितौ॥ तर्हि इदानीं किं भविष्यति॥ निर्नाथा वयं किं करिष्याम इति॥ तत
श्चिन्तितं कृष्णस्यांतःपुरीजनः केलिवचनैरिति प्राह॥ अहो देवरस्त्वं तु तीर्थकरत्वादनंतवीर्य इति श्रूयते॥ तस्य तव पत्न्य नोपि वेत्त
व बंधून्शत्रवः पीडयंति॥ तर्हि किं नाम भवतः पौरुषं भ्रातृजायाभिरित्यादिवाक्यैर्हास्यमानो भगवान्॥ किंचिद्विचिंत्य मभायां य

ततो युद्धोद्यतं समुद्रविजयनृपं प्रति कौतुकी नेमिनिक इति प्राह॥ स्वामिन् अत्र कार्ये भवतः प्रयासकरणं विफलं॥ यतो न गदेक वरिौ॥ कृष्णब
लभद्रौ येर्विजितौ ते तु शत्रवः तीर्थंकरेणैव जेतुं शक्याः॥ न तु अन्येषां तत्र सामर्थ्यं॥ इत्येवं कथयत एव इंद्रादेशात्॥ मातलिस्तत्र दिव्यं रथ
मानीय जिनं नत्वा इति विज्ञपयतिस्म॥ स्वामिन् तवेच्छायाः समकालमेव शक्रादेशान्मया रथोयं आनीतः॥ तत आरुह्यतां॥ इति तद्वाक्याद्भ
गवानपि समुद्रविजयं अनुज्ञाप्य तं रथं समारुरोह॥ ततः सर्वाण्यायुधानि विहाय॥ एकं धनुः करे जग्राह॥ किंच त्रिजगतामपि अहं रक्षा
करस्तर्हि ममापि अन्येभ्यो रक्षा कथं स्यादिति वर्मकवचादि त्यक्त्वा॥ शीघ्रं तत्पुरपरिसरमागत्य॥ शंखनादेन तान्मायामर्त्यान् युद्धायाका
रयत्॥ ततः पुरस्य परितो रथभ्रमणं निर्मितं॥ प्राकारकपिशीर्षकाणि शत्रुशीर्षाणि व निपेतुः॥ एवं च तदाघातान् कुपिस्ते मायावि
नः सर्वेपि मिलित्वा चतुरंगसेनाभिर्विमानैश्च व्योमगगनं च छादयंतः समाययुः॥ ततस्ते भंभानिःस्वानकाहलादीनि॥ तथा नादयामासु
र्यथा स्थिरापि पृथ्वी अस्थिरा भूत्॥ अचला अपि चला अभूवन्॥ लोकेष्व कल्पांतकालशंका भूत्॥ ततो वात्यावर्तान्॥ धूमपटलान् अ
ग्निकणान्॥ ज्वालाकलापान्॥ स्थानेस्थाने महानागान्॥ सिंहान् व्याघ्रान् वृश्चिकान्॥ अजगरान्॥ शाकिनीभूतवेतालादींश्च स्थानेस्था
ने प्रकटयामासुः॥ अथ प्रभुस्तथाविधं तेषां चेष्टितं दृष्ट्वा किंचिद्विहस्य॥ लीलामात्रेणैव धनुरारोपयत्॥ तस्य धनुषो निकठोरं टंकार

शंखैः नेमिंद्रादयः शरदभ्रघटाइव अलक्ष्यतां ययुः॥ ततः प्रभुश्चापमारोप्य पुनर्दढं आस्फालयत्॥ ततस्तस्मात्प्रकटितेन वह्निना मायिकोर्वि
स्फारिता॥ अंधकारघटारुणात् निवर्त्तिता॥ ततस्तान् कांश्चित्पृथिव्यां कांश्चिच्च आकाशे प्रकटान् दृष्ट्वा किंचित्स्थितः॥ प्रभुर्वायव्यास्त्रलक्ष
णं अमोघं बाणं धनुषि संदधे॥ आकर्णांतमाकृष्य तस्मिन्मुक्ते॥ तदुद्भवेवातेन कृत्वा॥ तेषां विमानानि तूलानीव उड्डीयोड्डीयं दूरं निपेतुः॥
कुलाचला अपि भंगमापुः॥ समुद्रश्च उद्वेलो जातः॥ ततः स्तेषां विमानानि परस्परं आस्फल्य॥ अंगारवृष्टिं मुमुचुः॥ अथ प्रभुर्द्वितीयं मोह
नाभिधं बाणं मुमोच॥ तेन ते मायिकाश्चेतनारहिता भूत्वा भूमौ अलुठन्॥ पुनस्तेन मोहं प्रभा॥ अपरेपि देवमानवपक्षिपश्वादयः स्थाव
राइव निश्चेष्टा बभूवुः॥ ततः स धर्मेंद्रः प्रभोस्तद्विलसितं विज्ञाय॥ तत्रागत्य प्रभुं नत्वा॥ इति स्तुतिं चकार॥ जयस्वामिन् जगत्तारजगदु
द्धरणक्षम॥ अनंतवीर्य भगवन् जय दुस्सहदोर्बल॥१॥ इत्यादि हे स्वामिन्॥ त्वं एतं सर्वलोकमपि अलोके क्षेप्तुं समर्थः॥ किंच अंगुष्ठाग्रेण मेरुमपि
उद्धर्तुं क्षमः॥ किं बहुना॥ सुरासुरमनुष्येषु॥ स कोपि नास्ति॥ यस्तव बललेशमपि सोढुं क्षमः स्यात् परं भवादृशां बलसंपदस्तु॥ केवलं लो
करक्षार्थ एव भवंति॥ न च कस्यापि पीडायै भवंति॥ ततो न युज्यते विश्वैकपालकस्य भवतः कोप विलसितं एते तु वराकाः अज्ञान ॥ अ
पराधं कृतवंतः परं वज्रपातं तृणानीव॥ एते वराकास्तव बलं न सहंते॥ ततो वेगात्॥ अस्त्राणि संहर प्रसादं विधेहि॥ इत्यादि शक्रः [illegible]

स्तुतः स्वामी वेगात् अस्त्राणि संहृतवान्॥ ततः सचेतनीभूतास्ते सुराः शक्रं दृष्ट्वा लज्जिताः संतः प्रभुं प्रणमंति स्म॥ ततः शक्रस्तान् प्रत्याह॥ अहो
सुराः दृष्टं युष्माभिः आत्मनो दुर्विलसितस्य फलं॥ अयं तु जगद्धितंकरः स्वामी॥ कृतापराधेष्वपि भवत्सु कृपावान्॥ ततो वेगात्पादयोर्निपत्य
क्षमयध्वं स्वापराधं॥ इति श्रुत्वा अज्ञानभ्रमुखाः स्वामिपादयोर्लुठित्वापराधं क्षमयित्वा प्रभुमेव शरणीचक्रुः॥ स्वामी प्रसाददानेन तान्संभाव्य
तैः समं पुरमध्ये गत्वा अनाधृष्णिरामकृष्णौ च स्वदर्शनदानेन आनंदयत्॥ ततः शक्रः प्रभुं इति विज्ञपयामास॥ स्वामिन् अस्मासु अनुग्रहं कृत्वा
श्री शत्रुंजयादितीर्थयात्रां कारयेति॥ ततः प्रभोराज्ञां प्राप्य शक्रः स्वकल्पित विमाने प्रभुं उपविश्य॥ सुरसमूहपरिवृतः शत्रुंजयं प्राप्य॥ प्रजा
स्नानादिभिः कृत्यैः स्वमनोरथान् सफलीचक्रे॥ अथ तत्र भगवान् सविस्तरं तीर्थमहात्म्यं कथयित्वा पुनः शक्रादियुतो गिरिनारगिरिं प्राप्य
॥ तत्रापि शक्रः स्थावरजंगमतीर्थयोः पूजां विधाय॥ प्रभुं द्वारकायां मुक्त्वा॥ समुद्रविजयादीनां पुरतो गुणप्रशंसां विधाय हर्षितमनाः
शक्रः सुरलोकं ययौ॥ इत्थं श्री नेमिस्वामी चंद्रवद्विश्वाह्लादकः समुद्रविजयादिभिः रामकृष्णाभ्यां च संसेवितः सुखेन स्थौ इतश्च कृष्णो नारदव
चनात् विदर्भाधिपतेः पुत्रीं रुक्मिनृपभगिनीं रुक्मिणीं कन्यां स्वभुजबलात् अत्र गत्वा॥ अपहृतवान् पुनश्च जांबुवद्विद्याधरसुतां जांबुवतीमंग
मांस्नानं कुर्वतीं॥ जांबुवंतं विजित्य कृष्णो जहार॥ एवं लक्ष्मणा सुसीमा गौरी पद्मावती॥ गांधारी चेति नामकाः॥ अपरा अपि परिणीतवान्

२६७।२६२

ततः कृष्णस्य॥सत्यभामा॥१॥जांबुवती॥२॥रुक्मिणी॥३॥लक्ष्मणा॥४॥सुसीमा॥५॥गोरी॥६॥पद्मावती॥७॥गांधारी॥८॥इत्यष्टौ॥अग्रमहिष्यो
बभूवुः॥इत्थं श्रीद्वारकापुर्यां॥कृष्णः प्राप्तोदयोनद्भूत॥नेमिरामदशार्हैश्च समं राज्यमन्वभुवन्॥१॥ ॥ ॥इति श्रीशत्रुंजयमहात्म्यो
ल्लेखे पं॰डितश्रीहंसरत्नविरचिते अंतर्भूतश्रीरिवताचलमहात्म्योल्लेखे भीमसेनचरित्र हरिवंश पांडवोत्पत्तिनेमी शब्दवर्णनाख्यो
नाम दशमोधिकारः॥१०॥ ॥ ॥नमोस्तु नेमये नम्रा॥शचीकमायनायिने॥द्वाविंशायार्हते ऽर्च्याय॥हरिवंश्याय योगिने॥१॥
अथाकर्णयदेवेंद्र॥अग्रतः संबंधं॥तथाहि॥अथ ते पंचापि पांडवा॥धृतराष्ट्रसुताश्च॥सूतपुत्रः कर्णश्चैते सर्वेपि सभ्यक्रीडयामासुः
तेषां मध्ये दुर्योधनः कूटकपटगृहं छलं कृत्वा सरलस्वभावान्॥पांडुपुत्रान्नित्यं वंचयामास॥भीमस्तु स्वभावादेव उद्धतस्तेषां मायां ज्ञात्वा
यदा ते मायां कुर्वंति तदा असौ तान् प्रत्यक्षं कुट्टयति॥ततस्ते बलेन भीमं पराभवितुं अशक्ताः बलेन सुप्तमेव तं बध्वा जले अक्षिपन्॥भीम
स्तु प्रबुद्धः सन् रज्जुः त्रोटयित्वा निर्ययौ॥दुर्योधनो रोषाद्भीमं तर्जनावाक्यैस्तर्जयति॥भीमस्तु तदैव तं भुजाभ्यां निपीड्य भूमौ आस्फो
टयति॥ततः क्रुद्धो दुर्योधनो भोजनमध्ये भीमस्य॥विषं ददाति॥तस्य तु पुण्यवशात्॥तदपि अमृतवद्भवति॥इत्येवं दुर्योधनो यत्नयत्
भीमस्य प्रत्यनीकत्वं चक्रे॥तस्य पुण्यप्रभावात्॥तत्सर्वं विफलं बभूव॥अथ ते पंचोत्तरशतमपि कुमाराः सूतपुत्रः कर्णोपि [illegible]

तेकृ. चार्यगुरोः पार्श्वे शास्त्रविद्यां जगृहुः॥सर्वेषामपि अर्जुनः कर्णश्च॥एतौ द्वौ प्रज्ञाप्रकर्षात् विशेषेण शास्त्रपारीणौ जातौ॥दुर्योधनस्तु ख
लस्वभावात्॥तयोरुपरि द्वेषभावं वहति॥अन्यदा॥अनध्यायदिवसे क्रीडां कुर्वतां तेषां कंदुकः कूपे पतितः॥तस्य निःकासनार्थं यावत्ते
कूपकंठे व्याकुला भ्रमंति॥तावत्तत्र कश्चित्तीर्थो द्रोणनामा विप्रोश्वत्थामाख्यपुत्रेण युतः समागतः॥स च समग्र धनुर्वेदविद्यापारगामी
कूपकंठे व्याकुलांस्तान्वीक्ष्य प्राह॥किं भो यूयं निरुपायाः कूपवेष्टयित्वा स्थिता इति॥ततस्तैः कंदुकपतनवृत्तांते कथिते॥धनुर्विद्याधुरीणो
द्रोणः कूपकंठे स्थित एव॥अन्योन्य पुंखवेधकान् बाणान् क्षिप्त्वा तं कंदुकं निरकासयत्॥चमत्कृताः कुमारास्तस्य हस्तलाघवं भीष्मपिता
महाग्रे वर्णयामासुः॥भीष्मोपि सपुत्रं द्रोणं समान्यस्व पुरे स्थापयित्वा॥कृपाचार्यस्याज्ञां लात्वा धनुर्विद्याशिक्षणार्थं कुमारान् तस्य पा
र्श्वे मुमोच॥तत्र तेषु पठत्सु नारागणेषु चंद्र इव कर्णोऽधिकं अदीप्यत॥ततोपि अर्जुनः सूर्य इव अधिकं अदीप्यत॥शालनयोजनशीघ्राक
र्षणदूरपातनप्रहारदार्ढ्यादिकेषु बाणकर्मसु॥एक एव अर्जुनोऽधिको बभूव॥द्रोणोपि॥तेषु सर्वेषु विनयविक्रमशौर्यादिगुणाऽधिक
तया॥अर्जुनमेव बहु मन्यते अन्यदा द्रोणः शिष्यैः परिवृतो यमुनायां जलक्रीडां कुर्वन्॥एकस्मिन् पादे केनचिज्जलचरेण गृहीतः॥ततः
शिष्याणां गुरुभक्तिपरिक्षार्थं पूत्कारः कृतः॥ततोन्येषु शिष्येषु वस्त्राद्युत्क्षारणपरेषु विलंबं कुर्वत्सु अर्जुनस्तु असाधारणगुरुभक्त

तथा॥ यथास्थितएवमजलिं पतित्वा गुरुं निरकासयत्॥ ततो द्रोणस्तस्य भक्तिप्रकर्षेण मनसि रंजितोपि॥ अन्येषां ईर्ष्या अस्य च गर्वो मा भूदि
ति विमृश्य साक्षात्प्रशंसां न कृतवान्॥ अन्यदा एकांते अर्जुनस्याग्रतो द्रोणः प्रतिज्ञां चकार॥ यत्त्वां विना अन्यस्य कस्यापि मया धनुर्विद्या न दातव्या
इति॥ अथान्यदा कश्चित् हीनकुल एकलव्यनामा द्रोणाचार्यमतिविनयेन धनुर्विद्यां अभ्यर्थयन् गुरुणा नीचकुलत्वात्॥ प्रतिज्ञाकरणाच्च
निराकृतोपि स्वस्वयं मृत्तिकामयं द्रोणं विधाय पुष्पगंधधूपदीपादिभिस्तं संपूज्य॥ तस्याग्रतो धनुर्विद्यां अभ्यस्यन् गुरुभक्ततया तस्य स्तोके
रेव दिनैश्छिन्नपत्रवेधने लाघवं अभूत्॥ अन्यदा द्रोणाचार्येण समं अर्जुनस्तत्रागतो वने पत्रछेदादिकं दृष्ट्वा॥ गुरुं प्रत्याह॥ स्वामिन् भवद्भिः अ
न्यस्य धनुर्विद्याप्रदाने प्रतिज्ञा कृतासीत्॥ तर्हि अयं तु कश्चित् भवद्भिरेव धनुर्विद्यां शिक्षितो दृश्यते॥ एतत्कथं॥ ततो द्रोणोपि विस्मयं प्राप्य॥
प्राह॥ अहो वत्स॥ मम वाक्यं तु अन्यथा न भवत्येव॥ परं अहं न जाने नरेषु सुरेषु वा कोप्ययं तु नूतन एव धनुर्विद्याविशारदः प्रकटितो दृश्यते
॥ अतस्तमेव गवेषय॥ इति वदन्नेव धृतधनुस्तूणीरः स एकलव्यो वनांतादागत्य॥ मा रुद्ध गुरुं दृष्ट्वा प्रणमति स्म॥ ततः तव गुरुः कोस्ति इति
द्रोणेन पृष्टः सोवदत्॥ श्रीद्रोणाचार्यपादा मम गुरवः इत्युक्त्वा मृत्तिकामयं द्रोणाचार्यं दर्शयित्वा॥ सर्ववृत्तांतं कथयामास॥ तद्दृष्ट्वा मन सि तु
ष्टोपि द्रोणो॥ अर्जुनादन्यो धनुर्द्धरो मा भूदिति अर्जुनानुरोधेन॥ तं प्रति दक्षिणहस्तांगुष्ठं अयाचत॥ सोपि हृष्टस्तत्कालमेवांगु [illegible]

ष्ठं पुरो मुमोच॥ ततोंगुलीभिरेव बाणाभ्यासं सुखेन चकार॥ अथ द्रोणोर्जुनं प्रति राधावेधविद्यां भीमदुर्योधनौ प्रति गदायुद्धं चाशिक्षयत्॥ क
मात् युधिष्ठिरनकुलसहदेवाः अपरेपि कुमाराः शस्त्रकलाविशारदा अभवन्॥ अश्वत्थामा तु कर्णार्जुनाभ्यां तुल्य एव धनुर्विद्याविदभूत्
अन्यदा द्रोणाचार्यवचनाद्गांगेयः कुमाराणां अस्त्राभ्यासपरीक्षां कर्तुं सभां चकार॥ ततः समस्तसामंतादिभिः सह भीष्मद्रोणधृतराष्ट्रपां
डुप्रमुखेषु उपविष्टेषु युधिष्ठिरप्रमुखाः सर्वास्त्राणि धारयंतो रणाभ्यासं चक्रुः॥ ततो द्रोणाज्ञयावसरं प्राप्य॥ भीमदुर्योधनौ युध्यमानौ लो
कानां क्षोभं चक्रतुः॥ ततो दुर्योधनो भीमस्य प्राणापहारं कर्तुमिच्छुः सहसा भीमेन आकारेंगितादिभिस्तदभिप्रायं ज्ञात्वा क्रोधाध्मातेन गाढं
निरुद्धः॥ अत्रांतरे रनर्थचिंतां विज्ञाय॥ अश्वत्थाम्ना निषेधितौ तौ आकारगोपनं कृत्वा॥ स्वस्वस्थानं श्रितौ॥ अथ गुरुणानुज्ञातोर्जुनो भुजास्फो
टैर्दिशो बधिरयन्॥ बाणाभ्यासं दर्शयामास॥ ततः पार्थेन मुक्तैर्बाणैः संरुद्धे राकाशे ग्रहगणा अपि त्रासमापुः॥ इत्थं राधावेधक्रमपत्रवेधादि
कौतुकानि विलोक्य सर्वेपि भूपाला श्चमत्कृताः शिरांसि धूनयंतोर्जुनस्य सर्वोत्तमां धनुर्विद्यां प्रशशंसुः॥ ततोर्जुनप्रशंसासहिष्णुना दुर्योधनेन प्रे
रितः॥ कर्णोपि मंचादुत्थाय धीरध्वनिना मेघ इव गर्जन्॥ भुजास्फोटैर्हुंकारैश्च सभामिनीः कंपयन्॥ स्वबाणक्षेपणलाघवं दर्शयामास॥ त
स्य हस्तलाघवेन तुष्टो दुर्योधनस्तस्मै अर्जुनवैरिणे पारितोषिकमध्ये चंपापुरीं ददौ॥ तदवसरे रक्तः सारथिस्तत्रायातः स च कर्णेन पितृ

भक्त्या नमस्कृत्य सन् नृपाणां अग्रतो निषसाद॥ अथार्जुनो भीमेन सह क्रोधारुणो भूत्वा॥ अरे कुलाधम कुलांगार॥ अस्मै हीनकुलाय चंपाक
र्यं ददासि॥ एनं तवापराधं अहं न सहिष्ये॥ इत्युक्त्वा धनुरास्फाल्य युद्धायोद्यतो भवत्॥ ततो दुर्योधनः कर्णोपरेपि च॥ तत्पक्षपातिनो भूपाः
युद्धाय उत्तस्थुः॥ तदानेषां भुजास्फोटैः सिंहनादैः हुंकारैः भ्रम्यमानसागरनिर्घोषध्वनिः प्रादुरासीत्॥ तत्रासेनैव सूर्योप्यस्ताचलं
गतः॥ ततो गांगेयादिभिः वृद्धैर्निवारिताः स्वहृदय एव कोपं संरुध्य तस्थुः॥ ततो धृतराष्ट्रेण सूतः कर्णस्य कुलादिकं पृष्टः सप्राह॥ मयातु गंगा
प्रवाहे पेटास्थितो लब्धः परं मुद्रिकाक्षराभिज्ञानात्॥ कुंत्याः पुत्र इति स्वप्ने सूर्यदर्शनाच्च तेजस्वी इति ज्ञात्वा पुत्रत्वेन पालितः॥ किंच कर्णतले हस्तं
कृत्वा पेटायां सुप्तो भूत्॥ तदनुसारात् कर्ण इति नाम कृतं इति तद्वचनात् हर्षितो धृतराष्ट्रः सपुत्रः कर्णं समादाय पांडवान् प्रति मत्सरं वहन् स्वगृ
हं ययौ॥ अथ प्रजालोका अपि गुणाकृष्टतया पांडवेषु रागिणो बभूवुः॥ तथैव च धृतराष्ट्रपुत्रेषु तेषां उन्मार्गगामित्वात् विरक्ता बभूवुः॥ अथ
पांडुनृपः पुत्राणां भ्रातृव्याणां च विरोधनिवारणार्थं राज्यं विभज्य कुशस्थलपुरादिकं धृतराष्ट्रपुत्रेभ्यो ददौ॥ अन्यदा पांडुनृपे सभायां नि
विष्टे सति प्रतिहारेण समं दूतः समागत्य नत्वा च इति विज्ञपयांचक्रे॥ स्वामिन् द्रुपदराजस्य पुत्री चुलनीकुक्षिजाता॥ धृष्टद्युम्नकुमारस्य
लघुभगिनी द्रौपदीनाम्नी कन्या॥ तस्याः स्वयंवरे सर्वे दशार्हा रामकृष्णौ दमदंतः शिशुपालो रुक्मी कर्णः सुयोधनश्च॥ अपरेपि [illegible]

नः आकारिताः संति॥ तेषां प्रत्येकं स्वस्वसमृद्ध्या सहितायांति॥ ततो यूयमपि एभिः पंचभिः कुमारैः सह समागत्य॥ स्वयंवरमंडपं अलंकुरुध्वं॥ ततः
पांडुरपि पंचभिः पुत्रैः सहितो महर्द्ध्या कांपील्यपुरं ययौ॥ द्रुपदराजोपि पांडुनृपस्य प्रवेशोत्सवादि विधाय बहुभक्तिं चकार॥ ततो रत्नमाणिक्य
कर्दमहर्म्यैः चंदनागरुप्रभृतिकाष्ठैश्च रचिते॥ अनेकस्तंभतोरणोल्लोचादिविभूषिते॥ तत्र मंडपे स्वर्णसिंहासनेषु निविष्टास्तेजस्विनो भूपा
व्योम्नि ग्रहगणा इव शुशुभिरे॥ तेषु पांडुनृपः पंचभिर्मुखैः पंचानन इव पंचभिः पुत्रैः नाधिकतरं शुशुभे॥ अथ द्रौपदी स्नानशुद्धवस्त्रधरा
श्रीजिनं प्रपूज्य पित्रा धृतसर्वांगीणाभरणा प्रभापटलावृता॥ क्षीरसमुद्रस्थिता साक्षाल्लक्ष्मीरिव करे वरमालां धारयंती॥ तत्रागत्य स्तंभसमीपे स्व
पितुः समीपे अस्थात्॥ इतश्च तत्र धरो द्रुपदराजादेशात्॥ राधास्तंभसमीपस्थो भूपतीन् प्रति इत्याह॥ भो भो राजन्याः शृणुत सर्वेपि सावधानाय
दुत अस्य स्तंभस्याग्रे ऊर्ध्वे चक्रमेतत्॥ अस्य च वामदक्षिणपार्श्वतो भ्रमी द्वादश आरा भ्रमंति॥ अधः स्थिततप्तघृतकटाहमध्ये॥ एषां तै
प्रतिबिंबे दृष्टिं दत्वा॥ योलघुवेधबाणेन एतान् भित्वा॥ सर्वोपरि स्थितां राधां विध्यति॥ स एव पुरुषचूडामणिः एतत्कन्यारत्नं परिणयतीति॥ पण
स्य उद्घोषणां श्रुत्वा केपि भूपा धनुषः उत्पाटने असमर्थाः॥ केचिच्च आरोपयितुं॥ अशक्ता इति स्वशक्तिं विचार्य तथैव तस्थुः॥ केचिच्च कृतो
द्यमा अपि कार्यसाधने असमर्थाः संतो जनान् हासयामासुः॥ ततोऽर्जुनो भीमसेनेन समं मंचादुत्तीर्य॥ विधिवत् गुरून् देवं च नत्वा॥ लब्धान अ

मुखेषु सर्वनृपेषु पश्यत्सु पाणिनाधनुर्जग्राह॥ततो नीमो भुजंउर्द्धीकृत्य उच्चैःस्वरेणप्राह॥भोभोदिशांपतयःस्थिराभवंतु यूयं॥देशेषनागत्वम
पिसावधानो भूत्वा॥भुवंधारय॥भोभोकुलाचलाःदृढा भवंतु यूयं अयममातुलोयंसर्वराज्ञांगर्वेणसमं एतद्वज्रसारं धनुर्नामयन्नस्ति॥ततोर्जु
नोपि॥क्रट्क्रडितिकठोरशब्दं कुर्वाणं॥तद्धनुर्बलान् आरोप्यस्वयं अधोमुखःकटाहप्रतिबिंबेदत्तदृष्टिर्बाणंसंधायलक्ष्यंसम्यग्निश्चित्यसाक्षा
त्सर्वेषांपश्यतांराधांविध्यतिस्म॥ततोदेवैर्जयजयारवदुंदुभिनादपूर्वकंपुष्पवृष्टिःकृता॥द्रौपद्यपिपणपूरणात्संजातप्रेमातिरेका॥शीघ्रं
अर्जुनकंठेवरमालां अक्षिपत्॥ततोयथाएकमेवमनःपंचस्वपींद्रियेषु पृथग्लक्ष्यते॥तथैवएकापिसावरमालापंचानामपिपांडवानांकं
ठेषु पंचरूपा भवत्॥तत्कौतुकंवीक्ष्यसर्वैर्जनाश्चिंतयामासुः॥यथापंचानामपिविषयाणांमध्येचेतनाएकैव॥तथापंचानामपिपांडवानां
एषैवएकाप्रियाइतिसंभाव्यते॥गांगेयद्रुपदराजे॥शेषेष्वपिस्वजनेषु लज्जयाधःकृतमुखेषुसत्सु तत्रकश्चिच्चारणमुनिसमाययौ॥ततकृ
ष्णादिभिःप्रणम्य पांचाल्याःपंचभर्तृत्वकारणेपृष्टे मुनिःप्राह॥पांचाल्याःपूर्वभवकर्मवशात्पंचपतयोभविष्यत्येव॥किमत्रआश्चर्यं॥यतः
कारणात्विषमाकर्मणांगतिः॥तथाहि॥इयंपूर्वभवेचंपायांसागरश्रेष्ठिनःसुभद्राकुक्षिजाता॥सुकुमारिकानाम्नीपुत्रीआसीत्॥साजिन
दत्तस्यपुत्रेणसागरेणपरिणीता॥रात्रौशय्यायांतस्याःपूर्वःकर्मवशात्स्पर्शमात्रेणापि अंगारवद्दह्यमानोसौक्षणंयावदपितस्याःस्प[illegible]

असमर्थोनिद्रायमाणांतांमुक्त्वास्वपितुर्गृहंययौ॥सापिजागरितासतीपतिंअदृष्ट्वारुदंती॥तातेनतस्याएवशरीरस्यदुःस्पर्शदुर्गंधादिदो
षंविज्ञायदानादिसुकृतंकुर्वती॥सास्वगृहेएवस्थापिता॥अन्यदासागोपालिकासाध्वीपार्श्वेव्रतंगृहीत्वाचतुर्थषष्ठाष्टमादितपःकुर्वती॥वि
जहार॥अन्यदाग्रीष्मकालेसातपस्विनीभूमिभागोद्याने सूर्यबिंबेदृष्टिंनिवेश्य॥आतापनांकुर्वाणा॥तत्रोद्याने॥देवदत्ताभिधांगणि
कांरूपसौंदर्यगर्वितांपंचभिर्विटपुरुषैःसमुपास्यमानांदृष्ट्वा॥आजन्मपुरुषवियोगिनीसानिदानंअकरोत्॥एषागणिकाइवअहमपि
अस्यतपसःफलेनपंचभर्तृकाभूयासं॥इतिनिदानंकृत्वा अष्टमासान्संलेखनांविधाय॥तन्निदानंअनालोच्यैवमृता॥सौधर्मदेवलोकेदे
वीजाता॥तत्रनवपल्योपमानिदेवायुःप्रपाल्यअत्रद्रौपदीजाता॥ततःपूर्वकृतनिदानवशात्॥अस्याःपंचपतयःसंजाताः॥अत्रनकश्चिद्वि
स्मयइतिमुनिनाप्रोक्तेसत्यंसत्यमेतत्॥इत्याकाशवाणीबभूव॥कृष्णादिभिरपितथैव॥अंगीकृतेतेपंचापिपांडवाःसुमुहूर्ते द्रौपदींपरि
णयामासुः॥ततोद्रुपदराजेनवस्त्रसुदायदानैःपरितोषितःपांडुनृपःस्वपुत्रैःसहप्रीत्यादशार्हान्कृष्णंच॥अन्यान्मित्रभूपान्सार्थे
नीत्वास्वपुरंययौ॥अथान्यदाद्रौपद्याआवासेयुधिष्ठिरस्थितेसतिनारदऋषिःतत्रायययौ॥युधिष्ठिरेणप्रणामादिभिःसंमानितोहृष्टचित्त
[illegible]वान्॥तत्राकार्यद्रौपद्याःस्थितस्यर्थइतिप्राह॥भवद्भिःपंचभिरपिवारकान्कृत्वा॥स्वस्ववारकेद्रौपद्यागृहेस्थातव्यं॥यदिएक

स्मिन् तत्रस्थिते॥अन्योगमिष्यति तदामहद्द्वादशवर्षाणि॥तीर्थवासीभविष्यतीति॥अन्यदायुधिष्ठिरेतत्रस्थिते॥अर्जुनोभ्रांत्वातत्रागतः॥
ततोवलयित्वामतिप्रतिज्ञत्वात्॥तीर्थयात्रायैययौ॥ततोसौयात्राकुर्वन्॥अन्यदा॥वैताढ्येऋषभजिनंअनमत्॥तत्रकिंचिद्विद्याधरंचिंतातु
रंवीक्ष्य॥अर्जुनेनतत्स्वरूपेपृष्टेसप्राह॥वैताढ्येउत्तरश्रेण्यांमणिचूडनामाविद्याधरनृपोहं॥हेमांगदविद्याधरेणबलवता॥अहंराज्या
न्निष्कासितोस्मि॥इतितस्यचिंताकारणंज्ञात्वा॥अर्जुनस्तद्रचितविमानारूढस्तत्रगत्वाहेमांगदंजित्वा॥पुनर्मणिचूडंराज्येअस्थापयत्॥त
त्रस्तत्रमणिचूडहेमांगदप्रमुखविद्याधरैःसेव्यमानेर्जुनःकियत्कालंतत्रस्थित्वा॥पुनःतद्रचितविमानारूढोऽष्टापदादितीर्थेषुजिना
ननमत्॥क्रमाद्रैवताद्रिंययौ॥इतश्चपूर्वंश्रीपुरेएकःपृथुनामाक्षत्रियआसीत्॥तस्यनाम्नाशरीरेणापिचदुर्गंधाइतिपुत्रीअभूत्॥सासो
मदेवस्यपरिणायितापरंतस्यादुर्गंधत्वात्सतांमुक्त्वानिशायांनष्टाकापिययौ॥ततोनिःपतिकामातापित्रोरपिअप्रियासर्वतोपितिरस्कारंलभ
माना॥अन्यदासमुद्रझंपयामरणमिच्छतीगृहान्निर्गताकुत्रापिवनेजटीलंतापसंदृष्ट्वायावत्तंप्रणमति॥तावत्तद्दुर्गंधात्समुनिःपराङ्मुखोजा
तः ततःसातंनिंदतीतंप्रतिप्राह यदितिममोपित्वंमांएवंतिरस्करोषि॥तदाअन्यत्किंममशरणंइति॥ततस्तापसःप्राह॥भद्रेअत्रवनेमम
गुरुःकुलपतिरस्ति॥तत्रागच्छसतवदुःखप्रतीकारंकरिष्यतीतिश्रुत्वा॥तेनैवमुनिनासह॥तत्रगत्वासाकुलपतिंअपश्यत्॥ततोगत्वाउक

धरेवृद्धकायं॥श्रीयुगादिजिनंध्यानपरंकुलपतिंचाक्ष्मा प्रणमति॥ताक्ष्मोपिनासिकांमोटयित्वा॥प्राहवत्सेकथमेवं॥तवदेहेदुर्गंधःप्रवर्त्ततेकथंच
दुःखितावनेभ्रमसीति॥ततःसापिअश्रूणिमुंचती॥आबाल्यादपिस्वस्यदुःखव्यतिकरंकथयित्वादुःखनिवारणोपायंचअपृच्छत्॥ततोमुनिःप्रा
हवत्सेअहंतुज्ञानीनास्मि॥येनतवपूर्वभवस्वरूपंजानामि॥तथापित्वंश्रीशत्रुंजयविचालेभ्रत्वारैवताद्रिंयाहि॥तत्रकेवलिवचनात् गजेंद्रपद
कुंडजलेनस्नानंकुरु॥इत्थंतेपापक्षयोभविष्यतीतिश्रुत्वासाहर्षितामुनेःपादौप्रणम्यश्रीशत्रुंजयंरैवतंचस्मरंतीचलिता॥क्रमात्शत्रुंजयेप्रदक्षि
णांदत्वा॥श्रीयुगादीशंप्रणम्य॥ततोऽग्रेगच्छंतीउत्तरदिशःपद्यया॥श्रीरैवताद्रिंआरुह्यगजेंद्रपदकुंडंप्राप्य॥तत्रकुंडेजिनभवेचदुर्गंधता
त्॥प्रवेशंअलभमानाकुंडाद्बहिःपानीयंआनायस्नानंकुर्वतीसप्तभिर्दिनैर्देहदुर्गंधेगतेसतिसुगंधदेहाभूत्वाकुंडेस्नाता॥भगवंतंपूजयि
तुंययौ॥तत्समयेर्जुनोपि॥तत्रपूजांकुर्वन्॥अभूत्॥पूजाकरणानंतरंकेवलिमुनिर्नतोने॥तयापूर्वभवेपृष्टेकेवलीप्राह॥भद्रेत्वंपूर्वभवेब्राह्म
णीअभूः॥अन्यदाश्वेतांबरसाधुंदृष्ट्वाजुगुप्सांकृत्वाएतेश्वेतांबरादुर्गंधाःस्नानशौचादिरहिताःवस्त्राण्यपिमलीमलानिस्वद्य अंगस्पर्शेनमलिनी
कुर्वंतीत्युपहासंकृतवती तेनपापफलेन॥ततोमृत्वानरकेगता॥ततःकुर्कुरीततश्चांडाली॥ततोग्रामशूकरी॥इत्यादिदुष्टभवान्भ्रांत्वासांप्रतं
पानुश्रीजातापरंतेनैवकर्मशेषेणदुर्गंधत्वंदुर्भगत्वंचप्राप्ता॥सोवीतरागस्त्रैलोक्यपूजितःसर्वोत्तम॥तस्यवेषंधारयंतःसाधवःकथंनिंदनीयाः

स्तुः॥येसाधवोमहाव्रतधराःयेचअज्ञानांधानांज्ञानदृष्टिंददतियेश्वश्री॥जिनशासनंधार्यंतेतेतुमनसापिअवहीलिताःअनंतसंसारभ्रमणका
रणंभवेयुरितिसांप्रतंतुत्वंतीर्थानुभावात्॥दुष्टकर्मक्षपयित्वा॥बोधिंप्राप्तासि॥अस्यतीर्थस्यैवसेवनात्॥मुक्तियास्यसिइतिश्रुत्वासातथैवचका
र॥अर्जुनोपितीर्थमहात्म्यंश्रुत्वा॥आत्मानंमन्यमानोमणिचूडमित्रेणसहदिनत्रयंतत्रतस्थौ॥अथकृष्णोपिअर्जुनंतत्रायातंज्ञात्वाबहुमानपू
र्वकंसंमान्यस्वभगिनींसुभद्रांतस्मैददौ॥पुनरर्जुनःशत्रुंजयेनंदिवर्द्धनेअष्टापदेचभगवद्भक्त्याद्वादशवर्षाणिपूरयित्वा प्रतिज्ञांनिर्वाह्य॥ततोवि
द्याधरछंदसहितोविमानैर्गगनंछादयन्हस्तिनापुरंप्राप्य॥ततःपांडुनृपोपितंवधूसहितंसमागतंविज्ञाय॥पुत्रपरिजनादिभिःसमंप्रवेशोत्स
वंचकार॥अथनंदेवमणिचूडस्यभगिनींप्रभावतींकश्चिद्विद्याधरस्थलेनअपहृतवान्॥तद्व्यतिकरंश्रुत्वाअर्जुनोमणिचूडसहितोगगनमार्गेण
गत्वा॥प्रभावतींमोचयामास॥ततःपांडुनृपस्तंअर्जुनंजितकाशिनंबहुधाअभिनंद्य॥तदैवयुधिष्ठिरंराज्येअस्थापयत्॥ततोयथासूर्येणगग
नंयथाचध्वजेनप्रासादः॥तथैवयुधिष्ठिरेणराज्ञा तत्राज्यंशुशुभे॥ततोभीमाद्याश्चत्वारोपिबांधवाधर्मपुत्रस्याज्ञयाचतस्रोपिदिशोजित्वा
समाजग्मुः॥ततस्तेचत्वारोपिबंधवोयुधिष्ठिरस्यस्नेहाद्विनयाच्चपुत्रवत्पदातिवत्॥मित्रवत्॥निजांगवच्चबभूवुः॥अथद्रौपदीकुक्षिजाताःपंचा
नामपिपांडवानांपंचपुत्राबभूवुः॥अथमणिचूडोविद्याबलात्॥तत्पुरेअनेकमा नंभपुत्तलिकातोरणादिमंडितांरत्नभित्तिमयीं॥इंद्रसभा

तुल्यांसभांकारयित्वा॥तत्रस्वर्णरत्नमयसिंहासनेयुधिष्ठिरंनिवेश्यस्वमैत्रींसफलांचकार॥अन्यदातत्रपुरेश्रीशांतिनाथस्यकल्याणकत्रयंविचिं
त्य॥युधिष्ठिरःस्वर्णमयंश्रीशांतिजिनप्रासादं॥स्वर्णमूर्त्तियुतंकारयामास॥ततस्तस्यप्रतिष्ठार्थंआहूता॥रामकृष्णद्रुपदादिभूपाःसमाजग्मुः॥
तेषुचतत्रसभायांउपविष्टेषुराज्ञाआहूतः॥सुयोधनोपिसबांधवस्तत्राजगामसचतत्रआकाशस्फटिकसिंहासनस्थितान्॥यादवपांडवान्
स्वछतयाआकाशस्थितानिवदृष्ट्वाविस्मयंप्राप्य॥ततोऽग्रतःइंद्रनीलमणिमयभूमौ॥जलभ्रांत्यावस्त्राणिसंवरन्॥ततश्चस्फाटिकभित्तौआस्फ
लन्राज्ञांमणिभित्तिप्रतिबिंबितानांप्रतिबिंबानांचभेदंअजानन्॥सर्वेषांसभासदांहास्यपदंबभूव॥ततोसोअंतःक्रोधाग्निज्वलितोपि॥स्वर्यकां
नषदद्दिःशी॥ततःसन्आकारगोपनंकृत्वातंउत्सवंनिवर्त्यपतिस्म॥ततोयुधिष्ठिरोधर्मस्यदयामूलमितिजानन्॥सर्वत्रदेशेमारिघोषणपूर्वकंवि
धिवत्प्रतिष्ठोत्सवंकारयित्वा॥चारणमुनिसाधुसाधर्मिकादीन्विविधपूजाभिःसंपूज्यकल्पतरुवद्वांछाधिकंदानंयाचकेभ्योदत्वा॥रामकृष्णा
दीन्दुर्योधनंचवस्त्ररत्नाद्यैःसत्कृत्यस्वस्वपुरंप्रतिससर्ज॥अथदुर्योधनःस्वनगरेगत्वापित्रामातुलेनचसमंइतिमंत्रयामास॥यत्एतेपां
डवाआबाल्यादपिकूटकपटनिपुणामुखेमिष्टाहृदयेनिष्ठा॥अस्माकंहृदयेशल्यकीलकाइवनित्यंशल्यंति॥सांप्रतंचएतेरामकृष्णादि
मित्रराज्यमदोद्धतैर्यत्उपहासःकृतः॥तेनअस्मिन्मेमनो ॥ततोबलेनछलेनापिवायदाएतेषांराज्यंगृह्णामितदैवममहृदयाग्निः

शाम्यति॥ इत्युक्त्वा पांडवस्थर्द्धया सोपि द्रव्यकोटिव्ययं कृत्वा नवां सभां अकारयत्॥ तस्यावलोकनार्थं दूतैर्द्वार्द्धान् पांडवान् रामकृष्णादि
आकारयामास॥ ततः कूटकपटपंडितो दुर्योधनस्तान् सर्वान् भूपतीन् संमुखगमन अर्घ्यपाद्य भोजनादि भक्तिमधुरभाषणादिना॥ अत्यर्थं
आवर्जयामास॥ ततो सौ कपटप्रीतिदर्शनेन पांडवान् बहुधा प्रीणयित्वा॥ अन्यदा द्यूतक्रीडार्थं न्यमंत्रयत्॥ ततो नर्थकारणं द्यूतमिति
विदुरेण वार्यमाणोपि कर्मयोगात् युधिष्ठिरो दुर्योधनेन समं द्यूतं समारेभे॥ अथ दुष्कर्मोदयात् युधिष्ठिरो यत्किंचिदपि॥ अश्वगजग्रामा
दिकं पणीकरोति॥ तत्सर्वमपि दुर्योधनं छलाभावात् हारयति॥ तथापि मृगतृष्णा जलवत् जयवांछया सौ॥ भ्रातृन् नन्यवस्तुन एवं यदा सर्वमः
पि हारितं तदा द्रौपदी पणीकृता दुर्दैववशात्सापि हारिता॥ ततो दुष्टो दुर्योधनः पांडवानां देशग्रामकोशगजरथाश्वादिकं स्ववशीकृत्य॥ द्रौपद्याग्रह
णार्थं निजं अनुजं दुःशासनं प्राहिणोत्॥ सोपि दुर्मतिस्तत्र गत्वा॥ रेरे द्रौपदी त्वं पतिभिस्त्वं हारितासि ततस्त्वं॥ अकिंचित्करान् त्यक्त्वा सांप्रतं
ममोत्संगे उपविश इत्यादि निष्ठुरांगारसमतुल्यानि वाक्यानि किरन् द्रौपद्या आवासमध्ये जगाम॥ अथैनं वचनं श्रुत्वा नस्तां द्रौपदी सो धमः
केशेषु गृहीत्वा॥ हठात् सभामध्ये आनीतवान्॥ ततो भीष्मद्रोणविदुरेषु उपविष्टेषु लज्जमाना सा सती कोधात् दुःशासनं प्रति इत्याह॥ अरे
रे कुलांगार॥ निर्लज्ज॥ एवं निष्ठुरं कर्म कुर्वन् विफलाश्रयस्त्वं भविष्यसि॥ तस्या इति वाक्यात् क्रुद्धः स दुरात्मा द्रौपद्याः कटितटात् चीरं नि:कासय

मास॥ यथा यथा सो तस्या नितंबात् चीराणि गृह्णाति॥ तथा तथा तस्याः शीलमहात्म्यात्॥ नवं चीरं प्रकटी भवति॥ इत्येवं अशेषरशनचीराकर्षणेपि तां
तथास्थितां एव वीक्ष्य॥ अतिविषण्णो सौ दुर्मतिर्विलक्षो भूत्वा निविष्टः॥ ततो भीमो दुर्योधनोपरि कोधाग्निना प्रदीप्तोपि॥ युधिष्ठिरेण बलात्कारेण वा
रितः समाच्छादितो ग्निरिव भूत्वा वचनं अमंत्रकटीचक्रे॥ शृणु भो दुर्योधन एषोहं भीमः॥ त्वां सकुटुंबं गदया चूर्णयामि॥ परं किं कुर्वे॥ एषोस्माकं
ज्येष्ठ एव अंतरायी भवतीति॥ श्रुत्वा केपि भयकंपितांगाः केपि चलज्जिताः केपिद् दुःखिताः संतो॥ अधोमुखा बभुवुः॥ ततो दुर्योधनं प्रति भीष्मः प्रा
ह॥ रेरे अंधपुत्र॥ स्वकुलध्वमकेनोकिमेतत्त्वया महासत्याविडंबनं प्रारब्धं॥ एते भीमार्जुनादयस्तु॥ इदानीमेव त्वां मारयंति॥ परं धर्मपुत्रवारिता
अंतर्लज्जं तान्निष्टंति॥ तव पितानुबहिरंधः त्वं तु अंतर्बहिश्चापि॥ अधुनासि यदि किमपि शुभं वांछसि तर्हि एतां पतिव्रतां मुंचेत्यादि वाक्यैः उपालब्धो
सो दुर्योधनः प्राह॥ एते पांडवा द्वादशवर्षाणि वनवासे ततोपि एकं वर्षं नष्टचर्यया तिष्ठंतु॥ तत्र वर्षे स्थितान् यदि कोपि ज्ञास्यति॥ तदा पुनरपि द्वादश
वर्षाणि वनवासाय प्रेषयिष्यामि॥ इति तद्वचनं युधिष्ठिरोंगीकृत्य गुरून् नत्वा बांधवैर्द्रौपद्या च सहितो हस्तिनापुरं प्राप्य॥ तत्र मातापितरौ नत्वा किं
चिद्विषण्णचित्तः सर्ववृत्तांतं अकथयत्॥ तच्छ्रुत्वा पांडुरपि करुणं दुःखान्मौनमाप॥ पुनर्धर्मपुत्रः प्राह॥ तात मा खेदं कुरुध्वं॥ अहं वनवासेन कृत्वा सत्य
सधत्वं निजकीयं नाम सार्थकं करिष्ये सत्पुरुषाणां हि राज्ये सति॥ अथवा राज्यनाशेपि एवं सुखे दुःखे पि वा जने वा वने वा निजवचनपालनमेव पर

मौनिधिः ततो धैर्यं धृत्वा अस्मान् वनवासाय अनुजानीथ तत् श्रुत्वा ॥ अंतःसंरुद्ध दुःखप्रसरः पांडुः कुंती च मौनेन तस्थतुः ॥ अथ अप्रतिषिद्धं अनुमतं इति विकल्प्य युधिष्ठिरो बंधुभिः पत्न्या च समं वनवासाय प्रतस्थे ॥ ततः पांडुः कुंती माद्री सत्यवती अंबा अंबाला अंबिकादयः स्नेहात् ॥ अश्रुजलैर्भुवं सिंचित्यः तेषां पृष्ठतो निर्ययुः ॥ ततस्तैः पंचभिर्निर्गच्छद्भिः समग्रं पुरं इंद्रियैः रहितं शरीरम् इव निश्चेतनं शून्यं च अभवत् ॥ अथ पुराद् बहिरागत्य धर्मपुत्रः पितरं मातृंश्च नत्वा इति प्राह ॥ हे तात कुरुवंशावतंस ॥ त्वया सत्त्वं समालंबनीयं ॥ प्रतिज्ञां निर्वहद्भिः अस्माभिः पुत्रैस्त्वं एव मदनीय यशो वृद्धिः सत्पुरुषाणां च यश एव धनं ॥ ततो अर्थे न कश्चित् खेदः कार्यः ॥ तथा हे मातरः यूयं यत् कातरास्तत् स्नेह परवशत्वं परं स्वस्थ वीरपत्नीत्वं विचिंत्य धैर्यं भजत किं च तातस्य शुश्रूषा कार्या ॥ श्रीजिनेश्वरः पूजनीयः ॥ अस्मासु च नित्यं आशिषो वाच्याः इत्येवं पितरं मातृवर्गं च आश्वास्य ततो वसरागतान् पौरजनान् ॥ बाष्पपूर्णनयनान् प्रसाद दृष्ट्या समाश्वास्य ॥ भो भोः पौरा राज्यस्थितैरस्माभिर्यत् किंचित् अप्रियं आचरितं तत् भवद्भिः क्षंतव्यं इत्यादि क्षमयामास अत्रांतरे दुर्योधन प्रेरितो क्रूरकिर्मीर नामा नैद्वोराक्षसो द्रौपदीं भापयंतो भीमेन जितो ॥ ततो युधिष्ठिरः पितरं मातृवर्गं च पौरजनांश्च विसृज्य कुंती द्रौपदी सुभद्राभिश्चतुर्भिश्च बंधुभिः सह अग्रे चचाल ॥ अथ विदुरः सर्वोपाय कुशलः कांश्चित् द्विषोपायान् पांडवेभ्यः कथयित्वा पुनः सखेद चित्तो गृहं प्रतिवलितः ॥ ततो द्रौपद्या भ्राता धृष्टद्युम्न नामा मार्गे समेत्य पांडवा

न् स्वपुरे कांपिल्ये समानयत् ॥ अथ समुद्रविजयादिशान् कृष्णोपि कुंती प्रणमितुं यादवकोटि परिवृतः समाययौ ॥ ततः कृष्णं सपरिकरं अर्जुनः सविधासमाहूतभक्ष्यभोज्यैर्भोजयामास ॥ तेन सर्वेषां मनसि महान् विस्मयो भूत् ॥ अथ तान् कृष्णः प्राह ॥ अहो वीरा एते धृतराष्ट्र पुत्रा जन्मप्रभृत्येव ॥ कूटकपट प्रवीणाः छलावलोककाश्च ॥ एभिर्द्यूत क्रीडा मिषेण यूयं राज्यात् निर्वासिताः ॥ ततोहं एतान् हत्वा अद्यैव युष्मान् पुनः स्वराज्ये स्थापयामि छलकारकेषु एषु प्रतिज्ञा भंग दोषो न कश्चिद् अपि शंकनीयः इति श्रुत्वा युधिष्ठिरः प्राह ॥ स्वामिन् त्वया प्रतिपन्ने अस्मिन् कार्ये नास्ति कश्चिद् विलंबः परं त्रयोदशवर्षांते तव साहाय्येनैव वयं राज्यं गृहीष्यामः सांप्रतं तु सर्वथा प्रतिज्ञा भंगो न कार्यः ॥ इत्युक्तो विसृष्टः कृष्णो निज भगिनीं सुभद्रां सपुत्रां रथम् आरोप्य स्वपुरीं जगाम ॥ अथ दुर्योधन प्रेषितः पुरोचन नामा पुरोहितः आगत्य युधिष्ठिरं नत्वा इति प्राह ॥ स्वामिन् दुर्योधनो मम मुखेन ॥ अत एव एष मे पराधः इति विज्ञपयति यन्मया अज्ञानवशात् भवत्सु प्रतिकूलं आचरितं ॥ त्वं च अस्माकं ज्येष्ठो गरीयान् ॥ अत एव एष मे पराधः क्षंतव्यः सांप्रतं च हस्तिनापुर राज्यं एतत् त्वदीयं गृहाण ॥ यदि च एवं मन्यसे मम प्रतिज्ञा पालनीया ॥ तदा इंद्रप्रस्थ पुरं गृहाण ॥ तत्रस्थस्यैव वनवासावरोहं कोशं वापयिष्ये ॥ इति तस्य भर्त्सिषमयी बहिः कोमलां वाणीं श्रुत्वा धर्मसूनुः सरलत्वात् विश्वासं आनीय वारणावती प्राप्य ॥ ततो विदुरेण दुर्योधनस्य कूटं विज्ञाय पांडवेभ्यो गुप्तं प्रस्थापिताः ॥ प्रेषित

लिखितंचदुर्योधनेनयुष्माकंवासार्थंलाक्षागृहंकारयित्वा ॥ दत्तमस्तिफाल्गुनस्यकृष्णचतुर्दश्यां ॥ रात्रौदुर्योधनादिष्टः पुरोचनपु
रोहितोसौज्वालयिष्यति ॥ ततोयुष्माभिः सावधानैः स्थातव्यंयदिसंकटंपततितदामयाकारितेनसुरंगामार्गेणनिर्गंतव्यमिति
श्रुत्वा ॥ कोपाध्मातंभीमंनदैवदुर्योधनवधायोद्धतंयुधिष्ठिरः कथंचिन्निवारयामास ॥ अथविदुरोगुप्तवृत्त्यासुरंगांकारयामास
अथपुरोचनस्तत्रैवलाक्षागृहेपांडवान्वासयित्वा ॥ भक्ष्यभोज्यादिनानाभक्तितत्परः कपटप्रीतिंदर्शयामास ॥ अथचतुर्दशीदि
नेकाचिद्वृद्धा ॥ पंचभिः पुत्रैः एकयावध्वाचसहिता तत्रागतासाचकुंत्या अनुकंपापरयाभोजनादिना तोषयित्वा ॥ तत्रगृहेरात्रौ
वासार्थंस्थापिता ॥ तत्रैवरात्रौदुष्टेनपुरोचनेनअग्निर्दत्तः ॥ ततोज्ञाततवृत्तांतोभीमस्तान्चतुरोपिबंधून्कुंतींद्रौपदींचसुरंगामा
र्गेणनिःसार्य स्वयंचपश्चात्स्थित्वापुरोचनंस्ववैरिणंअग्नौप्रक्षिप्यहृष्टचित्तोवेगान्बंधुभिःसहअमिलत् ॥ अथप्रभातेलो
काःलाक्षागृहेदग्धे ॥ तन्मध्यात्सप्तशवानिदृष्ट्वाहाहापांडवादग्धा ॥ इतिशोकंचक्रुः ॥ पुरोचनस्यशवंदृष्ट्वापितृमारकस्यक्रो
धान्मादाद्यातैराहत्य ॥ पुरोहितेनयादृशंकृतं तादृशंतत्फलंप्राप्तं ॥ इतिनिंदांचक्रुः ॥ अथदुर्योधनः पांडवान्पुरोहितंचदग्धा
न्विज्ञाय मनसिहर्षितोपिबहिर्लोकलज्जयाशोकंदर्शयामास ॥ अथपांडवाः शत्रुभीत्यामार्गेशीघ्रंगच्छंतः पतंतः स्खलंतोहो

रात्रंचलंतः क्वापिवृक्षेवापर्वतेवाजलाशयेवा क्षणमपिविश्रामंनचक्रुः दर्भांकुरैः कंटकैश्चविषमेवनेगच्छंतः शत्रुभयात्दुःखंनगणयामासुः
इतः कुंतीमार्गेश्रांतास्मिनकुलसहदेवौ ॥ श्रांतौअपिलज्जयानब्रूतः इतिश्रुत्वाकंबलीतुनशाकामिवप्ररपितथैवश्रांतास्मिनकुलसहदेवौ
श्रांतौअपिलज्जयानब्रूतः इतिश्रुत्वा ॥ भीमोअसमानपराक्रमः निजस्कंधयोः कुंतींद्रौपदींचनिवेश्य ॥ कटिप्रदेशेनकुलसहदेवौचवधायुधिष्ठि
रार्जुनौतुकराभ्यांअवलंब्यईषद्अपिश्रमंअगणयन्चचाल ॥ अथरात्रिंअतिक्रम्यप्रभातेनैकिमपिकाननंप्रापुः तत्रअतिश्रमात्सुप्तेषुसर्वे
षु ॥ भीमसेनोजलंगवेषयन्एकस्मिन्सरसिगतः ॥ तत्रमहासरसितूर्णंजलक्रीडांकृत्वामार्गश्रमंनिवार्यवारिगृहीत्वायावदुत्थितः तावत्पश्चादा
गच्छंती रेरेतिष्ठतिष्ठेतिवदंती क्रूरवदनांकांचित्स्त्रीयंअपश्यत् साचभीमंदृष्ट्वातत्कालमेवजातानुरागासतीसुमुखीभूत्वा कटाक्षान्क्षिपंती
मधुरवाक्यैरितिप्राह हेपुरुषश्रेष्ठ शृणु ॥ अत्रपर्वतेहिडंबाख्योराक्षसोममभ्रातावसति ॥ अहंतुहिडंबानाम्नीतस्यभगिनीममभ्रातामनु
ष्यगंधेनतवआगमनंज्ञात्वाबुभुक्षितस्त्वयानयनार्थंमांप्रेषयामास ॥ अहंतुत्वांदृष्ट्वामोहवशंगता ॥ ततोमांत्वदेकहृदयांविज्ञायपाणिग्र
हणेनसफलप्रार्थनांकुरु ॥ अहंतुभवतांवनवासेअनेकोपकारान्करिष्ये ॥ इतितद्वाक्यंश्रुत्वाभीमः प्राह ॥ अ— वमावदयतोवनवास
गतानांअस्माकंपाणिग्रहणंपादबंधनं ॥ तत्रयुज्यते ॥ अत्रांतरे विकरालरूपोहिडिंबः समागत्यस्वभगिनींपादघातैस्ताडयामास ॥ ततो

भीमोपिक्रुद्धोराक्षसंप्रतिप्राह । रेरेराक्षसाधमकिमिवअबलांताडयन्नसि । यदिपौरुषमस्ति । तर्हिअत्रागछ । इतिश्रुत्वा । क्रुद्धोराक्षसो
महांतंवृक्षंउन्मूल्यधावितः भीमोपिवृक्षमुत्पाट्यसिंहनादंमुंचन् । तेनसमंयुयुधे । ततस्तयोःसिंहनादैः पादाभिघातैश्चभूतलंभज्य
मानमिवासीत् । शरीराण्यंगाणिचनिपेतुः ॥ अत्रांतरेहिडिंबावेगात्कुंतीपार्श्वेगत्वाजागरयित्वाभीमसेनोविषमयुद्धेपतितोस्ति । त
तोयूयंतत्साहाय्यार्थंशीघ्रंधावत अहंतुगुणैःकृताभीमस्यदासी अस्मिइतिश्रुत्वासखड्गपाणीकृत्वावेगात् । युधिष्ठिरस्तत्रगत्वाराक्षसं[illegible] । त
तःप्रवृद्धभुजबलोभीमोगदयाकृत्वामृत्तिकाभांडमिवराक्षसं अचूर्णयत् । तस्मिन्निपातितेहिडिंबाभीमरूपमोहितासतीसेवांकुर्वतीतेषांपृष्टत
एवंययौ । अन्यदाकापिवनेमार्गवैषम्यात् द्रौपदीमार्गात्भ्रष्टाकापिययौ । ततःसिंहव्याघ्रमातंगसर्पाजगरादिव्याकुलेपि । तत्रवनेतस्याः
शीलप्रभावात्नकोपिपराभवंचकार । ततःपांडवागिरिगहनकुंजादिनिभत्येकंपश्यंतोपि । निर्भाग्याश्चिंत्रकवल्लीमिवतांकापिनप्रापुः । त
तश्चिंतातुरेतेषुभीमवाक्यात् हिडिंबातांसमानयत् । ततोमार्गेसाकुंतीद्रौपदीचभक्त्यतिशयात् निजंस्कंधयोर्वहतिस्म । स्थानेस्थानेचय
थेप्सितानिअन्नानिपानीयानीचसमानयति । इत्थंतस्याभक्त्यातुष्टौकुंतीयुधिष्ठिरौ । तांभीमेनउद्वाहयामासुः । अथहिडिंबारिव्यंशाक्षा
नानाविधसौधकरणेन । नानारूपैश्चभीमेनसहसुरतसुखंबुभुजे । इत्येवंतेसुखेनद्विजवेषंधारयंतः क्रमेणएकचक्रपुरंप्रापुः त

देवशर्मब्राह्मणगृहेतस्थुः । तत्रयुधिष्ठिरेणहिडिंबांप्रतिकथितं हेवधु अस्माकंद्वादशवर्षाणियावद्वनवासःश्रेयोस्ति । ततःसांप्रतंत्वंस्वकीयगृ
हंप्रतियाहीत्यादेशंप्राप्यसाकुंत्याः अग्रेस्वस्यगर्भाधानंकथयित्वा । कार्येहंस्मरणीयाइत्युक्त्वाअंतर्हिताबभूव । अथतेपांडवास्तत्रवसंतः
अन्यदादेवशर्मगृहेस्नेहेतिरुदनंद्वयैर्देपिदनादिमहाशोकंश्रुत्वातद्दुःखेनदुःखितोभीमस्तंपृष्टतिस्म किमेतत् तेशोककारणमिति । ततो
देवशर्मास्त्वाटेहस्तंदत्वानिःश्वस्यचप्राह । भोमहाभागममदुःखंकेनापिनिवारयितुंशक्यंनास्ति । तथापितत्स्वरूपंशृणु । पुराअत्रबकनामा
राक्षसःसिद्धविद्योमहादुष्टोमहतींशिलांपुरोपरिधारयित्वाजनसंहारंकर्तुंउद्यतोभूत् । ततोराजापौरजनसहितस्तद्भयात् जिनंस्मरन्
कायोत्सर्गंकृतवान् । तत्प्रभावात् राक्षसःपुरस्यक्षयंकर्तुंअशक्तःशांतात्माइवप्रकटीभूयराजानंप्राह । राजन् अहंलोकसंहारतत्परोपि
सांप्रतंजिनंभक्त्यातुष्टोस्मि ततःप्रतिदिनंएकैकंमानुषंत्वयाममदेयंतेनत्वंअहंप्रजाश्चसुखेनस्थास्यामः ततोराजातदंगीकृत्यपुरवासि
समस्तजननाम्नांपत्रिकाःकृत्वाकुंभमध्येक्षिपत् । ततोनित्यंकुमारिकायदीयांपत्रिकांनिष्कासयति । सराक्षसस्थानेयाति । राक्षसस्तंभक्ष
यति । अद्यतुममपुत्रस्यममनाम्नःपत्रिकाआयातास्ति । एतेचराजपुरुषाआकारणार्थंआगताःसंतितत्तोनास्ति । अत्रकिमपिशर
णं । तेनसर्वंकुटुंबंशोकमयंजातं । पूर्वकेवलिनाअस्यराक्षसस्यमरणंपांडवहस्तेकथितमस्तिपरंनजाने । तत्तुकदापिभविष्यति । अहं

तुञ्शरणोधेवञ्प्रिये॥ इतितद्वचनंश्रुत्वा॥ भीमःपरोपकारमेवसंसारसारंजानन्॥ अहोइदंशरीरंरोगशस्त्राग्निजलादिभिरपिअवश्यंविपद्यते॥ तेनअ
निस्येनशरीरेणयदिअन्यप्राणानांरक्षणंभवति॥ तर्हि तेनमहाफलंप्राप्तं॥ इत्यादिविमृश्यतंप्रतिप्राह॥ अहोविप्रत्वंगृहेतिष्ट॥ तवस्थानेअद्यअ
हमेवयास्यामि॥ इतितस्यसाहसेनअंतश्चमत्कृतः पुनर्देवशर्माप्राह॥ अहोद्विजश्रेष्टत्वयातुउपकारिणायुक्तंपरंत्वां पुरुषरत्नंप्राघूर्णकंवस्मा
मरक्षणार्थंयममुखेक्षिप्त्वा॥ ममनरकेपिस्थानंनभवतीतिवदंतं॥ तंगृहेस्थाप्य॥ भीमोबलात्राजपुरुषैःसहययौ॥ अथसराक्षसः पि॥ अन्य
राक्षसैर्वृतस्तत्राऽगत्य॥ शिलायांसुप्तंमहाकायंभीमंवीक्ष्य॥ अद्यबुभुक्षितानांअस्माकंआकंठतृप्तिर्भविष्यतीति॥ हर्षितोयावत्॥ ककचाका
रान्दंतान्पीषयन्पुनःपुनर्जिह्वांलोलयन्॥ कृतिकांभ्रमयन्॥ अट्टहासंकुर्वन् समीपमाऽगतः तावद्भीमोविपटीमुक्तालोहगदांधारयन्॥
प्रत्युतराक्षसान्भाषयन्साक्षात्पर्वतइवउत्तस्थौ भीमःप्राह॥ रेरेराक्षस॥ लोकहत्याभवपापअद्यतेफलितंनइष्टदेवतंस्मर॥ अद्यअहंत्वा
नमोक्ष्ये॥ ततोराक्षसःक्रोधारुणोन्यराक्षसवृंदसहितोदंडमुद्यम्यधावितः॥ इत्थंतयोर्भीमराक्षसयोस्त्रिभुवनभयंकरंमहद्युद्धंअभूत्॥ अथ
भीमोलघुहस्तत्वात्प्रस्तावंप्राप्यराक्षसमूर्द्धिगदाघातंददौ॥ तेनघातेनसराक्षसोमहाकायःपृथ्वीकंपयन्पपात ततोभीमस्यमूर्द्धिदेवैः
पुष्पवृष्टिःकृता॥ जयजयशब्दघोषश्चकृतः तत्श्रुत्वापुरनाथःपुरलोकाश्चअतिहर्षिताःभीमंवर्द्धापयामासुः केनलिखनेनात्॥ पराक्रमा

 ६१

च पांडवानउपलक्ष्यनृपःसबहुमानंगृहेनीत्वा नानाभक्तियुक्तिभिःपूजयामास स्वनगरेपिउपद्रवनिवृत्तिहेतुकंतिनपूजादिमहोत्सवंचका
र ततःपांडवाःपुनस्तत्रापिशत्रुभयंविचिंत्यनिशायांतत्पुरंत्यक्त्वाद्वैतवनंप्राप्य तत्रफलोदनान्कृत्वाशुभवृत्त्यातस्थुः इतश्चलोकमुखात्दुर्यो
धनो राक्षसवधादिकंपांडवपराक्रमंश्रुत्वा मनसिशोकेनग्रस्तोपि लोकदर्शनार्थंबहिर्हर्षोत्सवंचक्रे ततोविदुरोदुर्योधनस्यदुष्टाभिप्रायंज्ञा
त्वापांडवान्प्रतिप्रियवंवंनामदूतंप्रेषयामास सोपिद्वैतवनेगत्वापांडवान्प्रतिविदुरस्यइतिसंदेशंप्राह तथाहि दुर्योधनोयुष्मान्द्वैतवने
स्थितान्ज्ञात्वा पुनःसशल्योजातोस्ति तेनकर्णेनसमंस्वयंतत्रागमिष्यति ततोभवद्भिस्तत्रनस्थातव्यं इतिश्रुत्वा दुःखिताक्रोधाद्द्रौपदीप्रा
ह अहहधर्मपुत्रवचनात् राज्यजनपदसैन्यधनादिकंसर्वंत्यक्तं अनेकदुःखास्पदंवनंगृहीतं अद्यापिअस्मासुतेपापिनःकिंकरिष्यंति
धिगस्तुमेजन्मजीवितव्यंचयस्याएकःपतिर्भवतिमापिअभीप्सितंसुखंभुनक्ति अहंतुपंचभर्तृकापि कांकांदुर्दशांप्राप्नोमि किंच
मातस्त्वयावीरपत्न्यापि पंचाप्येतेक्लीबाजाताःसंति यतोदुःशासनकृतोममदुर्दशामपिवीक्ष्ययेषांपौरुषंनप्रकटीभूतंयंपराभवं
शत्रुःकरोति तत्सर्वंसहंत्येवनचकिंचित् तत्प्रतीकारंकुर्वंते इत्यादिश्रुत्वासमुच्छलितरोषो भीमोभूतलेहस्तौआस्फाल्यं मूर्ति
मान्वीररसइवउत्तस्थौ ततःपार्थोपिसीत्कारेणवनंपूरयन् धनुष्टंकारंचकार तथैवनकुलसहदेवौखड्गमास्फाल्यरौ

पारुणोजातौ॥एवंकोपोद्गलान् तान् दृष्ट्वा युधिष्ठिरो [illegible] शामयांचकार॥भोवीरा भवतां अतुलशक्तिं अहं जानास्येव।परं ममवच
नपालनार्थं कियत्कालं प्रतीक्षध्वमितित्र्यिष्ट्वव सामं [illegible] पुनः शांतिं ययुः॥ततः प्रत्युत्तरं कथयित्वा सत्कृत्य च प्रियंवदं विम ‍ जुः॥
अथ तिविदुरवाक्यं स्मृत्वा॥तद्वनं परित्यज गंधमादन [illegible] त्र अग्रतः इंद्रकीलाभिधं पर्वतं विद्यासाधनयोग्यं दृष्ट्वा॥अवसरं विज्ञा
य॥अर्जुनो युधिष्ठिरस्याज्ञां लात्वा विद्याः साधितुं ययौ।सच तत्र युगादीशं नत्वा एकाग्रचित्तो जितेंद्रियः स्थिरासनो युक्ताहारविहारः परि
त्यक्तसर्वसंगो मुनिरिव ध्यानपरः सन् मणिचूडादिभिर्दत्ताविद्याधरविद्याः साधयामास॥तत्र भूतवेतालशाकिन्यादयः सिंहव्या
घ्रादयश्चापि॥तं क्षोभयितुं नशक्ता बभूवुः॥ततः कालेनाः सर्वा विद्याः प्रकटीभूय वत्स वरं वृणीष्वेति प्राहुः अर्जुनोपि तासां पादेषु
लुठित्वा प्रणामं कृत्वा पुरस्तस्थौ॥ततस्ताः सर्वा अर्जुनस्य शरीरे संक्रांताः अयं सिद्धविद्यत्वात्॥दर्शनीयो यावत्तत्र स्थितोस्ति तावत्
व्याधेन हन्यमानं एकं शूकरं अपश्यत्॥ततोर्जुनः सारूपं तं प्रत्याह।रेरे अत्र तीर्थं मम पश्यत एव अग्रतः किमेन निरपराधं पशुनि
हंसि॥इत्येवं न र्जितो व्याधः प्राह॥भो पांथ अत्र मया तव किं अपरा ‍ ते॥वन्यसत्वानां न कस्यापि स्वामित्वं वर्त्तते।यदि त्वं छलोत्कटेन नि
षेधितासि तर्हि अहमपि सज्जोस्मि॥अथार्जुनः कृतांतदंडसदृशं कोदंडं करे कृत्वा बाणैर्गगनांतरं अपूरयत्॥ व्याधोपि तथैव बाण

श्रेणीर्मुमोच॥तयोर्बाणश्रेणि भीरेणुवत्स मुक्तालिनानि॥गिरिशृंगाणि परस्परं आस्फलंतिस्म तत: समायात्लुब्धकोऽर्जुनस्य धनुः अपाह
रत्॥ततोऽर्जुनः खड्गं करे कृत्वा दधावे॥पुनस्तेन खड्गोपि अपहृतः।ततो बाहुयुद्धं प्रारेभे।ततस्तौ पर्वतौ इव अन्योन्यं आस्फलंतौ देवाना
मपि भयंकरौ अभूतां ततोऽर्जुनो लघुहस्ततया तं चरणे गृहीत्वा आकाशे भ्रामयामास तत: पुष्पवृष्टिर्जाता कश्चित्सुरः प्रकटीबभूव।त
तोऽर्जुनो विस्मितः किमेतदिति यावच्चिंतयति॥तावत्स प्राह।हे पार्थ तव सत्वेन तुष्टोस्मि ततो वरं प्रार्थय अर्जुनः प्राह समये वरं प्रार्थयि
ष्ये परं सांप्रतं तु न वस्वरूपं निवेदय।इति श्रुत्वा हृष्टः स प्राह।शृणु पार्थ वैताढ्ये रथनूपुराख्ये पुरे इंद्रनामा विद्याधरपतिः इंद्रनामा विद्या
धरपतिः इंद्रवद्दिक्पालादिसेव्यमानोस्ति॥तस्य विद्युन्माली लघुबंधुर्दुर्विनीतः प्रजापीडकत्वान्नगरान्निःकासितो मर्षवहन् रत्नसांपुरे
त्वं ग्राम॥तत्र वसन् असौ तलतालाभिधै राक्षसैः परिवृतो धाटीं कृत्वा इंद्रस्य देशं लोकांश्च उपद्रवयति।तेन रथनूपुरवास्तव्या लोकास्त
थाउपद्रुता।यथा तद्भयात् दिशोदिशि पलायिताः।ततः इंद्रराजेन केवलिमुखात् तव अत्रागमनं ज्ञात्वा अहं प्रेषित:॥ततएनं रथं आरु
ह्य इमं मुकुटं कवचं धनुर्गृहाण तव प्रभावादेव तत्र शत्रुक्षयो भविष्यति श्रुत्वा पार्थो विपत्कार्ये कृतत्वरस्तं रथमारुह्य धृतमुकुटकवचध
नुः रुणाद्राक्षसपत्तनं प्राप्य।ततस्तत्र पुरे रथनिर्घोषश्रवणात् महान् कोलाहलो जातः ततस्ते राक्षसाः अंजनगिरिकूटानि समस्तकायाः

पुराद्बहिर्निर्गत्यघोरंरणंआरेभिरे॥ततोऽर्जुनस्तान्‌हत्वाजयलक्ष्मीप्राप्यवैताढ्येइंद्रंप्रणमतिस्म॥इंद्रोपिअभ्युत्थानादिआदरंकृत्वा॥अर्जु
नंस्वस्यअर्द्धासनेनिवेशयामास॥लोकपालाद्याःसर्वेपिदेवाअपितंप्रणमंतिस्म॥अथइंद्रःस्वपुत्रादिवस्नेहात्‌अर्जुनायस्वकीयानिदि
व्यायुधानिददौ॥अर्जुनोपिचित्रांगदादिविद्याधरेभ्योधनुर्वेदविद्यांअशिक्षयत्॥इत्थंइंद्राग्रेकियत्कालंतत्रस्थित्वा॥पुनर्मातृभ्रातृमिल
नोत्कंठितोर्जुनोबलात्‌इंद्रस्याज्ञांलात्वा॥अनेकविद्याधरवृंदोविमानमारुह्य॥स्वस्थानंप्राप्य॥तत्रकुंतीयुधिष्ठिरंभीमंचततोलघुबंधू
समालिंग्यस्नेहावलोकनेनद्रौपदींप्रसादयित्वाचिरंवियोगजंतापंनिरवापयत्॥तत्रचित्रांगदोऽर्जुनपराक्रमवृत्तांतंकथयित्वायुधिष्ठिरादी
न्प्रमोदयामास॥ततःसत्कारपूर्वकंविसृष्टास्तेविद्याधराःस्वस्थानंजग्मुः॥अथतत्रस्थितानांतेषां॥अन्यदागगनमार्गात्‌एकंस्वर्णकमलं
मुखाग्रेपतितं॥तद्दृष्ट्वाममाघ्रायच॥अत्यंतहृष्टाद्रौपदीभीमंप्रत्याह॥स्वामिन्‌एतत्पद्मंअतिरुचिरत्वात्‌मममनोहरति॥ततईदृशानिप
द्मानियत्रवनेसरोवरादौभविष्यंति॥तानिसमानीयमह्यंदेहि॥इतिप्रियावचनप्रेरितोभीमोपि॥पंचपरमेष्ठीन्स्मृत्वावनमध्येतस्यगवेषणा
र्थंययौ॥ततोयुधिष्ठिरस्यवामंलोचनंकुंत्याश्चदक्षिणलोचनंअस्फुरत्॥ततोभीमस्यकिमपिविघ्नंआशंक्यचत्वारोपिबांधवाःभीमस्यपृष्टतो
ययुः॥परंनिरंतरवृक्षगहनेसर्वतःसंचरंतोपितेक्वापिभीमंनप्रापुः॥ततस्तेचिंताकुलाइतस्ततःस्खलंतःपतंतोमूर्छंगताः॥किमपिउपायंअप

श्यंतो॥हिडंबांस्मरंतिस्म॥ततःस्मरणमात्रात्‌हिडंबातत्राऽऽगत्यतान्‌॥शिरसिआरोप्य॥भीमपार्श्वंमुक्त्वास्वयंस्वस्थानंजगाम॥भीमोपिस्वस्यमार्ग
वैषम्यव्यतिकरंबंधुभ्यःकथयित्वा॥समीपस्थितपद्मसरसःपालिंसमारुरोह॥ततःस्वर्णपंकजग्रहणार्थंयावत्सरोगाहतेतावत्‌क्षणमात्रात्‌
अदृश्योभूत्‌ततस्तस्यपृष्टतोऽर्जुनःप्रविष्टःसोपिक्षणात्‌अदृश्योजातः॥एवंयुधिष्ठिरोपिततोनकुलःसहदेवश्चापिसर्वेपिअलक्ष्यतांप्रापुः॥
अथकुंतीद्रौपदीचचिरेणापितान्‌अनागतान्विज्ञायश्वापदाकुलेभीषणेतत्रवनेबिभ्यत्यौशोकाकुलत्वाच्चिंतयांचक्रतुः॥अहोजगदेकवीराणां
पांडवानांकिंचित्कष्टंआपतितं॥अन्यथापंचानांमध्यात्‌एकोपिअस्माकं॥आश्वासनायकथंनायाति॥इतिचिंत्यपुनःअत्रअरण्येरुदि
तेनकिंभवतिइतिधैर्यंकृत्वाकायोत्सर्गंविधाय॥नमस्कारमंत्रंगणयांचक्रतुः॥इत्थंतयोःपाषाणघटितमूर्त्योरिवनिःकंपयोःरात्रिप्रहरा
जग्मुः॥ततोद्वितीयदिनेसूर्योदयेजातेतेपंचापिपांडवाआकाशमार्गात्अवतीर्यकुंत्याःपादौप्रणेमुः॥कुंत्यपिकायोत्सर्गंपारयित्वाहर्षा
श्रुभिस्तदंगानिअभ्यषिंचत्॥ततःकश्चित्स्वर्णदंडधरःपुमान्कुंतींप्रणम्यपांडवानांसर्वव्यतिकरंकथयामास॥तथाहि॥शृणुमातःके
वलज्ञानोत्सवंकर्तुंगच्छतःश्रीसुधर्मेंद्रस्यविमानंअत्रभवत्योरुपरिआकाशेस्खलितं॥ततोविमानस्खलनकारणंज्ञातुं॥इंद्रेणअहंप्रेषि
तो॥अत्राऽऽगत्यभवद्दृष्ट्वापुनस्तत्रगत्वामयाइंद्राग्रेयथादृष्टंनिवेदितं॥इंद्रोपिअहोसतीद्वयस्यकिंचिन्नूनंमहत्कष्टंदृश्यते॥तेनममविमा

नंस्खलितं॥ इतिविचिंत्य॥ ततउपयोगंदत्वामांत्रनिइत्यादिशत्॥ भीमद्रौपदीवचनात्॥ अमीस्वर्णपद्मान्याहर्तुंसरसिप्रविष्टाः॥तस्य सरसःस्वा
मीशंखचूडनागःपंचापिपांडवान्॥नागपाशैर्बध्वाद्रौपदीमपिपातालंगतः॥तवतत्रकस्मापिबलंचलति॥नत्विमित्रं॥एतेद्वमहासन्यो॥कार्योत्सर्गंकृ
त्वास्थितेस्तः॥ तयोःशीलमाहात्म्यात्ममविमानंस्खलितं॥ अतःत्वंशंखचूडपार्श्वेगत्वा ममाज्ञांकथयित्वा॥ तान्मोचयित्वासत्योःसमीपं
आनयंयेनअस्माकंविमानंअग्रेचलति॥ इतिइंद्रस्यआदेशंप्राप्य॥ अहंपातालंगतः तत्रशंखचूडायइंद्रादेशंकथयित्वा॥ कथमेतेनिरप
राधाःपुरुषपुंगवानिःकारणंत्वयाविडंबिता इत्याद्याक्षेपवाक्यैःबहुधाउपालब्धवान्॥ शंखचूडोपिशक्रादेशंमस्तकेकृत्वा॥ इतिप्रा
ह॥ एतेतुमदीयसरोवरे॥ सरोरुहाणिगृह्णंतोमयाअज्ञानताबद्धाःसांप्रतंतुशक्रादेशंसिरसिकृत्वा॥ स्वराज्यप्रदानेन॥ एतान्स्वापराधंक्षाम
यामि॥ ततस्त्वदर्शनोत्कंठितान् तवपुत्रान्पातालराज्येनिःस्पृहान्वीक्ष्य॥ पुनःशंखचूडःप्राह॥ भोभोपांडवाःसंग्रामादौमहत्कष्टे॥ अहंस्मर
णमात्रादेवभवतांसान्निध्यंकरिष्यामि॥ ततःकार्येदंस्मरणीयः इत्युक्त्वाअर्जुनायदिव्यहारंनृपायरत्नमुकुटं॥ अन्यबंधुभ्योविद्याश्चदत्वाम
यासहअत्रप्रेषयामास॥ ततोमातर्हत्यंतवत्वत्सुतांविनिव्यंच॥ यस्याःईदृशामहासत्ताःपुत्रार्हशीचमहासती वधूः॥ आ..........
क्षपातंवहति॥ इत्यादिप्रशंसांकृत्वाकुंत्याःसत्कारवाक्यमुदितोदेवःशक्रसमीपंययौ॥ कुंतीचकरतलेनपुत्रांगानिसंस्पृश्यपरसंहर्षभाप्य

पांडवाअपिमातुर्वधूश्चशोकंनिवार्यसुखेनतस्थुः॥ देवात्क्षीणश्रियोपीऊंचंदनइवपांडवाःयशःपरिमलोद्गारैर्वासयांचक्रिरेजगत्॥१॥
॥ ॥इतिश्रीमत्तुंगसमहाकाव्यांतर्गत श्रीरत्नचन्द्रमहात्म्योल्लेखपंडितश्रीहंसरत्नविरचिते पांडवद्रुतक्रीडावनवासादिवर्ण-
नोनामएकादशाधिकारः॥ ॥११॥ ॥श्रीमान्नेमिजिनःपातुनिःसीमबलशेवधिः॥येनैकेनरथस्थेनरक्षितायदवोखिलाः
॥१॥ अथशृणुसोधर्माधिप॥अग्रेतनंपांडवानांअधिकारं॥तथाहि॥ अथतेपांडवास्तत्रषड्वर्षाणिअतिक्रम्य॥पुनर्द्वैतवनंजग्मुःइत
श्चदुर्योधनोपितान्तत्रागतान्ज्ञात्वा॥ वेगात्सैन्यंलात्वाद्वैतसरस्तीरेसेनानिवेशंचकार॥ तत्रचित्रांगदविद्याधरेणनिजविद्याधरमुखेन
वार्यमाणोपिदुर्योधनोगर्वात्स्वसेनाभिःतत्सरोवरंगाहतेस्म॥ ततःक्रुद्धःसविद्याधरोदुर्योधनंसबांधवं॥ अपहृतवान्॥ ततस्तत्सैन्येम
हान्कोलाहलःसमुच्छलितः॥ अथदुर्योधनस्यअंतःपुरस्त्रियोऽनन्यगतिकाक्रंदंत्योयुधिष्ठिरस्यसमीपेगत्वापतिभिक्षांयाचयामासुः
हेज्येष्ठयद्यपिधृतराष्ट्रपुत्रैर्युष्मासुमहान्अपराधःकृतः॥ तथापित्वंधर्मस्यनुगरिष्ठोसि॥ तेषांलघुबांधवानांअपराधंअविचिंत्यअ
स्मासुचअबलासुदयांविधायअस्माकंपतिंमोचय॥ इत्यादितद्वचनैःसंजातकरुणोयुधिष्ठिरोऽर्जुनंप्रतितस्यमोचनार्थंसमादिश
त्॥ अथार्जुनोपिसिंहनादैर्दिशोमुखरयन्तंविद्याधरंसंग्रामायप्रत्याकारयत्॥ ततोविद्याधरःकोपारुणोभूत्वापश्चाद्वलित्वाउ

त्र रदिवोमेघइववाणधाराभिर्ववर्षतिस्म॥ अर्जुनोपिलोहनाराचैस्तं प्रतिवर्षन्॥ क्षणेनतस्यसर्वगर्वनिवारयामास॥ ततः सखेचरोस्तव
त्रोव्याकुलःसैन्यसहितःसमेत्यअर्जुनंनत्वादुर्योधनंअमुचत्॥ अथाऽर्जुनः प्राह॥ भोमहाभागज्येष्ठाज्ञयाप्रतिबद्धेनमया॥ भवतासह
एतत्आचरितं॥ ततोदुर्योधनेनसहत्वंतत्राऽगत्यधर्मसूनवेसर्वकथयित्वामांसत्यमतिशंकुरुइतिवचनात्तुष्टःसोपिअर्जुनंपुरस्कृ
त्य सर्वद्याविमानमारुह्य॥ युधिष्ठिरसमीपंआययौ॥ तत्रयुधिष्ठिरंवीक्ष्यदुर्योधनःशिरःशूलेनपीडितइव॥ सशल्यइव लोहकीलकैः
कीलितइवतस्थौ भूत्र॥ अथअर्जुनेनविद्याधरैश्चप्रणतचरणोधर्मसूनुःस्नेहदृष्ट्यापुनःपुनःसुयोधनमुखंअपश्यत्॥ ततस्तेविद्या
धरादुर्योधनंप्रतिप्राहुः॥ भोदुर्विनीतयत्त्वबन्धुत्वाज्ज्येष्ठश्च॥ यश्चत्वयाकृतान्अनेकापराधान्सोढवान्॥ येनचसांप्रतमेवजीवितदा
नंदत्तं द्रेमूढतमःपिकथंननमसीतिलज्जयित्वा॥ बलात्तंनामयामासुः॥ ततोधर्मसूनुस्तंप्रणमंतंसमालिंग्यस्नेहवाक्यैःकुशलंपृ
च्छतिस्म॥ ततोदुर्योधनःप्राह॥ राज्यभ्रंशोवैरीपीडा॥ नमेत्रीडाकृतेनतथायथात्वयिप्रणामोयं बाधतेमांसुदुस्सहः॥ इतिश्रुत्वापिनिःको
पोधर्मसुतस्तं॥ आश्वास्यनिजावासंप्रतिप्रेषयामास॥ अथगांगेयविदुरप्रमुखाःसुयोधनंप्रबोधयामासुः॥ रेरेआकविरत्वअधुनात्वय
अर्जुनस्यबलंदृष्टं॥ अथापियदिकुलस्यकुशलंवांछसि तर्हिपांडवैःसहसंधानंकुरु॥ इतितैर्बहुशिक्षापितस्य त्रिदोषरोगिणःऔष

धमिवप्रकोपायैव॥ अभवत्॥ इतश्चदुर्योधनस्यभगिन्यादुःशल्यायाः पतिर्जयद्रथोराजामार्गेगच्छन्॥ कुंत्याजामाताइतिकृत्वाभोजनार्थंनिमंत्रितः त
तोर्जुनोदिव्यशाल्यानानारसवतीभिर्भोजयामास॥ ततोजयद्रथोद्रौपदींवीक्ष्य॥ जातानुरागस्छलंप्राप्य॥ बलाद्द्रौपदींरथेआरोप्यपलायितः तत
स्तस्याःपृष्ठेधावमानौभीमार्जुनौप्रतिकुंतीप्राह॥ वत्सौयुवाभ्यांममजामाताकृतापराधोपि॥ अयंनहंतव्यइति॥ ततोऽर्जुनःशरवृष्टिभिस्तस्यसैनं
दशोदिशिअनाशयत्॥ भीमोपिगदाघातैर्गजरथादीनिमृत्तिकाभांडानीवचूर्णयामास॥ ततोर्जुनोर्द्धचंद्रबाणैर्जयद्रथस्यध्वजंछत्रंकूर्चंचछेदयति
स्म॥ परंमातुर्वचनंस्मरन्॥ नमारयामास॥ ततोभीमाऽर्जुनौबलान्तस्यकाशान्॥ द्रौपदींगृहीत्वाकुंत्याःपादौप्रणेमतुः॥ मातापिआशिर्वचनपूर्वकं
तयोःपृष्ठेहस्तंददौ॥ अत्रांतरेनारदऋषिर्गगनात्अवतीर्य॥ तैर्वदितस्तत्रएकांतेउपविश्यइतिप्राह॥ भोभोपांडवादुर्योधनोयुष्माभिर्मोचि
तोनिजगृहमागतःसन् ततःप्रभृतिदुष्टोसौभवतांमारणार्थंउपायान्चिंतयन्असिपराक्रमेणमारयितुं॥ अशक्तोसौछलेनापियुष्माकंघातवां
छन् राज्ञोपुरमध्येइतिउद्घोषणानित्यंकारयति॥ यःकोपिपराक्रमी॥ बलेनवाछलेनवापिपांडवान्मारयति॥ अहंतस्मराज्यार्द्धंददामीतिश्रुत्वा
पुरोचनःपुरोहितपुत्रःपितृवैरंस्मृत्वादुर्योधनंप्रति आगत्यप्राह॥ राजन्अत्रकार्येचिंतानकार्या॥ ममपार्श्वेकृत्यानाम्नीविद्यास्तितस्याप्रभावात्॥ अ
हं त्रैलोक्यमपिक्षोभयामीतिश्रुत्वाहर्षितोदुर्योधनोवस्त्रालंकारादिभिस्तंतोषयामास॥ ततःप्रभृतिसोधमोविद्यांसाधयन् अभियदावसासि

दिंप्राप्स्यति॥तत्रापि भुवनेपि अलंघ्याभविष्यति॥ततोऽप्रतएवकंचित्प्रतीकारंविचारयत॥मयानुसाधर्मिकस्नेहान्वेगेनभवतांज्ञापितं॥ततोयुधि
ष्ठिरःसाधुप्रोक्तंभवतांइत्युक्त्वानारदंविसृज्य॥सकुटुंबेनतत्प्रतीकारंचिंतयामास॥ततस्तैःसर्वैरपितपएवसर्वदुःखोन्मूलनंइतिनिश्चित्य॥एकपादाव
स्पृष्टभूतलाःसूर्यबिंबस्थापितलोचनाःपरमेष्ठिस्मरणैकाग्राःकायोत्सर्गंकृत्वातस्थुः॥एवंतेषुक्षुत्तृषाशीततापदंशमशकादिपरीषहान्सहमा
नादृढधैर्याःसप्तदिनानिव्यतिचक्रमुः॥अथाष्टमदिनेसर्वदिशांमुखान्॥पर्वतान्चालयन्गिरिशृंगाणिकर्कराणिवउड्डापयन्॥महावातःप्रादु
रासीत्॥यथायथामहावातोवाति॥तथातथातेषांध्यानदीपोनिश्चलतांययौ॥इतश्चगजाश्वरथशब्दैःपर्वतानपिविदारयन्चतुरंगसैन्यंसर्वदिग्भ्यः
प्रकटीबभूव॥ततःक्षणात्कायोत्सर्गस्थितेकुंतींद्रौपद्यौकश्चित्अश्वस्कंधेसमारोप्यकटकमध्येययौ॥ततस्तेनकशाघातैस्ताड्यमानायाःकुंत्या
द्रौपद्याश्चहावत्साहास्वामिनःहाशूरावत्साःआवयोरक्षार्थंधावत॥इत्यादिकरुणवचनानिश्रुत्वाअतिदुःखात्॥शिथिलितध्यानास्तेशस्त्राणिगृही
त्वासिंहनादैर्गर्जंतःप्रधावंतिस्म॥ततोऽर्जुनोऽपारैःशरोत्करैर्गगनंछादयद्भिःतत्सैन्यंपंजरमध्यगतपक्षिवच्चकार॥धर्मपुत्रोपिसमुद्यतकरवा
लःप्रोद्धतफणाटोपधरःशेषनागइवशुशुभे॥भीमोपिगदामुशलेनवैरिकणान्चूर्णयांचकार॥नकुलसहदेवावपिशरधारावर्षतोदुर्दर्शौअभूतां
इत्येवंतेषांपौरुषबलात्चतुरंगमपिनष्टंसहसाअलक्ष्यतांप्राप्य॥अथइंद्रजालवत्॥तस्मिन्सैन्येनष्टेयुधिष्ठिरादयस्तेपंचापितृषातुराः॥इ

स्ततोजलंगवेषयंतःपुरतएकंस्वच्छशीतलजलापूर्णं॥सरोवरंपश्यंतिस्म॥तत्रतेतृषातुराःसंतःआकंठंपयःपपुः॥तज्जलपानान्मूर्छितास्तेपंचापिभू
तलेनिश्चेष्टाःपतिताः॥अत्रांतरेकुतश्चिद्भ्रमंतीद्रौपदीतत्रायातास्वपतीन्मूर्छितान्वीक्ष्यदुःखार्दिताविलपितुंलग्ना॥इतोकस्मात्भल्लीसमूहैर्वेष्टि
तकेशपाशावल्कलपरिधानाकाचित्स्त्रीतत्रागतायावत्तांप्रतिद्रौपदीकिंचिद्वक्तितावत्पुरतोधूमघटाइवकृष्णवर्णाभस्मदेहादावानलज्वालामाला
करालान्केशान्बिभ्रतीज्वलदुल्मुकाकारलोचनारुंडमालाभरणाकपालकर्त्रिकाहस्ता॥आर्द्रचर्मपरिधानाराक्षसीरूपाकृत्याप्रकटीबभूव॥त
तःसाजिह्वांलोलयंतीकर्त्रिकांनर्तयंतीदंतान्पीषयंती॥मूर्छितान्पांडवान्परितोबभ्राम॥तस्यादर्शनात्कंपमानाद्रौपदीभिल्लनायिकांअंतराले
कृत्वाअतिष्ठत्॥अथसाभिल्लीकृत्यांप्रतिप्राह॥देविअमीवराकाःपांडवाःतवागमनवार्तयैवमूर्छांप्राप्ताः॥मृताश्चैतेलोकेसकोपिबलवानास्ति॥
यस्तवक्रोधंसहतिइति॥ततएतेषांमृतानांमारणेनकश्चित्बलोत्कर्षःसंपद्यते॥इत्यादियुक्तिभिस्तया॥प्रसादिताकृत्यानिजात्मानंकृतकृत्यंमन्य
मानाहसित्वाकापिययौ॥ततोद्रौपदीतान्मृतान्विज्ञाय॥मूर्छांप्राप्ता॥पुनःसचेतनीभूताविलापान्चकार॥ततःसाभिल्लीतस्याअश्रूणिमार्जयित्वा
वत्सेमारुद॥एतेमाययामूर्छिताःसंति॥ततोमणिकाञ्चनपात्रजलेनएतान्आछोटय॥येनचेतनांलभंते॥इतितस्याआश्वासनवाक्यैर्हृष्टाद्रौ
पदीसमीपस्थितनदीजलेनअभिषिच्यतान्॥सचेतनान्चकार॥अथतेपांडवाःसुप्तोत्थिताइवभ्रांतमानसाश्चिंतयामासुः॥अहोअत्रअसंभव

291|1962

सैन्यैः परिवृतः कोनृपः आगतः केनचकुद्रोपघोअपहृते॥ कथंचद्रौपदी स्वयमेवअत्रायाता॥ किंचैतद्दिव्यांबुमयंसरः काचइयंभिल्ली तत्कि
मिदं इंद्रजालंवास्वप्नोवादेवचरितंवा॥ इत्यादिचिंतयतांतेषां॥ तेनोभिर्दिशोऽद्योतयन्॥ कश्चिद्देवः पुरोभूत्वाइतिप्राह॥ हे धर्मसूनो किंविस्मयंप्राप्ति
॥एतत्सर्वंमयैवकृत्यावंचनार्थंमायाजालंरचितं॥ अहंतुशक्रस्यपदात्यनीकपतिर्हरिनैगमेषीसुरः युष्माकंध्यानबलात्तुष्टोमायांकृत्वा॥ कृत्यांअ
वंचयंपुनरपिविषमकार्येहं स्मर्त्तव्यः सान्निध्यंकरिष्यामीत्युक्त्वा॥ दिव्याभरणानिदत्वा॥ पुनः स्वर्गंजगाम॥ अथपांडवाः पुण्यबलेनविगतविघ्ना
ः प्रवृद्धकांतयोविशेषाद्धर्मपरायणाबभूवुः॥ अन्यदामध्याह्नि॥ भोजनावसरे कश्चिन्मा॥ सोऽपवासीमुनिः पारणार्थं आगतः॥ तंदृष्ट्वापांडवाः प्रमुदि
ताः सकुटुंबेनतंसाधुंवंदित्वाशुद्धान्नपानादिभिः प्रतिलाभयंतिस्म॥ ततोदेवदुंदुभिध्वनिः॥१॥ सुवर्णवृष्टिः॥२॥ चेलोत्क्षेपः॥३॥ सुगंधोदकवृष्टिः॥४
॥जयजयेतिउद्घोषणा॥५॥ इतिपंचदिव्यानिबभूवुः॥ ततः शासनदेवताइतिअवदत्॥ भोवत्सायुष्माभिर्द्वादशाब्दानिअतिदुःसहानिअति
तानि॥ इदानींत्रयोदशंवर्षंवेषपरावर्तंकृत्वा॥ मत्स्यदेशेतिष्ठंतु॥ इत्युक्त्वाअंतर्दधेततस्तेपांडवाः अन्योन्यंविचारंचक्रुः॥ तत्रयुधिष्ठिरः प्राह॥
अहंतुविराटराजस्यगृहेकंकनामाद्विजोभूत्वास्थास्यामि॥ ततोभीमः प्राह॥ अहंवल्लवनामासूदोभूत्वा॥ तत्रस्थास्ये॥ अर्जुनस्तुबृहन्नटा
नृत्याचार्यः ... षिश्चाहंस्थास्यामिति॥ ग्रंथिज्ञाततवान्नकुलस्तुअहंगाधिकोनामअश्वपालोभूत्वास्थास्यामि॥ सहदेवश्चगोविंदाख्योगोप

भविष्यामीति॥ ततोद्रौपदीप्राह॥ अहंतुराजपत्न्याः सुदेष्णायाः पार्श्ववर्तिनीसैरंध्रीभूत्वास्थास्यामीति॥ सर्वेपिस्वस्वकार्यंअंगीचक्रुः॥ ततोनिजंनि
जंवेषंधारयित्वा॥ विराटस्यदेशंप्राप्य॥ तत्रकेनापिअलक्षिताः पुरपरिसरमागत्यशमीवृक्षस्यकोटरे॥ शस्त्राणिमुक्त्वापुरप्रवेशंचक्रुः॥ क्रमे
णपृथक्पृथक्नृपद्वारेगताः राज्ञापिसबहुमानंस्वस्वकार्येस्थापिताः॥ सुखेनतत्रतस्थुः॥ तेसर्वेपिप्रतिदिनंप्रभातेसमुत्थाय॥ कापिगृहेगुप्तवृत्त्या
स्थितांकुंतीमातरंप्रणमंतिस्म॥ अन्यदामल्लयुद्धेजायमानेभीमोतुलपराक्रमत्वात्॥ मल्लान्जितवान्॥ ततस्तुष्टोराजाभीमंविशेषात्सत्कारया
मास॥ अथतत्रराज्ञः श्यालकाः सुदेष्णायाभ्रातरः षडुत्तरंशतंअभूवन्॥ तेषुचकीचकोमुख्योभूत्॥ सचकदाचित्सुदेष्णायाआवासे॥ द्रौपदीं
अद्भुतरूपलावण्यांवीक्ष्यमोहितमतिः कामबाणपीडितः॥ कुत्रापिरतिंनप्राप्यसोन्यदाविषयोक्तिभिर्द्रौपदीं प्रार्थयत्॥ तयाधिक्कृतोविलक्षो
भूत्॥ ततः सोत्यंतकामार्तिव्याकुलतया॥ सुदेष्णायैनिजंअभिप्रायंकथयामास॥ सापिबंधुस्नेहात्॥ तंदुःसाध्यव्याधिपीडितंज्ञात्वा॥ अवोचत्
अहंएतामिषांतरेणतवगृहंप्रेषयिष्यामि॥ ततस्त्वयाचिंतितंकर्त्तव्यं॥ तथाइतिआश्वासितोसौगृहेगतोपिनिःश्वासान्मुंचन्तस्थौ॥ अन्य
दासुदेष्णाद्रौपदीबलात्॥ कीचकगृहेप्रेषयामास॥ सातुबिभ्यती भूत्यस्तलोचना॥ यावत्तेनआगच्छंतीदृष्टातावत्कृतसंकेतइवसमुत्थाय
हिलद्दिश्गलोचविरोत्कंठितं॥ मांआलिंगनदानेनसमाश्वासय॥ इत्येवंकर्णशल्यरूपं॥ तद्वचःश्रुत्वाकोपात्द्रौपदीप्राह॥ रे तेकथमेवंदु
301/1962

र्वाक्यंवदसि॥महापराक्रमामेपंचभर्त्तारोगुप्ताःसंति॥तेवेगात्त्वांयमगृहंप्रापयिष्यंति ततएतादृशींकुबुद्धिंत्यजेति श्रुत्वासोदुर्मतिःक्रोधात्द्रौपदींके
शेषुगृहीत्वा॥पादाभिघातैस्ताडयामास॥ततःसाचांडालहस्तात्छागीइवकथंचिन्मुक्ता॥धूलिलिप्तगात्राविराटसभांजगाम॥तत्रमुक्तकेशाविल
पंतीगुप्तनामाक्षरान्पंचापिपतीन्बोधयामास॥तथाहि॥यस्थिरायुधिदभीमानयांकायेथदोर्मृतःसद्भिस्तैरध्यदंराजन्कीचकेनकदर्थिता॥श्रु
त्वाकंकरूपोयुधिष्ठिरःसूपेवक्रोधंकृत्वाप्राह॥अरेयदितेपतयोगुप्ताःसंतितर्हिगवेषणंकुरुयदितेषुकोपिभीमोस्ति॥तदासतवदुःखंनिवारयि
ष्यतिसांप्रतंदूतोयाहि॥अस्माकंपाशकक्रीडायांअंतरायंमाकुरु॥इत्युक्तासायया॥रात्रौतंवृत्तांतंभीमंप्रतिकथयामास॥भीमोपितांप्रत्याश्वास्यउपायं
प्राह॥प्रियेअयंकीचकस्त्वयाकूटवचनैर्लोभयित्वासंकेतकरणमिषेणअद्यरात्रौ॥रंगमंडपेप्रेषणीयः॥तत्राहंतंहनिष्यामीतिभीमेनआश्वासिता
साद्रौपदी॥मार्गेमिलितंकीचकंकूटस्नेहवाक्यैर्लोभयित्वारंगमंडपेरात्रौआगंतव्यं॥इतिसंकेतंचकार सचहर्षितोरात्रेःप्रथमयामेअंधकारावृते॥
तत्रमंडपेगत्वाप्रियेकासिकासीत्युच्चरन्॥तत्रपूर्वागतेनस्त्रीवेषेणभीमेनगृहीत्वाव्यापादितःतथैवतंक्षिप्त्वा॥केनापिअलक्षितोभीमःपुनःस्व
स्थानंप्राप्तः॥ततःप्रभातेतद्भ्रातरःकीचकंमृतंवीक्ष्यशोकातुरास्तस्यशवंशिबिकायांप्रक्षिप्य॥दाहसंस्कारार्थंगच्छंतोमार्गेद्रौपदींप्रसन्नव
दनांदृष्ट्वा॥अस्याएवनिमित्तंअस्माकंभ्रातामृतइतिक्रोधात्द्रौपदींकेशेषुगृहीत्वा॥चिताग्नौक्षेप्तुंउत्सुकाआकर्षयांचक्रुः॥ततोद्रौपदी

रुदतीमनसास्वभर्तॄन्स्मरंतीयावत्॥तैश्चितासमीपंनीता॥तावन्महाबलोभीमःकुतोपिअकस्मादागत्यसर्वान्कीचकबंधून्समकालंसमावर्ज्यचि
ताग्नौअक्षिपत्तान्कुट्टयित्वा॥अग्नौप्रज्वाल्यद्रौपदींनिर्भयांकृत्वाभीमःपुनर्महानसंप्राप्य॥ततोभ्रातृवधदुःखिनांभीमक्रोधातुरांसुदेष्णांप्र
तिविराटराजःसमाश्वास्यइतिप्राह॥देविकियत्कालंप्रतीक्षध्वं॥यतोयंवल्लवोतुल्यपराक्रमःकुपितःसर्वमपिसैन्यंतृणायक्षपयति॥ततोना
यंमारयितुंशक्यः॥ततःकियद्दिनांतरेएतंपुरान्निःकासयिष्यामः॥अस्याःसैरंध्र्याअपिपतयःसमागमिष्यंति॥तदाएषापतिभिःसहयास्य
ति॥तावंतिदिनानित्वयाक्षमितव्यंइत्यादिवचनैःसुदेष्णापुनःसुस्थिताभवत्॥इतश्चदुर्योधनप्रेषिताहेरिकादेशान्भ्रमंतःकुत्रापिपांडवानां
शुद्धिंअप्राप्य॥पुनर्हस्तिनागपुरमागत्यदुर्योधनंप्राहुः॥राजन्अस्माभिःअनेकेदेशावलोकिताः॥परंतवभीत्याअलक्षीभूताःपांडवास्तुकुत्रापि
नप्राप्ताः॥तेतुसमुद्रेकच्छपाइवकुत्रापिनिलीयस्थिताःसंति॥इतिश्रुत्वादुर्योधनोविदुरमुखाभिमुखंव्यलोकयत्॥ततस्तस्याभिप्रायंज्ञात्वागांगे
यःप्राह॥यत्रदेशेरोगदुर्भिक्षदौःस्थ्यादिदुःखंनभवति॥तत्रदेशेपांडवान्विजानीहीतिश्रुत्वा॥तेहेरिकाःप्राहुः॥स्वामिन्सांप्रतंमत्स्यदेशेनदु
र्भिक्षंनरोगानचईतयोदृश्यंते॥किंचधनधान्यादिसमृद्धिमंतोजानपदावर्त्तंते॥अथदुर्योधनःप्राह॥यदिपांडवास्तत्रभविष्यंति॥तथापितेगुप्त
वृत्याचरंतोस्माभिःकथंज्ञायंते॥ततस्त्रिगर्त्तदेशाधिपतिःसुशर्मानृपःप्राह॥निश्चितंपांडवामत्स्यदेशेभविष्यंति॥ततोवयं॥तत्रगत्वागोकुलं

303|1462

हरामहे॥ ततस्तस्मोद्धुं अशक्तास्ते॥ अपूर्णकालेपिप्रकटीभवंति॥ एवंतुतावत् मत्स्यराजः अस्माकं वैरीवर्त्तते॥ तस्यनिग्रहोभवति॥ अन्यत्तुगोकु
लाहरणछलेन पांडवान्प्रकटीकृत्यहनिष्याम॥ इतिसुशर्मोक्तिं श्रुत्वा॥ दुष्टोदुर्मतिर्दुर्योधनोभीष्मद्रोणकर्णादिवृतोबहुसैन्ययुतोपशकुनै
र्वार्यमाणोपि॥ अमर्षप्रेरितोविराटदेशंप्राप्य॥ अथसुशर्मनृपोर्ईसैन्यपरिवृतोविराटपुरस्यदक्षिणदिशिस्थितं गोकुलंवालयामास॥ ततोगो
पानांपुत्कारं श्रुत्वा॥ विराटनृपतिः संजातकोपः सन्॥ सूर्यशंखमदिराश्वप्रमुखैः पुत्रैः सामंतादिभिर्वृतश्चतुरंगसैन्यसहितोधावत॥ ततः प्र
वृत्तोन्योन्यंसंग्रामः॥ क्षणाच्चबलोत्कटेनविराटबलेनसुशर्मणः सैन्यंनिर्मथितं घातिताः॥ सहस्रशस्तैनिकाः तदवसरेसूर्योपि अस्तंगतः॥
अथस्वसैन्यवधेनक्रुद्धः सुशर्मराजः॥ पुनः स्वसैन्यंस्थिरीकृत्यस्वयंशस्त्रवृष्टिंकुर्वन् मत्स्यराजंमेनांगादयामास॥ क्षणाच्चतस्यशस्त्राभिघातैर्वि
रलीभूतेसर्वसैन्येएकएव मत्स्यराजोरणांगणे अतिष्ठत्॥ ततः सुशर्माप्रवृद्धोत्साहोनिरंतरास्त्रवृष्टिभिर्व्याकुलीकृत्यैकं मत्स्यराजंमत्स्यमिवबधार
घेप्रक्षिप्यप्रचलितः॥ ततोयुधिष्ठिरभीमनकुलसहदेवाश्चत्वारोपिबांधवाविराटराजंकष्टपतितं वीक्ष्यमनसितदुपकारंस्मरंतः शमीवृक्षात्स्वस्वा
युधानिगृहीत्वाप्रलयकालीनमेघाइव अस्त्रधाराभिस्त्रिगर्त्तेशसैनांउपद्रवंतिस्म॥ ततोभीमः क्षणाद्विराटराजंमोचयित्वासुशर्माणंबध्वापुनर्दत्त
गृहीततृणंजीवंतंमुक्त्वाकयक्रीतंदासमिवाकरोत्॥ अथविराटराजस्तद्गुणचमत्कृतचित्तोगोकुलंवालयित्वा॥ तस्यांरात्रौतत्रैवतस्थौ॥ अथप्रभा

ते दुर्योधनोविराटपुरस्योत्तरदिक्स्थितं॥ गोकुलंवालयामास॥ ततोगोपालैनराजद्वारेआगत्यपुत्कारः कृतः॥ ततोंतःपुरस्थउत्तरकुमारस्तत् श्रुत्वा॥ अंतः
पुरपुरंध्रीणांपुरतः स्वबलस्फोरयन् इतिप्राह॥ अहमेकोपिकुरूणांसैन्यंसमुन्मूलयामि॥ परंकिंकुर्वेतथाविधःसारथिर्नास्तिसारथिविनाविचा
र्यस्थितोस्मीतितस्यमिथ्याहंकारं असहमानाद्रौपदीप्राह॥ अहोकुमार॥ यस्तवभगिनींउत्तराभिधांनृत्यकलांशिक्षयति॥ सबृहन्नडनामाक्लीबो
पिसारथित्वेनिपुणोस्तीतितद्वचनात्॥ कुमारोपितंक्लीबंयंत्याजयित्वाकवचादिधारयित्वासारथित्वेनिवेश्यचचाल॥ ततोर्जुनेनवाहितोरथः पवन
वेगेनकुरूणांकौरवसेनांप्राप॥ अथतत्रभीष्मद्रोणकृपाचार्यकर्णादिभिर्दुर्दांतैर्बलोत्कटंतद्बलंदृष्ट्वा॥ जातोत्कंपभयार्त्तउत्तरकुमारोर्जुनंप्रतिप्रा
ह॥ अहोबृहन्नडगजाश्वरथसंकुलं॥ अनेकशस्त्रौघैर्दुरिताकाशंसमुद्रमिवदुरुल्लंघ्य॥ मेतद्बलंविलोकयितुं॥ नाहंसमर्थोस्मि॥ ततोहसित्वार्जुनः
प्राह॥ कुमारकिमेवंक्षत्रियकुलोत्पन्नोपिकातरोभवसि॥ मातृभगिनीभ्रातृजायादीनांअग्रेपूर्वंस्वपराक्रमंघोषयित्वा॥ इदानीएवंवदन् कुलंलज्जयस्य
सि॥ क्षत्रियाणांहिरणांगणरसिकानांसंग्रामेजीवतांराज्यलाभः स्यात्॥ मृतानांचकीर्त्तिलाभःस्यादिति॥ उभयथापिनास्तिकाचित्हानिरिति॥ त
तोसौजीवितनाशेनयत्कीर्त्तिलाभरूपंफलंभवति॥ तेनफलेननास्तिमेकार्यं॥ इत्युदीर्य॥ यावदयात् झंपांदत्वानश्यति॥ तावदर्जुनोपि॥ तत्पृष्टे
झंपांदत्वातंहस्तेगृहीत्वाप्राह॥ भोकुमारधीरोभव॥ अहंअर्जुनोस्मि॥ त्वंममसारथिर्भव॥ अहमेवशत्रून्निर्जित्यतवैवयशः प्रकटयिष्यामीतितंसमा

305/1962

थान्य॥शमीवृक्षात्वनिजशस्त्राणिसमानीयधृतायुधःस्वयंरथमध्येउपविष्टः उत्तरकुमारःसारथिर्जातः॥ ततोगांगेयोरथारूढंसंमुखमागछंतंअर्जु
नं उपलक्ष्यदुर्योधनंप्रतिप्राह॥नूनंएषस्त्रीवेषधारकोऽर्जुनःसमभ्येति॥अयायंप्राप्तावसरः॥सर्वथात्वांदनिष्यति॥ततोद्यापित्वमनेनसहसंधानंकु
रु॥एवंचेन्नकरोषितदासबांधवस्त्वंनिजप्राणंरक्षणार्थंइतोयादि यतंअंतरालेस्थिताःस्मइतिश्रुत्वा भीतःपितामहवाक्यंप्रमाणमितिकृत्वाकिय
त्सैन्यंलात्वागोधनंपुरस्कृत्यचचाल॥अथाऽर्जुनस्तंपलायमानंदृष्ट्वा॥वेगादथंवाहयित्वा॥शत्रुसेनायांआपत्य॥शंखनादंचकार॥तेनशंखनादेन
मोहितागावःसमस्ताअपिवत्सान्पुछानिऊर्ध्वीकृत्य॥स्वपुरंप्रतिवलंतिस्म॥ततःसुयोधनंप्रतिअर्जुनःप्राह॥रेरेनिःसत्वयातातवृगवाहरणेनकुरु
णावंशःकलंकितः अधुनानुवैरिणिप्राप्तेपलायस्वन्विशेषतःपूर्वजान्किंलज्जयसि॥ततस्त्रिष्टधनुःसंधेहिइतिश्रुत्वालज्जितोदुर्योधनोधनुरारोपया
मास॥ततःपार्थःस्वशरोत्करैःक्षणात्तत्सैन्यंवारयामास॥ततोभटकोटीनांक्षयंमत्वादयापरःपार्थःसंमोहनास्त्रंमुमोच॥तत्प्रभावात्तासेनाएकंगां
गेयंविनासर्वापिमूर्छितांइवसुनाइवनिश्चेष्टाइवबभूव॥इत्येवंतेषुदुर्योधनादिषुनिद्रांप्राप्तेषु॥ततः उत्तरकुमारोऽर्जुनवसात्तथावस्थानांदुर्योध
नकर्णादीनांवस्त्राणिअहरत्॥ततोभीष्मेबाणवृष्टिकुर्वति॥अर्जुनस्तस्यरथहयान्जघान॥ततोऽर्जुनेनसंमोहनास्त्रेपश्चाहृतेदुर्योधनादि
सैन्याःपलायनंचकुः॥अर्जुनोपित्रितंकाशीमन्॥पुरंप्राप्य॥अथविराटराजोगृहमागतःसन् उत्तरकुमारःशत्रुंपृष्टगामिनंज्ञात्वाखेदंप्रा ॥पाव

तस्यपृष्टतोगमनार्थंसेनांसज्जयति॥तावत्सेवककआगत्य॥कुमारस्यजयोजातः॥इतिवर्धापनिकादत्ता॥तत्श्रुत्वाहर्षितोराजानगरेमहोत्सवंअकारयत्
स्वयंचकंकेनपाशकखेलनंकुर्वन्॥पुनःपुनःकुमारप्रशंसांचकार॥ततःकंकःप्राह॥राजन्यस्यबृहन्नडःसारथिस्तस्यजयप्राप्तौकःसंदेहः॥इतिश्रु
त्वाराजामौनपरःस्थितः॥इतोरथादुत्तीर्य॥अर्जुनेस्वस्थानंगतेसतिउत्तरकुमारः॥सभायांनिविष्टंनृपंप्रणम्यप्राह॥स्वामि-न्नयापरस्यसानिध्यात्जयः
प्राप्तःसपुमानइतस्तृतीयदिवसेवंधुसहितःस्वयंप्रकटीभविष्यतीति॥ततस्तृतीयदिवसेयुधिष्ठिरःकृतमंगलस्नानः॥शुचिवस्त्राभरणाद्यलंकृतां
गोभगवत्पूजांविधायक्षुद्रदेवताभ्योबलिदानंचकार॥परेपिचत्वारोबांधवाःस्वस्वशस्त्रायुधानिधारयंतोयुधिष्ठिरंप्रणमंतिस्म॥तत्ज्ञात्वाविराटराजो
धर्मपुत्रंसिंहासनेनिवेश्य॥स्वयंनत्वाकृतांजलिःप्राह॥स्वामिन्इदंराज्यंएषासर्वासंपत्॥तवैवमयात्युष्मान्अनुपलक्ष्य॥यत्युष्मासुअनुचितंकार्यं
दत्तं॥तत्क्षंतव्यं॥इत्यादिवदंतंविराटराजंयुधिष्ठिरःस्नेहवाक्यैःसमाश्वासयत्॥ततोविराटराजःस्वपुत्रीउत्तरांअर्जुनपुत्रायअभिमन्यवेददौ॥तदा
कारणायदूतःप्रेषितः॥ततःकृष्णोपिस्वभागिनेयंअभिमन्युंसहगृहीत्वा॥वेगात्तत्रागतः॥सुमुहूर्तेमहोत्सवपूर्वकंतयोर्विवाहःकृतः॥ततःकृष्णोवि
राटराजंअनुज्ञाप्यपितृष्वस्राकुंत्यासमंपांडवान्सपरिकरान्द्वारकायांसमानयत्॥तत्रअर्जुनवर्जंचत्वारोपिपांडवाश्चतस्रोयदुकन्याःपरिणयामा
सुः॥इतश्चरुक्मिणीस्वप्नेवृषभयुक्तविमानस्थितं॥आत्मानंदृष्ट्वाप्रबुद्धा॥तंस्वप्नंकृष्णायउक्तेकृष्णश्चतवउत्तमःपुत्रोभावीइतितत्श्रुत्वाकापि

दासी तं वृत्तांतं सत्यभामाग्रे अकथयत्॥ भामापि कृष्णाग्रे गत्वा मयापि रावणो दृष्ट इति कूटमेव प्राह॥ ततः कृष्णोपि आकारचेष्टया तत् कूटं ज्ञात्वा प्राह॥ त्व
मपि खेदं मा कुरु तवापि समये पुत्रलाभो भविष्यति॥ सत्यभामा प्राह॥ मम वाक्यं यदि कूटं मन्यसे॥ तदा यस्याः पुत्रः प्रथमं परिणेष्यति तस्याः अन्यया स्व
स्वककेशा दातव्याः॥ इत्येवं आवयोः प्रतिज्ञाने यूयमेव साक्षिणः प्रतिभुवश्च॥ इत्येवं ते सत्यभामारुक्मिण्यौ प्रतिज्ञाय॥ स्वस्वगृहं जग्मतुः॥ दैवात् द्वे अपि
गर्भं दधतुः॥ काले रुक्मिण्याः प्रद्युम्ननामा पुत्रोऽभूत्॥ सत्यभामायाश्च भानुकनामाभूत्॥ अथान्यदा पूर्ववैरवशात् धूमकेतुनामासुरो रुक्मिणीरूपेण
कृष्णोत्संगात् प्रद्युम्नं गृहीत्वा वैताढ्ये टंकशिलोपरि मुमोच॥ अत्रांतरे कालसंवराख्यो विद्याधरस्तं बालं सुरूपं लात्वा स्वपत्न्यै कनकमालायै अर्पयामास
तत्र तेनापि प्रद्युम्न इति नाम दत्वा॥ पुत्रत्वेन पाल्यमानः क्रमात् वृद्धिं प्राप्य॥ इतश्च पुत्रदुःखातुरं रुक्मिणीं नारदः श्रीसीमंधरमुखात् श्रुतेन पुत्रवृत्तांतेन सुस्थ
चकार॥ तथा हि रुक्मिण्या पूर्वं कौतुकात् मयूर्याः॥ अंडकानि कुंकुमेन लिप्तानि॥ ततो वर्णपरावर्तात् स्वांडकानि अनुपलक्षयंती॥ मयूरी दुःखिता जाता
पश्चाद्यथावस्थानि वीक्ष्य सुस्था जाता॥ तेन कर्मणा अधुना अस्याः पुत्रवियोगो जातः॥ षोडशवर्षांते पुनः पुत्रसंगमो भविष्यति इति अर्हद्वाक्यात् रु
क्मिण्यपि सुस्थाभूत्॥ इतश्च सर्वशास्त्रशस्त्रविद्यापारीणो महाबलः प्रद्युम्नो यौवनं प्राप्तः॥ अन्यदा सा रूपकामाकारं प्रद्युम्नं वीक्ष्य कनकमाला कामा
कुलामती॥ विषयवांछया तं प्रार्थयामास॥ तद्वचनेन मनस्याहत इव खेदं प्राप्य प्राह॥ मातर्भ्रातार्ता इव किमिदं पापकारि वचनं प्रलपसि अहं तव पु

त्रमाता इति॥ ततः सा प्राह नाहं तव माता त्वं तु कालसंवरेण क्वचित् आनीय मम अर्पितः ततो निःशंकं मया सह भोगान् भुंक्ष्व॥ इमे च गौरी प्र
ज्ञप्ती द्वे विद्ये गृहाण॥ अनयोः प्रभावात् सर्वत्रापि अपराजितो भविष्यसि इति श्रुत्वा तन्मुखात् ते विद्ये गृहीत्वा ससाधयामास॥ पुनस्तया प्रा
र्थितः स प्राह॥ पूर्वं त्वं मे माता इदानीं पुनर्विद्यादानात् गुरुः त्वं जाता॥ इत्युक्त्वा पुराद्बहिर्निर्ययौ॥ ततः कनकमाला कूटसती नखैरंगा
नि विलिख्य पूत्कारं अकरोत्॥ तत् श्रुत्वा तस्याः पुत्रा आगताः ते पृष्टे सा प्रद्युम्नेन उच्छंठता कृता इति अकथयत्॥ ततस्ते मातुः पराभवात्
क्रुद्धाः गृहीतायुधाः प्रद्युम्नपृष्ठे धाविताः॥ तेन ते विद्याबलात् हताः॥ ततः पुत्रमारणात् क्रुद्धः कालसंवरः स्वयं योद्धुं आगतः प्रद्युम्नस्त
मपि जित्वा कनकमालाया यथास्थितं वृत्तांतं अकथयत्॥ तदा च नारदस्तत्रागतः प्रद्युम्नेन सत्कारितः॥ तेन सीमंधरमुखात् श्रुतो वृत्तांतः
कथितः किंच त्वं रुक्मिणीकृष्णयोः पुत्रः सत्यभामाया भानुकः पुत्रः प्रथमं परिणेष्यति॥ तदा एवं मातुः स्वकेशदानस्य पणः कृतोऽस्ति त
तस्माद्वियोगेन केशदानदुःखेन च त्वयि पुत्रे सत्यपि तव माता मरिष्यति॥ इति श्रुत्वा नारदेन समं प्रज्ञप्तिकृतं विमानं आरुह्य वेगादसौ द्वा
रकां प्राप्य॥ तत्र बाह्योद्याने नारदं विमाने च मुक्त्वा सामान्यवेषधरो भानुकविवाहदर्शनार्थं पुरमध्ये ययौ॥ ततो मंडपात् भानुना परिणे
ष्यमाणां कन्यां अपहृत्य नारदपार्श्वे मुंचत्॥ ततश्च विद्याबलेन कृष्णस्य उद्यानं पुष्पफलरहितं चकार पुरस्य समंतात् जलाशयेभ्यो जल

309|962

नि॥ अशोषयत्॥ तृणान्यपि अपहार॥ ततः पुराद्बहिः तुरंगमं नर्तयन् तस्थौ॥ तं तुरंगमं मूल्येन गृहीतुमिच्छन्॥ भानुकोयावत् आरु
ह्यदूयति॥ तावत्तेन मायया पातितः सर्वलोकैर्दृश्यमानः पुरं ययौ॥ अथ प्रद्युम्नोपि द्विजरूपं कृत्वा॥ वेदं पठन् कृष्णांतःपुरे गतः॥ तत्र
सत्यभामायाः कुब्जिकां दासीं विद्याबलेन सुरूपां सरल देहां चकार॥ भामा तद्दृष्ट्वा तं द्विजं बहुमानयित्वा॥ मामपि रूपेण रुक्मि
ण्याः समधिकां कुरु इति प्रार्थयत् स प्राह॥ यदि एवं वांछसि तर्हि सांप्रतं मस्तकं मुंडयित्वा मषीकूर्चकेन मुखं मार्ज्जयित्वा॥ जीर्णवस्त्रा
णि परिधाय॥ कुलदेव्या अग्रे ॐ वडवड स्वाहा॥ इति मंत्रं स्मर इति तद्वचनं प्रमाणयित्वा॥ सा तथैव अकरोत्॥ सभामायाद्विजस्तु यथेच्छं भो
जनं प्रार्थयन् तस्या गृहे भोजनार्थं निविष्टः विद्याबलात् तस्या गृहे विवाहार्थं निष्पादितं पक्वान्नादिकं॥ तेन सर्वं निष्ठापितं॥ तथापि अतृ
प्तो सौ निर्भर्त्स्य दास्या गृहान्निःकासितः॥ ततः प्रद्युम्नो बालमुनिरूपं कृत्वा रुक्मिण्या गृहं गतः सा तु शोकार्ता स्थितास्ति परं तस्य दर्शनमा
त्रेणैव रुक्मिण्या अंगानि उच्छ्वसितानि सा वत्तस्य आसनार्पणाय रुक्मिणी उत्थिता॥ तावदसौ कृष्णस्य सिंहासने उपविष्टः॥ तत् दृष्ट्वा
रुक्मिण्या प्रोक्तं कृष्णं कृष्णपुत्रं वा मुक्त्वा अन्यः किंचिदपि अत्र सिंहासने स्थितं॥ एतदधिष्टायकादेवा न सहंते॥ ततः स प्राह॥ तपःप्रभा
वात् अस्मान् देवा न पराभवंति॥ अहं तु षोडशवर्षांतिअ पारणार्थं आगतोस्मि यदि आहारादि न दास्यसि तदाहं भामा

यास्यामि॥ ततः सानिःश्वस्य प्राह॥ मया तु चिंतापरत्वात्॥ अद्य किंचिदपि पाचितं नास्ति॥ ततस्तेन चिंताकारणे पृष्टे पुनः सा प्राह॥ मया पुत्रसंगमा
र्थं चिरं॥ प्रदानमाहमेन कुलदेवी आराधिता॥ तया च यदि नेमम पुत्रमेलापकः कथितः॥ अभिज्ञानार्थं तत्कथितं॥ सहकारोपि मंजरितः पुत्र
संगमस्तु अद्यापि न दृश्यते यदि ज्ञानं भवेत्॥ तदा त्वमेव कथय॥ ततः स प्राह रिक्तहस्तानां प्रश्नः सफलो न स्यात्॥ इति सा प्राह॥ तर्हि किं ददामि स प्रा
ह॥ मह्यं पेयां देहीति॥ ततो सावत्सा वेल्लोकयति॥ तावत्तेन पेयाद्रव्यं सर्वमपि विद्यया भस्मीकृतं वीक्ष्य सेद प्राप्ता॥ तथा विधानां वीक्ष्य पुनस्तेन
कृष्णस्य महामोदकाया चिताः सा प्राह॥ एते मोदकास्तु कृष्णं विना अन्येषां सु दुर्जरास्ततो हं तान् दत्वा कथं ऋषिहत्या करोमि इति॥ ततो मुनिः
प्राह॥ अस्माकं तपोबलात्॥ नास्ति किमपि दुर्जरं इति॥ ततः सा शंकितासती एकैकं मोदकं ददौ॥ तं मुनिः अनिशु धातुरमिव अप्रेमेव भुंजानं
वीक्ष्य विस्मिता॥ अहो महत् एतस्य तपोबलमित्य चिंतयत् इतश्च कुलदेव्यग्रे॥ मंत्रजापतत्परां भामां प्रति सेवकाः फलपुष्पजलतृणहरणादिवा
र्तां प्राहुः॥ अपरे सेवकाः कन्यापहारवार्तां भानुकस्य अश्वात्पतनादुपहास वार्तां च कथयामासुः॥ ततो भामा अतिखिन्ना अमर्षात् रुक्मि
ण्याः केशग्रहणार्थं दासीः प्रेषयामास॥ ततः समायाता धुस्ता सामिय केशैः पटलिकाः प्रपूरयित्वा भामासमीपे प्रतिस्म॥ ततो भामा निखिलाकृ
ष्णां प्रति भुवं प्रति रुक्मिणीकेशान् अयाचत॥ ततः तत्कथं ईदृशं रूपं जातं केन च केशा मुंडिता॥ इति वदन् कृष्णः ... सयामास॥

31 / 1962

अथकृष्णेनरुक्मिणींकेशवाचनार्थंबलभद्रःप्रहितः॥ तत्रप्रद्युम्नेनविद्याबलात्कृष्णरूपंप्रकटीकृतं॥ततोरुक्मिण्यःपार्श्वेकृष्णंदृष्ट्वा॥लज्जि
तोबलभद्रःपुनःसंभायामागत्यईर्ष्ययाकृष्णंप्रतिप्राह॥भ्रातस्त्वयारूपद्वयंकृत्वावधूर्वयंचलज्जांप्रापिता॥कृष्णस्तुशपथपूर्वकं॥अहंन
तत्रागतइतिप्राह॥ततोभामारुष्टासतीअरेमायिक॥तवैवइयंमाया॥इतिखिद्यंतीनिजगृहंययौ॥अथनारदोरुक्मिण्यागृहेआगत्य॥तवपुत्र
एवअयमितिप्रद्युम्नउपलक्षयामास॥सोपिमुनिरूपंत्यक्त्वामूलरूपंप्रकटीकृत्यमातुःपादयोःपतितः॥अथरुक्मिणीहर्षात्स्तनयोःस्तन्यंक्षरं
तीपुत्रंआलिंगतिस्म॥ततःप्रद्युम्नःप्राह॥मातःकृष्णाग्रतोहंनप्रकटीकरणीय॥इत्युक्त्वारुक्मिणींरथमारोप्यशंखनादेनपुरक्षोभंकुर्व
चाल॥ भोभोकृष्णायादववीरा॥एषोहंरुक्मिणींहृत्वायामियदिकृष्णोबलवान्॥तर्हिआगच्छतुरक्षाकारणार्थंइतिजल्पन्पुराद्बहिर्ययौ
॥ततःकृष्णोपिकोपंअकालमरणाभिलाषी॥इत्यादिजल्पन्॥शार्ङ्गंकरेकृत्वाससैन्योधावत॥प्रद्युम्नस्तुविद्याबलात्कृष्णसैन्यंदशदिशिवि
क्षिप्यक्षणात्॥कृष्णस्यासर्वायुधानिअहरत्॥अथविषण्णःकृष्णोयावत्किंचिच्चिंतयति॥तावन्नारदस्तत्रागत्यप्रद्युम्नोयंतवपुत्रइत्यादिवृत्तांतं
अकथयत्॥कृष्णोपिप्रीतमनास्तंभमालिंग्य॥रुक्मिणीसहितःपुत्रसंगमोत्सवंकृत्वापुरींप्रविवेश॥अथदुर्योधनःप्रणम्यकृष्णंप्रत्याह॥स्वामि
न्ममपुत्रीतववधूः... ...ता॥ततःप्रद्युम्नःप्राह॥प्रसर्पोआपृच्छ्यअनेष्यामीतिकथयन्क्षणात्तांकन्यांसमानीयार्पयत्॥ततःकृष्णेनदीय

मानांकन्यांइयंममवधूःस्यानइतिकृत्वाप्रद्युम्नोनजग्राह॥ततोभानुकःपरिणीतवान्॥ततोनिच्छन्नपिप्रद्युम्नोबलात्कृष्णेनवह्व्यःखेचरभूचरक
न्याःपरिणायितः॥अन्यदाजीर्णमंचुकसुप्तांदुःखितांभामांदृष्ट्वाकृष्णेनदुःखकारणेपृष्टेसाप्राह॥प्रद्युम्नसदृशंपुत्रंइच्छामिइति॥ततःकृष्णेन
चतुर्थतपसाआराधितोहरिनैगमेषीसमागतः॥सचकृष्णेनपुत्रंयाचितोहारंदत्वाययौ॥ततःप्रद्युम्नस्तत्स्वरूपंज्ञातामातुःसखींजंबूवतीं
विद्ययाभामारूपांकृत्वा॥कृष्णमंदिरेवासार्थंप्रेषयामास॥कृष्णोपितस्यैभामाभ्रांत्याहारंदत्वासुरतसंगंचकार॥तदेवदेवलोकाच्च्युतःकश्चि
द्देवःतस्याःकुक्षौअवतीर्णः॥ततोजांबुवतीहृष्टास्वगृहंययौ॥ततःसत्यभामावासार्थंकृष्णावासेगताकृष्णोपिअहोस्त्रीणांभोगतृष्णेति
चिंतयन्॥पुनस्तांबुभुजे॥अथतस्मिन्नेवसमयेप्रद्युम्नोदुंदुभिंअताडयत्॥तन्नादेनकिंचित्क्षुब्धःकेशवोभामांप्राह॥तवपुत्रोभविष्यत
ि॥ततःप्रभातेजांबुवतींतंहारंविलोक्यविस्मितः॥कृष्णःप्रद्युम्नमायांबुबोध॥अथकालेजांबुवतीसुस्वप्नसूचितं॥शांबाभिधानंपुत्रंप्रासूत
भामापिभीरुकाभिधंपुत्रंजन्मतोपिभयनशीलंप्रासूत॥अथरुक्मिनृपपुत्रींवैदर्भींहिरण्योपायात्प्रद्युम्नःपरिणीतवान्॥शांबस्तुहेमांगदनृ
पपुत्रींसुहरिण्यांपरिणीतवान्॥अन्यदाभामया॥तवपुत्रःशांबोममपुत्रंभापयतीतिप्रोक्तेजांबुवतीप्राह॥ममपुत्रः... ...पवान्सरलोस्तीति
श्रुत्वाकृष्णःप्राह॥प्रियेइदानींतवपुत्रस्यन्यायित्वंदर्शयामीत्युक्त्वा॥स्वयंआभीरोभूत्वा॥जांबुवतींआभीरीं... ...तोरसंविक्रेतुंगतौ

313 | 1952

ततःकापिशांबकुमारस्तांआभीरींदृष्ट्वा॥ रेआभीरीइहागच्छ॥ गोरसंग्राह्यमस्तीतिकृत्वा॥ वस्त्रांचलेगृहीत्वायावत्॥ शून्यगृहेप्रविशःतावत्ता
क्षान्मातापितरौवीक्ष्यलज्जितोनष्ट्वाकुत्रचिद्ययौ॥ ततोहरिर्हसित्वाजांबुवतींप्राह॥ प्रियेदृष्टंत्वयास्वपुत्रस्यन्यायवत्त्वं॥ अथवायुक्तमेतत्॥
सिंहीअपिस्वपुत्रंसौम्यंकलभंच॥ क्रूरंमन्यतेइतिततोद्वितीयदिनेकीलकंगृहीत्वाआगच्छंतंशांबंवीक्ष्यकेनापिपृष्टेशांबःप्राह॥ योममपि
शून्यंभाषतेतस्यवक्त्रेक्षेप्स्यामीति॥ ततोसौदुर्विनीतइतिकृत्वाहरिणापुरान्निर्वासितःप्रद्युम्नसकाशात्॥ प्रज्ञप्तींविद्यांप्राप्यनिर्ययौ॥ अ
थप्रद्युम्नोभीरुकंनित्यंभापयत्॥ अन्यदाभामया॥ रेरेशठत्वमपिशांबवत्पुरात्कथंननिर्यासीत्युक्तःसप्राह॥ मातःक्वगच्छामि॥ तयोक्तंश्म
शानेगच्छ॥ तेनोक्तं॥ कदामयाआगंतव्यं॥ सापिक्रोधात्प्राह॥ यदाशांबंहस्तेगृहीत्वा॥ अहमानयामितदात्वयामिआगंतव्यमिति॥ तद्वचनं
प्रमाणीकृत्य॥ प्रद्युम्नःश्मशानेगतः॥ शांबोपिभ्रमंस्तत्रमिलितः॥ अथभामाभीरुकार्थएकोनशतंकन्यामेलयित्वा॥ एककन्यांगवेषयंत्य
स्ति॥ प्रज्ञप्तिविद्याबलात्॥ तत्ज्ञात्वाप्रद्युम्नोजितशत्रुराजाबभूवशांबश्चतत्कन्याजाता॥ इत्येवंमायाकृत्वातत्रपुरेतस्थतुः॥ ततोभामास्व
पुत्रार्थं[illegible]याचतिस्म॥ जितशत्रुःप्राह॥ यदिभामास्वयमागत्यकन्यांहस्तेगृहीत्वायाति॥ अन्यच्चविवाहसमये॥ यदिभीरुकह
स्तोपरि[illegible]करोति॥ तदार्पयतत्कुर्वेइतितदंगीकृत्य॥ भामातद्गृहेगताकन्यांतस्यहस्तेगृहीत्वानिर्गता॥ प्रद्युम्नप्रयुक्तविद्याव[illegible]

सर्वोपिजनःशांबंपश्यति॥ केवलंभामाकन्यांपश्यति॥ ततःशांबंकरेधृत्वाव्रजंतींभामांवलोक्यजनाःप्राहुः॥ एषापुत्रविवाहोत्सवेशांबमानयित्वा॥ गृ
हेसमानयतिइति॥ अथशांबोभामागृहेगतःसन्परिणयनावसरे॥ भीरोर्दक्षिणहस्तंस्ववामहस्तेनउपरिस्थेनगृहीत्वानवनवतेःकन्यानांहस्तान्
दक्षिणहस्तेनगृहीत्वाअग्निंपरितोभ्रमत्॥ एवंताःकन्याःपरिणीयशांबोनवनवतिकन्याभिःसमंआवासगृहंययौ॥ भीरुकस्तुपृष्ठेगच्छत्॥ तेन
तर्जितोविलक्षोभूयस्वगृहंगत्वा॥ भामायैकथितवान्॥ सापिअश्रद्दधानातत्रागताशांबंपश्यतिस्म॥ शांबोपिमातःप्रणमामीतिकृत्वाअग्रेस्थितः॥ ततो
भामाकोपातुराप्राह॥ रेधृष्टभंडकेनत्वंअत्रानीतोसीतिसोप्याह॥ मातस्त्वयैवहस्तेगृहीत्वानीतोहंकन्याश्चपरिणायितः॥ अत्रार्थेसर्वोपिजनःसाक्षीवर्त्त
तेलोकाअपिसर्वेतत्तथैवेतिप्राहुः॥ ततोनिश्वासाप्राह॥ मायीबंधुःपितामायीजननीयस्यमायिनी॥ मायीसोत्यलयत्कन्यारूपोमांसहजोरिपुः॥
१॥ इत्युक्त्वादुःखितानिःश्वसंतीगृहंययौ॥ अन्यदाशांबोवसुदेवंनमस्कर्तुंगतोवोचत्॥ तातत्वयातुचिरकालंदेशांतरेषुभ्रांत्वास्त्रियःपरिणीताः
मयातुअल्पकालेनैवस्थानस्थितेनशतंकन्याःपरिणीताः॥ ततआवयोर्महदंतरंइतिश्रुत्वाईर्ष्यायावसुदेवःप्राह॥ रेकूपमंडूकत्वंकिंवेत्सि॥ अहं
तुशक्तिसामर्थ्यात्॥ देशांतरेषुस्थितःस्वयंवरायाताःकन्याःपरिणीतवान्समयेचबंधूनपिमिलितः॥ रेनिर्लज्जत्वंतुमा[illegible]मातरंछलयित्वा
कन्याःपरिणीतः॥ तत्रकिंतेपौरुषमिति॥ ततःपितामहंकुपितंविज्ञाय॥ शांबोविनयवाक्यैःप्राह॥ तातममेदंबालदुर्ललितंक्षंतव्यंशिशुत्वात्॥

315/1952

पुक्तायुक्तंविवेकंअहंनजानामीति॥तस्यविनयवाक्यैः पुनर्वसुदेवःप्रसन्नोभूत्॥इत्येवंतत्रद्वारकायांप्रद्युम्नप्रमुखायदुकुमाराः पांडवानांचकुमाराः
संभूयखेलयामासुः॥अथैवंतत्रयादवैःकृतसत्कारास्तेपांडवाःसर्वेअमनीवसुखेनतस्थुः॥अथसमुद्रविजयाद्यायादवेश्वराःसंभूयपांडवान्प्राहुः
॥युष्माभिःसत्यप्रतिज्ञैःअद्ययावत्शत्रुपराभवाःसोढाः॥इदानींतुप्राप्तकालैर्भवद्भिस्तेशत्रवःकंटकिवृक्षाइवप्रवर्द्धमानाः छेदितव्याः॥ततो
धर्मपुत्रःप्राह॥तंतथाविधंशत्रुपराभवंभवंतःसहंतांपरंवयंतुंनसहिष्यामहे॥ततोयुधिष्ठिरःप्राह॥यदियुष्माकंशत्रुनिग्रहेनिश्चयोस्तियदि
चयुद्धार्थसमुत्सुकाः तथापिपूर्वंमधुरोक्तिभिःसप्रतिबोध्यःबोधितोयदिनबुध्यते॥तदाभवद्भिर्निजाभीप्सितंकर्तव्यंइति॥ततःसमुद्रविजयादीनां
आज्ञयाजयनामादूतोरथमारुह्यहस्तिनागपुरंप्राप्य॥सचतत्रदुर्योधनसभामध्येगत्वादुर्योधनंप्राह॥राजन्अहंद्वारकाधीश्वरस्यकंसहंतुःश्री
कृष्णस्यदूतोस्मि॥ततस्तत्संदेशंसमाकर्णय॥तथाहि॥एतेपांडवास्तववांधवाःसत्यप्रतिज्ञत्वात्त्रयोदशवर्षाणिदुःखेनगमयित्वा॥सांप्रतंप्रत्यक्षा
जाताः॥यथाएतैःस्वप्रतिज्ञानिर्वाहिताः॥तथात्वमपिएतेभ्योराज्यभागंदत्वा॥स्वप्रतिज्ञांनिर्वाहय॥अथवातेषांराज्येनपूर्णंकिंतु॥इंद्रप्रस्थ॥१॥
तिलप्रस्थं॥२॥कासी॥३॥हस्तिनापुरं॥४॥वारुणावर्तं॥५॥चेतिपंचग्रामाणिदेहि॥इतिदूतवाक्यात्प्रवृद्धकोपःसुर्योधनोनिजस्कंधयोर्दृष्टिंदत्वाऽ
हंस्पृशन्॥उष्टंदशन् [illegible] ह॥एभिर्द्यूतेहारितंराज्यंतत्इदानींकथंलप्स्यंतेभीमादयस्तु॥आजन्मतएवममशत्रवःकीदृशंतेषुबांधव-

किंचमयारक्षितायामेवभूमौइयंतंकालंएतेस्थिताः॥एषएवभूमिभागोमयाएतेषांअर्पितः॥ततःएतेपांडवाःस्वपराक्रमेणयद्भवंति॥तत्कु
र्वंतुपरंद्यूतात्लब्धाद्राज्यात्स्वल्पमपिभूभागंएभ्योनदास्यामि॥इतिश्रुत्वापुनर्जयःप्राह॥राजन्ममवाक्यंमन्यस्व॥नास्तिगोत्रविरोधात्किंचिदपिश्रे
यःफलंकिंचयेनभीमेनहिडंबबककीचकबकक्रूरकिर्मीरादयोदानवाव्यापादिताः॥तस्यभीमस्याग्रेतवबलंकियन्मात्रं॥तथायोऽर्जुनस्त्रि
जगत्यपिविख्यातबलोयेनचविद्याधरात्तवजीवितदानंदत्तं॥तेनापिकारणेनएतेतवपूज्याःत्वयातुअद्ययावत्॥एषुअपकारःकृतः॥एतेतु
तथापि॥त्वयिउपकारमेवकुर्वंति॥धर्मसूनुस्तु॥धर्मात्माएकांततस्त्वयिवत्सलोस्तियतोसौउपतंवह्निमेघइव॥वह्निरोधोपनात्सवंधूत्नि
वारयत्येव॥सांप्रतंतुएतेदेवदानवानामप्यसह्यपराक्रमेण॥कृष्णेनसमाश्रिताःसंति॥ततोवायुप्रेरितादावाग्निज्वालाकलापाइव॥एते
सकुटुंबंत्वांतृणोत्करमिवदहिष्यंति॥इतितद्वचःश्रुत्वा॥भीष्मकृपद्रोणविदुरादयोपिसत्यमेतदितितथैवप्राहुः॥ततस्तेषांवचनैस्तप्त
तैलेजलप्रक्षेपवत्॥दुर्योधनोमनसिअधिकंप्रज्वलतिस्म॥ततस्तेनावमानितः॥सकृष्णदूतोधार्तराष्ट्राणांमृत्युकालःसमासन्नआयातो
दृश्यते॥तेनइत्थंमतिविपर्ययोजातः॥इतिवदन्निर्ययौसदूतः॥शीघ्रंआगत्यकृष्णायसर्वंनिवेदयामास॥ततः [illegible] गभीमादीनांवांछि
तंफलितं॥ततस्तेपांडवाःसंग्रामकरणोद्यताःकटकंमेलयंतिस्म॥तत्रसैन्येसर्वेयादवाः॥मत्स्यराजोधृष्टद्युम्नः [illegible] किद्रुपदसौभद्रेय

317|1962

प्रमुखान्नृपाश्चासन्॥ततोऽर्जुनपुत्रोभिमन्युः॥भीमपुत्रोघटोत्कचः॥एवंपरेषांअपिपुत्रास्तत्रआजग्मुः॥ततोऽर्जुनस्नेहवशात्इंद्रश्चूडामणि
श्चंद्रचूडोविद्युद्गतिश्चित्रांगदइत्यादयोविद्याधरास्तत्राजग्मुः॥इतश्चअर्जुनःकर्णश्च॥स्वस्वसभायां॥अन्योन्यंमारणेप्रतिज्ञांचक्रतुः॥अथदु
र्योधनोपिकर्णादिभिःप्रेरितोदूतान्प्रेषयित्वा॥स्वपक्षेकृपाचार्योद्रोणःसोमदत्तोबाह्लीकःशुक्तिःसौबलःकृतवर्मावृषसेनोहलायुधउल्ल
कश्चेत्यादिनृपाअमिलन्॥अथतदाविदुरस्तुगोत्रक्षयोपायंसमागतंविज्ञायदीक्षांगृहीत्वावनंययौ॥अथान्यदाकुंत्यास्सपुत्रत्वसंबंधंज्ञा
पितोपिकर्णोऽगीकृतपरिहारो॥महान्दोषइतिदुर्योधनंनमुमोच॥तथापिकुंतीमातृवात्सल्यात्पांडवेभ्योपि॥अधिकंतज्जयंवांछतिस्म॥
अत्रांतरेकेपिव्यापारिणोयवनद्वीपात्॥क्रयाणकानिगृहीत्वा॥द्वारकायांआगत्यकियत्कमितानितत्रविक्रीय॥ततोविशेषलाभार्थिनोऽपराणिलात्वा
जरासंधाधिष्ठितंराजगृहपुरंययुः॥तत्रजरासंधपुत्र्यां॥अल्पमूल्येनमार्गयंतींप्रति॥तैर्व्यापारिणोनिर्भर्त्सनावाक्यैःप्रोक्तुः॥हाहाधि
गितद्राज्यं॥अस्मानपिधिगस्तु॥यतोमहोदारैर्यादवैःपूर्णांकृष्णराजधानींत्यक्त्वाऽत्रायाताः॥ इतिश्रुत्वाजीवयशाः॥तत्स्वरूपंतान्प
प्रच्छ॥ तेप्राहुः[illegible]श्चिमसमुद्रतटेधनदेननिर्मितास्वर्णरत्नमयी॥साक्षात्स्वर्गपुरीवद्द्वारकांपुरीअस्ति॥तत्रतेजसांएकआश्रयोवसु
देवपुत्रःकृष्णनृपो[illegible]राज्यंकरोति॥इतिकृष्णनामश्रवणमात्रात् समुल्लसितशोकासारुदंती॥जरासंधाग्रेगत्वा॥मरणंप्रार्थयामास

जरासंधःप्राह॥वत्सेत्वंमारुद॥अहंचकुशोयादवपत्नीःकृष्णपत्नीश्चरोदयिष्यामि॥इयंतंकालंतुमयाअज्ञातत्वात्॥कृष्णोजीवितइत्यु
क्तः॥रणभंभांवादयित्वा कटकंमेलयांचकार॥ततोस्यसहदेवादयःपुत्राःशिशुपालःस्वर्णनाभोरुक्मिनृपोएवमन्येपि सहस्रशोनृ
पाःसामंताश्चसर्वदिग्भ्योनदीप्रवाहाइवतत्सैन्यंसागरंसमाजग्मुः॥ अथजरासंधःप्रतिवासुदेवो यादवान्प्रतिकोपाटोपंवहन्प
देपदेअपशकुनैर्मंत्रिभिश्च॥वार्यमाणोपिअनिवार्यरोषपोषवशात्॥सैन्यपूरैःपृथ्वींकंपयन् प्रतस्थे॥ ततोनारदःकलहदर्शन
कौतुकात्कृष्णंप्रतिजरासंधागमनवार्त्ताअकथयत्॥ ततःकृष्णोपिसामर्षःप्रयाणभंभांवादयित्वा॥स्वसैन्यंअमेलयत्॥तत्रप्रथमद
शार्हः॥समुद्रविजयनृपःसमुद्रइवदुर्द्धरआसीत्॥तस्यइमेपुत्राः॥तथाहिमहानेमिःसत्यनेमिर्दृढनेमिःसुनेमिःअरिष्टनेमि॥जयसे
नोमहाजयः॥तेजःसेनोजयोमेघश्चित्राश्वोगौतमःश्वफल्कः॥शिवनंदोविष्वक्सेनश्चेत्येवमाद्याः॥ततोक्षोभ्योदशार्हः॥तस्यइमेअष्टौ
पुत्राः॥उद्धवोधवोक्षुभितोमहोदधिः॥अंभोनिधिर्जलनिधिर्वामदेवोदृढव्रतश्चेति॥तृतीयोदशार्हःस्तिमितः॥तस्यपंचपुत्राः
ऊर्म्मिमान्वसुमान्वीरपातालःस्थिरश्चेति॥चतुर्थोदशार्हःसागरः॥तत्पुत्राःषट्निःकंपःकंपनोलक्ष्मी[illegible]केसरीश्रीमान्
युगांतश्चेति॥पंचमोदशार्होहिमवान्॥तत्पुत्रास्त्रयोविद्युत्प्रभोगंधमादनो॥माल्यवांश्चेति॥षष्ठोद[illegible]र्होऽचलनामा॥तत्पुत्राः॥

3|9|1962

सप्तमदेंद्रोमलयःसह्योगिरिः॥शैलोनगोबलश्चेतिनामानः॥सप्तमोदशार्होधरणनामा॥तस्यपंचपुत्राःकर्कोटको॥धनंजयो॥विश्व
रूपः॥श्वेतमुखो॥वासुकिश्चेति॥अष्टमोदशार्हःपूरणः॥तत्पुत्राश्चत्वारोमीदुःपूरोदुर्मुखोदुर्दुरोदुर्द्धरश्चेति॥नवमोदशार्होभिचं
द्रःतस्यषट्पुत्राःचंद्रः॥शशांकःचंद्राभः॥शशीसोमोमृतप्रभश्चेतिदशमदशार्होवसुदेवः॥तत्पुत्रास्तुबहवोमहाबलाविश्वविख्यातकी
र्त्तयः॥तथाहि॥अक्रूरक्रूरोज्वलनप्रभोवायुवेगोमहेंद्रगतिः॥सिद्धार्थोमितगतिः॥सुदारुर्दारुकोनाधृष्णिर्हिमसुष्टिःशिलायुधःज
रत्कुमारोवाल्हीकोगंधारः॥पिंगलश्चेत्याद्याराम॥सारणोविदूरथश्चेतित्रयोरोहिणीकुक्षिजाताः॥ततोरामपुत्राः॥उल्मुकोनिषध
श्चारुदत्तोध्रुवःशत्रुदमनःपीठश्चेत्याद्याःविष्णोःपुत्राःभानुर्भामरोमहाभानुःअनुभानुर्वृहद्ध्वजोऽग्निशिखोविष्णुःसंजयो
कंपनोमहासेनोधीरोगंभीरोगौतमःसौधर्म्मउदधिःसूर्यश्चंद्रोधर्म्मःप्रसेनजित्चारुकृष्णकोभरतःसुचारुर्देवदत्तःप्रद्युम्नःशां
बश्चेत्याद्याअपरेपिबहवोमहाबलाः॥ततःउग्रसेनःउग्रसेनसुताश्च॥एवंअन्येपिपितृष्वसृस्वस्त्रदिपरूजाबद्धवःसमाययुः॥
ततःक्रोष्टुकिनाआदिष्टेसुदिवसे॥श्रीकृष्णोदारुकसारथिनासज्जितं॥गरुडध्वजरथंआरुह्यसर्वयदुभिःसैनिकैश्चपरिवृतः॥
शुभशकुनैःससूचितजयोत्सवःपूर्वोत्तरांदिशंप्रतिचलः॥ततोयदूनांपांडवानांचमूसमूहैश्चलद्भिःकुलाचलाश्चलाचलावभुः

वसुंधरापिभारसहनाक्षमासर्वतःकंपयामास॥इत्थंचलन्स्वनगरात्पंचचत्वारिंशद्योजनानि॥अतिक्रम्य॥श्रीकृष्णःशनिपल्लीग्रामस
मीपेसेनानिवेशंव्यधात्स्थौ॥ततोजरासंधोपिकृष्णसैन्यात्योजनचतुष्टयांतरेआगत्यसेनानिवेशंचकार॥अत्रांतरेतत्रयदूनांसैन्येके
चिद्विद्याधराआगत्य॥समुद्रविजयंनत्वाप्राहुः॥स्वामिन्वयंतवबांधवस्यवसुदेवस्यगुणैःक्रीतास्मःयुष्माकंसंग्रामारंभंविज्ञायआगतास्म
किंचयेषांकुलेजगद्रक्षाकारणसमर्थः॥श्रीअरिष्टनेमिर्यत्रचरामगोविंदौ॥देवदानवानामपिअजय्यौ॥यत्रचप्रद्युम्नशांबाद्याःकोटिशः
कुमाराःतत्रवयंकिंसाहाय्यंकुर्मः॥तथापिभृत्यभावंस्वभक्तिंचसत्यापयितुंआगतास्मः॥ततोयथोचितकार्यप्रदानेनअस्मान्सेवकम
ध्येगणयेतितेषांवाक्येहृष्टःसमुद्रविजयोपितथास्तु॥इतितान्संभावयामास॥ततस्तेप्राहुःराजन्जरासंधस्तुरामकृष्णादीनांअ
ग्रेकियन्मात्रः॥परंवैताढ्यविद्याबलवंतोविद्याधराजरासंधस्यवशवर्त्तिनःसंतियावत्तेअत्रनआयांतितावत्॥तान्प्रतिअस्मान्प्रेषय
अस्माकंसेनानीस्तु॥तवानुजोवसुदेवःशांबप्रद्युम्नपुत्रःप्रेष्यतां॥इतितेषांवचनंप्रमाणीकृत्यसमुद्रविजयःकृष्णंआपृच्छ्यशांबप्रद्युम्नसहितं
वसुदेवंतैःसहप्रेषयामास॥तदाभगवान्॥अरिष्टनेमिर्जन्मस्नात्रसमयेसुरैर्बद्धांअस्त्रवारणौषधींवसुदेवायददौ॥अथयादवपांडवा
नांवधायउद्यतंजरासंधंदुर्योधनोनमस्कृत्यविज्ञपयतिस्म॥स्वामिन्अमीयादवागोपाःपांडवास्तुवनेचराः॥तेषांपरिभवतोभमनंनयु

S24/1952

न्यंते ॥ ततोमांआज्ञापय॥इदानींअपांडवपादवांपृथ्वींकुर्वे॥इतितस्याग्रहं दृष्ट्वाजरासंधःपट्टबंधंकारयित्वा॥चतुःसैन्यंदत्वादुर्योधनंप्रेषयामा
स॥ततोसौमदोद्धुरःसैन्यसमूहपरिवृतःकेश्चित्प्रयाणैःकुरुक्षेत्रंप्राप॥तत्रतस्यएकादशाक्षौहिणीप्रमितंसैन्यंअमिलत्॥अथदुर्योधनो
भीष्मंपितामहंस्वसैन्यापतिंचकुः॥अथतेकौरवपांडवाःसामदानभेदलक्षणंउपायत्रयंपरित्यज्यकेवलंनिग्रहमेवतुर्योपायंसमा
श्रिताः॥रणमुहूर्त्तंनिर्द्धार्य॥आयुधागारेषु॥धूपदीपाक्षतबलिपुष्पादिभिरायुधानि पूजयंतिस्म॥वीराणांवीररसोत्साहकानि निःस्वा
नानिनिःस्वनैर्दिग्मुखानिपूरयांचक्रुः॥अथप्रभातेभटानांसमुत्साहदायके॥मूर्त्तेवीररसेइवालोहितेसमुदिते॥श्रीसूर्यमंडलेउभ
योरपिसैन्ययोःसमरोत्सुकानांभटानां॥महान्कोलाहलध्वनिःप्रावर्त्तत॥रणाचनिस्वानानांनिर्घोषैः॥भेरीणांभांकारैर्ढक्काकाहलाहु
डुक्कापटहादिध्वनिभिः॥गजानांगर्जितैर्हयानांहेषारवैः॥रथानांचीत्कारैर्योद्धानांभुजास्फोटक्ष्वेडादिनादैःधनुषांटंकारैश्चसर्वजगत्ना
दमयंअलक्ष्यत॥ततस्तयोःसैन्ययोःसप्तसुस्थानेषुमदप्रवाहान्क्षरंतोजंगमाः॥पर्वताइवप्रोत्तुंगाःशुंडादंडान्समुच्छालयंतोगजाःप्रतस्थि
रे॥ततोध्वजकिंकिणीघंटाप्रावरणादिमंडिताः॥साक्षात्आयुधशालाइवसर्वायुधपूरिताःनेमिधाराभिर्निष्पिष्टभूपृष्टाः॥विगतनिद्रि
रंगमैःसमाश्रितारथाःप्रतस्थिरे॥ततःपवनवेगाःसमुद्रकल्लोलाइवभुवंअस्पृशंतोरणतूर्यनिर्घोषैर्विगतनिद्राःहेषारवैःखुराघातै

श्चकातरान्कंपयंतस्तुरंगमाःप्रतस्थिरे॥ततोवर्मकवचसन्नाहफलकधारिणःकृपाणधनुस्तूणीरादिशस्त्रधराःसिंहनादान्मुंचतः
स्ववीर्यप्रकर्षेणविश्वंतृणमिवगणयंतः॥संग्रामकरणप्रवृद्धोत्साहाःसुभटाःप्रतस्थिरे॥सेनानांरजोभरैश्छादितेनभोमंडलेअकालदु
र्दिनंबभूव॥ततःसमकालोत्थितैःसुभटकोटिसिंहनादैर्भयंकरंरणंप्रावर्त्तत॥गजागर्जैस्तुरगास्तुरंगैरथिनोरथिभिःपदातयःपदा
तिभिःसमंयुद्धंतिस्म॥तत्रचसंग्रामसागरे कल्लोलंतितुरंगमाःपर्वतीयंतिमतंगजाःमीनवदाचरंतिस्व-लनाःमकरवदाचरंतिर
थाः॥जलमानुषीयंतिपदातयःप्रवहणायंतेविमानानानिवडवाग्नीयंतिशस्त्राणांमल्लकारागर्ज्जितायंतेनिःस्वाननिर्घोषाःवे
लायंतेच॥धावत्सेनासमूहाःइत्येवंरौद्रवीररसाद्वैतसाम्राज्यपरमकोटिंप्राप्ते॥पार्थपुत्रोभिमन्युःप्रस्फुरत्पराक्रमोरथमारूढ
कौरवीयांसेनांगाहतेस्म॥तस्मिन्बाणधाराभिर्वर्षतिवैरिभटाजवासकाइवअलक्ष्यतांययुः॥तमेवंस्वसेनामर्द्दंतंवीक्ष्य बृहद्बल
नृपःकृपाचार्यश्चएतौद्वौरथारूढौबाणवृष्टिंकुर्वंतौअधावतां॥ततोभिमन्युर्बृहद्बलंरुरोध॥तावत्तांकिकयनृपतिश्चतत्सहायीभूयंकृ
पंसमेध॥तेचत्वारोपिपरस्परंशस्त्राणिक्षिपंतोभुवनस्यापिभयंकराअभूवन्॥ततःसा केकयकृपौयुद्ध्यमानौ॥द्वावपिरथरहिता
वेवलखङ्गहस्तौ॥उद्यत्फणाधरौभुजंगौइवअभूतांबृहद्बलस्तु॥अभिमन्योरथध्वजंसारथिंचनिपातयामास॥अथांतरेरत्न

322/1962

कार्याणि भूमीं विदारयन् भीष्मः पांडवसैन्यं प्राप॥ अथ भीष्मे रणोद्यते सति पांडवसैनिका अत्यर्थं अस्थिरा अभवन्॥ ततः क्रुद्धोऽभिम
न्युः भीष्मस्य ध्वजं दुर्मुखनृपस्य च सारथिं चिच्छेद॥ ततोऽतिक्रुद्धो भीष्मो॥ यावत् अभिमन्युं प्रति धावति॥ तावत्पांडवसैन्यात् सरभसाद
शभूपाः रक्षार्थं अभिमन्युं वेष्टयामासुः॥ अथ भीमो रथनिर्घोषैः शत्रुसैन्यं क्षोभयन् रणांगणं आगात्॥ भीष्मस्तु बाणेन॥ तस्य ध्वजं चि
च्छेद इतश्च उत्तरकुमारः शल्यनृपस्य वाहनभूतं हस्तिनं जघान॥ ततः क्रुद्धः शल्योऽमोघां स्वर्णशक्तिं अमुंचत् सर्वायुधैर्निवारितापि
सा॥ तस्य मस्तके निपात्य प्राणान् जहार॥ अथ तद्वधात् क्रुद्धोऽर्जुनः शरसमूहैः शत्रुसैन्यं निरश्चकार॥ ततोऽर्जुनेन व्यथितां कौरव
सेनां दीनां वीक्ष्य॥ भीष्मो धनुष्टंकारं कृत्वा धावति स्म॥ इतश्च धृष्टद्युम्नो भीष्मं प्रति अधावत्॥ ततस्तयोः अनेकभटक्षयकरो महान् सं
ग्रामो भूत्॥ अथ दिनांते रणं निवार्य उभे अपि सैन्ये स्वस्वस्थानं जग्मतुः॥ ततो रात्रौ पांडवाः कृष्णेन सह संभूय मंत्रयांचक्रुः॥ एष भी
ष्मः सर्वथा दुर्जयः किंचास्मिन् विद्यमाने कौरवा अपि दुःसाधा॥ इति श्रुत्वा कृष्णः प्राह॥ एक उपायोऽस्ति॥ यत् भीष्मस्तु निरायुधे क्लीबे स्त्रि
यां भीते च पराङ्मुखे प्रहारं न करोति॥ ततो हे पार्थ त्वं श्वः द्रुपदपुत्रं शिखंडिनं क्लीबं स्वरथे स्थापयित्वा॥ त्वं तत्पृष्ठतः स्थितो
भीष्मं प्रति बाणान् मुंच॥ भीष्मस्तु शिखंडिनं क्लीबं दृष्ट्वा न प्रहरिष्यति इत्येष उपायोऽस्ति॥ इत्येतत् कृष्णवचः प्रमाणीकृत्य प्रभाते पा

रणांगणं आययुः॥ कौरवा अपि समाययुः॥ पुनर्गांगेयो निरंतरास्त्रधाराभिः प्रलयकालीनमेघ इव पांडवसैन्यं उपाद्रवत्॥ ततोऽर्जुनः स्व
रथे शिखंडिनं आरोप्य स्वयं तदंतरितः क्लीबोपरि प्रहारकरणे॥ निरुद्यमं गांगेयं॥ कर्णाकृष्टबाणैर्विध्यति स्म॥ ततो भीष्मो वर्ममर्मभेदि
भिर्बाणैर्भिन्नगात्रः सन् नैते शिखंडिनो बाणाः किंतु महाबलस्यार्जुनस्येति॥ सारथिं प्रति कथयन्॥ रथमध्ये लुठति स्म॥ अथैवं भीष्मे प
तिते॥ शोकव्यग्रत्वात् दुर्योधनादयः सर्वतोऽपि तं वेष्टयित्वा॥ तद्वचनपिपासिता अस्थुः॥ ततो भीष्मे तृषार्ते सति अर्जुनो दिव्यास्त्रं मुक्त्वा॥ पृथ्वी
मध्यात् जलं निष्कास्य प्रपितामहं पाययामास॥ अथ तज्जलपानेन सुस्थीभूतो भीष्मो॥ दुर्योधनं प्राह॥ रे रे दुर्मते॥ अद्यापि अर्जुन
स्य पराक्रमो न दृष्टो॥ यत् पांडवैः सह संधिं न करोषि॥ यदि राज्येन जीवितव्येन च प्रयोजनं भवति॥ तर्हि मद्वचनं प्रमाणीकृत्य संधिं
कुर्यादिति तद्वचनं दुर्योधनोऽश्रुतमिव कृत्वा॥ भीष्मोपरि रोषारुणां दृष्टिं अक्षिपत्॥ अथ गांगेयो देववाणीभिः सर्वसावद्यत्यागा
कृतं अनशनं चांगीकृत्य॥ समाधिना मृत्वा॥ अच्युतस्वर्गं जगाम॥ ततो दुर्योधनः स्वसैन्ये द्रोणं सेनापतिं चकार॥ प्रातस्तमेव पुरस्कृत्य
रणांगणं प्राप्य॥ ततोऽर्जुनोऽपि स्वविद्यागुरुं द्रोणं प्रति प्रणामपूर्वकं॥ बाणसमूहरूपां दक्षिणां उत्सृजति स्म॥ ततस्तयोर्युध्यमानयोः शरै
स्त्रस्ततुरंगमः सूर्योऽपि अस्ताचलं प्राप्य॥ ततो द्वादशे दिने अर्जुने त्रिगर्ताधिपान्॥ संशप्तकान् जेतुं गते सति॥ अर्जुनवर्जितां

पांडवसेनांसुप्रतीकगजारूढो भगदत्तनृपोविगाहतेस्म॥ततस्तस्यदुर्दांतेनहस्तिना विमर्द्यमानापांडवसेनाकमलिनीवअत्यर्थंग्लानिंप्राप्
॥ ततोऽर्जुनः स्वसैन्यपराभवंश्रुत्वा॥संशप्तकान्तथैवमुक्त्वा॥सैन्यमध्येआगत्यचिरंयोधयित्वा॥तंमत्तगजंभगदत्तंचयमसदनंप्रेषयामा
स॥ततोभगदत्तेहतेनिरुत्साहानिरानंदाःकौरवसैनिकारात्रौचक्रव्यूहंरचयामासुः॥अथप्रभातेपार्थेसंशप्तानांजयार्थंगतेसतिअ
भिमन्युर्भीमादिभिःपरिवृतश्चक्रव्यूहंप्राविशत्॥ततोसौदुर्योधनकृपद्रोणकृतवर्मकर्णादीनांअस्त्राणि॥अवगणय्य॥चक्रव्यूहंअ
भ्यगाहत॥अथभीमादिषुदुर्योधनादिभिःरुद्धेषु॥एकएवाभिमन्युस्तत्रजयद्रथेनसमंयुयुधे॥ततोदिव्यास्त्रैःशस्त्रैश्चचिरंयोधयित्वा॥सु
कृतिशापेदिवसेजयद्रथोभिमन्युंजघान॥अथाभिमन्युवधाक्रुद्धोऽर्जुनःदिनावसानात्पूर्वंजयद्रथवधंविज्ञायशत्रुसैन्यंगाहतेस्म॥ततो
द्रोणादिभिःरुद्धःपार्थोनिरोधान्कौरवानीकंभटरुधिरकर्दमाकुलंचकार॥ततोऽर्जुनस्यअनुपदमागतौ॥सत्यकीवायुपुत्रौवीक्ष्य
दुर्योधनोभीमभूरिश्रवाःसत्यकिंचरुरोध॥अथसभुजबलेनसर्वान्नृपान्दूरंविक्षिप्य॥पार्थोदिनांतेजयद्रथंप्राप्य॥अथैनं[illegible]
पितेषांयुद्ध्यमानानां॥शस्त्रपातैर्विश्वस्यापिप्रलयअकालशंकाअभूत्॥अथसत्यकिवधोद्यतस्यभूरिश्रवसोभुजंपार्थो[illegible]
पुनःसत्यकीस्वप्राणैर्वियोजयतिस्म॥अथपार्थोपिजयद्रथंकर्मणविरथ्यरथसारथिंकृत्वादिनांतेयमसदनानियीचकार॥[illegible]

चतुर्दशदिनावधौ॥तत्ररणेकौरवसैन्येसप्तअक्षौहिण्यःक्षयंययुः॥ततोधृतराष्ट्रपुत्राःपांडवानांजयेअन्यंउपायंअपश्यंतो॥रात्रौपां
डुपुत्रेषुसुप्तेषुधाटीरूपाधूकवत्॥पांडवसैन्येनिपेतुः॥ततोभीमपुत्रोहिडिंबाकुक्षिजातो॥घटोत्कचनामाअनेकमायायुद्धैःकौरवसै
न्यंबहुतरंक्षपयामास॥ततस्तंसैन्यंचूर्णयंतंवीक्ष्य॥कुपितःकर्णोबाणमंडपेनछादयामास॥तथापिअस्खलितपराक्रमोसौ॥शस्त्रा
णांअसाध्यइतिज्ञात्वाकर्णोदेवनार्पितां॥वह्निकणावृतांअमोघांशक्तिंमुमोच॥साशक्तिर्घटोत्कचोपरिनिपत्यप्राणान्अपजहार॥त
स्मिन्हतेपांडवसैन्येखेदःकौरवसैन्येप्रमोदश्चसमकालंबभूवतुः॥अथप्रभातेसंग्रामांगणमागतौ॥विराटद्रुपदनृपौ॥कृतांतवत्॥
कोपाद्ध्यतोद्रोणश्चिरंयुद्धानिपातयामास॥तयोर्मरणात्विसंस्थूलंपांडवसैन्यं॥पुनःस्थिरीकृत्यधृष्टद्युम्नोद्रोणाभिमुखंययौ॥अ
नेकगजाश्वभटक्षयंकरंसुयुद्धंबभूव॥अत्रांतरेमालवराजस्यअश्वत्थामाभिधोगजोहतः॥ततोअश्वत्थामाहतः॥इतिलोकोक्तिंश्रुत्वा
द्रोणःस्वपुत्रमरणाशंकयाखेदपरोपावद्यअनयाकिंकर्तव्यमूढोजातः॥तावत्छलंतर्कयित्वा॥धृष्टद्युम्नोबाणैर्विध्यतिस्म॥तत्प्रहार
विकलांगोद्रोणःसर्वसंगत्यागात्॥अनशनंकृत्वा॥समाधिनामृत्वा॥ब्रह्मदेवलोकेदेवोजातः॥ततःपितुर्मरणंज्ञात्वाक्रुद्धोऽश्वत्थामा
पांडवसैन्यंबाणधाराभिर्व्यलोडयत्॥पुनरसौपांडवसैन्यवधाय॥नारायणीयंअस्त्रंमुमोच॥तच्चज्वालाभिर्व्याप्तदिगंतं॥विश्वस्यकवली

325/1762

करणसमुद्यतमिवंसैन्योपरिप्रसृतं॥ततःकृष्णवचनेन पांडुपुत्रैःसर्वायुधैःसपरिकरैःसर्वायुधपरित्यागेन॥भक्तिविनयप्रणामादिकरणे
प्रसादितंशांतिंप्राप्य॥एवंद्वादशप्रहरप्रमाणेतस्मिन्युद्धेऽनेकेसुभटाःक्षयंप्रापुः॥ततोधृतराष्ट्रपुत्रैःकर्ण्णःसेनापतित्वेस्थापितः॥अथते
दुर्योधनादयःकर्ण्णमग्रतःकृत्वारणांगणमाययुः॥पुनरपितेषांमहान्संवर्त्तः॥ततःकर्ण्णेनाकृष्टकोदंडःकल्यांतकालार्कइवचंडकां
तिःकर्ण्णःपार्थश्चउभावपितुल्यपराक्रमौचक्रतुः॥इतश्चपूर्ववैरोद्धतोभीमदुःशासनौसकलसैन्यक्षोभकरौअभूतां॥ततोभीमोगदा
घातेनदुःशासनंनिपात्य॥द्रौपद्याःवस्त्राहरणपराभवंसंस्मार्यतभुजौउत्पाटयामास॥ततःसूर्येस्तंगतेद्वेअपिसैन्येस्वस्वस्थानंप्रापतुः॥
अथकर्ण्णोऽर्जुनवधंप्रतिज्ञाय॥शल्यनृपंसारथित्वेनिवेश्य॥शंखशब्देनशत्रुसैन्यंक्षोभयन्रणांगणमाजगाम॥तथैवार्जुनोपिगर्ज्जि
तरवैर्दिग्मुखानिमुखरयन्प्रतिजगाम॥ततस्तयोर्बाणाःसवातजलदजलकणाइवआकाशभूम्योरंतरालंपूरयामासुः॥ततःकर्णेनमुक्तं
पन्नगास्त्रंपार्थोगरुडास्त्रेणविफलीचकार॥इत्यंअपराण्यपितन्मुक्तानिअस्त्राणिअर्ज्जुनःप्रत्यस्त्रैर्विफलीचकार॥पूर्वप्रतिपन्नशंखचूडसं
ह्याख्यान्दिनांतेकर्ण्णंव्यापादयामास॥ततःकर्ण्णवधान्निरुत्साहा॥निरानंदास्तेधृतराष्ट्रजाःभमोघमाअपिअशालोकेवलीयसी
क्षमत्यापनायेव॥शल्यनृपंसेनान्येकृत्वा॥संग्रामांगणमाजग्मुः॥ततःशत्रूणांशल्यरूपेशल्येशरसमूहान्वर्षतिसति॥एकएवयु

ष्ठिरःस्थिरोभूत् इतश्चसहदेवोपिनिरंतरास्त्रवृष्टिभिर्दवाग्निमिवप्रसरंतंशकुनिंरुरोध ततउत्तरकुमारवधंसंस्मार्य युधिष्ठिरःशक्ति
मुत्क्षाशल्यंनिपातयामास ततोदिनांतेअनन्यगतिकःस्वकर्मलज्जितोमुखंदर्शयितुंअशक्तोदुर्योधनःकेनापिअलक्षितःक्वचित्सरसिप्र
विश्यजलमध्येतस्थौ ततोअश्वत्थामःकृतवर्माःकृपाचार्योदुर्योधनशुद्धि-नार्थंगवेषयंतः तत्सरःप्रापुःयावत्तेदुर्योधनंकिंचिज्जल्पंति
तावत्पांडवाअपिएकाक्षौहिणीसैन्यसहितास्तत्राययुः तत्रजलांतर्निलीनंदुर्योधनंवीक्ष्यधर्मपुत्रःप्राह अहोवीरेंद्र तवैतत्पलायनंन
युक्तं त्वयारणांगणेनश्यता पूर्वजानांकुलकीर्त्तिःपौरुषंचसर्वंमलिनीकृतं किंचअर्जुनेरुष्टेसति अत्रत्वयाक्षणमपिस्थातुंनशक्यते
यतोयंशोपणास्त्रेणसमुद्रमपिशोषयति तस्याग्रेसरोजलंकियन्मात्रं अथवायदित्वंसर्वसैन्येनसमंयोद्धुमशक्तःतर्हित्वंएकेनैवकेनचि
त् आत्मनःसंमतेनयुद्धस्व यथातथापिअनीतिकारिणस्तवमरणंतुसर्वथाउपस्थितमेव ततोदीनतांमुक्त्वाक्षात्रमरणमेवश्रेय इत्यादि
श्रुत्वा दुर्योधनोभीमेनसमंगदायुद्धंअंगीकृत्यजलचरसत्ववत्शीघ्रंसरोवरान्निर्जगाम ततःकौरवपांडवेषुसर्वेषु सभ्यीभूयस्थितेषु
तौ दुर्योधनश्चगदादक्षौयुद्धायअभ्यधावतां तौअन्योन्यंप्रहरंतौ अन्योन्यंघातान्वंचयंतौ रोषारुणमुखौ देवानामपिदुर्दर्शौ
अभूतां ततःपुनःपुनःउत्पतंतंपतंतंदुर्योधनं लाघवप्रादवात्तदुर्जयंज्ञात्वाभीमःपादयोर्गदाप्रहारंदत्वाभूमौनिपातयामास मर

णावस्थस्यापि तस्यमुकुटं भीमः पूर्वकोपात्पादप्रहारैश्चूर्णयामास तद्दृष्ट्वाज्ञातेयसंबंधात्कुपितोबलभद्रोशेषविशात्पांडवान् अवगणय्य
निर्ययौ ततस्तन्निर्गमात् व्यग्रमनसः पांडवाः तत्रैवतत्त्वमुक्ता कृष्णंपुरस्कृत्य बलभद्रंसांत्वयितुंययुः स्वसैन्यरक्षार्थंच धृष्टद्युम्न
शिखंडिनौस्थापितौ अथकृतवर्माश्वत्थामाकृपाचार्यास्त्रयोपि अमी सुयोधनंवीक्षितुं रणक्षेत्रमाजग्मुः तथाविधंतंवीक्ष्य आत्म
नंनिंदंतस्तंप्राहुः हेराजन् अद्यापियमवरोचते तद्वयंकुर्महे तदासयाअद्यापिवयंपांडवान् हन्मः ततः पांडवान्हन्मइतिवचः श्रो
णान् पुनरुज्जीवितइवभूत्वा दुर्योधनस्तेषां हस्तंददौ ततस्तेपिरक्तकशून्येपांडवसैन्येगत्वा धृष्टद्युम्नशिखंडिनौ चिरंयुद्ध्यमानौनि
पात्यबालान् पांडवपुत्रान्हत्वा तन्मस्तकानिचलात्वा दुर्योधनाग्रेअमुंचन् तानिदृष्ट्वादुर्योधनोबालशिरांसि उपलक्ष्यखेदपरःप्रा
ह धिग् धिग्भोः कथमेषांबालहत्याविहिता नचमेकोधोपशांनिर्जाता इत्यादिनित्यनदुःखार्त्तोदुर्योधनः प्राणान् मुमोच कृतवर्मकृपा
द्यास्तुलज्जिताः कुत्रापिययुः अथपांडवाः भक्तिविनयवाक्यैर्हलधरं प्रसादयित्वासैन्यमागताः संतः पुत्रान्हतान् विज्ञायशोकंच
क्रुः ततस्तेषांधृतराष्ट्रसुतानां अन्येषामपिस्वजनानांच सरस्वत्यास्तीरे पांडवाःप्रेतकार्याणिचक्रुः इतश्चमगधेश्वरंजरासं
धःस्वपक्षघातिनं दुर्योधनंहतंज्ञात्वाक्रोधेनज्वलितः सोमकंनृपंप्रेषयामास ततःसोमकः पांडवेषुकंसमुद्रविजयंप्रतिअग .

त्य जरासंधोक्तंअकथयत् तथाहि कंसवधवैरंतुप्रथमं अस्त्येव ततोपिइदानींयुष्मद्दलमालंब्यपांडवैर्ममसखादुर्योधनोहतः
तेनममंमनोभृशंदह्यति ततोमदपराधिनौ रामकृष्णौशीघ्रंप्रेषितव्यौनोचेत् युद्धसामग्रीक्रियतां एषोहंशीघ्रमेवआगत
इति जरासंधोक्तंश्रुत्वा रोषात् रामकृष्णाभ्यांधिक्कृतःसोमकोगत्वाजरासंधकंगत्वा तद्वृत्तांतंअकथयत् तच्छ्रुत्वाकोधोद्धतं
जरासंधंप्रति हंसकोनाममंत्रीप्राह स्वामिन् राज्ञां उत्साह १ प्रभुत्व २ मंत्रणा ३ स्तिस्रःशक्तयःसंति तत्रउत्साह प्रभुत्वशक्त्योःस
काशात् मंत्रशक्तिर्बलीयसीभवति यतोमंत्रंविनाउत्साहशक्तिमंतोपि प्रभुत्वशक्तिमंतोपि नृपाःस्वार्थसाधकाः नभवेयुः कं
सकालाद्याअपिमंत्रंविनैवविनाशंगताः मंत्रशक्तिमालंबितानांहिसंपदःपदेपदेभवंति मंत्रस्तुएवं यतः एतेयादवाःसांप्रतं
प्राप्तोदयावर्त्तंते पूर्वमपित्वयारोहिण्यास्वयंवरे स्वर्वनृपसमक्षंवसुदेवपराक्रमोदृष्टः सांप्रतंचरामकृष्णौत्रिभुवनेपिख्यातविक्रमौ
तत्सुतौशांबप्रद्युम्नौविद्याबलिनौ अपरौरामकृष्णाविवदुर्जयौ किंचअन्यद्वाच्यं येषांकुलेएकोपिअरिष्टनेमि र्मेरुदंडेपृथ्वीछ
त्र कर्तुंसमर्थः अपरेपिमहानेमिरथनेमिप्रमुखा अनेकेवीराः तादृक्पराक्रमाधाराअपि पांडवायदाश्रयेस्थिताःसंति
एवंकालबलंशत्रूणांउदयकालंचविचिंत्य सहसायुद्धंकर्तुंनयुज्यतइतितस्यवचः श्रुत्वाघृतसिक्तवह्निरिवातिप्रदीप्तः।

32a|1962

जरासंधःप्राह रेमूढत्वंतुनूनं यादवैर्भेदंप्रापितोसितेनएवंप्रलपसि अहंतुतवमंत्रैःसमं यादवान्गोपान् निहत्यत्वत्पुत्राःप्रति
ज्ञांपूरयिष्ये इत्युक्त्वाअन्यमंत्रिभिश्चक्रव्यूहंकारयित्वा प्रभातेशनिपल्यांयादवान् आकारयामास ततोजरासंधःस्वसैन्ये
हिरण्यनाभंसेनान्यंचकार यादवाअपिगरुडव्यूहंरचयित्वाशुभशकुनैःप्रवर्द्धितोत्साहाःरणांगणमाययुः अथसमुद्रवि
जयःस्वसैन्येअनाधृष्टिंसेनान्यंचकार अत्रांतरेइंद्रादेशाद्दिव्यंरथमादायमातलिःसारथिस्तत्रागत्यनेमीश्वरंप्रणमतिस्म
स्वाम्यपितंरथमाश्रयत् अथास्त्राणांपरस्परास्फालनैःवह्निकणान्किरंतौ उभावपिव्यूहौ प्रलयकालीनपर्वताविवअमिलतां
अथतत्रतूर्याणांरवैःगजानांगर्जितैःहयानांहेषितैःरथानांनिर्घोषैः सुभटानांसिंहनादैश्च शब्दसमुद्रउद्वेलोभूत् ततश्चक्रव्यू
हागतैर्नंदैःयादवानांव्यूहाग्रगाःसुभटाभज्यंतेस्म ततोव्यूहस्यवामदक्षिणभागयोरर्जुनमहानेमिनौव्यूहाभिमुखंच अना
धृष्टिःइत्येवंत्रयोपिवीराअधावंत महानेमिःसिंहनादं अर्जुनोदेवदत्तं अनाधृष्टिर्बलाहकं शंखंअवादयत् तेषांशंखना
दैर्हनुःकींकारैर्बाणसमूहैश्चजरासंधसैन्यंपरमांग्लानिंप्राप ततस्तैस्त्रिभिःत्रिषुस्थानेषुचक्रव्यूहोभिद्यतेस्म इत्थंचक्रव्यू
हेभेदिते[illegible]रूपोमहानेमिंशिशुपालो अर्जुनंहिरण्यनाभश्चानाधृष्टिंयोद्धुंउपतस्थुः ततस्तेषांषण्णांअपिमहावीराणांसंग्रा

मःसुरासुराणांदुरालोकःसमभूत् ततोमहानेमिशरैःसम्यगाक्रांतंरुक्मिणंवीक्ष्य तद्रक्षार्थंजरासंधाज्ञयावेणुदारीप्रमुखाःस
प्तभूपाःसमाययुः महानेमिस्तुलघुहस्तत्वात्तेषां अष्टानामपिबाणान् स्वबाणैश्छिछेद अथरुक्मीपूर्वंवरुणेनार्पितांशक्तिं म
हानेमिवधायअमुचत् ततस्तदाश्रिताःक्रूरव्यंतराःप्रसरंतिस्म ततोरिष्टनेम्यादेशान्मातलिर्महानेमेःशरेवज्रंसंक्रामयतिस्म
तेनशरेणमहानेमिस्तांशक्तिंभेदयित्वाअन्येनबाणेनरुक्मिणंभालेजघान ततस्तंपतंतंवेणुदारीरथेआरोप्य स्वसैन्यमध्येययौ
अपरेपिशिशुपालादयःसप्तनृपाभयाकुलाःपलायनंचक्रुः अथसमुद्रविजयोमंत्रिमितो भद्रकंठंअक्षोभ्यःसुसेनं ए
वंअन्येपियादववीराः अपरापरान् जरासंधभटान् भूपान्व्यापादयामासुः अत्रांतरेभास्करे अस्ताचलाग्रंअवलंबितेयु
द्धंनिवार्य सैन्यंस्वस्वस्कंधावारंजग्मुः ततःप्रभातेहिरण्यनाभोमहारथिभिर्नृपैःपरिवृतोयादवीयंसैन्यंगाहतेस्म ततोयादवसै
न्यात् जयसेनमहाजयौबाणवृष्टिभिःश्रावणभाद्रपदाविववर्षंतौधाविंतौ तेषांचिरंयावन्महायुद्धंबभूव ततोहिरण्यनाभस्य
नेभाप्य जयसेनंमहाजयंचापिनिपातयामास ततस्तयोर्वधात्क्रुद्धानाधृष्टिःस्फुरद्बाहुवीर्यस्त्राणिक्षिपन् क्रमात् रथंरथ्या
न् सारथिं ततोहिरण्यनाभंचच्छेदयांचकार इतोरथनेमिःस्वबंधुजयसेनमहाजयौहतौविज्ञायक्रुद्धोजरासंधस्य एकोनविंश।

33||1962

तिपुत्रान्जघान एवंअनाधृष्णिरथनेम्यादयो यादववीरा जरासंधसेनांवक्रुधानिर्मथ्यदिनांतेस्वस्कंधावारंप्रापुः अथप्रभा
तेजरासंधःस्वयंरामकृष्णयोर्वधंप्रतिज्ञायशिशुपालंसेनान्यंपुरस्कृत्यरणांगणआययो यादववीराः तथैवसमाजग्मुः अथ
हंसकवचनात् रामकृष्णौउपलक्ष्यक्रोधोद्धुरोजरासंधस्तौप्रतिरथंप्रेरयामास ततस्तंकुद्धंयममिवागच्छंतंवीक्ष्य बलभद्रस्य
दशपुत्राबाणश्रेणीर्मुचंतःप्रतिजग्मुः इतःशिशुपालोपि अमर्षवशात् कृष्णोपरिपुष्पवृष्टिमिवबाणवृष्टिंचकार कृष्ण
स्तुक्रमात्तस्यमुकुटंकवचं ततोधनुःसारथिंरथद्यान् तदनंतरंशिरोपिअछिनत् इतोजैर्यरासंधस्य अष्टाविंशतिःपु
त्राः रामेणसमंयुद्ध्यंतोरामास्त्रघातेनैवमृतिंप्रापुः जरासंधोपिरामस्यदशपुत्रान्हत्वा रामंगदयामूर्द्धिअताडयत् तत्प्र
हारात् रामोमूर्छांप्राप्यभूमोपपात ततःपुनरपिरामवधोद्यतंजरासंधं अर्जुनोबाणवृष्टिभीरुरोध ततोरामंतथाविधंवी
क्ष्यातिदुःखितःकृष्णोजरासंधस्य एकोनसप्ततिंपुत्रान्जघान ततोदिनांतेजातेसतिरणान्निवृत्तेउभेअपिसैन्येस्कंधावारं
जग्मतुः अथरात्रौजरासंधोयादवान्दुर्जयान्विज्ञाय पूर्वसाधितांजराविद्यांसंस्मृत्य यादवसैन्येजरांमुमोच साजरानेमिंरा
मंकृष्णंच इत्येतान्त्रीन्पुरुषान्मुक्त्वा अन्यत्सर्वंचतुरंगमपि यादवसैन्यंकालरात्रिरिवअग्रसत् तयाक्रांतागजाश्च

नभटादयःसर्वेपिनष्टचेतना श्वासमात्रानुमेयजीविताअभूवन् ततःप्रभातेकृष्णोनिजसेनांतथाविधांदृष्ट्वा किंचित्खेदव्य
ग्रमना अरिष्टनेमिंप्रतिइतिप्राह अहोभ्रातःकिमयंअस्मत्सैन्ये अकालेरूपकालःसमुपस्थितः सैनिकास्त्वेते संतोप्य
संतइव रामस्तुगदाघातपीडितोवर्त्तते इदानींतुकेवलंआवाञ्जौअशक्तिनौस्तः एषशत्रुस्तुछलप्रियोनिःशेषसैन्ययुक्तश्चस्ते
आवांबलंनिहंतुंतत्परोस्तिकिंच तवबलस्याग्रेसर्वेपिसुरासुरेश्वरास्तृणायंते तत्रअस्यबलंकियन्मात्रं परंयावत्त्वंचित्तेनधा
रयसि तावदेवअस्यबलंविद्यते त्वयिसमुद्यतेतुसिंहाग्रेजंबुकवत् स्थातुंएवनशक्नोति तत इदानींतवसाहाय्यंकर्तुंयु
ज्यतेएवेतिश्रुत्वा श्रीनेमीश्वरोवधिनाविलोक्यकृष्णंप्राह शृणुहरे जरासंधस्तवपराक्रमेण पराभूतोन्योपायंअपश्यन्
सैन्येजरांमुमोच तद्वशात्सर्वेप्येते ईदृशीअवस्थांप्राप्ताः यद्यपिएकएवत्वंजरासंधरुयं कर्तुंसमर्थस्तथापि एतेजराग्र
स्ताःसैनिकाउपायंविनाप्राणान्मोक्ष्यंति ततस्तेषांमल्लीकरणोपायंशृणु तथाहि पातालेधरणेंद्रस्यदेवतालये भविष्यतः
श्रीपार्श्वनाथस्यप्रतिमास्तित्रिभिरुपवासैर्धरणेंद्रंआराध्य तांप्रतिमांयाचस्व सचतुःइष्टलांदास्यति तस्याः स्नानजलेन अभि
षिक्ते एतत्सैन्यंसज्जं भविष्यति ततःकृष्णस्त्रीणिदिनानिमयिध्याननिष्ठेसतिसैन्यस्य रक्षांकःकरिष्यति तदानिःसंगोपिश्री

333/1962

नेमिर्व्विहारं पुरस्कृत्य दिनत्रयं यावत्सैन्यरक्षां स्वयं अंगीचकार ततः कृष्णोपि दुष्टचित्तः सन् उपवासत्रयं कृत्वा एकांतेध्यानपर
स्तस्थौ इतोजरासंधोयादवसैन्यं विबलं ज्ञात्वा चतुरंगसैन्यं कृत्वा अद्य अयादवपांडवां पृथ्वीं विधास्ये इति वांछन् समाययौ
अथ श्रीनेमेरादेशात् मातलिः स्वसैन्यस्य पृष्टे रथं चमथामास तस्य निर्घोषशब्देन जरासंधसैन्यं निश्चेष्टमिव बभूव ततः प्रभुर्विश्व
क्षोभकरं शंखनादं चकार ततः शक्रेण दत्तं धनुः समारोप्य टंकारं अकरोत् ततः रुणान् बाणवृष्टिभिः समग्रं गगनांगणं अपूरय
त् ततस्तस्य रथावर्त्तबाणवर्षे भेतुं असमर्था जरासंधपक्षा राजानो रणे माक्षिणइव दूरे तस्थुः ततः स्वामी करुणैकजलधि
केषांचिन्मुकुटं केषांचित् ध्वजं केषांचिच्च धनुस्तूणीरादीन् छेदयामास नचकस्यापि प्राणान् जहार इतः कृष्णस्य ध्यानासक्त
स्य तृतीयदिवसे प्रभातं जातेस्मिन् पद्मावती प्रकटीबभूव कृष्णोपि देवतापरिवृतां तां दृष्ट्वा भक्त्या प्रणम्य स्तुतिपूर्वकं इति
प्राह धन्योद्यानं कृतार्थोस्मि पवित्राः स्मि पावने अद्यमे सफलाः कामा यद्दृष्टं तव दर्शनं १ वर्णयामि कियद्देवि ते भवं ते स्वजिह्व
या शक्रादयोपि यद्भ कुंशक्ता नो विबुधाधिपाः २ इत्यादि वाक्यैः प्रसन्ना सा प्राह हे कृष्ण किमर्थं अहं स्मृतास्मि यत्कार्यं भवति
तत् कथय तामिति ततः कृष्णः प्राह देवि यदि त्वं तुष्टासि तर्हि यत्र देवतालये पार्श्वनाथस्य बिंबमस्ति तद्देहियेन तस्य स्नानजलं

निषिच्य जराग्रस्तं तत्सैन्यं उज्जीवयामीति ततो देवी प्राह हे कृष्ण तव बंधुः श्रीनेमिरेव जगतो रक्षायां समर्थः यः स्वामी जगत्प्र
भुः जगद्गुरुर्जगत्कर्ता जगदुद्धारः सर्वसुरासुरवंदितः तस्याग्रतः काजरा को जरासंधः कियन्मात्रं च सर्वेपि सुरासुराः तस्याज्ञां प्रा
प्य अहमेव जरासंधं ससैन्यं वधात्तवाग्रे मुंचामि अथवा यद्वांछसि तदत्रैव क्षिप्तं करोमि ततः कृष्णः प्राह देवि त्वयि तुष्टायां
सर्वमपि एतत् सुलभं परं मयापि श्रीनेमेरादेशात् त्वं आराधिता त्रिजगद्विख्यातमहात्मस्य श्रीनेमेः पौरुषं जगति कोन जानाति परं त
था कृते सति अस्माकं पौरुषं अफलं भवति ततः प्रसादं कृत्वा प्रतिमां एव अर्पय यथाहं स्वयमेव शत्रून् निराकरोमि इति कृष्णाः
प्रह्लात्य पद्मावती दिव्यशक्त्या तां प्रतिमां तत्र आनीय कृष्णाय दत्वा स्वस्थानं जगाम अथ कृष्णः समुल्लसन्मनास्तस्याः प्रतिमायाः स्नानप्र
णादि भक्तिं कृत्वा स्नानजलेन सर्वसैन्यं अभ्यषिंचत् तज्जलस्पर्शमात्रादेव पुनर्नवावतारमिव लब्ध्वा चैतन्यं समुत्तस्थौ ततः प्रलयका
लीनसमुद्रमिव दुर्धरं समुद्रविजयं प्रणम्य सहर्षः कृष्णः पंचजन्यशंखस्य नादं अकरोत् तच्छ्रवणात् जरासंधस्य सैन्ये महान्नि
र्घोतो भवत् ततो भगवान् अरिष्टनेमिर्मरुशोनृपाणां गर्वापहारं विधाय प्रतिवासुदेवस्तु वासुदेवस्यैव वध्य इति जरासंधं जीवंतं
मुक्त्वा दिनत्रयं सैन्यरक्षां कृत्वा सैन्ये समागतो रणान्निवर्त्ततेस्म अथ स्वस्य भद्रोपि प्रहारव्यथां अनुभूय मत्सीभूतः सन् मुशला

३३५।१९६२

क्षिणसहस्रशः शत्रुभटान् अचूर्णयन् अथजरासंधोपिरोषांधः सन् कृष्णंप्रतिरथंअचालयत् कृष्णोपिवैरिवनदावाग्निरिव प्रसरत्प्र
तापः संमुखंरथंप्रेरयामास ततस्तयोरथचक्रैः पिष्टाभूमिर्विश्वभंगभ्रमंजनयामास ततः शस्त्रैः शस्त्राणिदिव्यास्त्रैर्दिव्यास्त्राणिप्रहरं
तौ तौवीरशौंडीरौ उदयाचलास्ताचलाविवआस्फलतां ततश्चिरंयुध्यमानोजरासंधः प्रक्षीणसर्वास्त्रः क्रोधारुणोभूत्वाचक्रंस्मरतिस्म
ततोवह्निकणान् विमुंचन् चक्रंतस्यहस्तेआजगाम ततोनिरोषाज्जरासंधः कृष्णंप्रतिप्राह रेरेगोपअद्यापिगर्वंत्यक्त्वाममाज्ञामन्यस्य
जीवन्सन् पुनर्गोपालत्वरूपेणस्वकुलकर्मणावृत्तिंकरिष्यसि नोचेत् इदंचक्रंतवशिरोलुनिष्यति इतिप्रलपंतंजरासंधंकृष्णःप्राह
रेजरासंधत्वयासत्यमुक्तं यतोगोपालैनपृथ्वीरक्ष्यते तस्याःपालनंएवअस्माकंकुलकर्म ततस्त्वांहत्वाअहंजीवन् पृथ्वीपालनरूपं
स्वकुलकर्मसमाचरन्वर्तिष्ये ततश्चक्रंमुंच विलंबंकिंकरोषि इतिश्रुत्वाजरासंधोपिरोषात्चक्रंभ्रमयित्वाकृष्णंप्रतिमुमोच ततस्तच्च
क्रंवेगात् कृष्णंप्रदक्षिणीकृत्य कृष्णस्यैवहस्तोपरिअतिष्ठत् ततःकृष्णोपिस्वस्यवासुदेवत्वंनिश्चित्य तच्चक्रंकरेकृत्वजरासंधंप्रतिमु
मोच तदपिरणरणत्कारंकुर्वन् तत्रगत्वा जरासंधस्यगलनालंचिच्छेद तच्चकाहतोमगधेशोमृत्वा चतुर्थनरकंप्राप्य ततश्चाकाशे
जयजयकृष्णनवमवासुदेव चिरकालंत्रिखंडभरतंपालय इत्यादिवदंतोदेवगणाःकृष्णस्यमूर्द्ध्नि पुष्पवृष्टिंचक्रुः अथजरासंधस्य

पुत्रा मुकुंदनदेवप्रमुखाःसमागत्यकृष्णंप्रणमंतिस्म कृष्णोपितान् समाश्वास्यराजगृहराज्येस्थापयामास अथश्रीकृष्णःश्रीपार्श्वनाथ
स्यप्रकटमहिमानंवीक्ष्य प्रमोदोल्लसन्मानसः तस्यतीर्थंचिह्नंविचिंत्य तत्रशंखेश्वराभिधंपुरंवासयित्वा तन्मध्येप्रोत्तुंगप्रासादे श्रीपार्श्वप्र
भुंस्थापयित्वा तदग्रतोभक्तिप्रह्वांनिजांमूर्तिंसंस्थाप्य तत्पुरंपार्श्वप्रभोःपूजार्थंददौ अथयादवाःअनिमेषतयाविध्वंसैन्यरक्षणपौरुषं
वीक्ष्य हर्षोल्लसितांगाः स्वकुलंजन्मनाचितेनधन्यंमन्यमानानानास्तुतिभिःप्रभोर्महिमानंवर्णयामासुः ततोमातलिरपिभगवतःपादौ
प्रणम्य अनुज्ञांप्राप्य सौधर्मेसौधर्मेंद्रायसकलंभगवतोधैर्यचरित्रंख्यापितवान् ततोवासुदेवःपांडवेभ्यःइंद्रप्रस्थं कुरुभ्योनोपअपि
ध्यांमहानेमये शौरिपुरंअन्येभ्योपियथायोग्यंददातिस्म ततोवासुदेवश्चक्रपृष्ठानुगःसर्वयादवैःपरिवृतोर्द्धभरतंसाधयितुंप्रतस्थे ततःष
ड्भिर्मासैर्देशसाधनंकृत्वाएकांतपत्रांपृथ्वींविधाय षोडशसहस्रराजभिःसहमहोत्सवपूर्वकंद्वारिकांप्राविशत् ततोहरिर्नरनार्द्धनिवा
सिदेवताश्रितांकोटिशिलांभुजलात् चतुरंगुलंयावत् उद्दधार इत्यादिसर्वेषांवासुदेवानांस्थितिरिति इत्थंपूर्वोपार्जितपुण्यप्राग्भारो
पनतं वासुदेवसाम्राज्यंकृष्णोभुनक्तिस्म इत्थंमहापदंभोधिं तीर्त्वापांडवयादवाः प्रापुरुच्चैःपरंप्रौढिं सत्वप्रवहणंश्रिताः १

इतिश्रीशत्रुंजयमहात्म्यांतर्गतश्रीरैवताचलमहात्म्योल्लेखे पंडितश्रीहंसरत्नविरचिते पांडवजयप्राप्तिजरासंधवध श्री

श्रर पार्श्वनाथप्रकटनादिवर्णनोनामद्वादशोधिकारः १२ सुरासुराद्यप्यतुलप्रमाणं नमंनिवद्धांजलयोयमुच्चैः ध्यायंतियंयोगि
दोहृदंतस्तंनेमिनाथंप्रणतःस्तवीमि १ श्रथाऽत्रतःशृणुसुधर्माधिप श्रीनेमिचरित्रंगिरिनारगिरेर्नंदाप्यंच तथाहि प्रभुश्रीश्ररिष्ट
नेमिर्भगवान् स्वकीयैर्लोकातिशायिभिः सौभाग्यादिगुणैर्विश्वत्रयजनमनांसिप्रीणयन् श्रकौतुकोपि नानाकौतुकक्रीडाभिःक्रीडन्विज
हार श्रन्यदासस्वइच्छानुसारिभिःसुरैर्यदुकुमारैश्चपरिवृतोहरेरायुधशालांप्राप्य तत्रकृष्णस्यपांचजन्याभिधंशंखंसुदर्शनंचक्रंकौ
मोदकींगदांशार्ङ्गधनुः श्रन्यान्यपितत्रायुधानि धूपदीपपुष्पार्चनादिभिःपूज्यमानानिवीक्ष्यविनोदार्थंप्रभुःशंखंगृहीतुमिच्छुःशस्त्रा
गाररक्षकेणऊचे स्वामिन्यद्यपि[illegible]लघुःपराक्रमसिंधुरसि तथापि एतस्मिन्शंखेमनोरथंमाकुरु यतएकंकृष्णंविना एनं
शंखंगृहीतुंश्रपिनान्यःकश्चित्समर्थःस्यात् इतिश्रुत्वास्वामीसुरगणानांविनोदायलीलयातंशंखंकरेकृत्वा ईशन्मात्रप्रयत्नेनवाद
यतिस्म ततस्तच्छब्दःसमग्रांपुरींप्रपूर्यप्रतिछंदकैःसमुद्रस्यपरतीरंप्राप्य ततःकंपिताप्टथ्वी सागरःसमुद्रेलोभूत् पर्वतशृंगा
णीवनकवकाणिसमुछलितानि सौधगवाक्षाट्टादीनित्रुटित्वाभुविपतंतिस्म गजाश्वादयोबंधनानि उन्मुच्यपलायनंचक्रुः जनाः
सर्वेपिकर्णेषुतद्दकीलघातान्मूर्छितांइवभूमौलुठतिस्म रामकृष्णादशार्हादयोपिजातोत्कंपाःक्षोभंप्रापुः ततःकृष्णःक्षणंमूर्छि

तइवनेत्रेमीलयित्वा शिरोवधूयइतिप्राह श्रहोकश्चिन्नवोवासुदेवोजातःकिंवाकश्चिच्चक्रीप्रकटितः यथाजरासंधोपरिश्रहं जातः
तथैवममोपरिनूनंकश्चिदयंप्रकटितः त्रैलोक्येपिनान्यः कोप्येवंविधंशंखनादंकरोति ततःप्रथमतएव श्रहंसावधानोभवामीतिकृ
त्वासेनांसज्जयामास राजलोकेपुरेत्रिकचतुष्कचत्वरादौचमहान्कोलाहलःसमुछलितः वादिताःप्रयाणभंभाभेरीकोलाहलादिशब्दाः
इत्येवंयावत्कृष्टःससैन्यःसन्नद्धगंतुंप्रवृत्तः तावत्श्रायुधशालापालकश्रागत्यविनयावनम्रोवदतिस्म स्वामिन् किमर्थंइत्थंसंग्रामसाम
ग्रीक्रियते श्रनेनव्यर्थप्रयासेन श्रलंप्रत्युतहर्षोदयकारणमेतत् यतस्तवैवबंधुःश्रीश्ररिष्टनेमिस्त्रैलोक्येपिश्रप्रतिमःपराक्रमःश
स्त्रागारमायातोभूत् श्रस्यपुराणस्यश्रसारस्यशार्ङ्गस्यारोपणेभंगइतिशार्ङ्गंत्यक्त्वा ईयंपामरजनयोग्याइतिगदांउन्मुच्य चक्रंतु
कुलालचक्रभ्रमणवत् पौरुषस्यलज्जाकरंइत्यंवज्ञायकिंचिद्विनोदलीलारूपंशंखंविनाय श्रस्माभिर्नीतिवाक्यैर्वार्यमाणोपिम
तवबंधुर्लीलामात्रेणवादयामास ततोमुच्यतांनिःकारणंरणोद्यमश्रमं इतिश्रुत्वानिजबंधोःश्रीनेमेस्तादृक्पराक्रमाश्चर्यंकृत्वावि
वासुदेवःक्षणंस्तंभितइवस्थित्वासमरारंभेउद्यमंत्यक्त्वाकिंचिद्विचारपरस्तस्थौ श्रथश्रीनेमिस्वामीइत्थंनिजबललेशंदर्शयित्वा
पुनःखेलयाखेलयन्हरेःसभांप्राप्य तत्रसंवर्मितान्सर्वायुधपाणीन्संग्रामार्थसज्जितान्सुभटान् रामकृष्णादींश्चान्यःश्रपि

339|1952

त्रान् इत्यसंवर्ससंभ्रमात् नानाभावसंकीर्णान् अपश्यत् ततःकृष्णोपिनेमिंवीक्ष्य किंचिल्लज्जावनम्रमुखः आकारगोपनंकृत्वाससंभ्रमादरे
ण श्रीनेमिंआभाष्यइतिअपृच्छत् भ्रातःकिमर्थंअद्यपांचजन्यःपूरितः यदिवाभवतातुक्रीडामात्रेणैव एषनादःकृतःपरंएतच्छब्देनस
क्षोलसागरंजगत्क्षोभंप्राप्तंइतिश्रुत्वा श्रीनेमिःसहजविनोदेनैवअस्माभिर्लीलाविहिताइतिप्रत्युत्तरंददौ अथहरिस्तथाविधंश्रीने
मेर्बलंधैर्यंचविलोक्यसाशंकइवबलभद्रमुखेदृष्टिंदत्वापुनर्नेमिंप्रतिअत्यंतःकर्कशंबहिर्मधुरंइतिवचःप्राह भ्रातर्लोकोत्तरेणानेनतव
वीर्येणगांभीर्येणचहृष्टोहं अद्यत्रिभुवनस्यापिसाम्राज्यंहस्तागतंमन्ये यथाममवीर्येण बलदेवोविश्वंतृणवन्मन्यते तथाहमपि
त्वत्पराक्रमेणसर्वसुरासुरनायकान्तृणवन्मन्ये किंच चंद्रेणसमुद्रइवत्वयैकेनश्रीयादववंशोधिकंशोभांप्रापितः किंच लोकोत्तरंतव
बलंजानन्नपि अद्याहंसाक्षात्तवभुजबलंवीक्षितुंसमुत्सुकोस्मि ततोदर्शयकिंचित्स्वभुजविक्रमंइतिकृष्णवचनंश्रुत्वा तदीयंहृदय
गतभावंजानन् श्रीनेमिरपिअक्षुब्धचित्तःसन्ॐइत्युक्त्वाअंगीचकार ततस्तौद्वौबंधूबलभद्रसहितौआयुधशालांजग्मतुः अ
थतत्रश्रीनेमिःअचिंतयत् नूनंएषकृष्णोमत्ताकाशादपिभयंचिंतयति एषमेभ्राताबलवान्राज्यंगृहीष्यतीति धिक्२ अहोलोभविलसितं
अहंतुत्रिभुवनाधिपत्येपिनिःस्पृहोअन्यग्रहणोत्सुकश्चास्मि परंमोहाच्छादितबुद्धित्वात्अयंनमन्यते ततएवबलपरीक्षार्थंउद्यतोस्ति परं

ममभुजोरुपाणिपादादीनांबलंतु॥अयंकथंसहते॥यथाकदलीस्तंभःपक्षिपदानिसहते॥परंऐरावणसंघट्टनंनसहते॥ततोयथाअस्य
अनर्थोनभवति॥यथाचमेबलपरीक्षांअपिलेशमात्रेणजानाति॥तथैवकर्तव्यं॥ इतिचिंतयित्वाप्रभुःआह॥भ्रातःपादाभिघातभू
मिपतनंरजोगुंडनादिभिर्गर्हितं॥पामरजनोचितंबाहुयुद्धंतुआवयोः॥अयुक्तंशास्त्रयुद्धंतुशास्त्रजनेषुयोग्यंतदपिआस्तां॥ततोन्यो
न्यंभुजनामनेनबलपरीक्षांकुर्मइतिकृष्णोपितत्अंगीकृत्य॥पूर्वंस्वभुजंप्रसारयतिस्म॥तंचश्रीनेमिर्भुजवामेन॥कमलनालमिवआ
लयत्॥ततःस्वामिस्वकीयंवामभुजंप्रसारयित्वास्थितःसचकृष्णेनसर्वबलेनबाध्यमानोपिनवलितः॥ततःकृष्णोपिभुजद्वयेनापितंभु
जंअवेष्ट्यत्॥तथापियदिनवलितः॥तदावृक्षशाखायांवानरइववल्गुलिकाइवस्वयंअलंबयत्॥तथापियदिकिंचिन्मात्रंनवलितस्तदाकृ
ष्णोविलक्षीभूय॥अंतःखेदंप्राप्तोपि॥आकारगोपनंकृत्वाबहिःप्रसन्नाकारंदर्शयित्वा॥श्रीनेमिंसमालिंग्यइतिप्राह॥बंधोत्वयाअपरि
मितबलेनबंधुना॥अहंविश्वमपिजेतुंसमुत्सहे॥किंचसर्वनेषु॥मेरुरिव॥सर्वकुलेषु॥दशार्हाणांकुलंसर्वोत्तमंमन्येइत्यादि॥प्रसन्नंगंभी
रयावाण्याप्रशंसांकृत्वा॥श्रीनेमिंविसृज्य॥शंकितचित्तःसन्॥बलभद्रंइतिप्राह॥भ्रातःएषोरिष्टनेमिः॥अनंतबलनिकेतः।यदिकथं
चित्॥अस्माकंराज्यंगृह्णाति॥तदाकएनंनिवारयति॥इतिश्रुत्वा॥रामप्राह॥भ्रातर्नैवंशंकितव्यं॥यतः॥आजन्मविरक्तोसौभगवान्॥भो

गेषुरिरकश्चिन्नोव्रतग्रहणसमयंप्रतीक्षमाणोस्ति॥अयंभगवान्॥संसारनिबंधनकारणंराज्यंकथंगृह्णातुंइच्छतिय॥समाधिसुखरसिको भवति॥तस्यविषयसुखाशक्तिस्तुविषरूपाप्रतिभातिकल्पद्रु॒फलास्वादसक्तानांनहिकिंपाकफलेऽभिलाषःस्यादित्यादिभिर्बलदेव वाक्यैरपि॥अविगतशंकःकृष्णोमौनंकृत्वास्थितः॥ततःशक्रःप्रभोर्विलसितंज्ञात्वा॥कृष्णस्यशंकानिवारणार्थं॥विगात्तत्राऽगत्य॥श्रीनेमि श्वरंनत्वाकृष्णंप्रतिप्राह॥अहोकृष्णवासुदेव॥त्रिषष्टिशलाकापुरुषाःसर्वजनेभ्योपिअधिकबलाभवंति॥त्रिषष्टिपुरुषेष्वपि॥ती र्थकराअनंतबलाभवंति॥परंतेसंसारसुखेभ्योविमुखाभवंति॥ततएवतेषांपुरतोस्मदादयः॥शक्राअपिकिंकराइवतिष्ठंति॥तत्रायं श्रीनेमिस्वामी॥पूर्वतीर्थकरनिर्दिष्टोद्वाविंशोजिनस्त्रिलोकीवंदितपादपद्मोपि॥तवेदंतुच्छंराज्यंकथंगृह्णातुमिच्छति॥पूर्वंअपितया स्य॥तथाविधंपौरुषंदृष्टमस्ति॥ततइदानींकिंविकल्पजालंकरोषि॥अयंतुदीक्षावसरंयावत्॥भोगकर्मक्षपयन्॥संसारेस्थि तोस्ति॥ततोव्रतंगृहीत्वा॥धर्मतीर्थप्रवर्त्यमोक्षंलप्स्यते॥इतिइंद्रवचनात्॥शंकांनिवार्यकृष्णः॥श्रीनेमिंक्षमयामास॥ततः॥शक्रं विसृज्य॥श्रीनेमिमादायकृष्णःस्वांतःपुरंययौ॥तत्रद्वारपालान्प्रतिअसौममभ्रातायथेच्छं॥अंतःपुरेक्रीडार्थंआगच्छन्॥नरिषेध्यइ तिसमादिश्य॥श्रीनेमिंविसृज्यकृष्णःस्वांतःपुरेभोगान्॥भुंजानस्तस्थौ॥श्रीनेमिरपिनिर्विकारमनायथासुखंविहरतिस्म॥अन्य

दाग्रीष्मर्त्तौअंतःपुरीजनसहितःकृष्णोनेमिंसहाय श्रीरैवताचलेक्रीडार्थंजगाम तत्रताःकृष्णपत्न्यःसरसिजलःक्रीडांकुर्वंत्यःकंकणा नांरणत्कारैर्वलयानांखलत्कारैस्तूर्यध्वनिंप्रकटयंत्यइवजलोत्करैःकृष्णंअभ्यषिंचन् ताभिरभिषिक्तोहरिर्वर्षाकालीनऋरत्निर्भरा भिरामः शैलइवशुशुभे इत्थंनानाक्रीडारसेप्रवृत्तेकृष्णप्रेरिताः सत्यभामारुक्मिण्यादयोंतःपुर्यः श्रीनेमिना नानाविध मौक्ति भिःक्रीडांचक्रुः ततःकाश्चित्कनकशृंगमुक्तैःकुंकुमजलैःकाश्चिच्चघनसारादिचूर्णैःकाश्चिच्चनानाविधवर्णकैः काश्चित्केवल जलास्फालनैश्च नेमिंप्रतिआछोटनंचक्रुः भगवान्नेमिस्तुनिर्विकारमनाःकेवलंतासांविनोदनार्थंताभिःसहअखेलत् ततःश्रीनेमिं क्रीडापरंवीक्ष्यहर्षितः कृष्णःस्वयंजलक्रीडांकृत्वाहंसवत्सरस्तीरंसमाश्रयत् इतश्चनेमिरपिजलक्रीडांकृत्वा यावद्बहिर्निर्गतः तावत् सर्वास्तंवेष्टयित्वा नानानर्मकेलिवाक्यैर्हास्यक्रीडांचक्रुः तत्ररुक्मिणीप्राह देवरसंसारे सुंदरीविलासात् अन्योनास्ति अधिक कोपिरसः त्वंतुएकामपिसुंदरींनवरयसि ततस्त्वंसुखंविनाकिमेवंवृथैवजन्मगमयसि तवभ्राताकृष्णःषोडशसहस्रपत्नीर्निर्वि करोति तस्यभ्रातात्वं एकामपिअनिर्वहन् कथंनलज्जसे ततोजांबुवतीप्राह नूनंदेवरःपौरुषरहितो यादव[illegible]शक्तस्ततो गृहव्यापाद्भीतोनोद्वाहयति पूर्वतीर्थकरास्तुसर्वेपि भुक्तराज्यगृहाश्रमाः शांतेव्रतंसमाश्रिताः अयंतुअपूर्वएवतीर्थंकर[illegible]मा

343/1962

दिभिरपि॥ अत्याग्रहेकृते स्वामी अचिंतयत्॥ अहोमहामोहस्य विलसितं॥ यतः स्वयंसंसारसमुद्रे पतिताः परानपि पातयंति तथा मयाव
चनमात्रेण एषांमाग्रहोनुमंतव्यः॥ इदानीं आभिःसह वदुक्तमेवादकरणं अनुचितं पश्चात्स्वचित्तवांछितं साधयिष्यामि॥ इतिकृत्वा॥ युष्मा
कसमीहितं करिष्यामः॥ इति उत्तरं ददौ॥ ततो हर्षिताभिस्ताभिर्देवरेण विवाहो मानित इति हर्षो भ्रालब्धनिश्चक्रे॥ ततो हर्षितः॥ कृष्णापि नि
मिंगजेआरोप्य॥ सांतः॥ पुरामहोत्सवेन सप्तद्वारकाप्राप॥ ततः समुद्रविजयशिवाप्रभृतयोपि नेमेर्विवाहस्वीकारेण प्रीता बभूवुः॥ ततः सत्यभा
मास्वभगिनी उग्रसेनपुत्रीं राजीमतीं नेमेर्योग्यां कन्यां प्राह॥ तत् श्रुत्वा कृष्णः स्वयं उग्रसेनगृहे गत्वा॥ अत्यादरपूर्वकं श्रीनेमिकृते राजीमतीं
प्रार्थयत्॥ उग्रसेनोपि दुष्टः प्राह स्वामिन् राज्यं गृहं सर्वसंपदश्च॥ ततः किमेतदधिकं इतिकृत्वा तत्प्रमाणीचकार॥ ततः कृष्णोपि क्रोष्टुकिव
चनात्॥ श्रावणशुदिषष्टीदिने विवाहलग्नं निर्द्धार्य धवलमंगलगानमंडलतूरनिर्घोषपूर्वकं विवाहोत्सवप्रारंभं चकार॥ अथ आसन्ने॥
[illegible]शृंगारिता॥ हट्टश्रेणयः बद्धानि प्रतिद्वारं॥ तोरणानि कृताश्च मंचरचनाः कृताश्च पुरांतः सर्वचैत्येषु विशेषपूजोत्सवाः दीयंते च॥ बंदी
[illegible]षु विविधदानानि निमंत्रिताः स्वजनपरिजनादिवर्गः भोजिताश्च॥ नानाभक्ष्यभोज्यैर्ज्ञातयः॥ प्रवर्त्तितानि नानानृत्यादिप्रेक्षणकानि॥ अथ
[illegible]दिवस॥ अ[illegible] देवीरोहिणीदेवकीभामाद्याः सर्वेपि गोत्रवृद्धाः संभूय॥ श्रीनेमिं सिंहासने संस्थाप्य स्नपयामासुः॥ स्नानांते च सर्वालंका

रैः शोभयांचक्रुः॥ ततउग्रसेनगृहे गत्वा कृष्णः स्वयं राजीमतीं॥ कौसुंभवस्त्रादिभिरध्यवासयत्॥ अथ श्रीनेमिस्वामी गोशीर्षचंदनलिप्तांगः श्वेत
शृंगारवस्त्रधरो धृतछत्रचामरः पुरोगामिभिः अनेकराजन्यकुमारैः यदुकुमारैश्च परिवृतः श्वेततुरगैरथं समारुरोह॥ प्रभोरुभयपार्श्वतो
गजारूढा॥ अनेकेराजानः पृष्टतो यदवादशार्हाः रामकृष्णौ च॥ प्रतस्थिरे॥ तेषां पृष्टतश्च शिबिकारूढाः सर्वा अंतःपुरस्त्रियो धवलमंगलध्व
निनाहर्षाद्वैतमयं गायंति स्म॥ ततो नर्त्तकीजनेषु नृत्यत्सु याचकजनेषु मंगलवादं पठत्सु वाद्यमानेषु सर्ववादित्रेषु दीयमानेषु॥ अनगा[illegible]दा
नेषु॥ अमंदप्रमोदोद्दासिषु॥ स्वजनवर्गेषु जनानां नेत्रकोटीभिर्निरीक्ष्यमाणः स्तूयमानः कवीश्वरैर्वर्ण्यमानः पुरपुरंध्रिभिः स्वपंचम
हामोहनिर्मितं भवनाटकस्वरूपं चिंतयन्॥ श्रीनेमिस्वामी उग्रसेनगृहान् प्रतिप्रतस्थे॥ इतो राजीमत्यपि कृतस्नाना सर्वाभरणभूषिता
॥ श्वेतमाल्यलपनवस्त्रधरासाक्षात्पूर्णिमारात्रिरिवोज्वलशोभावती॥ समानवयस्कसखीजनपरिवृता॥ वरागमनवादित्राणि श्रुत्वा॥ रोमांचि
तगात्रा बभूव॥ ततो भावाभिज्ञासखी राजीमतीं प्राह॥ सखि त्वया पूर्वभवे शुद्ध[illegible]॥ श्रीजिनः समाराधितः॥ ततः एवत्वया ईदृशो वरो लब्धः
शक्रादीनामपि यस्य दर्शनं दुर्लभं स प्रभुः साक्षात्तव गृहांगणे समेष्यति एतानि तदागमनवादित्राणि वाद्यंते॥ एहि तमेव आगच्छंतं॥ सर्वस
मृद्ध्या परिवृतं पश्यामः॥ इति तद्वाक्यात्॥ राजीमत्यपि नेमिदर्शनोत्कंठिता सखीभिः समं गवाक्षे स्थिता अन्यायलोक[illegible] किरः इत्येवभ[illegible]

चंद्रवंशाभिनाछत्रेण भ्रियमाणेन॥हंसीजलजाभ्यांचामराभ्यांवीज्यमानाभ्यांशोभितं मूर्तिमंतं त्रिभुवनस्य भाग्यसमूहमिवसमुत्सुसंतं॥श्रीने
मिंवीक्ष्ययावत्सखीभिःसमंराजीमती किंचित्कथयत्यस्ति॥तावत्तस्यादक्षिणंनेत्रं॥दक्षिणांगंचस्फुरितं॥तदेवकिंचिच्चिंताकारणंविचिंत्य
राजीमतीनिःश्वस्यसखीःप्रत्याह अहोसख्यःशकुनवैपरीत्यात् अहं एवंजानियन्नेमेर्मिलनंममदुर्लभं भविष्यतीतिश्रुत्वाताःसख्यःप्राहुःस
खिअमंगलंप्रतिहतं॥अपशकुनानिक्षारसमुद्रेपतंतु॥नेमिस्तुगृहांगणंआयांतःअत्रकःसंदेहोस्तीति॥अथनेमिनोरथःउग्रसेनस्यद्वार
तोरणंप्राप्तः॥तत्रस्वामीबहूनांपशुपक्षिणाबद्धानांरुद्धानां॥दीनकरुणस्वरंकलकलंशृणोतिस्म॥तेचअशरणाअनाथाःदुःखिताःप्रा
णिनःपरमकरुणैकसागरंत्रिभुवनरक्षाक्षमंप्रभुंविज्ञायस्वदुःखंकथयंतइवप्रूत्कारंचक्रुः॥ततःस्वामीजानन्नपिकथंएषपशुसमूहः
करुणंरौतीतिसारथिंपृछतिस्म॥ततःसारथिःप्राह॥स्वामिन्॥तवविवाहेगौरवभोजनदानार्थंउग्रसेनेनएतेजीवामिलिताःसंति॥इतितद्व
चनं श्रुत्वास्वामीदयार्द्रमनाइतिअचिंतयत्॥अहोधिग्धिग्विषयसुखंयइज्ञानात्॥सर्वोपिजनस्तत्त्वार्थविमुखोभ्रमतिआपात्रमात्ररम्या॥
एतेविषयाःनरकनिगोदादिदुःखंतुअनंतकालेनापिदुरतश्चयंशरीरादिसर्ववस्तुक्षणभंगुरं॥तस्मात्येकोविवेकीस्वकार्यंविनाशयतिको
वा हितं चक्र ॥देरंददति॥इतिविचिंत्यप्रभुःसारथिंप्रत्याह॥अरेरथतुरगान्वालय॥नाहंमानुषींकन्यांपरिणेतुंइच्छामि॥अ

नंतसुखदांमुक्तिकन्यामिववरिष्ये॥इतितत्रोवालितरथंनेमिंदृष्ट्वासमुद्रविजयोनरासदृग्निंआनीयप्राह॥वत्सअस्मिन्महामंगलमयेसमयेकि
मितिसर्वस्वजनशोकोत्पादनाय रथंवालयसिइति॥ततःशिवादेव्यपिअकस्मात्संजातखेदा॥तत्रागात्॥रामकृष्णावपितत्श्रुत्वानेमेरथंवेष्ट
यित्वातस्थतुः॥एवंसर्वेपिस्वजनामिलिताः॥ततोमातापितरौऊचतुः॥वत्सअद्ययावत् इछतांअस्माकंइदानींकथमपि तवपाणिग्रहणावस
रःसमायातः॥त्वमपिमनोरथकल्पद्रुमंसांप्रतंमत्तहस्तीवत्वंकथंउन्मूलयितुंउद्यतोसि॥ततःकृष्णोपिप्राह॥भ्रातर्मांगल्यमयेत्रसमयेकिमे
तत्त्रैवैराग्यकारणं॥वात्सल्यामृतसारणीसमौ॥एतौमातापितरौएतेचवयंरुणे॥२॥तवमुखावलोकनपराबांधवाः॥इयंचत्रिभुवनैकमोहन
वल्लीवराजीमती॥त्वदर्पितहृदयाइत्येवसर्वान् अस्मान्कुतोनिराशान्॥करोषीतिश्रुत्वानेमिःप्राह॥हरेस्वजनधनभोगादिषुनास्तिमेक्षणम
पिरतिःसंसारकांतारभयाद्बिभेमि एतेविषयाअनंतकालंभुक्ताअपिअनंतदुःखायैवप्राणिनांभवति॥ततोयदियूयंअस्माकंहितंइ
छथ॥तदादीक्षायैअनुमन्यध्वंइतिश्रुत्वाकृष्णादयःसर्वेपिप्रत्युत्तरंदातुंअशक्ताःअधोमुखीभूयतस्थुः॥अत्रांतरेसारस्वतालोकांतिका
देवा॥स्तत्रागत्यजयजयशब्दपूर्वकं॥धर्मतीर्थंप्रवर्त्तयेति॥भगवतोदीक्षावसरंकथयामासुः॥तदैवभगवान्॥रथादवतीर्य॥शाकविदा
न॥तिर्यग्जृंभकदेवैःपूरितैर्द्रव्यैःसांवत्सरिकंदानंदातुं॥प्रारेभे॥अथराजीमतीवृत्तांतंश्रुत्वावज्राहताइवमूर्छि स्थो॥ततःपूर्ण

ततः सखीजनैर्नानाशीतलोपचारैः सचेतनाकृता पुनर्विलापान् चकार॥ हे स्वामिन् हे प्राणवल्लभ॥ हे लोकोत्तरसौभाग्यभूमे॥ हे नवभवप्रेमास्प
द स्वामिन्॥ त्वैवं कर्तुं न युज्यते॥ यत्पूर्वमंगीकृत्य पश्चात्तिरस्कारं करोषि सत्पुरुषास्तु दोषशतान्निदृष्टापि अंगीकृतं निर्वहंति॥ यथाब्धिर्व
डवाग्निं निर्वहति रुद्रो विषमपि निर्वहति॥ अहं तु त्वदेकहृदया निरपराधापि त्वयात्यक्ता॥ अथवा एकया कि कोप्ययं स्नेहो मया निर्वाह्य
॥ एवेत्यादि विलपंती सखीजनादिभिः कथंचित् कृच्छ्रेण प्रतिबोधितासती किंचित्सुस्थी भूयतस्थौ॥ अथ स्वामी वर्षं यावत्कल्पद्रुमइव॥ अ
र्थिनां वांछितं पूरयित्वा सुरासुरैः कृतदीक्षोत्सवः उत्तराकुरां शिबिकामारुह्य॥ त्रीणि वर्षशतानि कुमार एव गृहवासे स्थित्वा॥ श्रावणश्वेत
षष्ठ्यां चित्रानक्षत्रे॥ पूर्वाह्णसमये सुरासुरनरैः समनुगम्यमानो॥ द्वारवत्या बहिः रैवताद्रेः सहस्राम्रवनमागत्य पंचमुष्टिकं लोचनं कृत्वा कृ
तषष्ठतपाः सहस्रभूपैः समं सर्वविरतिसामायिकं जग्राह॥ तदैव चतुर्थज्ञानं समुत्पन्नं ततः शक्रकृष्णादयः सर्वेपि भगवंतं नत्वा स्वस्थानं
जग्मुः॥ भगवांस्तु अप्रतिबद्धतया विहारं कृतवान्॥ द्वितीयदिने वरदत्तद्विजगृहे प्रभुः परमान्नेन पारणं चकार॥ देवैः पंचदिव्यानि प्रकटि
॥ इत्येवं प्रभोर्व्रतदिनात् चतुःपंचाशद्दिनेषु गतेषु अश्विनामावास्यायां चित्रानक्षत्रे पुनः सहस्राम्रवने वेतसवृक्षतले ध्यानं ध्या
त्वं॥ इंद्रादिभिः केवलोत्सवकरणानंतरं समवसरणं रचितं॥ ततउद्यानपालेन कृष्णवासुदेवाय वर्धापनि

कादत्ता॥ कृष्णोपि तस्मै पारितोषिकदानं दत्त्वा॥ दशार्हैः मातृपुत्रभ्रातृपरिजनादिभिश्च सर्वर्द्ध्या परिवृतो वंदितुं जगाम॥ तत्र भगवंतं त्रिःप्रदक्षि
णीकृत्य नत्वा स्तुत्वा च यथासुदेवः शक्रस्य समीपे उपाविशत्॥ अन्येपि सुरासुरनरेशा यथायोग्यस्थानं उपाविशंतिस्म॥ अथ श्रीनेमेः कूष्मां
डी अंबिका इत्यपरनाम्नी शासनदेवता यथा उत्पन्ना॥ तस्यास्तच्चरित्रं कथयामः॥ तथाहि॥ सुराष्ट्रासु रैवताद्रेर्दक्षिणस्यां दिशि सान्त्वात्॥ कुबेर
स्यैव पुरमिव॥ कुबेराख्यं पुरं सर्वसंपदां समाश्रयभूतं अभूत्॥ तत्र पुरे देवभट्टो नाम द्विजो वसति॥ स च सम्यक्त्वमूलद्वादशव्रताराधकः प
रमजैनो ज्ञानदर्शनचारित्ररूपरत्नत्रयं लक्षणं यज्ञोपवीतत्रयं धारयति॥ तस्य देवला भार्या तस्याः कुक्षिजातः सोमभट्टाभिधानः पुत्रः तस्य सा
क्षाल्लक्ष्मीरिव शीलादिसकलगुणगणालंकृता॥ अंबिका नाम्नी पत्नी अभूत्॥ अन्यदा देवभट्टे दिवंगते सति मिथ्यात्वकलुषितात्॥ तस्य गृहा
त् जैनधर्मोपि हंस इव दूरं ययौ॥ ततः सोनिरंतरवायसादितर्पणपिप्पलपूजनादिकुर्वन् प्रवर्तते स्म॥ अंबिका तु तेन संगतापि भद्र
कभाविन्येव बभूव॥ अथान्यदा श्राद्धदिवसे मध्याह्नसमये मासोपवासिनौ द्वौ साधुमूर्ती॥ शमसंवेगौ भिक्षार्थं तस्य गृहमागतौ॥ तौ दृष्ट्वा
भक्तिप्रकर्षप्रेरिता समुल्लसितरोमांचा अंबिका इति अचिंतयत्॥ अहो एतौ विश्वपावनकौ महामुनी अद्य पर्वदिने मम गृहागतौ॥ गमा
गतौ॥ तन्नूनं अगण्यपुण्यवशात् अयं संयोगो मिलितः श्वश्रूरपि तावत् गृहे नास्ति॥ अन्नपानादिकमःपिसर्द॥ ... तिनि [illegible] पतिः॥

3441/1962

ततः सुपात्रे स्वहस्तेन दानं दत्वा जन्मसफलं करोमि॥ इति विचिंत्य शुद्धान्नपानादिभिस्तौ मुनी त्यै प्रत्यलाभयत्॥ मुनिरपि द्रव्यशुद्धिं भावशुद्धिं
च विज्ञाय स्वयोग्यं अशनादि विहृत्य धर्मलाभाशिषं दत्वा यथागतं तथा जग्मतुः॥ अंबिका तु तत्सुपात्रदानं दर्षातिरेकात् पुनः २ अनुमोदयं
ती असंख्यगुणफलं चकार॥ अथ तत्र कात्रिदकृतपुण्यादारिद्र्यदौर्भाग्यैकगृहं प्रातिवेश्मिनी रेजे ती॥ अंबिकया दीयमानं वीक्ष्य प्रत्यक्षा
राक्षसीव सा क्रान्त्या ऽव स्वगृहात् दक्षौ उद्धाल्यंती उत्थिता॥ पुनः सा मुखं वक्रीकृत्य विकृतवदननेत्रवी रूणे र्जनान् त्रासयंती॥
सर्वप्रातिवेश्मिकाणां समक्षं इति माह॥ रेरे वधू धिग् २ इदं तव स्वच्छंदत्वं यत् एवं असमंजसं विचेष्टसे॥ श्राद्धदिवसे अद्यापि पिंडदानेन सर्वो
पि पाक उच्छिष्टः कृतः॥ इति॥ साफेत्कारी वरटं ती॥ गृहांतरे स्थितां॥ तत् स्वश्रू आकार्य॥ वधा वैगुण्यकथनेन तामपि क्रोधाकुलां चकार॥ त
तः सापि वात्यां प्रेरिता भ्रम्या इव धमधमायंती वधूं प्रति रेरे हीनकुले दुराचारिणि मयि जीवंत्यामेव कथमेवं स्वच्छंदं प्रवर्त्तसे॥ इत्यादि
भिः उपालंभशतैस्तां निर्भर्त्सयामास॥ अंबिका तु तयोर्द्वयोर्मध्ये अभ्रपटलराहुमंडलयोरिव रंतरालेऽशशिकलाइवात्यर्थं क्षीण
तां प्राप्य॥ ततः सोमोपि ब्राह्मणान् आकार्य गृहमागतः सोपि तयोर्वचनात् भृशं कुपितो ऽबिकां ताडयामास॥ ततः सा जनवाक्यैर्निर
पराधत्वात् स्वनस्ति दूना ..वीभीनं कृत्वा स्वपुत्रयुगलं गृहीत्वा गृहान्निर्गता॥ ततोपि दुःखितां चा मार्गे रुदती॥ इति चिंतयामास॥ अहो म

या श्वश्रूवाक्यं कदापि न लोपितं॥ नित्यं पत्यु भक्ती तत्परास्मि॥ न च कदापि अनयोः कुलद्वयस्य वा विप्रियं आचरितं॥ स्वदेहस्य दुःखं दत्वापि गृह
कार्यं सर्वं करोमि॥ तथापि॥ निरपराधा अहं एवं लोकसमक्षं पराभूतास्मि॥ यच्च अद्य पुण्यदिवसे साधुभ्यो दानं दत्तं॥ तत्तु महाफलत्वात्॥
कुलद्वयस्यापि श्रेयःकारणं कृतं॥ हा हा तदपि एभिर्मिथ्यात्वमूढैर्विपरीतं कल्पितं॥ अहो मिथ्यात्वं अधताया प्रबलत्वं॥ यदेते अस्य फलं रुज
ल सिंचनवत्॥ मृतानामपि पूर्वजानां पिंडदानद्विजातिभोजनादिभिस्तृप्तिं मन्यंते॥ साक्षात् अनंतफलं सुपात्रदानं तु॥ उलूकाः सूर्यबिंब
मिव निंदंति॥ अथवा मम अनया चिंतया किं कार्यमस्ति॥ मया तु सत्पात्रफलं सम्यक्कृत्वा ग्रंथो निबद्धः॥ तदेव अपापि अनुमोदयामि॥ अ
तः परं मम अनेन गृहवासेन अलं॥ ततो भवसमुद्रे प्रवहणरूपौ तौ मुनी एव मे शरणं भवेतां॥ किं च रे वनादौ तपः कुर्वती दुष्टकर्माणि क्षप
यिष्यामीति विमृश्य॥ सा सती एकं बालं कटिदेशे उत्क्षिप्य॥ परं च हस्तांगुल्यां संयोज्य॥ जिनपादान् हृदि स्मरंती कथंचिच्छिन्नं स्थिरीकृत्य अ
ग्रे चचाल॥ अथ सा यावत् पुराद्बहिः परिसरं गता॥ तावत्तस्याः कटिस्थितो शुभंकरनामा लघुबालो जलार्थं अस्य दृष्टवर्ण रोदिति स्म ततः
शुभंकरनामा परोपि बालो बुभुक्षापीडितो॥ मार्गक्लांतश्च मातर्मे भोजनं देहीति उच्चै रुरोद॥ ततः सा भीष्मग्रीष्ममध्याह्नसमये स्वयं ता प
तृषा बुभुक्षादि अनेक दुःखानि अगणयंत्यपि॥ तयोर्बालयोर्दुःखात् भृशं दुःखिता भूत्वा॥ अचिंतयत्॥ हाहा धिग् मां यतो ऽहं स्वबालयोरपि ए त

योऽहं भुक्षातृषाभ्रमेनेनसमर्थास्मिरहाभातः किमिदं विधाः हं केवलं दुःखखनिः स्वष्टाग्निमानमेंदिनिश्चवकाशंदेहि॥यथातत्रप्रविश्यदुरक
स्यांतंकरोमि॥अथवाकिमनेनअरण्यप्रलपितेनकर्मणांपूर्वकृतानांविषमोविपाकः यदिवासर्वाण्यपिदुःखानिसमकालमेवआयांतुयद्भ
वतितद्भवतुदुःखमेवांगीकृत्यस्थितास्मि॥केवलंश्रीजिनानांपादपद्मंममहृदयेस्थिरीभवतु॥इत्यादिचिंतयंतीसायावदग्रेयाति॥तावदग्र
तःस्वच्छशीतलजलापूर्णसरोपश्यत्॥तत्रचउभयपार्श्वयोःकोकिलालापमुखरितवनांतयोःसहकारयोःफलउंबिकातस्यादृष्टेसमाता
गाम॥ततःसाजलपानेनफलास्वादनचतौबालौतोषयित्वा॥सुपात्रदानंफलंतात्कालिकंमन्यमानारुणंविश्रामंचकार॥इतश्चदेवलाइत्थं
वंअंबिकांनिर्भर्त्स्यमुनिदानात्दुर्वरितान्नंउच्छिष्टमिवमन्यमानाअन्यांरसवतींपाचयितुंयावत्पात्राणिःवलोकयतितावत्तानिसर्वाण्यपि
पात्रदानमाहात्म्यात्स्पर्शोपलस्पर्शादिवसुवर्णमयानिअन्नपूर्णानिचअपश्यत् ततःसाचित्रेचमत्कृतासतीइत्यचिंतयत्॥हामयानिर्भाग्य
यानिरपराधापिसारात्कल्पलताइवजंगमाउर्ध्वगरिववधूर्निराकृता॥अथवाद्ययंअस्माकंगृहेनैवनिष्टति॥नहिमरुभूमौकल्पवृक्षःस्थितिंक
रोतिधिग्मांयत्एवंविधसुकृतकारण्यपिवधूर्मयानिरस्कृता॥अत्रांतरेआकाशवाणीजाता॥अहोअंबिकायाःपात्रदानसफलस्यइयंवार्ण
कादर्शिता॥तत्फलंतुसाअग्रेनंदेवेंद्रादिपूजनीयत्वंप्राप्स्यंति॥इत्याःकाशवाणींश्रुत्वाशंकिताइवसापुत्रंप्रतिवृत्तांतंकथयित्वा॥तस्यागवे

षणार्थअनुनयार्थंचप्रेषयामास॥सोपितंवृत्तांतंज्ञात्वा॥आत्मानंनिंदन्निर्गात्॥तत्पृष्ठतोधावत्॥अथतस्याअनुपदंव्रजन्सोअग्रतोदूरात्
पुत्रद्वयावलंबितहस्तद्वयांतांदृष्ट्वा॥बालेक्षणमेकंप्रतीक्षस्वप्रतीक्षस्वेतिआकुलगिराजल्पनिस्म॥ततोस्पष्टवर्णतद्वचनंश्रुत्वा वेगात्समा
पतंतंचतंविलोक्य॥नूनंममभारणायएवंआगच्छतीतिभीतासादुशीलोमायिकाःकाविडंबनाःकरिष्यतिनचकोपि॥अत्रममरक्षकोभविष्य
ति॥ततोहंअत्रकिंकरिष्यामि॥केवलंआकाशपतितायाइवअनाथायामेआत्मनैवमरणंशरणंइतिविचार्यसमीपस्थितकूपस्यतटे
आगत्यझंपांप्रदातुंतत्पराभाइतिउवाच॥अर्हंतोमेशरणमस्तुसिद्धाः१शरणमस्तु२साधवःशरणमस्तु३जिनप्रणीतधर्मोमेशरणमस्तु
४॥इतिचत्वारिशरणानिकृत्वा॥स्वकृतदानधर्मस्यानुमोदनांविधायपुनरितिभाष॥हिंजेदरिद्देकृपणेवभिंछे॥कुलेकलंकिन्यधमेपर
स्मिन्॥कुलिंगवंगालकुरौचकछेसिंधादिदेशेममभास्तुजन्म॥१॥अर्थित्वमूर्खकृपणत्वनत्वमूढत्वमिथ्यात्वनृपाधिकाराः॥विपात्वमया
दिरसापणत्व॥सत्वकयोमास्तुभवंतरेपि॥२॥एतेषुस्थानेषुकुलेषुएतद्वाणिज्यकारिषुचममजन्ममाभूत्॥एषुचजन्मभूयात्॥इत्याद
॥दियादिरत्नत्रयज्ञातरिक्तदातर्यधीशेचशुभाशुभंजो॥कुलेषुराष्ट्रामगधेवकीर॥काश्मीरदिदक्षिणजिवंदेशे॥१॥ममावतारोस्तुधनित्वदा
तृआरोग्यतारूपगुणत्वमस्तु॥सत्वानुकंपार्जनस्पररु॥भोगाश्रयोदानभवंप्रभावात्॥२॥इतिचिंतयित्वासासहसाबालकाभ्यांसहि

353 | 1912

ना॥एवं कूपेझंपांददौ॥ततोमृत्वाअनेकमहर्द्धिव्यंतरसमृद्धसेव्या॥व्यंतरनिकायेषुदेवीअभूत्॥अथसोमस्तुमामाइतिजल्पन्॥यावत्॥अग्र
तोगत्वावलोकयति॥तावत्तांबालकद्वययुतां॥कूपपतितांज्ञात्वाऽतिदुःखितःसन्द्वाद्वाधिग्रमांअविमृश्यकारिणंअनयासाक्षाल्लक्ष्मीरिव
पत्न्यापुत्राभ्यांचविरहितंनचजीवितेनममकिंप्रयोजनं॥ततोधुनाममापिमरणमेवश्रेयः इत्यादिचिंतयित्वासोपिकूपमध्येपतितःकथंचि
त्परिणामवशात्मृत्वाअंबिकादेव्यावाहनीभूतःसिंहरूपदेवोजातः॥अथतत्कालोत्पन्नांस्वदेहप्रभापूरपूरितदिग्वलयांसिंहवाहनांस
र्वांगसुंदरांअनर्घ्यमणिसुवर्णाभरणभूषितां॥अनेकसुरांगनागणैःसमुपास्यमानांपुत्रद्वयालंकृतोत्संगदेशांचतुर्भुजांदक्षिणभुजद्वयेनपाशं
१आम्रलुंबिकां२वामभुजद्वयेनचपुत्रंअंकुशंचधारयंतीं॥सुवर्णवर्णांवरप्रदायिनीं॥अचिंत्यप्रभावांतथाविधांअंबिकांदेवींदृष्ट्वा॥अनीद्वार
[illegible]त्वांप्रणम्यइतिविज्ञपयामास॥हेस्वामिनि॥त्वयापूर्वभवेकिंतपःकिंदानंकिंतीर्थंकिंचसुकृतंकृतंयेनैवंविधांव्यंतराधिपत्यसमृद्धिंप्राप्तासि
[illegible]तद्वचःश्रवणात्॥साज्ञानेनपूर्वभवंविज्ञायतस्मैचनिवेद्य॥जैनधर्मस्योपकारंस्मरंती॥आभियोगिकसुरैर्विमानंरचयित्वा॥विगात्रैवतगि
रिमाप्ता॥इतश्चतदेव॥श्रीअरिष्टनेमेःकेवलज्ञानंउत्पन्नं॥ततःसापिभगवंतंवंदित्वासमवसरणेदेशनाश्रवणार्थंउपाविशत्॥भगवतांदेश
नादत्ता॥तथाहि॥धर्मोजगद्बंधुरकारणेन॥धर्मोजगद्वत्सलआर्तिहर्ता॥क्षेमंकरोस्मिन्भुवनेपिधर्मो॥धर्मस्ततोभक्तिभरेणसेव्यः॥१॥अस्य

धर्मकल्पद्रुमस्यसम्यक्त्वंबीजंयथाशक्तिपालनोद्यमःस्कंधः॥ततोदानशीलतपोभावना४रूपाश्चतस्रःशाखाः॥शत्रुंजयंतादितीर्थभक्ति१र्देव
पूजा२गुरुभक्ति३साधर्मिकशुश्रूषा४परमेष्ठीस्मरणं५इत्यादयोनेकेप्रशाखाः॥सुवासनाकोमलदला॥अनुकंपाआस्तिक्यादिपत्राणिस्वर्गा
दिसुखानिपुष्पाणि॥मोक्षसुखंतस्यफलंइतिमत्वायःकश्चित्तथाभव्यत्वादिसमग्रसामग्रींप्राप्य॥प्रमादंत्यक्त्वा॥एतंधर्मकल्पद्रुमंसेवते
॥तस्यअभीष्टार्थसिद्धिःस्यात्॥इत्यादिभगवतोदेशनांश्रुत्वाअमृतपानादिवसर्वेसभासदःपरमंतोषंप्रापुः॥ततोवरदत्तनामानृपःस्वकी
यद्विसहस्रप्रमितंसेवकयुतोवैराग्यात्व्रतंजग्राह॥क्रमाद्गणधरत्वंचप्राप॥यक्षिणीनाम्नीराजकन्याःप्रभोपार्श्वेदीक्षांगृहीत्वा॥क्रमात्प्र
न्यसाध्वीषुप्रवर्त्तिनीपदंलेभे॥दशार्द्धभोजरामकृष्णाद्याःश्रावकाबभूवुः॥तेषांभार्याश्राविकाअभूवन्॥इत्थंभगवान्चतुर्विधसंघ
स्थापनांचकार॥ततःशक्रःश्रीनेमिमुखात्अंबिकायाःपूर्वभवसद्वासनासुपात्रदानादियोग्यतांश्रुत्वा॥तामेवश्रीनेमीश्वरस्यशासनदेवतांस्था
पयामास॥अंबिकावत्गोमेधयक्षोपिशासनाधिष्ठायकोभूत्॥तत्स्वरूपंचइदं॥तथाहि॥सुग्रामनाम्निग्रामे॥गोमेधादिबहुयज्ञकरणात्
ख्यातिंप्राप्तो॥गोमेधनामाद्विजस्तत्रवसति॥बहूनांद्विजानांमाननीयः॥अथासौबहुजीवहिंसादिपातकात्॥अन्यदास्त्रीपुत्रादिमरणात्गृह
धार॥क्रमात्चगलितकुष्टरोगीबभूव॥ततःप्रतिरोमकूपेःसमुत्पन्नैःकीटकैःखाद्यमानोदुर्निवारंनरकादिकंदुःखंसहतेस्म॥अन्यदागंश्च

355|1962

स्तुति गंधर्वाभत्सं॥ भण भणायमानमक्षिकासमूहं॥ विरूपं मार्गे पतितं वीक्ष्य कश्चिद् यालुर्मुनिः प्राह॥ अहो भद्र यत्त्वया कुगुरूपदेशात् धर्मबु
द्ध्या॥ अनेकजीवहिंसारूपं कुकर्माचरितं॥ तस्य पापवृक्षस्येदानीं एते क्रूराः प्रकटिताः फलं तु भवांतरे नरकादिदुःखं भविष्यति॥ ततोधुना
पि जीवरक्षारूपं श्रीजिनोक्तं धर्मं समाचर॥ तथा॥ अनेकदेवगणसेवितं अनंतसिद्धास्पदं॥ श्रीरैवताचलं सेवस्व येन तव सर्वपापानि विलयं यां
ति॥ इत्यादि मुनिवाक्यं श्रुत्वा॥ सम्यग् मनसि अवधार्य सहिंसो मृत मग्नइव॥ उपशमरसास्वादेन विगलितव्यथः क्षणमात्रेण मृत्वा महर्द्धिमान्
यक्षनायको जातः मुनेर्मुखवचनश्रवणमात्रादेव दिव्यां देवर्द्धिं प्राप्तः अंसो नरवाहनो यक्षो पर्वतान् धरः षड्भुजो वामहस्तेषु त्रिषु॥ शक्ति १ शूलं २
नकुलं ३ दक्षिणहस्तेषु॥ चक्रं १ पर्शु २ बीजपूरकं ३ धारयन्॥ अंबिकावत्सपरिच्छदो विमानमारुह्य॥ तदैवागत्य॥ रैवतकाद्रौ भगवंतं वंदितवा
[illegible] भगवद्भक्तं विज्ञाय शक्रो गोमेधनामानं शासनसुरं स्थापयामास॥ इतश्च सौधर्मेंद्रः श्रीनेमिं प्रणम्य कृतांजलिः सन् वरदत्तगणध
[illegible] भवान् पृच्छति स्म॥ स्वामिन् केन पुण्येन अयं वरदत्तराजर्षिस्तव गणधरत्वं प्राप्नोति॥ ततः प्रभुराह शृणु शक्र॥ अतीतायां उत्सर्पिण्यां
[illegible] र्थकरः सागरनामा केवली लोकालोकभास्करोन्यदा विहरन् चंपापुर्यां समवसृतः तत्र देशनामध्ये मोर्हन् मुक्तेः स्वरूपं वर्णया
[illegible] लोकपुरुषस्योपरि॥ पंचचत्वारिंशल्लक्षयोजनानि आयामविस्तराभ्यां॥ तथाष्टमध्यभागे योजनबाहुल्या॥ ततः क्रमेण हीयमा

ना प्रांते मक्षिकापक्षवत्सूक्ष्मा॥ उत्तानछत्राकारा स्वच्छस्फाटिकमयी सिद्धशिलास्ति॥ तदुपरि योजनस्योपरितने चतुर्विंशतितमे भागे अनंताः सिद्धा
स्तिष्ठंति॥ ते च अनंतचतुष्टयकलिताः अनंतज्ञानदर्शनवीर्यसुखसहिताः चिदानंदमयाः शिवमचलमरुजमनंतमक्षयमव्याबाधमपुनरा
वृत्तिरूपं सिद्धिगतिनामधेयं स्थानं संप्राप्ताः सादनंतं कालं तत्र सुखमनुभवंति॥ तत्सुखं वक्तुं न शक्यते॥ केवलं केवलज्ञानी भिर्ज्ञायते॥ तत एव
सर्वोत्तरं तत्सुखं स एव च आत्यंतिको दुःखक्षय इत्यादि भगवद्देशनां श्रुत्वा पंचमदेवलोके शो ब्रह्मेंद्रः सागरं भगवंतं प्रणम्य प्राह॥ स्वामिन्नेत
न्निराबाधसुखरूपं श्रुत्वा॥ मधुबिंदुप्रसक्तधारामरो वैषयिके सुखे॥ अहं केवलं असारतामेव पश्यामि॥ ततः कदा सो वमरो भविष्यति॥ यदाहं त
त्सौख्यं अनुभविष्यामि॥ इति तदा सागरः जिनः प्राह॥ शृणु ब्रह्मेंद्र भविष्यत्काले अवसर्पिण्यां द्वाविंशः श्रीनेमिजिनो भविष्यति॥ त्वं तु तस्य वरद
त्ताख्यो गणधरो भूत्वा॥ रैवताद्रौ कर्मक्षयात् केवलं प्राप्य मुक्तिं यास्यसीति श्रुत्वा॥ ब्रह्मेंद्रो हर्षोत्फुल्ललोचनो जिनं नत्वा स्वस्थानं गतः॥ ततः प्रभृति अस्म
द्धानात् रक्तचित्तो नानारत्नानां सारदलैः अस्माकं मूर्तिः निर्माय चिरं ध्यं पूजयामास स ब्रह्मेंद्रो यावज्जीवं तां प्रतिमां पूजयित्वा आयुषः क्षयेन च्युत्वा
त्वं अहो वर भवान् प्राप्य सांप्रतं अस्माकं वरदत्तनामा गणधरो जातः अनेन पूर्वं यत् अस्माकं मूर्तिर्निर्मिता पूजिता च॥ तत्प्रभावात् उत्तरोत्तरं भवा
न्॥ गणधरत्वं च प्राप्य॥ इतोपि केवलं लब्ध्वा मुक्तिं गमिष्यतीति॥ श्रीनेमेर्मुखात् श्रुत्वा॥ तत्कालीनो ब्रह्मेंद्रः समुत्थाय॥ श्रीनेमिस्वामिनं नत्वा इ

35 7/1962

निप्राह॥स्वामिन्नसत्यमेतत् यद्भिरपि त्रैलोक्यैः साप्रतिमाऽस्य पावनस्य पूजिता॥इदानीं अपि शाश्वतार्हद्वत् साप्रतिमा मया त्रिसंध्यं पूज्यते॥ततः प्रभु
राह॥भो देवेंद्र सांप्रतं सा प्रतिमा॥अत्रानेतव्या॥यतः कृत्रिमप्रतिमास्तु॥शाश्वतप्रतिमावत् सदाकालं स्वर्गे न स्थिरीभवंति॥इति भगवद्वचनं
प्रमाणीकृत्य॥अखंडलः शीघ्रं तत्रानयामास॥ततः कृष्णवासुदेवो भगवदाज्ञया नित्यपूजार्थं तां स्वयं जग्राह॥अथ ते सुरासुरनरेश्वराः श्रीनेमि
स्वामिना प्रकाश्यमानं गिरिमहात्म्यं शृण्वंति स्म॥यथा हि मूलग्रंथे॥ पुंडरीकगिरेरेतन्मुख्यं शृंगं हि कांचनं॥मंदारकल्पवृक्षाद्यैरावृतं तरुभिर्वरैः॥१॥
संपाति निर्झरैर्यो निपातकं प्राणिनां सदा॥स्पर्शेनापि महातीर्थं हत्या पापं व्यपोहति॥२॥पर्वतोयं पुण्यराशिः पृथिव्यामिलकोपमः॥पाविनस्ती
र्थकृत्पादैर्भाति त्रैलोक्यभूषणं॥३॥उत्तमः सर्वतीर्थानां सर्वतीर्थफलप्रदः॥दर्शनस्पर्शनेनापि दुरितं हंति सर्वतः॥४॥सजलः सफलो भद्रशाला
दिवनवेष्टितः॥क्रीडाशैलः सुरेशानां रम्यो रैवतपर्वतः॥५॥तावत्सर्वाणि पापानि॥तावद्दुःखान्यनंतशः॥तावत्संसारवासोत्र यावन्न दृष्टो रै
वतः॥६॥न्यायार्जितं धनं येत्र सुपात्रे ददते जनाः॥तेषां समृद्धयः सर्वाः संपद्यंते भवे भवे॥७॥शीलमेकदिनं येत्र बिभर्ति शुभभावतः॥सुरासु
रनृनारीभिः काम्यते सो भवांतरे॥८॥प्रत्याख्यानं दशविधं॥विवेकी कुरुते नरः॥अस्मिन् तस्य क्रमात् स्वर्गसौख्यानि दशधा पुनः॥९॥चतुर्थष
ष्ठाष्टमादि॥तपो यत्र वितन्वंतो॥ते नूनं सर्वसौख्यानि॥भुक्त्वा यांति परां गतिं॥१०॥भावतः प्रतिमामत्र॥जिनानां ये तु रचयंति॥लभंते शिवसौ

ख्यानि॥मर्त्यसौख्यस्य का कथा॥११॥शुद्धान्नवस्त्रपानाद्यैः साधून् प्रतिलाभयन्॥मुक्तिनारीकृदानंददायी भवति भावतः॥१२॥स्वर्णरूप्यान्नवस्त्रा
दि॥यद्दात्यत्र भावतः॥तदनंतगुणं सोपि॥लभते लीलया जनः॥१३॥महातीर्थमिदं सर्वतीर्थोत्कृष्टं जगत्त्रये॥तिर्यंचोपि दिवं यत्संगात्॥सिद्धं त्वं
तर्भवाष्टकं॥१४॥क्रमाधन्या मयूराद्याः यक्षिणः पुण्यशालिनः॥वसंति रैवते येत्र मनुष्याणां किमुच्यते॥१५॥देवताऋषयः सिद्धाः॥गंधर्वाः
किन्नरादयः॥सौकाद्याश्च समायांति॥अत्रतीर्थे निरंतरं॥१६॥नता औषधयो दिव्यां नताः स्वर्णादिसिद्धयः॥रसकूपाश्च नेत्र॥गिरौ संति निश्चा
श्चताः॥१७॥गजेंद्रपदमत्रास्ति॥कुंडं मोक्षश्रियो मुखं॥यत्र जीवसंसक्तिः शक्तिः पापापनोदने॥१८॥परेषामपि कुंडानां॥प्रभावोत्र पृथक्पृथ
क्॥षण्मासस्नानतो रोगाः कुष्टाद्यायांति दिग्दिशं॥१९॥इत्यादि भगवदुक्तं॥रैवतमहात्म्यं श्रुत्वा॥ते सुरासुरनरेश्वराः अमृताभिषिक्ता इव परमा
नंदमया बभूवुः॥ततो वासुदेवः प्राह॥स्वामिन् इयं प्रतिमा मया स्वप्रासादे स्थापिता सती कियत्कालं तत्रस्थास्यति॥कुत्र च वा पूज्यतां प्राप्स्यति इ
ति॥ततः स्वामी प्राह हे कृष्ण त्वज्जीवितं यावत् त्वत्कृते॥प्रासादे स्थास्यति॥ततः परं तु कांचनबलानके देवताः पूजयिष्यंति॥ततोस्माकं निर्वाणा
त्॥द्विसहस्रवर्षाणि॥अनिदुशनि यास्यंति॥तस्मात् रत्ननामा श्रावको अंबिकां समाराध्य॥तद्वां इमां प्रतिमां रैवते तत्र प्रासादे पुनः स्थापयिष्य
ति॥तत्र एकं लक्षं त्रीणि सहस्राणि द्विशतानि पंचाशच्च॥१०३२५० वर्षाणि यावत् स्थिता पुरैर्नरैरपि अदृश्या भवि [illegible] कांतदुःषमाख्ये पंचम

359|1962

के॥एनांसमुद्रमध्येनीत्वा अंबिकाप्रज्ञापयिष्यति॥ततोपरंविंदेवाःप्रज्ञापयिष्यंतीति॥पुनःकृष्णःप्राह॥स्वामिन्कएवंविधोमहापुण्यवान्॥रत्नश्रावकोय
एनांप्रकटीकरिष्यति॥स्वामी प्राह॥शृणुवासुदेव॥त्वत्कृतप्रतिमायाविनाशानंतरं विमलोनामराजाभविष्यति॥सोन्यदागिरिनारेकाष्टमयंप्रा
सादंनिर्माप्यलेप्यमयंबिंबंस्थापयिष्यति॥कियंतंकालंसर्वेजनाः तदेवपूजयिष्यंति॥ततःकांपील्यपुरे॥रत्ननामाश्रावकोभविष्यति॥ततोद्वादश
वार्षिकेदुःकालेसुराष्ट्रायांआजीविकायाअभावात्॥सरत्नश्रावकःकाश्मीरदेशंयास्यति॥तत्रासौपुण्योदयवशात्॥बहुधनंअर्जयित्वाद्व्योपार्ज
नफलंकर्तुमिछन्॥महतासंघेनस्वर्णदेवालयस्थितां॥जिनप्रतिमांआनंदसूरिंगुरुंचपुरस्कृत्य॥श्रीशत्रुंजययात्रार्थंचलिष्यति॥ततोसौग्रामे॥२॥
नवीनान्॥जिनप्रासादान्कारयन्॥स्थानेस्थानेदेवगुरुसाधर्मिकभक्तिंचकुर्वन्मार्गेअंबिकायाःसानिध्यात्दुष्टभूतप्रेतादिकृतंसंघोपद्रवंनि
वारयन्क्रमेणसुराष्ट्रायांकापिल्यपुरमागत्य॥तत्रत्यसंघंभक्तितोनिमंत्र्य॥सकलसंघपरिवृतःशत्रुंजयेविधिनायात्राविधाय॥ततोरैवते
गमिष्यति॥तत्रअस्माकंस्नानस्थाने॥अस्मत्प्रतिमांअर्चयित्वा॥गिरिंसमारुह्यिष्यति॥अप्रतश्चवशिलाधोगछन्॥सोथतांशिलांकंपमानां
ज्ञानिनंगुरुंप्रतितत्फलपृछांकरिष्यति॥ततोगुरुरपिअवधिनातत्फलंज्ञात्वात्वत्तस्तीर्थभंगः पुनस्त्वत्तएवतीर्थोद्धारोभविता॥इतितत्फलंकथ
यिष्यति॥ततोविमलाद्रि[illegible]लातंकथयिष्यति॥यदिमत्तोतीर्थभंशोभवितातर्हिमयाइतोपदमेकमेवगंतव्यं॥अत्रस्थितएवनेमीश्वर[illegible]

ध्यास्यामिइति पुनर्गुरुःप्राह॥भोभद्रत्वत्तएवतीर्थभंशोनभविताकिंतुत्वदीयसंघलोकेभ्यएवपरंत्वयातु॥ततोधिकतरंस्थापयिष्यते॥इतिगुरुव
चनात्स्वरंनिवार्य॥सोत्तमसंघलोकेनसमंतत्रयास्यति॥ततःसोत्साहास्तेयात्रिकजनाः॥गजपदकुंडेस्नात्वाशुचीभूताःकलशान्जलेरापूर्यश्रीप्रा
सादंप्रविक्ष्यंति॥तत्रदेवतयावार्यमाणाअपितेअनभिज्ञतयालेपमयीं॥अस्मत्प्रतिमांअहंपूर्विकयास्नपयिष्यंति॥ततोजलस्पर्शात्॥अपक्वघट
इवसालेप्यमूर्त्तिर्गलिष्यति॥ततोविशीर्णांतांप्रतिमांवीक्ष्य॥अत्यंतशोकशंकुपीडितोरत्नोमूर्छांलभिष्यते॥पुनश्चेतनांप्राप्यधिग्मांतीर्थध्वंस
कारिणं॥यतोममानुगतलोकैरविवेकतोयंतीर्थभ्रंशःकृतःतस्यदोषस्यभाजनंतत्त्ववोढमेवेति॥अथैतत्पातकंकेनमहापुण्येनकृत्वानिवारयि
ष्यामि॥अथवातीर्थभंगपातकंतु॥सुकृतानांकोटिभिरपिनमुच्यते॥इत्यादिचिंतयन्॥सांप्रतंतुश्रीनेमिरेवमेशरणमस्तु॥इतिकृत्वासर्वलोकैर्वा
र्यमाणोपि॥आसनंबध्वानिराहारोहृदयेमांस्मरन्॥तत्रैवदाःसनेनस्थास्यति॥इत्येवंतस्यनिराहारस्यवक्रूषपिउपसर्गेषु॥निश्चलस्यमासोऽपवा
संतेअंबिकाप्रकटीभविष्यति॥ततोरत्नोपितत्तपसःसाक्षात्फलंज्ञात्वासमुत्थाय॥अंबिकांप्रणमिष्यति॥ततोंबिकाकथयिष्यति॥वत्सकुतः
शोकंकरोषि॥त्वंधन्योसि॥त्वयातुमानुष्यंसफलंकृतं॥यतःइयंतएतेजनाःत्वत्प्रसादात्तीर्थयात्राफलं[illegible]तुप्रतिवर्षपुरा
लेपस्य॥नाशोअपरलेपःक्रियतेएवपुनरयंशंकुरस्तु॥सदैवअभग्नःस्थिरोस्ति॥अतोत्रकीलकेपुनर्लेप[illegible]तांप्रतिष्ठांकारय॥तेन

361 | 1982

जीर्णवस्त्रत्यागेननववस्त्रपरिधानमिव पुनर्नवीभविष्यति॥इतिश्रुत्वात्वं सः कथयिष्यति॥मातर्मा एवंवद पूर्वमूर्त्तिभंगात्॥अहं पापवानेवजातोस्मि॥इ
दानीमपियदित्वदाज्ञया॥ऽन्यबिंबंकारयामि॥तदा अन्योपिकश्चित्॥अहमिव अजानन् तस्यविध्वंसंकरोति॥तदपि अनर्थकारणं॥ततोयदित्वंप्रत्य
क्षाजानासि॥तदा अन्यामेवकामपितथाविधांप्रतिमांअर्पय॥येनयावत्कालंअत्रपूजायाःसर्वमनोरथाःपूर्यंतेइतिश्रुत्वाऽपितस्यनदवनंअश्रा
तमिवकृत्वा॥अंबाअंतर्हिताभविष्यति॥ ततोरत्नस्तु॥निश्चयंकृत्वापुनस्तथैव॥तपस्तपिष्यतितस्यचालनार्थंअंबिकाअनेकान् उपसर्गान्प्रकटयि
ष्यति॥तथापिसमहासत्वो॥मामेवस्मरन् न निश्चलस्थास्यति॥ततःसाकूष्मांडिनीप्रसन्नासती॥सिंहनादनादिताशासुखानिप्रकाशयंती॥प्रकटीभूयक
थयिष्यति॥वत्सतवसत्वेनतुष्टाहं॥ततोमनोभिलषितंवरंवृणीष्वेति॥ततोरत्नोपितांनत्वा॥मातर्नेमीश्वरात् अन्यत् नकिंचिदपिमेप्रार्थनीयम
स्ति॥इतिकथयिष्यति॥ततोंऽबापिवदिष्यति॥वत्सपूर्वंसर्वकृत्स्नमेवतीर्थोद्धारकारकःकथितोसीति॥ततोमयासह आगच्छ॥ममपदानिमुक्त्वा
अन्यत्रकापिदृष्टिंमाकृथाःसोपितथैवतांवीरैष्यात्तस्याःपृष्टेतत्पदानिविलोकयन्यास्यति॥ततोंऽबाःअन्यानिशृंगाणिअपसव्यानिमुंचती॥पूर्व
स्यांदिशिकांचनाख्येशृंगेगता॥तत्रसिद्धविनायकाभिधंरक्षकदेवंकथयिष्यति॥अहोभद्र इंद्रादिदेवादेशात् त्वमेवअत्ररक्षकोसि॥ततःसांप्रतं
एतद्द्वारंउद्घाटयइति [illegible] द्वारंउद्घाटयिष्यति॥ततस्तन्मध्यात्भासमूहःप्रकटिष्यति॥ततोंऽबातस्याःपृष्टलग्नोरत्नश्च॥तत्रप्रवेशं

करिष्यतः॥अथतत्रकांचनेनसिद्धायतनेनानामणिरत्नादिमयीप्रतिमादर्शयंतीसाकूष्मांडीरत्नंप्रतिइतिवक्ष्यति॥वत्सएतद्बिंबंसौधर्मेंद्रेणनीलम
णिमयंपुरानिर्मितमस्ति॥इदंचधरणेंद्रेणपद्मरागमणिदलैर्निर्मितमस्ति॥अमूनिचभरतादित्ययशोबाहुबलीप्रमुखैःरत्नमाणिक्यादिमयानिनि
र्मायचिरंपूजितानि॥एतच्चब्रह्मेंद्रेणरत्नमाणिक्यसारैर्निर्मितं॥असंख्यकालंयावत्स्वकल्पेपूजितंशाश्वतबिंबसदृशंअमूनिचरामकृष्णाभ्यांकारितानि
एषुयद्बिंबंतुभ्यंरोचतेतेनगृहाण॥ततोरत्नोमणिरत्नादिमयानिबिंबानियदाजिघृक्षति॥तदाअंबाइतिवदिष्यति॥वत्सअग्रेदुःषमाकालेलोकानिःशं
कानिशठालोभग्रस्ताःनिर्मर्यादाश्चभविष्यंति॥तथाभूपाश्चैवभविष्यंति॥तेचमणिमयबिंबानांआशातनांकरिष्यंति॥तदाउद्धारपुण्यतोपिपश्चात्तापो
ऽधिकोनायंते॥तस्मात्मण्यादिमयानिबिंबानित्यक्त्वा॥इदंब्रह्मेंद्रनिर्मितंसुदृढंबिंबंविपुलानेनवन्हिनाजलैर्वालोहास्त्रैर्वापाषाणादिभिर्वावज्रेणवा
अभेद्यंमहाप्रभावंएतद्गृहाण॥इत्युक्त्वासाअंबाद्वादशयोजनप्रकाशकंतेजोदिव्यमंडलंदिव्यशक्त्यासमाच्छाद्यशेषपाषाणसदृशंतद्बिंबंनिःप्रभं
विधास्यति॥ततःएतद्बिंबंसूक्ष्मतंतुभिर्बध्वा॥अन्यदिशोपश्यन्गृहीतायाहि॥यदाकथंचिदिदंतगलेविलंबंकरिष्यसि॥तदातत्रैवपर्वतवत्स्थिरंभवि
ष्यति॥रत्नंप्रतिइतिशिक्षांदत्वाअंबास्वस्थानंयास्यति॥रत्नोपिदेवीकथितरीत्याअन्यदिशिअपश्यन्॥तद्बिंबंआदास्यति॥इत्थंमार्गेसवलितगत्या
मूलवसद्बिंबंसमानयन्क्रमात्प्रासादद्वारंप्राप्यइतिचिंतयिष्यति॥इदंअत्रमुख्यप्रासादमध्यात्पूर्वबिंबंनि[illegible]काशनंकृत्वा॥भूतलंप्रमार्ज्य

पश्चात् एतद्बिंबं स्थापयामीति कृत्वा॥ यावत्तत् प्रमार्ज्य बिंबस्थापनोत्सुकोसौ बहिरेष्यति॥ तावत्तद्बिंबं॥ तत्रैव मेरुवन्निश्चलं विलोकयिष्यति॥ ततः को
टिमनुष्यैरपि चालितं तन्न चलिष्यति॥ तदा रत्नः पुनरपि आहारपरिहारेण अंबां आराधयिष्यति॥ ततः सप्तोपवासप्रांते प्रत्यक्षीभूतां अंबां इति
वदिष्यति॥ वत्स मया तु तव पूर्वमेव उक्तमस्ति॥ ततो वृथा प्रयासं मा कुरु॥ कथमपि एतन्न चलिष्यति॥ ततः प्रासादमेव परावृत्य पश्चिमाभिमुखं कुरु
अन्यत्र तीर्थेषु बहव उद्धारा भविष्यन्ति॥ परं अत्र तु त्वमेवोद्धारकारकोसि॥ ततो मा विलंबं कुर्याः इत्यादि शिक्षां दत्वा गतायां अंबायां रत्नोपि तथैव
प्रासादं कृत्वा प्रतिष्ठोत्सवं कारयिष्यति॥ ततोसौ पूजास्नात्रध्वजदानादिविधिं समाप्य समुल्लसन्मना इति स्तुतिं विधास्यति॥ तथाहि॥ जयानंतज्ञ
[illegible]॥ जयाव्यक्तनिरंजन॥ चिदानंदमयस्वामिन्॥ जय त्रैलोक्यतारक॥१॥ नंगमे स्यावरे देहे॥ सदात्ममसि शाश्वतः॥ अप्रच्यवद गूढत्वो॥ ध्याता
पपविवर्जितः॥२॥ त्रिदशेरच्यनात्योसि॥ सुरासुरनरार्चितः॥ अचिंत्यमहिमोदार॥ विनिर्जितरिपुव्रज॥३॥ छत्रत्रयीमिलच्चारु चामरद्वयवीजितः
प्रातिहार्यश्रियोदार॥ विश्वाधार नमोस्तु ते॥४॥ इति भगवंतं स्तुत्वा॥ पंचांगप्रणिपातेन सप्रणमिष्यति॥ ततो वातु हस्तेन पाल्यादिदेवैर्युता॥ तस्य कंठे पारि
जातपुष्पमालां स्थापयि [illegible] तः कृतकृत्यतया स्वजन्म सफलं मन्यमानः॥ ततः प्रभृति सौराष्ट्रमंडलं जिनप्रासादभूषितं कृत्वा॥ सप्तक्षेत्र्यां वि
त्तबीजं वापयित्वा॥ सक्रमात् [illegible] सुखं लप्स्यते॥ इत्येवं हे कृष्णवासुदेव रत्नश्रावको रैवतोद्धारं करिष्यति॥ मम प्रतिमां च स्थापयिष्यति॥ किंच॥ त्वम

पि अस्मिन्॥ तीर्थे उद्धारकृद्भविष्यसि॥ इति श्रीनेमेर्वचनं श्रुत्वा कृष्णः प्राह॥ स्वामिन् अहं एतां प्रतिमां क्व तीर्थे स्थापयामि॥ ततः प्रभुः प्राह॥ पूर्वं सुरेंद्रेण ज्ञा
नशिलाया उपरि मम प्रासादः कारितोस्ति तस्य अधः स्थाने त्वमपि प्रासादं कारयित्वा एतां स्थापय इति श्रुत्वा॥ कृष्णोपि भगवता कथिते स्थाने श्रीतुंग
प्रासादं कारयित्वा॥ तां प्रतिमां स्थापयामास॥ ततः श्रीनेमिदत्तवासैर्गणधरैः प्रतिष्ठां कारयामास॥ अथ कृष्णो भगवतो जलयात्रायां सुरनरानुज्ञा
मंत्रयत्॥ ततो वाद्यमानेषु वादित्रेषु पूर्णकुंभहस्तेषु सधवस्त्रीसमूहेषु गायत्सु॥ कृष्णः सुरासुरैः परिवृतः कुंडानि समाययौ॥ तत्र प्रथमं ऐरावतेकुं
डे गत्वा॥ तत्स्वरूपं अजानन्॥ कृष्णः शक्रं प्रति तन्नामार्थं पप्रच्छ॥ शक्रः प्राह॥ पूर्वं यदा श्रीभरतोत्र आयातस्तदा॥ तत्कालीनेन सौधर्मेंद्रेण ऐरावणपाद
क्रमणेन कारितं॥ तेनेदं ऐरावतकुंडमित्युच्यते॥ अस्मिन् दिव्यानुभावात्॥ चतुर्दशनदीसहस्राणां प्रवाहाः समायांति॥ अस्य जलेन स्वयं स्नातायोपि
तं स्नपयति॥ स समग्रं कर्ममलं क्षिप्त्वा सिद्धिं याति॥ तथा कासश्वासकुष्टजलोदरादिरोगा अस्य जलस्य स्पर्शात्॥ नाशं यांति॥ तथैव इदं भर
तेंद्रेण निर्मितं॥ इदं च गजेंद्रेण [illegible] भूतमयूरेण कारितं॥ अनयोर्जलेन स्थावरजंगमं च सर्वविषं [illegible] रोगाश्च नश्यंति॥ अमूनि च
[illegible] सूर्यचंद्रादिभिः कृतानि कुंडानि पापहरजलानि संति॥ इदं च अंबाकुंडं एतत्तु इदानीं विशिष्टस्य [illegible] संजातं॥ ततः कृष्णः शक्रं प
प्रच्छ॥ विशिष्ट इति को बभूव॥ येन रैवताना मलोपि नालनाम प्रवर्तितं॥ ततः शक्रः प्राह॥ शृणु वासुदेव॥ पूर्वं अष्टम [illegible] सिति॥ कश्चि

365|1962

पात्तरे॥विशिष्टनामाता पसोभूत्॥सर्ववेदवेदांगपारगामी॥तीव्रकष्टकरोमंत्रतंत्रादिकौटिल्यकलानिपुणत्वात्॥मिथ्यात्विजनेषु॥बहुमानिनीयो
भूत्॥अन्यदाउदरांगणेशोषणार्थविस्तारितान्॥तिनसर्यतीसगर्भामृगींवीक्ष्यसविशिष्टोरोषात्लकुटेनअमारयत्॥तत्प्रहारेणविकलांगीसात्र
मिंश्रात्प्राभूमौपतितावेदनावशाद्गर्भतःशिशूनिनिर्गत्यपतितानि॥ततस्तन्मरणाद्विषण्णचित्तोविशिष्टो॥लोकैरपि॥स्त्रीघातकोभ्रूणघातकोयंइत्यादिनिं
द्यमानोसौ आयश्चित्तार्थी॥आश्रमंत्यक्त्वा॥तीर्थान्तराणिभ्रमतिस्म॥इत्थंअष्टषष्टीतीर्थेषु भ्रांतात्मानंपापमुक्तंमन्यमानोन्यदानिजाश्रमंप्राप्तः इतश्च
कश्चित्ज्ञानीजिनमुनिस्तस्याश्रमसमीपेप्रतिमांप्रपद्यस्थितः॥ततःसमासन्नपुरवासिनोजनास्तंसाधुं॥तत्रागत्यनमंतिसंदेहान्॥पूर्वभवांश्च पृच्छंतिमु
निरपितेषांपूर्वभवादिकथयित्वा॥संशयान्निवारयति॥तद्दृष्ट्वाविशिष्टोपितस्यपापशुद्धिंपृच्छतिस्म॥मुनिःप्राह॥अहोभद्रकेवलंनदीपर्वतादिभ्रम
णेनपापंकथंनश्यति॥मिथ्यात्वतीर्थभ्रमणात्तुकेवलंदेहक्लेशएवस्यात्॥प्रत्युतअधिकःकर्मबंधोभवति॥ततश्चित्तशुद्धिंविधायक्षमादयासत्य
संतोषादिभावितात्मा॥वीतरागंमनसिकृत्वा॥श्रीरैवताद्रौ॥तपश्चर्यांकुरु॥येनतेपापक्षयोभवति॥ततोविशिष्टःप्राह॥मुनेभवतायत्तीर्थउक्तंतत्तु
त्रास्ति॥मुनिःप्राह॥सुरा[illegible]श्रीने[illegible]रेण[illegible]तंतत्तीर्थमुक्तंतत्कुत्रास्ति॥मुनिःप्राह॥सुराष्ट्रायां॥श्रीनेमीश्वरेणपा[illegible]
त्॥भावशुद्ध[illegible]॥श्रुत्वाहृष्टचित्तःसविशिष्टोनिजाश्रमंत्यक्त्वा॥श्रीनेमिंमनसास्मरन्[illegible]

क्रमाद्रैवताद्रिंप्राप्य॥ततस्तंप्रदक्षिणीकृत्य॥उत्तरपद्यामार्गेणआरुरोह॥ततश्चत्रशिलांदक्षिणतोमुक्त्वा॥अंबाशृंगेअंबाकुंडेगत्वा॥तज्जलेस्नानंअकरो
त्॥ततएकाग्रध्यानविशुद्ध्यमानमानसोयावदसौस्नात्वाबहिर्निर्गतः॥तावत् इतिआकाशवाणीबभूव॥मुनेइदानींत्वं॥अंबाकुंडजलस्नानात्॥हत्यादोषं
अपभ्रंश्यशुद्धोजातोसि॥ततोधुनाश्रीनेमीश्वरंसेवस्वइतिश्रुत्वा॥प्रमुदितमानसोसौ॥प्रासादंगत्वाश्रीनेमिंप्रणमतिस्म॥तत्रनेमिसेवापरायणस्य॥त
स्यतपःकुर्वतोवधिज्ञानंसमुत्पन्नं॥ततःपूर्वमेवविषंधारयन्॥क्रमात् आयुःक्षयेमृत्वा॥महर्द्धिकदेवत्वंप्राप्तः॥ततोहेकृष्ण॥यतोत्रकुंडेस्नात्वाविशि
ष्टोहत्यादोषंविहाय॥निर्मलोजातस्तत्प्रभृतिलोके॥इदंविशिष्टकुंडमितिप्रतिप्रसिद्धं॥अस्यजलस्पर्शात्॥घातपीडाअश्मरीप्रमेहमूत्रकृच्छ्रकुष्ट
दद्रूप्रमुखरोगानश्यंति॥तथैवहत्यादोषाअपिसद्योविलीयंते॥इतिशक्रमुखात्॥कुंडानांप्रभावंश्रुत्वाकृष्णस्तेषांजलानिगृहीत्वा॥भक्त्युत्कर्षोल्लस
न्मानसःसुरासुरेंद्रैःसहस्नात्रंअकरोत्॥तदनंतरं॥गंधपुष्पधूपदीपाक्षतनैवेद्यआरात्रिकमंगलप्रदीपध्वजदानादिविधिःस्वर्णरत्नमणीनां
दानंविधायस्वभक्तिंसफलांचकार॥ततःकांचनबलानकेभगवतांदर्शनंप्रत्यक्षंकृत्वाकृष्णःस्वमूर्त्तिंतत्रकारयामास॥जिनस्यभक्तिदाक्ष्या॥अहंउदरेनिव
द्धोस्मीतिप्रकाशनार्थं॥दामोदरइतिनामकृतवान्॥भक्तिप्रकर्षदर्शनार्थंस्वस्योद्धारकत्वख्यापनार्थंच॥श्रीनेमेःप्रतिमांमूर्ध्निअधारयत्॥अथयत्र
स्थानेनेमिस्वामिनावस्त्राणिमुक्तानि॥तत्रवस्त्रपथाभिधानेपर्वतेकालमेघाभिधःक्षेत्रपतिर्दिग्रक्षकोभत्र[illegible]आविकानांअमलत्वकारणात्

367||962

यथार्थाभिधायां॥ अमलकीर्त्तिनद्यो भवोनाम्नाधिष्टायकसुरोऽभूत्॥ तथाहि॥ पूर्वं कश्चिन्मृगध्वजनियथार्थनामादरिद्रः पुमान्॥ अभूत् सोन्यदावने भ्र
मन् कस्यचिन्मुनेर्मुखात् रैवताद्रेः प्रभावं श्रुत्वा॥ तत्रैवासमुत्सुकमनाः अग्रेव्रजन्॥ दैवाद्दावाग्निमध्ये आगतः अपरवाग्निनादह्यमानः सः एकयाम्
यासमेतषार्त्तःसन्॥ एकं जलपूर्णकुंडं दृष्ट्वा॥ तत्रैवोच्चावपिझंपां दत्त्वंतौ॥ ततस्तीर्थभावनयातीर्थमहात्म्याच्च मृत्वा भवनाम्नातत्रमृगीकुंडेस्तत्राधि
ष्टायकसुरोभवत्॥ मृगीतु मृत्वा॥ तत्कुंडाधिष्टात्रीदेवी अभूत्॥ इत्थंतीर्थमहात्म्यात् तौद्वावपिपूजनीयौ अभूतां॥ इतश्च कर्णाटदेशे चक्रपाणी राजा
प्रियंगुमंजरीतद्भार्या॥ अन्यदा तयापुत्री प्रसूता॥ सा सर्वांगसुंदरापिमुखेन वानरमुखी॥ तद्दृष्ट्वानुत्पाताभिशंकितोराजा॥ तदुत्पातशान्त्यर्थं॥ नाना
दानदेवपूजास्नात्रोत्सवादिशांतिकर्माणि अकरोत्॥ तथापि॥ तथारूपासापुत्री सौभाग्यमंजरीनाम्नीक्रमेणवर्द्धमाना॥ चतुःषष्टिकलानिपुणाजाता॥
अन्यदा॥ राजातांपुत्रीउत्संगेकृत्वा यावत्॥ सभायांउपविष्टोस्ति तावत्कश्चिद्वैदेशिकः पुरुषोनृपस्याग्रेतीर्थानांप्रभावंवर्णयामास॥ तत्रानेकेषुतीर्थे
षुवर्णितेषुसर्वोत्तमं॥ श्रीपुंडरीकाद्रिमहिमानंकथयित्वा॥ ततश्चाद्रैवताचलंवर्णयामास॥ तथाहि॥ राजन् रैवतकः शैल उन्मीलत्पुण्यसंचयः नि
मीलद्दुःखदारिद्र्यो [illegible] सर्वकल्याणनिर्मिणा॥ प्रवीणे रैवते गिरौ॥ भवद्वयेपिनो भीति॥ दारिद्र्यादयपातकात् [illegible]
तानि॥ नदीभिर्भरणानि च॥ [illegible] सुखायसकलांगिनां॥ ३॥ देवाः श्रीनेमिसेवार्थं॥ यत्रागत्यसुरंजिता [illegible]

णायापिनजायते॥ ४॥ इत्थंरैवताद्रिवर्णनं श्रुत्वा॥ सौभाग्यमंजरीजातिस्मरंप्राप्य॥ मूर्छांगता॥ शीतोपचारैः पुनः सचेतनाभूत्वा॥ तातंप्रतिइतिप्रा
ह॥ तात अद्यमेमहन्मंगलं यतोहं॥ पूर्वभवे रैवताद्रौवानरी अभूवं॥ तत्रजातिस्वभावादेवचापल्यंकुर्वती॥ निर्विवेकतया॥ गिरिशृंगनदीनिर्झरवना
दिषु अभ्रमं॥ तत्रपर्वतेषुस्थश्शृंगान्॥ पश्चिमदिशि अमलकीर्त्तिनाम्नीनदी अस्ति॥ साच श्रीनेमिदृष्टिपवित्रितानानाप्रभावद्द्रहैः शोभितावर्त्तते॥ अ
न्यदा सावानरी इतस्ततो भ्रमंती॥ वानरयूथेनसमं॥ तस्यानद्यास्तटेसमागमत्॥ तत्रफालांददाना॥ दैवात् वल्लीवितानैर्निबद्धगलपाशांकुणात्मृत्युंप्रा
प्यतीर्थवासप्रभावात्ततोमृत्वातिर्यग्भवंउन्मुच्य॥ तवपुत्री अहंजाता यच्च इदंममदेहस्यवैचित्र्यंजातं॥ तत्कारणंशृणु॥ तल्लतापाशबद्धायास्त
स्याः शरीरंकतिभिर्दिनैर्गलिता॥ अमलकीर्त्तिनद्यांपतितं॥ तेनममसर्वाण्यपि अंगानिसुंदराणिजातानि॥ परंतस्यामुखंतु वल्लीवितानवेष्टितत्वात्
तस्यानद्याजलेनपतितं॥ तेनअद्यापि अहंवानरीमुखंधारयामि॥ ततोहेतातसांप्रतंसेवकान्प्रेषयित्वातन्मदीयंपूर्वभवमस्तकं॥ तस्यानद्यांपात
य॥ येनमेमुखंसुंदरंभवति॥ रैवतादिमहात्म्यश्रवणाज्जातिस्मरंप्राप्तास्मि॥ ततः इदंजानामीति॥ तस्यावचः श्रुत्वा॥ संजातविस्मयोनृपोपि॥ सेव
कान्॥ प्रेषयित्वा॥ तन्मस्तकंजलेअपातयत्॥ तदैवसासौभाग्यमंजरीचंद्रवदनाजाता॥ ततोनृपोपितीर्थमहात्म्यंदृष्ट्वा विस्मयंप्राप्य॥ अत्रकेचित्पुरु
षाः उद्योतन [illegible] प्रादुर्भवंति॥ तत्रोहस्तेनविलसितं॥ यतो मंत्रौषधमणितीर्थानांहि अचिंत्योमहि [illegible] देवानुभावस्यनास्तिकिंचिद

369/1962

विञ्रसाध्यंशाखिपिदरिहरिण्योर्दिवानुभावात्॥देहायुर्धारपवर्त्ताश्री दत्तमातुश्च॥फलभक्षणाद्रूपविपर्ययः॥एवं अन्येपिसुवर्णगुलिकादीनांबनांवा अने
केसंति॥एवंसत्यपियेनमन्यंते॥तेषांअश्रद्धानस्यैवफलं॥अस्मानिस्तुसुविहितशिरोमणेर्ग्रंथकारस्यवचनानुसारादेवलिखितमस्ति॥ततःसासौभाग्यमंज
री॥संसारवासविमुखाःवरगंधपणानन्तरं पितरं निषिध्य रैवताद्रौ जिनध्यानैकाग्रमानसातीव्रंतपस्तप्त्वाप्रांतेतीर्थमोहान्मृत्वा॥तत्रदाढ्याधिष्टा
त्री व्यंतरीदेवीअभूत्॥साचप्राग्भवतपोनुभावान्महाप्रभावा॥संघविघ्नौघनाशिनीबभूव॥इतश्चवायव्यकोणेरुद्रः स्वनाम्नापुरंवासयित्वा॥तत्रारि
ष्टनिवारणार्थंशिरसिनेमिमूर्तिंदधानांस्वमूर्त्तिंस्थापयामास॥ततोत्रैवश्रीडमरनाम्नि द्वारे संघस्यवृद्धिकरींस्वमूर्त्तिंस्थापयामास॥एवंनंदभद्रनाम्नि द्वा
रे॥रुद्रोगिरिद्वारे॥मल्लिनाथो३महाबलद्वारे॥बलभद्रो४वकुलद्वारे॥वायुकुमारेंद्र५॥उत्तरकुरुद्वारे६सप्तमानरोदेव्यः६वदरीद्वारे॥केदारद्वारेकेश
राख्योरुद्रः॥८॥इत्येवं अष्टास्वपिदिक्षु जिनस्याष्टप्रतीहारा इवतेदेवाःसर्वेपिनानायुधहस्ताःसंघलोकरक्षाकराः असंख्यदेवसेविताःश्रीनेमिपाद
पद्मंशिरसिदधानास्सस्युः॥मुख्यशृंगस्य उत्तरेणमेघनादः॥१॥पश्चिमायांरत्नमेघनादः॥२॥पूर्वस्यांसिद्धविनायकः॥३॥दक्षिणस्यांसिंहनादः॥४॥
एवंचतस्रष्वपिदिक्षु [illegible] चतुर्मुखमिवशुशुभे॥मुख्यशृंगाच्चतुर्दिक्षुयेद्वे द्वे लघुशृंगे॥तेषु सततोदसीयाप्यनुष्यःप्रायेण
देवलोकभक्तैः॥तत्रापि [illegible] तपः कुर्वंति॥तत्रभंते अष्टमहासिद्धिर्लब्ध्वा॥मोक्षपदंलभंते॥ [illegible] रुता कल्पवृक्षा

श्चित्रकवल्लीरसकूपिकाद्या अनेकेपदार्थाःसंति॥परंनिःपुण्यानांनेदृष्टिगोचरंनायांति॥तथात्रतीर्थेप्रतिशृंगंप्रतिद्रंगंप्रतिदृढ्हंप्रतिस्थानंप्रतिवृक्षं
अधिष्टायकदेवाःसंति॥तेषुसर्वेषुमध्येसर्वोच्चशृंगेस्मिन्नारमध्ये॥नायकमणिरिवशुशुभे॥यत्रस्थितेनश्रीनेमिभगवतापश्चात्अवलोकितं॥तत्
आलोकनाख्यंशृंगंभगवन्मूर्त्तिशोभितंमहातीर्थंबभूव॥अंबाशृंगात्दक्षिणतोगोमेधनामायक्षःसर्वत्राणुनिवारणविख्यातशक्तिर्बभूव॥उत्तरेण
महाज्वालाभिधादेवीसंघस्यसर्वविघ्नहराबभूव॥यत्रशिलायांकृष्णेनपूजार्थंगच्छताछत्रंमुक्तं॥ततःपूजांतेपुनर्गृहीत॥ततस्याःशिलायाश्छत्रशिला
इतिनामजातं॥इत्येवंअनेकानिशृंगाणिसर्वाण्यपिदेवताधिष्टितानि॥ततःसर्वदेवमयोयंगिरिःकथ्यते॥अथसर्वेसुरासुराःकृतकृत्याःस्वस्वस्थानं
जग्मुः॥कृष्णवासुदेवोपितस्माद्गिरेरुत्तरन्॥मार्गेबिंदुगुहामध्ये॥एकंमुनिंअपश्यत्॥ततःकृष्णस्तंमुनिंनत्वा॥तन्मुखादपिवक्तुंतरंगिरिनारम
हात्म्यंशृणोतिस्म॥ततोवायुकोणेपर्वतंदृष्ट्वा तत्स्वरूपंप्रपच्छमुनिःप्राह॥एतत्शृंगस्यउज्जयंतादिरितिनामास्ति॥अतःपरंतुअस्यशृंगस्यउ
मार्दभुरितिनामभविष्यति॥तथाहि॥येनात्रपर्वतेरौद्रविद्यासाधनात्॥रुद्रइतिप्रसिद्धनामाविद्याधरःक्रूरकर्मातस्यचउमाइतिभार्याभविष्य
ति॥तदुपद्रवप्रीडितालोकाउमार्दभुरितितन्नामकृत्वानानाभक्तिभिःशक्तिभिवतंआराधयिष्यंति॥सोपिभक्तितस्तुष्टो [illegible] जनांवांछितानिप्रद
[illegible]

स्यति॥ततोसौनानागिरिशिखरनगरारामादिषुक्रीडन्॥अल्पदाउज्जयंतामिधंगत्वा शिरसि आगामिष्य [illegible] देश [illegible] र्पीत्स्यप्रणम्यच तदुप

देशंश्रोष्यति॥ ततोसौ पापाद्विरतो भूत्वा॥ नारीदुःखतरोर्मूलमिति विज्ञाय सहस्रबिंदुशिलायां उमां मुक्त्वा स्वयं॥ अन्यकापि गुहायां तपस्तप्स्यति॥ उमा

पितद्वियोगदुःखिता बिंदुशिलोपरिनीत्रं तपः करिष्यति तपः प्रभावात् गौरीनाम्नी विद्यादेवी तस्या वरं दास्यति॥ तत्प्रभावात् स्वभर्तुः शुद्धिं ज्ञात्वा मोहिनी

रूपं विधाय तत्र गत्वा तं चालयिष्यति॥ ततोसौ पुनस्तस्यां पूर्वमिव प्रेममग्नस्तत्र क्रीडां करिष्यति॥ ततः प्रभृति तयोर्नाम्ना पर्वतस्यापि उमाशंभुरिति

नाम भविष्यति॥ एवं तेन शंभुना अत्र पर्वते तपस्तप्तं॥ श्रीनेमिजिनः समाराधितः॥ तत्पुण्यात् भाविन्यां उत्सर्पिण्यां॥ असौ तीर्थकरत्वं लप्स्यते॥ इति

श्रुत्वा कृष्णचित्रस्तं मुनिं नत्वा॥ स्वां पुरीं प्राप्य॥ अथ श्रीनेमिस्वामी सूर्य इव गवां विलासैर्विश्वं पावयन्॥ पृथ्वीतले विहरतिस्म॥ ततो राजीमत्यपि विर

क्तचित्ता प्रभोः समीपे दीक्षां लात्वा तपः परायणा बभूवुः॥ अथ तत्र द्वारकायां॥ काचित् स्थापत्या नाम्नी सार्थवाही वसति॥ तस्याः पुत्रः स्थापत्या

पुत्र॥ इति नामा॥ भोगपुरंदरः स च द्वात्रिंशत्स्त्रियाभिः॥ सह भोगान् भुंजानः साक्षाद्देव इव कियंतं कालं गमयतिस्म॥ सोन्यदा॥ श्रीनेमिस्वा

मिनः परमवैराग्यरसमयीं॥ देशनां श्रुत्वा॥ आसन्नसिद्धिभावात्॥ विरक्तचित्तो॥ व्रतं गृहीतुकामोनेकयुक्तिभिः स्वमातरं॥ प्रतिबोध्य दीक्षा

नुमतिं प्रार्थयत्॥ ततो माता तद्वचनं दुःखिता सुवर्णभृतस्थालं ढौकनं॥ गृहीत्वा कृष्णपार्श्वे जगाम॥ ततः कृष्णः स्थाप[illegible]

वेश्य॥ नानाविधैर्वैभवैः[illegible]लोभयामास॥ तथापि॥ अत्यंतविरक्तचित्तं तं निश्चलं विज्ञाय[illegible]

घोषणां कारयतिस्म॥ भो भो यः॥ कोपि स्थापत्यापुत्रेण सह प्रव्रज्यां गृह्णाति॥ तस्य कुटुंबनिर्वाहादि चिंतां कृष्णवासुदेवः स्वयं करिष्यति॥ ततः

स्थापत्यापुत्रो मात्रा अनुज्ञातः॥ सन् सहस्रपुरुषैः॥ सह कृष्णवासुदेवकृतदीक्षामहोत्सवः श्रीनेमिसमीपे व्रतं जग्राह॥ क्रमात् पारगामी जातः स्वामि

ना सूरिपदं दत्तं॥ तैः सहस्रमुनिभिः सह विहरन्॥ अन्यदा शैलकपुरं गतः॥ तत्र शैलकं नाम नृपं प्रतिबोध्य पंचाणुव्रतधरं श्रावकं चकार॥ ततः सौगं

धिकापुर्यां परिव्राजकसुदर्शनश्रेष्ठिनं प्रतिबोध्य जैनधर्मे स्थिरीचकार॥ अन्यदा तस्य सुदर्शनस्य पूर्वगुरुः शुकनामा परिव्राजकः सहस्रशिष्य

युतो॥ देशांतरादागतः सुदर्शनं अन्यमार्गामकं दृष्ट्वा॥ रेरे केन पाखंडिना वंचितोसीति॥ तेन पृष्टे॥ सुदर्शनः शुकोपि सुदर्शनेन समं नीलाशोकवने

गतस्तत्र स्थापत्यासूनुमुनीशं दृष्ट्वा॥ मासा भक्ष्येय वा इत्यादि प्रश्नानि कुर्वन् सूरिणा अनेकांतार्णवकल्लोलैः॥ सवाक्छिन्नानिरुत्तरीकृतो॥ मिथ्या

ध्यानकं दाग्रहं त्यक्त्वा॥ सहस्रशिष्यैः सह जैनीं दीक्षां जग्राह॥ क्रमात्सूरिपदं प्राप्य॥ ततः स्थापत्यासूनुराचार्यः स्वनिर्वाणसमयं आसन्नं ज्ञात्वा॥ स

हस्रमुनिभिः सह शत्रुंजये अनशनं कृत्वा॥ मासांते केवली भूत्वा मुक्तिं ययौ॥ ततः शुकाचार्यो विहरन् अन्यदा शैलकपुरं गतः तत्र पंचशतमंत्रियुक्तं शैल

कनृपं अदीक्षयत् लमान्॥ शैलकं द्वादशांगधरं विज्ञाय॥ सूरिपदे स्थापयित्वा॥ शुकभट्टारकः स्वयं चिरं विहृत्य सहस्रमुनिभिः सह शत्रुंजये अन

शनं कृत्वा मासांते॥ ज्येष्ठपूर्णिमायां मुक्तिपदं प्राप्य॥ इत श्रीशैलकाचार्यः कालातिक्रांतभोजनकर[illegible]शरीरो अन्यदा विहरन्

शैलकपुरं गतः तत्रतत्सुतोमंडुकोनामनृपोवंदनार्थमागतः देशनांश्रुत्वाश्राद्धधर्मप्रपन्नः ततोगुरुक्षीणकलेवरंवीक्ष्य॥नृपःप्राहस्वामिन्॥यदिभ
वतांआज्ञाभवति॥तदानिरवद्यभैषजपथ्यादिभिश्चिकित्सांकुर्मःइतितदनुज्ञाप्य॥राज्ञाचिकित्सकैश्चिकित्साअकारयत्॥ततःपथ्याहारादिग्रह
णात्॥रसगृ गुरुंज्ञात्वा॥एकंपिठकंशिष्यंविनाअन्येसर्वेपिसाधवोऽन्यत्रविहरंतिस्म॥पिठकस्तुप्रमादिनंअपिगुरुंभक्तयातथैव॥शुश्रूषमा
णस्स्थौ॥अन्यदाकार्तिकचातुर्मासकप्रतिक्रमणेपिठकोनिद्राणंगुरुंक्षामणार्थं॥पादयोर्मस्तकंस्थाप्य अजागरयत्॥ततःकोमांजागरयतीत्यादि
वदन्गुरुरुक्तिनः ततः पिठकोपिविनयावनतोभूत्वाप्राह स्वामिन्नधिम्मांयतश्चतुर्मासकक्षामणकारणात्॥मयायूयंजागरिताःततूक्षम
ध्वं॥तस्येतिविनयवाक्याद्धुज्झितोगुरुस्तंशिष्यंअनुमोदयन्॥प्रमादासक्तआत्मानंबहुधानिंदतिस्म॥हाहामयारसगृद्धचारित्ररत्नंम
लिनंकृतं॥धन्योयंशिष्योयेनाहं॥बाह्यतोऽभ्यंतरश्चद्विधापिजागरितः॥इत्यात्मगर्हणांकृत्वासम्यक्आलोचनयाच॥आत्मनःशुद्धिंवि
धायविहरन्॥शैलकगुरुर्बहून्भव्यान्॥प्रतिबोध्य॥प्रांतेपंचशतमुनिसहितःशत्रुंजयेऽनशनंकृत्वामासांतेमोक्षंगतः॥एवंअनेकेमु
निवराइह॥श्रीसिद्धाचलेसिद्धाःसिद्ध्यंतिचं॥अन्यदापांडवाःश्रीनेमेर्मुखात्॥श्रीशत्रुंजयमहिमानंश्रुत्वा॥या [illegible]
ततःपांडुजीवदेव [illegible] प्राप्तावान्॥प्रतिइतिप्राह॥भोवत्साःपुत्राभिरयंढत्तममनोरथःकृत [illegible]

चकरुमहाफलायएतद्भविष्यति॥अहमपितुप्रत्पुण्यप्रेरितःसान्निध्यंकरिष्यामीति॥पितुरादेशात्तुष्टाःपांडवायात्रार्थंसर्वनृपतीन्नि
मंत्रयामासुः॥ततोहृष्टाःसर्वेपिभूपाःसपरिलोकसहिताःसर्वर्ध्याहस्तिनापुरंप्रापुः॥ततःसुमुहूर्तेपांडवाःस्वर्णदेवालयस्थितंमणीमयंभग
वद्बिंबंपुरस्कृत्यगणधरमुनिवरसाधर्मिकसंघलोकसहिताःयात्रार्थेप्रतस्थिरे॥ततस्तेस्थाने२तीर्थप्रभावादिगुरुसंघपूजासाधर्मिकवा
त्सल्यजीर्णचैत्योद्धारानुकंपादानादिसुकृतानिकुर्वंतःक्रमात्॥सुराष्ट्रासंधिंप्रापुः॥अत्रांतरेकृष्णोपियदुभिःसहतत्रागत्य॥अत्या
नंदात्पांडवैःसहअमिलत्॥ततस्तेतीर्थपूजादिविधिंकृत्वा॥मुख्यशृंगंआरुरुहतिस्म॥तत्रराजादनींश्रीयुगादीशपादुकांचप्रदक्षिणीकृत्य॥त
तोयावत्॥वासुदेवयुधिष्ठिरौवरदत्तगुरुसहितौमूलप्रासादंप्रविविशतुः॥तावत्शिलासंधिषु॥समुद्गतवक्षवृक्षजालवर्षाकालोद्गत
तृणैःसंछन्नपतद्भित्तिकं॥जर्जरीभूतंतराक्रांतंदेहमिवप्रासादंशिथिलंतन्मध्येभगवद्बिंबमपितथारूपंदृष्ट्वा॥मर्मवेधनादिवअतिखेद
परौतौअभूतां॥ततोहरिर्युधिष्ठिरंप्राह॥हाधिग्आवयोराज्यंकुर्वतोरपि॥एतन्महातीर्थएवंजर्जरंजातं॥अत्रांतरेपांडुदेवस्तत्रागत्य
कृष्णंप्राह॥हेवासुदेव॥त्वंतुसर्वकार्येषुसमर्थस्त्रिभुवनप्रसिद्धश्चअसिकिंच॥पूर्वंत्वयाचैत्योद्धारःकृतोस्ति॥ततइतोद्धारपुण्यंमम
पुत्रेभ्योर्दय॥इतिश्रुत्वाप्रसन्नमनाःकृष्णप्राह॥अत्रार्थेप्रार्थनाकर्तव्यानास्ति॥यत्पांडवैःकृतं [illegible] किमपिअंतरंनास्ति॥तो
शान्॥राग॥

ततोऽहश्चादेवः [illegible]सन्॥ युधिष्ठिरायदिव्यंमणिंदत्वा॥स्वस्थानंययौ॥ अथयुधिष्ठिरःप्रोत्तुंगप्रासादंकारयित्वा॥गोशीर्षचंदनकुंकुमा
दिनिर्मलैः सुगंधिद्रव्यैः॥श्रीयुगादिप्रभोर्बिंबंनिर्माप्य॥पारिजातकाष्ठेनशंकुंकृत्वा॥तंदेवतादत्तंदिव्यमणिंभगवतोहृदयेस्थापयामास॥ततस्तद्बिं
बंपांडवानांपुण्यरूपसूर्यस्यउदयइव॥अथवा॥मोक्षलक्ष्म्यालाटेकुंकुमतिलकमिवशुशुभे॥ततःसुमुहूर्त्तेवरदनगणधरेणप्रतिष्ठाकारयामा
स॥ततोऽष्टप्रकारपूजाआभूषणारोपण॥आरात्रिककरणमंगलप्रदीपध्वजदानग्रामाश्वमरथछत्रचामरादिमोक्षण॥इंद्रमालापरिधानादि
सकलविधिं॥श्रीभरतेशवन्निर्माय॥स्वजन्मसफलंचक्रुः॥एवंतेस्वमनोरथान्पूरयित्वामुख्यशृंगादवतीर्य॥अन्यान्यशृंगस्पर्शनां[illegible]कुमाश्चं
द्रप्रभासेचंद्रप्रभंरैवतेनेमिंचपूजयित्वा॥ततोर्बुदेवैभारेसम्मेतशिखरादौसर्वत्रपूजांस्वात्रदेवगुरुसाधर्मिकवात्सल्यादिसुकृतैः सुकृतार्जनंच
क्रुः॥इत्थंतेपांडवाःपुण्यपवित्रिताशयाःसंघाधिपतिकर्त्तव्यंविधायक्रमेणद्वारकांप्रापुः॥ततोद्वारकायांकृष्णमुक्तासर्वाश्रुपर्णीश्चवस्त्रालंका
